॥ श्री गणेशाय नमः॥ ॥ श्री शिवाय नमः॥ ॥श्री गुरूचरणाभ्यां नमः॥
॥ श्री लक्ष्म्यै नमः॥ ॥ श्री सरस्वत्यै नमः॥ श्री गोविन्दाय नमः॥

# वात्स्यायनसूत्रवृत्तिः

## 1. साधारणाधिकरणम्

ढुण्ढिः प्रोद्दण्डगण्डस्थलयुगविगलद् भूरिदानाम्बुधारा
माधुर्यास्वादमत्तभ्रमरगलगलज्झंक्रियालंक्रियो मे।
दुग्धाम्भोराशिमध्यप्रचलदविरलप्रौढवीचीचयाना–
माचार्यान्वाङ्विगुम्भान्वितरतु नितरां कामशास्त्रार्थवक्त्रे॥ 1॥

श्री सिद्धेश्वरि तावकांघ्रि नृपतौ कान्तिप्रतापान्विते
छत्रादि स्फुरिते कवीश्वरमनः सिंहासनाध्यायिनि।
धामोद्यन्मणिसौधाश्रितजनः सेनाधिनाथत्यसौ
नित्यं श्रीयुवराजति क्षितिभुजो दासन्ति तस्याद्भुतं॥ 2॥

वत्सोपरि वात्सल्यात् वात्स्यायननामाथकामशास्त्रं यः।
चक्रे चक्रधरं तं वन्दे वन्दारूवृन्दमन्दारम्॥ 3॥

धर्मार्थोपरि विलसन्मोक्षादभ्यर्हितः पूर्वः।
सकलजगज्जनिहेतुः पुरूषार्थश्रेष्ठ आत्मभूर्जयति॥ 4॥

एकातपत्रं रजनीशबिम्बं नितम्बिनीराज्यमलिश्च वन्दी।
स्तोत्राणि वात्स्यायनसूत्रजालं यस्यास्त्यसौ भाति स कामराजः॥ 5॥

अमन्दानन्दसन्दोहसन्दायकधुरन्धरः।
स्मरराजो राजसखा राजते राजपूजितः॥6॥

श्री सर्वेश्वर ( वांछितार्थद ) शास्त्रि सद्गुरूमहाकारूण्यसहाय्यतः
श्री राजव्रजलालविद्वदधिराट् सम्प्रेरणादीक्षणात्।

श्री काश्यां नरसिंहशास्त्रिकविना कन्दर्पचूडामणेः
श्री वात्स्यायनसूत्रवृत्तिरखिलप्रौढप्रिया लिख्यते॥7॥

श्रीमद् भास्करवंशवारिधि विधून् षट्शास्त्रवेदस्मृति–
श्रौताभ्यागमकाव्यनाटकसुखप्रोत्कृष्टविद्याप्रदान्।
पूज्यान्लिंगनयज्वतत्सुतसुतान्नत्वा नृसिंहः सुधीः
श्रीवात्स्यायनसूत्रवृतिमखिलप्रीत्यै करोति क्रमात्॥8॥

विद्वान्सः स्वीयज्वतत्सु वाक्यामृतरसलहरीतृप्तचित्ता अपी मां
मत्प्रोक्तां सूत्रवृत्तिं मदुपरि दयया प्रेक्ष्य हृष्टा भवन्तु।
गंगां गंगाधरोऽपि त्रिभुवनशुभदामुद्वहन्नुत्तमांगे
वापी पाशोऽभिषेकान्नतजनकलितान्नैति किं निवृत्तिं सः॥9॥

दोषान्विहाय गुणलेशमपीह वृत्तौ
गृह्णन्तु निश्चिताधियो नितरां गुणज्ञाः।
क्षौद्रे यथात्रपटले परिधूय सर्वाः
क्षुद्राः ततो मधु पिवन्ति परं रसज्ञाः॥10॥

क्वाहं परिच्छिन्नमतिः नितान्तं क्व कामदेवस्य गुणा अगण्याः।
आदित्सपदोरिव वत्सकस्य कुत्साममातः कवितोत्सुकस्य॥11॥

निस्वे महाधनिकचेष्टितवन्ममाद्य
हास्याय वृत्तिकरणादरणं तथापि।
श्री कामदेवगुणसन्मणिसंघसंगात्
वृत्तिः शुभैरिव गुणः प्रथितिं प्रयातु॥12॥

ग्रन्थाः कियन्तः कवयः कियन्तः
गुप्ताः कियन्तो वितता कियन्तः।
तथापि चेतो मम कामसूत्रवृत्तिं
बुधेष्टां त्वरते विधातुम्॥13॥

यथामति तथैव मे मदनसूत्रवृत्तौ मनः
प्रवृत्तमधुना भवेत्तदपि चित्रमेतन्न तत्।
अनेकमणिमौक्तिकप्रकरपूर्णरत्नाकरात्
प्रगृह्य कतिचिन्मणीन् किमु न दर्शयन्ते जनाः॥14॥

श्रीवात्स्यायनवीरभद्रमुखसद्ग्रन्थामृताम्भोनिधे–
र्युक्त्याख्यान् पृषतोद्य कांश्चन समानीयाहमज्ञोऽपि वा।
वृत्तिं कांचन कल्पयन् कविपदं प्राप्नोमि यद् वद् भुवि
क्षुद्रासामधुकृत्पदं सुमनसः सारस्य संमेलनात्॥15॥

श्रीभद्रप्रदरामचन्द्रदयया वाणी ममास्यादपि
प्रोद्यद् भावरसान्वितातिसरला प्रासैर्युताविर्भवेत्।
वीणारोपितसद्गुणापि विरसाप्यत्यन्तमत्यद्भुत–
क्वाणैर्वादयितृप्रभाववशतः सन्तोषदात्री न किम्॥16॥

क्षीराम्बुधेरिव तरंगपरम्परेह
चन्द्रात्तुषारनिकरा इव मेघसंघात्।
आसारवज्झटिति यत्करूणाकटाक्षात्
वाचः स्फुरन्ति पुरतो मम सास्तु वाणी॥17॥

पुरूषत्रये त्रिधास्ते वदने वक्षस्थलेऽंकदेशे या।
राजव्रजलालविभोर्मुखगृहचित्तेषु साम्बिकास्तु सदा॥18॥

रसगुणगणनाध्यायाः प्रकरणसंख्याब्धिदेहगाब्जमिता।
सांघ्रिसहस्त्रश्लोका अधिकरणं सप्त कामशास्त्रेऽस्मिन्॥19॥

अर्थो धर्मप्रापकः सोऽपि हेतुः स्वर्गप्राप्तौ स्वर्गनामैव कामः।
अज्ञातात्यानन्दरूपाच्च मोक्षात् ज्ञातानन्दः कामः उच्चैः पुमार्थः॥20॥

अध्याय – 1

# शास्त्रसंग्रहप्रकरणम्

**1/1/1 'धर्मार्थकामेभ्यो नमः'**

अत्रभवान् वात्स्यायनः ब्रह्मानन्दाभिव्यंजकवृत्तिविशेषतया समाधेरिव कामस्य परमपुरूषार्थतां निषेधशास्त्रस्य तत्स्वरूपानभिज्ञविषयतां धर्मार्थयोश्च यागस्य प्रोक्षणावघातयोरिव सन्निपत्योपकारकतां स्त्र्यन्नपानादेश्च सत्संगादेरिव तत्साधनतां आनन्दाभिव्यंजकतया मोक्षादप्यभ्यर्हितमतां च पश्यन् निष्प्रयोजनत्वामूलकत्वाशिष्टपरिगृहीतत्वादि दोषान् क्रमेण वारयन् विघ्ननिवर्त्तकब्रह्मानन्दानुसन्धानलक्षणमंगत्वं च शिष्यशिक्षायै प्रेक्षावत् प्रवृत्तयेऽनुबन्धचतुष्टयं च सूचयन् सांगं परमपुरूषार्थं निर्दिशति।

तत्र धर्मत्वमलौकिकप्रवर्त्तकत्वमिति **भाट्टाः**। यागादिजन्यमपूर्वत्वमिति प्राभाकरादयः।

राजाज्ञादिव्यावृत्तयेऽलौकिकपदं प्रतिग्रहादिसाध्यत्वमर्थत्वम् यद्यपि अर्थत इति व्युत्पत्या सर्वस्याप्यर्थत्वं प्रतीयते तथापि निर्मन्थ्याधिकरणन्यायेन योगारूढेः प्रबलत्वात् पंकजादिशब्दवत् योगारूढया द्रव्यादिपरत्वमेव कामत्वं चानन्दाभिव्यंजकवृत्तिविशेषत्वं। योगादि व्यावृत्तये विशेषपदं निरूपकत्वं विभक्त्यर्थः। अप्रकृष्टत्वप्रकारकज्ञानं नमः शब्दार्थः।

अलौकिकप्रवर्त्तनादिनिष्टविषयताऽवच्छिन्नकरणजन्यवृत्तिविशेषनिष्ठ–विषयावच्छिन्नोत्कर्षनिरूपितापकर्षनिष्ठप्रकारता निरूपितस्वनिष्ठविशेष्यता निरूपितविषयिताशालिज्ञानाश्रय आचार्य इति वाक्यार्थः। धर्मादित्रितयार्थाहमित्येवं रूपः अप्रकृष्टत्वं चात्रार्थित्वं अत्रालम्बनविभावादयो विषयः। प्रयोजनं चानन्दाभिव्यंजकवृत्तिविशेषः कामः। तत्कामोऽधिकारी प्रतिपाद्य–प्रतिपादकभावसम्बन्धः। एतेन ब्रह्मानन्दानुसन्धान–लक्षणमंगत्वं च कृतम्। तदुक्तं श्रुतौ –

**Tai. Up. 7/2/1** **'कोह्येवान्यत्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयति'**

**Tai. Up. 2/12/2 'तस्माद्वा एतस्मादन्नरसमयात् अन्योन्यतरं आत्मा प्राणमयः तेनैष पूर्णः।'**

स वा एष पुरूषविध एव। तस्य पुरूषविधताम्। अन्वयं पुरुषविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः।

**Tai. Up. 2/5/2 आनन्द आत्मा ब्रह्मपुच्छं प्रतिष्ठा। तदप्येषः श्लोको भवति।'**

'अशिष्टो द्रढिष्टो बलिष्टः। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा

**Tai. Up. 2/8/1 स्यात्, स एको मानुष आनन्दः।'**

'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति, आनन्दो

**Tai. Up. 2/3/6 ब्रह्मेति व्यजानात्'।**

**स्मृतौ च –** 'आनन्दमयोऽभ्यासात्'। आनन्द स्वप्रभो दृष्टेत्यादिः।

**वसन्ततिलकभाणे**

**'सकलसुखसाक्षात्कारक्षमं लक्ष्मीशप्रभृतिभिः सदा सेवितं।**
**सर्वातिशायि तन्मोक्षं परमं सुखं निर्वाणं हि महत्सौख्यम्॥**

अभिनवयौवनमदलवितरं कामिनीनितम्बसुदुकूलमोक्षभाविसौख्यमेवाभिधीयते। अस्यैव स्वसंवेद्यपरमानन्दस्वरूपसुरतसुखस्य मोक्षसुखत्वं प्रतिपाद्यते। तच्चानंगोपासनमन्तरेण न घटत इति। अत्र धर्मार्थयोः दृष्टादृष्टद्वारा परमपुरूषार्थशेषत्वसूचनार्थं पूर्वनिर्देशः। ननु आत्मानमुपासीत भगवन्तं सदा ध्यायीत इत्यादि उपासनाया इव कामस्य तत्साधनस्य वा सेव्यत्वे प्रमाणाभावान्नेदं शास्त्रमादरणीयमित्यत आह–

**1/1/2 'शास्त्रे प्रकृतत्वात्'**

शास्तीति शास्त्रम्, वेदः वेदत्वं चालौकिकं पर्यवसन्नत्वं निरपेक्षशब्दत्वमित्यपरे, विध्यर्थवादमन्त्रनामधेयात्मकत्वमित्यन्ये, तस्मिन् प्रकृतत्वात् विहितत्वात् आदरणीयमिति शेषः।

**Tai. Up.1/11/1 पितृभ्यः' इत्यादिः।**

**तथा च श्रुति : – 'ब्रह्मचारी भूत्वा गृही भवेत्, आचार्याय धनमाहृत्य**

**प्रजातन्तुं मा व्यवच्छेत्सीः, नापुत्रस्य मोक्षोऽस्ति, दशास्यां पुत्रानाधेहि, त्रिभि ऋण वा जायते, ब्रह्मचर्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया।**

**Tai. Up. 2/3/6 पितृभ्यः इत्यादिः।**

**स्मृतिश्च, मिताक्षरायां याज्ञवल्क्यः**

**Yaj sm 3/52 'अविलुप्तः ब्रह्मचर्यः लक्षण्यां स्त्रियमुद्वहेत्'।**
**'वेदार्थानभिगच्छेच्च शास्त्राणि विविधानि च।**

**Yaj sm 5/99 विविधानि च शास्त्राणि मीमांसाप्रभृतीनि च॥'**
**'धर्मार्थकाममोक्षप्रतिपादकानि अधिगच्छेत्।**

**मनु** : 'ऋणत्रयमपाकृत्य मनो मोक्षे निवेशयेत्'। भागवते तृतीयस्कन्धे धर्मार्थकामशास्त्राण्यध्येतव्यानीति, कर्दमोपाख्याने सप्तमस्कन्धे च। प्रह्लादचरित्रे दशमस्कन्धे सान्दीपनमहर्षिसकाशात् श्रीकृष्णः चतुःषष्टिकला अशिक्षयदित्यादिः। एवं महाभारते तथा च विधिनिषेधात्मक श्रुतिस्मृतीतिहाससिद्धत्वादादरणीयमिति भावः।

एवमपि शिष्टपरिगृहीतत्वादननुष्ठानलक्षणाप्रामाण्यमाशंक्यमाह–

**1/1/3 'तत्समयावबोधकेभ्यश्चाचार्येभ्यः'**

**1/1/4 'तत्सम्बन्धात्'**

तेषां धर्मादीनां समया अनुष्ठापकाः वेदाः। तां नानाशाखाप्रकरणगतानर्थतोऽ–नुभाष्य शत सहस्राध्यायैः सम्यगवबोधयन्तीति समयावबोधकाः प्रजापतिप्रमुखाः स्वयमाचरत इत्यादिलक्षणलक्षितः तेभ्यः तैर्विहितत्वात् सेवितव्यमिति शेषः।

तथा च सर्वशिष्टपरिगृहीतत्वान् नानुष्ठानलक्षणाप्रामाण्यमिति भावः।

स्वग्रन्थप्रयोजनं प्रकृतस्य प्राधान्यं च सूचयन् सम्प्रदायप्रवर्त्तकांस्तद्ग्रन्थांश्च निर्दिशति –

**'प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गस्य**

**1/1/5 साधनमध्यायानां शतसहस्रेणाग्रे प्रोवाच'।**

प्रजानां पतिः प्रजापतिः। अनेन सकलप्रजाभिरेतदाज्ञानुवर्त्तितव्यमिति सूचितम्। प्रकर्षेणाविच्छिन्नं जायन्ते स्थूलोपाधिं सुखादिभोगायतनं गृह्णन्तीति प्रजाः। ताश्च जरायुजादि भेदेन चतुर्विधाः। जरायुजा जाता ब्राह्मणादयः, अण्डेभ्यो जायन्त इति अण्डजाः पक्ष्यादयः,

स्वेदजाः यूकादयः, उद्भिजास्तरूगुल्मादयः। ताः सृष्ट्वा संकल्पमात्रेण निर्माय तत्सम्बन्धिनी स्थितिः सुखं वृद्धिश्चेति निबध्येते। धर्मादिविधिना प्रतिपाद्यतेऽनेनेति स्थितिनिबन्धनं। तच्च धर्मादिप्रतिपादकवेदवाक्यं तत् शतसहस्रसंख्यकाध्यायपरिसीमितग्रन्थेन सम्यक्प्रकटीचकार।

**1/1/6 'तस्यैकदेशिकं स्वायंभुवो मनुर्धर्माधिकारिकं पृथक् चकार'।**

एवं प्रजापतिः नानाशाखागतवेदवाक्यानि त्रिवर्गप्रतिपादकानि संग्रथ्य तदेकदेशं मन्दानुग्रहाय स्वयंभूमनुरूपेण धर्मोऽधिक्रियते प्रतिपाद्यतेऽनेनेति धर्माधिकारिकं धर्ममात्रप्रतिपादकं तत्संक्षिप्तं पृथक् चकार।

**1/1/7 'वृहस्पतिरर्थाधिकारिकम्'।**

तदाज्ञया वृहस्पतिर्देवगुरु अर्थमात्रावबोधकं मन्दानुग्रहाय विशदीचकार।

एवं प्रजापतिरंगभूतावर्थधर्मौ जीवमनुरूपेण स्पष्टीकृत्य तृतीयं जीवनं लोके प्रवर्त्तयितुं तस्यानन्यसाध्यतया परमेश्वरं प्रार्थयामास। तदनुग्रहलब्धसर्वैश्वर्यः प्रमथाग्रगण्यः श्रीनन्दीकेश्वरस्तदाज्ञया परमपुरूषार्थभूतं कामशास्त्रं चकारेत्याह –

**1/1/8 'महादेवानुचरश्च नन्दी सहस्त्रेणाध्यायानां पृथक्कामसूत्रं प्रोवाच'।**

द्योतते द्योतयति जगदिनि च देवः महांश्चासौ देवो इति महादेवः, त्रिविधपरिच्छेदशून्यः ब्रह्मानन्दरूपः परमेश्वरः। तस्यानुचरः परमभक्तः तत्प्रसादलब्धसर्वैश्वर्यः। नन्दयति ब्रह्मानन्दं प्रापयत्येतच्छास्त्रं प्रवर्त्तनेन प्रजा इति नन्दी। एतेन ईश्वरानुग्रहमन्तरेण न कस्याप्येतल्लाभः इति सूचितम्। स च सर्वज्ञः अध्यायानां सहस्रेण प्रधानपुरूषार्थ तत्साधनविभावाद्यनेकार्थसूचकं कामशास्त्रं प्रोवाच।

**1/1/9 'तदेव तु पंचभिरध्यायशतैरौद्दालकिः श्वेतकेतुः संचिक्षेप''।**

केवलसत्त्वप्रधानानां कृतयुगजन्मनां पुरूषाणामुपकाराय श्रीनन्दिकेश्वरप्रणीतनवकामशास्त्रं रजोमिश्रसत्त्ववतां त्रेतायुगसम्भवानां ततो मन्दमतीनां अनुग्रहाय उद्दालकपुत्रः श्वेतकेतुः छान्दोग्यषष्ठाध्यायप्रतिपादितां निर्गुणब्रह्मविद्यां पितुः सकाशात् लब्ध्वा तत्रारूच्या ब्रह्मानन्दाभिव्यंजकपरमपुरूषार्थप्रतिपादकमिदमेव पंचशताध्यायैः शब्दसंक्षिप्तमकरोत्।

**1/1/10 'तदेव पुनरध्यर्धेनाध्यायशतेन साधारणसाम्प्रयोगिककन्या-सम्प्रयुक्तकभार्याधिकारिकपारदारिकवैशिकौपनिषदिकैः सप्तभिरधिकरणैर्बाभ्रव्यः पाञ्चालः संचिक्षेप'।**

एवं त्रेतायुगे औद्दालकिप्रतिपादितमेतच्छास्त्रं पंचदेशोद्भवो बाभ्रव्याख्यो महर्षिः केकयराज-सकाशात् वैश्वानरविद्यां तत्स्वारस्या तमोमिश्ररजःप्रधानानां द्वापरसम्भूतानां ततोऽपि मन्दप्रज्ञानामु-पर्यनुकम्पया च साधारणादि वक्ष्यमाणलक्षणैः सप्तभिरधिकरणैस्ततोऽपि ग्रन्थतः संक्षिप्य निर्ममे।

**1/1/11 'तस्यैकदेशं षष्ठं वैशिकमधिकरणं पाटलिपुत्रिकाणां गणिकानां नियोगाद्दत्तकः पृथक् चकार'।**

एवं युगत्रये महर्षिभिस्तत्तत्कालकृतस्यैकदेशं साधारणादिसप्ताधिकरणेषु षष्ठसंख्यापूरकं वैशिकाख्यमधिकरणं पाटलीपुत्रविख्यातनगरस्थानामगणितगणानां गणिकानां नियोगात् तासां उपरि कृपावशात् अर्थैस्सार्थतार्थदातृत्वाद्दत्तकनामधेयमहर्षिर्विभावादिभेदेन विशदी चकार।

**1/1/12 'तत्प्रसंगाच्चारायणः साधारणमधिकरणं पृथक् प्रोवाच'।**

तासां वारांगनानां प्रसंगादुपरिकरूणावशात् चारयति अनुष्ठापयति पुरूषमिति चारं शास्त्रं तस्याध्यापयितृत्वेनायनं आश्रयः पुरूषविशेषश्चारायणनामा ऋषिः। साधारणाख्यमधिकरणं पार्थक्येन प्रणिनाय।

**1/1/12 'सुवर्णनाभः साम्प्रयोगिकम्'।**

सुवर्णं ब्रह्माण्डम्, नाभौ कुक्षौ यस्य स सुवर्णनाभः परमेश्वरः।

तदवतारस्तन्नामा महर्षिः साम्प्रयोगिकाख्यं द्वितीयमधिकरणं चक्रे।

**1/1/12 'घोटकमुखः कन्यासम्प्रयुक्तकम्'।**

हयग्रीवावतारो घोटकमुखनामा महर्षिः कन्यासम्प्रयुक्तकं वक्ष्यमाणलक्षणं तृतीयमधिकरणमकरोत्।

**1/1/12 'गोनर्दीयो भार्याधिकारिकम्'**

गां नर्दयतीति भारं निर्हरणेनानन्दयतीति गोनर्दीयः परमेश्वरः।

तदवतारोऽन्यो महर्षिः भार्याधिकारिकं अकार्षीत्।

**1/1/12 'गोणिकापुत्रः पारदारिकम्'।**

अणुरिव विद्यमानाय यज्ञवराहदंष्ट्राग्रेऽणिकागोरूपाणिका यज्ञवराहोद्धृता भूः तत्पुत्रः शिवाज्जातोऽंगारकः तदवतारः कश्चनाचार्यः पारदारिकं पंचमं चकार।

**1/1/12 'कुचुमार औपनिषदिकम्'।**

कुचुमारः कुं भूमिं चवत्ते प्राप्नोति रक्षितुमिति कुचु मारयति दुष्टानिति मारः। सोऽसौ स च परमेश्वरः। तदवतारो मारागमपारंगतः कश्चन विपश्चिदौपनिषदिकं सप्तमं प्रकरणं प्रकटी चक्रे।

**1/1/13 'एवं बहुभिराचार्यैस्तच्छास्त्रं खण्डशः प्रणीतमुत्सन्नकल्पमभूत्'।**

पूर्वोक्तरीत्या दत्तकप्रभृतिभिः कैश्चिदाचार्यैरेकैकांशप्रणयनेन कैश्चिदतिविस्तारकरणेन मन्दमतिभिः दुरधिगममेतच्छास्त्रमीषदुसन्नकल्पं सम्यक् शास्त्रार्थानधिगमाद्यात् किंचिदधिगमाच्च नष्टप्रायमभूत्। एवं सम्प्रदायशुद्ध्यर्थं दत्तकाद्यानाचार्यान् तद् ग्रन्थाश्च निर्दिश्य स्वप्रवृत्तौ हेतुं सूचयन् तेषामेवैकैकविषयत्वेनातिविस्तृतत्वेन च न्यूनतां स्वग्रन्थस्य शब्दतः संक्षिप्तत्वेन कृत्स्नार्थगोचरत्वेन च प्राशस्त्यं सूचयन् चिकीर्षितं प्रतिजानीते –

**1/1/14 'तच्च दत्तकादिभिः प्रणीतानां शास्त्रावयवानामेकदेशत्त्वात् महदिति च बाभ्रवीयस्य दुरध्येयत्वात् संक्षिप्य सर्वमल्पेन ग्रन्थेन कामसूत्रमिदं प्रणीतम्'।**

तत् प्रजापतिप्रणीतं चकारान्नन्द्यादिभिः प्रणीतमेतच्छास्त्रं शब्दतः संक्षिप्तकृत्स्नार्थप्रतिपादकं प्राधान्येन कामतत्साधनादनेकार्थसूचकं बुद्धिस्थं कामशास्त्रं च भगवता वात्स्यायनेनातन्यत इति सम्बन्धः। बुद्ध्युल्लिखितत्त्वेन भूतार्थक त्तः प्रत्ययप्रयोगः। ननु बाभ्रवीयादि–कृतशास्त्रैरेवेष्टसिद्धौ किमनेन नूतनग्रन्थेनेत्याशंक्य तेषां सत्त्वमिश्रितरजः प्रधानद्वापरसम्भूतानां तमः प्रधानानामिदानीन्तनानां दुर्ज्ञेयत्वान्नैवमिति आह–महदिति च बाभ्रवीयस्य दत्तकादेरे-कांशत्वादिति। महदिति चेति चकारात् शब्दकाठिन्यादिकं समुचितम्। अथ तर्हि आधुनिक–दत्तकादिप्रणीतैः शास्त्रैः इष्टसिद्धिरित्याशंक्य तेषामेकैकदेशविषयत्वेन कृत्स्नविषयत्वाभावान्न प्रेक्षावत्प्रवृत्यर्हाणीत्याह दत्तकादिभिरिति प्रणीतानां शास्त्रावयानामेकदेशत्वादिति। शास्त्रस्यावयवा इव अवयवा एकदेशाः साधारणादयः ततः प्रतिपादकान्यपि शास्त्राणि शास्त्रावयवाः तेषां दत्तकादिप्रणीतानामेकैकावयवप्रतिपादकत्वान्नतैरिष्टसिद्धिरिति भावः।

कामशास्त्रसूत्राणां नृसिंहाचार्यविनिर्मितौ उपोद्घाततत्प्रकरणं वृत्तौ सम्पूर्णतामगात्। भास्करनृसिंहकृतिनामानन्दसम्पदभिवृध्यै सूत्रकृता साधारणमत्र तन्यते विशदम्। एवं प्रेक्षावत् प्रवृत्यर्थं अस्य शास्त्रस्यानुबन्धचतुष्टयं समूलतां शिष्टपरिगृहीतसम्प्रदायशुद्धिं स्वप्रवृत्तिनिर्मितं चोक्वा शिष्यबुद्धिवैशद्याय कर्त्तव्यकृत्स्नशास्त्रोपयोगित्वेन साधारणाख्यं प्रथममधिकरणं विशदयन् तत्रत्य पंचाध्यायान् क्रमेण निर्दिशति।

**1/1/15 'तस्यायं प्रकरणाधिकरणसमुद्देश' इत्यादिना।**

प्रकरणानि चाधिकरणानि, प्रकरणपदमध्यायानामुपलक्षणं। तेषां सम्यगुद्देशेन समुद्देशः नाम्ना वस्तुसंकीर्त्तनं। तस्य वक्ष्यमाणशास्त्रस्य अयं बुद्धिस्थः प्रकरणाध्यायाधिकरणनिर्देशो भवति इति शेषः।

**1/1/16 'शास्त्रसंग्रहः'।**

शास्त्रपदेन शास्त्रप्रतिपाद्यप्रमाणादयो लक्ष्यन्ते तेषां संग्रहः। संक्षेपेण प्रतिपाद्य क्रियत इति शेषः। सूत्रद्वयेनैकाध्यायनिर्देशः प्रतिपाद्य भेदाद्योगभेदः अयमर्थः। सप्ताधिकरणात्मकस्य शास्त्रस्य सर्वोपकारिकपदार्थप्रतिपादकतया साधारणाख्यं प्रथममधिकरणे तत्र च पंचाध्यायाः। तत्र एतावन्त्यधिकरणानि एतावन्ति प्रकरणानि एतावन्ति अध्यायप्रकरणादयः प्रतिपाद्या इति संग्रहेण निर्देशः प्रथमाध्याय इति।

**1/1/16 'त्रिवर्गप्रतिपत्तिः'**

त्रयाणां वर्गः त्रिवर्गः धर्मार्थकामाः। तस्य स्वरूपं प्रमाणं साधनं च प्रतिपाद्यते ज्ञाप्यतेऽनेनेति प्रतिपाद्यत इति व्युत्पत्या तत्सर्वं द्वितीयाध्यायप्रतिपाद्यमित्यर्थः।

**1/1/16 'विद्या समुद्देशः'**

विद्या वक्ष्यमाणाः गीतवाद्यादयः तदधिकारि तत्काल तत्साधनतत्स्वरूप प्रतिपादकस्तृतीयाध्यायः।

**1/1/16 'नागरकवृत्तम्'**

नगर भवाः नागरिकाः तेषां वृत्तमिववृत्तं वर्त्तनं गृहशय्यादिसम्पादनं चतुर्थाध्यायप्रतिपाद्यम्।

**1/1/16 'नायकसहायदूतिकर्मविमर्शः'**

नायिकाश्च नायकाश्च पुमान् स्त्री इत्येकशेषः सहायाः दूत्यादयः कर्मवाद्यनृत्या-लेख्यमणिभूमिकाकर्मशयनरचनामाल्यग्रथनादिरूप एषां स्वरूपप्रयोजनं च पंचमाध्यायप्रतिपाद्यं।

**1/1/16 'इति साधारणं प्रथममधिकरणम्।'**

एवं साधारणाधिकरणे पंचभिः अध्यायैः प्रकरणसमुद्देशः क्रियते इति प्रतिज्ञायतमेवाह–

**1/1/16 'अध्यायाः पंच'।**

प्रथमाधिकरणेऽध्यायाः पंच एकदेशार्थमत्र प्रतिपादकवाक्यसमुदायोऽध्ययन-

विषयत्वादध्यायशब्दार्थः। अधिकरणं विचारः। प्रथमाधिकरणे प्रस्तुतैकदेशमात्र पर्यवसन्नत्वं प्रकरणशब्दार्थः।

अथ साम्प्रयोगिकाख्येऽधिकरणे दशभिरध्यायैः सप्तदशमिः प्रकरणैश्च प्रतिपाद्यमर्थं संक्षेपेण निर्दिशति।

**1/1/17 'प्रमाणकालभावेभ्यो रतावस्थापनं। प्रीतिविशेषाः।'**

प्रमाणानि च कालाश्च भावाश्चेति प्रमाणकालभावाः। प्रमाणानि शशमृगीत्वादीनि, कालाः शैध्र्यमान्द्यादयः, भावाः अनुरक्तोऽहमित्यभिमानादयः। एभ्य जाता निरता निरहः शयनाद्यपरनामान्यनन्तानि तेषामवस्थापनं सम्पादनप्रकाराः। प्रीतिविशेषाश्च नखाश्च रदनाश्चेति नखरदनपर्यायाः रागरसाद्यपरपर्यायाः। एते प्रथमाध्याय–प्रतिपाद्या इति शेषः।

एवं संक्षेपेण प्रथमाध्यायप्रतिपादितार्थ एव नवभिः अध्यायै प्रतन्यते। तानेव नवभिः सूत्रैः निर्दिशति –

**1/1/17 'आलिंगनविचाराः' इत्यादिना।**

आलिंगनानि स्पृष्टकादीनि, तेषां विचाराः प्रकाराः द्वितीयाध्यायप्रतिपाद्याः।

**1/1/17 'चुम्बनविकल्पाः'।**

चुम्बनानि ललाटकपोलादिस्थानेषु मुखेन सशब्दस्पर्शनान्येते चुम्बनविकल्पाः। जातिरागपुरूषादिभेदेन नानाप्रकाराः तृतीयाध्यायप्रतिपाद्याः।

**1/1/17 'नखरदनजातयः'।**

दशनच्छेद्यविधयः नखाश्च रदनाश्च तेषां जातयः। देशभेदेन मृदुत्वस्निग्धत्वादयः चतुर्थाध्यायप्रतिपाद्याः। दशनोष्ठनखानामुपलक्षणं तैः च्छेद्याः वक्षोजादिप्रदेशाः, विधयः मयूरपदादिप्रकाराः।

**1/1/16 'देश्या उपचाराः'।**

देशेषु वाह्लीकादिषु भावाः देश्या अंगनाः तासां ये उपचाराः पंचमाध्यायप्रतिपाद्याः।

**1/1/17 'संवेशनप्रकाराः। चित्ररतानि'।**

संवेशनं शयनं तस्य प्रकाराः पार्श्वशयनादयः। चित्ररतानि मार्जार–वाराहादि बन्धविशेषाः षष्ठाध्यायप्रतिपाद्याः।

**1/1/17 'प्रहणनयोगाः तद्युक्ताश्च सीत्कृतोपक्रमाः'।**

प्रहणनं ताडनं, तेन युज्यन्त इति प्रहणनयोगाः। प्रहणनस्थानानि स्तनान्तरजघनपार्श्वादीनि तदुक्तं सम्प्रयुक्तानि उपक्रम्यन्ते क्रियन्ते इति उपक्रमाः। कृदभिहितन्यायेन उपक्रम्यमाणानि सीत्कृतानि कूजितरूदितभूत्कृतां अर्धशब्दप्रयोगादयः सप्तमाध्यायप्रतिपाद्याः।

**1/1/17 'पुरूषायितं पुरूषोपसृतानि'**

पुरूषवदाचरितं पुरूषायितं भावे क्तः। पुरूषस्य श्रममुपलभ्य कुतुहलाद्वा सहाय्यकरणं पुरूषकर्तृकाणी नीवीविश्लेषणादीनि अष्टमाध्यायप्रतिपाद्यानि।

**1/1/17 'औपरिष्टकम्'**

निमितं पार्श्वतोदष्टं बहिसंदंशाद्यष्टविधं वदने जघनकर्म नवमाध्यायप्रतिपाद्यम्।

**1/1/17 'रतारम्भावसानिकं रतविशेषाः प्रणयकलहः'**

रतानां उपवेशननीव्यालम्बनपरिष्वंगादीनामारम्भ उपक्रमः आवसानिकं रागमतिवाह्य पृथक् पृथक् वहिर्भूगमनं रतविशेषाः। श्रमापनोदाय चन्द्रिकासेवनारून्धतीनिरीक्षणादीनि। प्रणयकलहः प्रणयेषु तत्पूर्वकसंलापादिसमयेषु अर्थात्सपत्नीनामग्रहणे कलहः रूदितवक्षोजप्रहणनमाल्यभूषणावमोक्षणभूशयनादिरूपः दशमाध्यायप्रतिपाद्याः।

**1/1/17 'इति साम्प्रयोगिकं द्वितीयमधिकरणम्'।**

सम्प्रयोगः रतादिप्रमाणकालादिजन्यानि रहः शय्यापरनामानि इदं प्रणयकलहानामुपलक्षणं। तानि प्रतिपाद्यन्ते लक्षणपरीक्षाभ्यां निर्णीयन्तेऽस्मिन्निति साम्प्रयोगिकाख्यद्वितीयाधिकरणप्रतिपाद्यं इति परिसमाप्तमित्यर्थः।

**1/1/17 'अध्यायाः दश। प्रकरणानि सप्तदश'।** भवति इति शेषः।

अथ तृतीयाधिकरणप्रक्रिया।

**1/1/18 'वरणविधानम्। सम्बन्धनिर्णयः'।**

वरणस्य कन्यापरिग्रहस्य विधिः विधानम्। ब्राह्मप्राजापत्यादि प्रकाराः। सम्बन्धानामुच्चनीचादि सम्बन्धविनिर्णयः। परिष्कारः तृतीयाधिकरणे प्रथमाध्यायप्रतिपाद्यः।

**1/1/18 'कन्याविस्त्रम्भणम्' ।**

कन्यानां विवाहितदाराणां निशि विजने विस्त्रम्भणं मृदूपायैर्वशीकरणं द्वितीयाध्यायप्रतिपाद्यम्।

1/1/18 **'बालाया उपक्रमाः। इंगिताकारसूचनम्।**

बालस्य मात्रा पित्रा नियुक्तस्य उपक्रम्यंत इत्युपक्रमाः।

कन्यासहित बालकर्तृकपुष्पोपचयपुष्पग्रथनमध्यांगुलिग्रहणादयः तस्या इंगितस्वाभिप्रायाकारैर्नेत्रनिमीलनताम्बूलदानसंमुखसंवीक्षणादिभिर्ज्ञापनं तृतीयाध्यायप्रतिपाद्यम्।

**'एकपुरूषाभियोगः। प्रयोज्यस्योपावर्त्तनम्। अभियोगतश्च कन्यायाः**

1/1/18 **प्रतिपत्तिः'।**

एकेन पुरूषेणैव अभियोग आयोजनं गोष्ठीवर्धनोदकसेचनसहशयनादिरूपः कार्यः। प्रयोज्यस्य उक्तरूपस्य सकाशात् सानुरक्ताया अपि स्त्रिया उपावर्त्तन निवृत्तिः अभियोगतः अभियोगैः सार्वविभक्तिकैस्तस्याः इंगिताकारप्रदर्शनैः अलाभे मातृधात्र्यादिभिः प्रतिपत्तिः स्वाधीनता चतुर्थाध्यायप्रतिपाद्यं।

1/1/18 **'विवाहयोगः'।**

गान्धर्वादिविवाहप्रदर्शनं पंचमाध्यायप्रतिपाद्यं।

1/1/18 **'अध्यायाः पंच। प्रकरणानि नव'** भवन्तीति शेषः।

अथ भार्याधिकारिकाधिकरणे प्रथमाध्यायप्रतिपाद्यं निर्दिशति–

1/1/19 **'एकचारिणीवृत्तं'।**

एकस्मिन् पत्यानुकुल्येन तिष्ठतीत्येकचारिणी पतिव्रता तस्याः वृत्तं गुरूशुश्रुषादिकम्।

1/1/19 **'प्रवासचर्या'।**

पत्यौ प्रवासं गते सति तस्या एव चर्या स्थण्डिलशयनादिः प्रथमाध्यायप्रतिपाद्यः।

1/1/19 **'सपत्नीषु ज्येष्ठावृत्तम् कनिष्ठावृत्तं पुनर्भूवृत्तं दुर्भगावृत्तं आन्तःपुरिकं पुरूषस्य वह्वीषु प्रतिपत्तिरिति'।**

सपत्नीषु सतिषु स्वयं ज्येष्ठायाः इतरासु वृत्तं भगिनीष्वेव वर्त्तनादिकं कनिष्ठज्येष्ठायाः ज्येष्ठसुतानुवृत्तं मातृवत् वर्त्तनम्। पुनर्भवतीति अन्यं प्राप्नोतीति पुनर्भूः तस्याः वृत्तं तत्पत्नीशुश्रुषादिकं दुर्भगायाः अपत्यरहितायाः भर्त्तरि वर्त्तनः।

आन्तःपुरिकं अन्तःपुरे भवं राजस्त्रीवृत्तं। पुरूषस्य नायकस्य बह्वीषु तासु सतिषु यथायोग्यं वर्त्तनप्रकारः द्वितीयाध्यायप्रतिपाद्यः इत्यर्थः।

**1/1/19 'भार्याधिकारिकं चतुर्थमधिकरणं। अध्यायौ द्वौ। प्रकरणान्यष्टौ'।**

भार्यामधिकृत्यं प्रवृत्तं भार्याधिकारिकं। तन्नामकचतुर्थाधिकरणप्रतिपाद्यं समाप्तमित्यर्थः।

अथ पंचमाधिकरणे प्रथमाध्यायार्थं निर्दिशति–

**1/1/20 'स्त्रीपुरूषशीलस्थापनम्'।**

स्त्रियश्च पुरूषाश्च तेषां शीलं स्वभावः तस्यावस्थापनं विविच्य कथनं क्रियत इत्यर्थः।

**1/1/20 'व्यावर्त्तनकारणानि'।**

व्यावर्त्तनं पत्यावननुरागः, तत्र कारणानि अतिक्रान्तवयस्त्वादीनि।

**1/1/20 'स्त्रीषु सिद्धाः पुरूषाः'।**

स्त्रीषु विषये सिद्धाः स्वतोऽनुरक्ताः पुरूषाः कामसूत्रज्ञाः।

**1/1/20 'अयत्नसाध्या योषितः'।**

अयत्नेन अतियत्नं विना साध्या वश्या निरपत्याद्या योषितः इति प्रथमाध्यायप्रतिपाद्यम्।

**1/1/20 'परिचयकारणानि'।**

परिचये सख्ये कारणानि सहोद्यानगमनादीनि।

**1/1/20 'अभियोगाः'**

अभियुञ्जन्ते वशीक्रियन्ते योषित एभिरित्यभियोगाः। नायिकासमीपे बालमुखचुम्बनादयः द्वितीयाध्यायप्रतिपाद्याः।

**1/1/20 'भावपरीक्षा'।**

भावः नायिकायाः स्व अनुरागस्तस्य परीक्षानिरीक्षणभ्रूविक्षेपादिज्ञापनहेतवः तृतीयाध्यायप्रतिपाद्यम्।

**1/1/20 'दूतीकर्माणि'।**

दूत्या पत्रहारिणीप्रभृतयः तासां कर्माणि नायकचातुर्यकथनादीनि चतुर्थाध्यायप्रतिपाद्यम्।

**1/1/20 'ईश्वरकामितम्'।**

ईश्वरो राजा तस्य कामितं स्त्रीवश्या पंचमाध्यायप्रतिपाद्यं।

**1/1/20 'आन्तःपुरिकं'।**

अन्तःपुरिका राजपरिग्रहाः तासां विनोदाः दासीं पुरूषवदलंकृत्यं स्वाभिप्रायनिवर्त्तनादयः।

**1/1/20 'दाररक्षितकम्'।**

स्वदाराणां परपुरूषेभ्यो रक्षणप्रकाराः षष्ठाध्यायप्रतिपाद्यं।

**1/1/20 'इति पारदारिकं पंचममधिकरणम्'।** अधिकरणप्रतिपाद्यनिर्देशः।

**1/1/20 'अध्यायाः षट्। प्रकरणानि दश'। अत्रेति शेषः।**

अथ षष्ठाध्यायप्रतिपाद्यं निर्दिशति।

**1/1/21 'गम्यचिन्ता। गमनकारणानि। उपावर्त्तनविधिः'।**

वेश्यानां स्वयं गम्यागम्यनायकविचारः। गमने कारणादि शुकसारिकाप्रलापनप्रेक्षणादीनि विधीयतेऽनुष्ठीयत इति विधिः। उपावर्त्तनमेव विधिः। गमने कारणा ताम्बूलस्रगानुलेपनादिः प्रथमाध्यायप्रतिपाद्यम्।

**1/1/21 'कान्तानुवर्त्तनम्'।**

कान्तायाः एकचारिण्या वृत्तमनुसृत्य नायकरंजनार्थं वर्त्तनं द्वितीयाध्यायविषयः।

**1/1/21 'अर्थागमोपायाः। विरक्तलिंगानि। विरक्तप्रतिपत्तिः निष्कासनप्रकाराः'।**

अर्थस्य आगमः नायकसकाशाल्लाभः तत्रोपायभूतलाभप्रतिपादनादयः। विरक्तस्य स्वस्यां लिंगानि ज्ञानसाधनानि मुखवैवर्ण्यादीनि। विरक्तस्य निर्धनस्य तत्प्रति तज्ज्ञानसाधनानि निष्कासनप्रकाराः निर्धननायकस्य निष्कासने स्वगृहान्निर्यापणे प्रकाराः उपायाः नखक्षतजुगुप्सादयः

तृतीयाध्यायप्रतिपाद्यम्।

**1/1/21 'विशीर्णप्रतिसन्धानम्'**

विशीर्णस्य स्वस्यां विरागादन्यत्र गतस्य धनिकस्य प्रतिसन्धानं स्वस्यामनुरागोत्पादनं पीठमर्दादिभिः चतुर्थाध्यायप्रतिपाद्यम्।

**1/1/21 'लाभविशेषः'।**

लाभे नानानायकेभ्यो द्रव्यलाभे तुल्येऽपि युगपद् गम्यत्वे बहुकालरागित्वादिभिः गमने विशेषः पंचमाध्यायप्रमेयम्।

**1/1/21 'अर्थानर्थानुबन्धसंशयविचारः'।**

अर्थो धर्मादयः। अनर्था अधर्मादयः। अनुबन्धा अनुनिष्पादिनः संशयः सन्देहः एषां विचारः।

**1/1/21 'वेश्याविशेषश्च'।**

वेश्यानां विशेषाः अवान्तरभेदाः षष्ठाध्यायगोचरः। इति वैशिकं षष्ठमधिकरणम्।

**1/1/21 'अध्यायाः षट्।**

प्रकरणानि द्वादश। इति वैशिकाख्यषष्ठाधिकरणम्'।

अथ सप्तमाधिकरणप्रतिपाद्यं निर्दिशति।

**1/1/22 'सुभगंकरणं। वशीकरणं। वृष्याश्य योगाः'।**

सुभगा रूपगुणवयोयुक्ताः क्रियन्ते एभिरिति सुभगंकरणानि। वशीक्रियन्ते नायका एभिरितिवशीकरणम्। इति वक्ष्यमाणलक्षणं जनादीति जातावेकवचनम्। वृष्याः प्रीतिजनका युज्यन्त इति योगाः साधनानि प्रथमाध्यायप्रतिपाद्यम्।

**1/1/22 'नष्टरागप्रत्यानयनम्। वृद्धिविधयः। चित्राश्च योगाः'**

नष्टस्य उपायैर्नाशितस्य रागस्य प्रत्यानयनं। पुनः सम्पादनं। रागस्य नाशे सम्पादने चोपायाः, वृद्धिः रतिवृद्धि विधीयते एभिरिति वृद्धिविधयो रस विशेषाः। चित्रा वस्तुनि वस्त्वन्तरबुद्धिकराः योगाः साधनानि अनुक्तसमुच्चयार्थश्चकार। तच्च निर्दुष्टत्वादि। तदेतत्

द्वितीयाध्याय– प्रतिपाद्यम्। इत्यौपनिषदिकं सप्तममधिकरणम्।

**1/1/22 'अध्यायौ द्वौ। प्रकरणानि षट्। इत्यौपनिषदिकं सप्तममधिकरणम्'**

**1/1/23 'एवं षट्त्रिंशदध्यायाः। चतुःषष्टिप्रकरणानि। अधिकरणानि सप्त इति समाप्त इत्यर्थः। सपादं श्लोकसहस्रमिति शास्त्रस्य संग्रहः'।**

शास्त्रस्य कृत्स्नशास्त्रस्य संग्रहः संग्राहकः। प्रथमाध्याय इति समाप्त इत्यर्थः।

अस्योत्तरशास्त्रेण संगतिमाह

**1/1/24 'संक्षेपमिममुक्त्वास्य विस्तरोऽतः प्रवक्ष्यते।**
**इष्टं हि विदुषां लोके समासव्यासभाषणम्॥'**

संक्षेपं सम्पूर्णशास्त्रसंग्राहकं वृत्तः प्रवृत्तः प्रथमाध्यायमुक्त्वा अतः आकांक्षितत्वात् अस्य निर्दिष्टस्यैव हि विस्तरः प्रतन्यते लक्षणपरीक्षाभ्यां इत्यर्थः। अनेन प्रसंगसंगतिः सूचिता भवति। ननु त्रिवर्गस्य लक्षणादिभिः प्रतिपादनेनैवार्थादुद्देशस्यापि सिद्धेः किं पृथगुद्देशेनेत्याशंक्य शिष्यबुद्धिवैशद्यार्थं **बादरायणादिभिः** कृतत्त्वाच्च युक्तमित्याह इदं हीति विदुषां **व्यासादीनां** समासेन संक्षेपेण व्यासेन विस्तारेण च प्रतिपाद्यस्य भाषणं कथनं दृष्टं हि तौ। अतः इदं युक्तमिति शेषः। **बादरायणो** हि तत्तु समन्वयात् इत्यन्तेन संक्षिप्तमेव ईक्षतेरित्यादि कृत्स्नशास्त्रेण विपुली चकार स एव।

**विस्तार्यैतन्महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत्।**
**इष्टं हि विदुषां लोके समासव्यासभाषणम्॥**

इति महाभारते आदिपर्वणि, एवं गौतमेनापि प्रमाणप्रमेयेत्यादिना पदार्थानुद्दिश्य प्रमाकरणमित्यादि कृत्स्नशास्त्रेण स्पष्टीचकार तद्वदिति भावः।

**इति श्रीवात्स्यायनीये कामसूत्रे साधारणे प्रथमेऽधिकरणे शास्त्रसंग्रहः प्रथमोऽध्यायः।**

**नृसिंहशास्त्री शास्त्रे कामस्य संग्रहाध्यायं व्याख्याय कृत्स्नशास्त्रं व्याख्यातसाहितीसारः।**

अध्याय – 2

# त्रिवर्गप्रतिपत्तिकरणम्

एवं प्रथमाध्याये कृत्स्नशास्त्रप्रतिद्यार्थं निर्दिश्य द्वितीयाध्याये क्रमेण प्रतिपादयति– शतायुरित्यादिना।

**1/2/1 'शतायुर्वै पुरूषः विभज्यकालमन्योन्यानुबद्धं परस्परस्यानुपघातकं त्रिवर्गं सेवेत'।**

शातायुः पुरूषः त्रिवर्गं सेवेतेत्यन्वयः। शतपदं ज्योतिःशास्त्राद्यवगतकालोपलक्षणं आयुः प्राणधारणानुकूलो यत्नः। त्रयाणां वर्गः त्रिवर्गः धर्मार्थकामाः सेवनं साधनैः तत्सम्पादनम्। ननु त्रयाणां युगपत् सम्पादनासम्भवादन्यतमस्य त्यागः स्यादित्याह – परस्परस्यानुपघातकं। एकेन इतरयोरभिभवो यथा न स्यात् तथा बाल्ये विद्यामित्येवं वक्ष्यमाणप्रकारेण एवमपि बाल्ये विद्यामभ्यस्य कंचित्कालमुदासीनो यदि आयुषः क्षणलेशोऽपि न लभ्य स्वर्णकोटिभिरित्यभियुक्तोक्तिविरोधः इत्यतो अन्योन्यानुबद्धमिति अविच्छेदेन परस्परमेव नानुकूलं। समकालं विभज्य त्रिवर्गं सेवेत इत्यर्थः। तमेव कालं विभज्य दर्शयति–

**1/2/2-4 'बाल्ये विद्याग्रहणादीनर्थान्। कामं च यौवने। स्थविरे धर्मं मोक्षं च'।**

बाल्ये ग्रहणधारणपाटवसमये विद्याग्रहणादीनर्थान् सेवेतेति सर्वत्रानुषज्यते। यौवनं इन्द्रियाणां पुष्टिसमयः कामं चेति। चकारस्तत्साधनपरिग्रहः। स्थविरे तु आपारलौकिकं, इन्द्रियोपरतिकाले धर्मं मोक्षं च उपायानुष्ठानेन सम्पादयेदित्यर्थः। यद्यपि धर्मस्य सन्निपत्योपकारतया प्राक्सम्पादनमेव युक्तम् तथापि बाल्यसम्पाद्यविद्यादेरप्युपकारकतया प्रागेव स्थविरे तदनुष्ठानमिति सूचयितुं तथा विधानं अतएव'ज्योतिष्टोमेन स्वर्गकामो यजेत्' इत्यादावर्थापत्याऽपूर्वलाभ इत्याहुर्भट्टपादाः। मोक्षग्रहणं आनन्दानुभवानपेक्षाणां धर्मानुष्ठानासक्तानामेव च मोक्षेऽधिकार इति सूचनार्थम्। अतएव अन्धपंग्वादीनामेव मोक्षचिन्तेत्याह शाबरभाष्यकारः। न चैवमपि धर्मस्य प्रवर्त्तनादिरूपतया लिंगादिनिष्ठत्वेन दुःसम्पाद्यत्वमिति

शंक्यम्। साधनानुष्ठापनेन तत्साध्यपूर्वसम्पादनस्यैव तथात्वादिति दिक्। ननु ज्योतिःशास्त्रादिना कालनिर्णयाभावे का गतिरित्याह –

**1/2/5 'अनित्यत्वादायुषो यथोपपादं वा सेवेत'।**

त्रिवर्गं इत्यनुषज्यते। आयुषः अनित्यत्वात् इयत्तानिर्णयाभावे युगपत्सेवने निमित्तत्वात्पंचमी यथोपपादं योग्यं कालं विभज्य प्रातधर्मसेवासंगमेव चार्थसेवा ततः कामसेवेति पाराशर्यमिताक्षराद्युक्तरीत्या त्रिवर्गं सेवेतेत्यर्थः।

**Yaj sm 3/52** ननु एकेन त्रितयानुष्ठाने 'अविलुप्तब्रह्मचर्यलक्षण्यां स्त्रियमुद्वहेदिति' याज्ञवल्क्यस्मृतौ विद्याग्रहणरूपार्थसेवने ब्रह्मचर्यविधानात्तद्विरोध इत्यत आह–

**1/2/6 'ब्रह्मचर्यमेव त्वा विद्याग्रहणादिति'।**

आविद्याग्रहणात् विद्याग्रहणपर्यन्तं ब्रह्मचर्यमेव कुर्यादितिशेषः। तथा च विद्याग्रहणव्यतिरिक्तार्थसम्पादन एव यौगपद्योक्तेर्न तद्विरोध इति भावः। अतएव राजसेवासंगवत् इत्याह माधवः। इति शब्दः कालविभागसमाप्तिसूचकः। अथ निर्देशक्रमेण धर्मादीनां लक्षणान्याह – अलौकित्वादित्यादिना। तत्रापि मुख्यत्वात्प्रवर्त्तनाख्यधर्मस्य लक्षण तदाह–

**1/2/7 'अलौकिकत्वाददृष्टार्थत्वादप्रवृत्तानां यज्ञादीनां शास्त्रात्प्रवर्त्तनम्'**

शास्त्रं लिंगादि तद्वृत्तित्वे सति प्रकृत्यनुकूलत्वं प्रवर्त्तनाख्यधर्मत्वमिदमेव लक्षणवाक्यं अन्यत्स्वरूपकथनं। ननु निसर्गसुन्दरफले स्वत एव प्रवृत्तेः किं शास्त्रेणेत्यत आह – अदृष्टार्थत्वादप्रवृत्तानां इति अर्थ्यात् इत्यर्थः। फलं न दृष्टः चक्षुरादिजन्यज्ञानविषय इत्यर्थः। तथा च तृप्त्यादिवदप्रत्यक्षत्वान्न स्वतः प्रवृत्तिस्तत्रेति भावः। ननु फलसाधनताज्ञानाभावेऽपि जलताडनादिनाविव केषांचित्प्रवृत्तिः किं न स्यादत आह अलौकिकत्वादिति तत्साधनस्य यागादेर्जलादिवल्लोकासिद्धत्वान्न केषामपि प्रवृत्तिसम्भव इति भावः। निवर्त्तनाख्यधर्मस्य लक्षणमाह –

**1/2/7 'लौकिकत्वाद् दृष्टार्थत्वाच्च प्रवृत्तेभ्यश्च मांसभक्षणादिभ्यः शास्त्रादेव निवारणं धर्मः'।**

अत्रापि शास्त्रमात्रवृत्तिनिवृत्त्यनुकूलव्यापारत्वमेव लक्षणम्। ननु यागादाविव प्रवर्त्तकाभावे तद् भावान् किं निवर्त्तनेनेत्यत आह – लौकिकत्वादित्यादि। यागादेर्लोकाप्रसिद्धत्वात् फलस्यादृष्टरूपत्वात् शास्त्रं विना प्रवृत्यभावेऽपि मांसभक्षणादेस्तद्विपरीतत्वाद्रागादेव प्रवृत्तिसम्भव

इति भावः। अत्र राजाज्ञादावनतिव्याप्तये मात्रपदं सामान्यलक्षणं तूक्तमेव। एवं लक्षणमुक्त्वा तज्ज्ञानसाधनमाह—

**1/2/8 'तं श्रुतेर्धर्मज्ञसमवायाच्च प्रतिपद्येत'।**

तं धर्मं श्रुतेः यजेतेत्यादितः धर्मज्ञसमवायात् शिष्टाचारात् चकरात् कल्पसूत्रादि स्मृतिभ्यः प्रतिपद्येत् जानीयात्।

अस्यार्थं लक्षयति

**1/2/9 'विद्याभूमिहिरण्यपशुभाण्डोपस्करमित्रादीनामर्जनमर्जितस्य रक्षणं रक्षितस्य विवर्धनमर्थः'।**

विद्याश्चतुःषष्टिकला वक्ष्यमाणाः भूम्यादयः प्रसिद्धाः उपस्कर शय्यासनादि अर्जनं स्वाम्योत्पादनं रक्षणं परिपालनं वर्धनं तन्मूलेन द्रव्यान्तरस्वाम्योत्पादनं तदन्यतमनिरूपितस्वाम्योत्पादनाद्यन्यतमत्वमर्थ–लक्षणम्। तत्प्राप्त्युपायानाह –

**1/2/10 'तमध्यक्षप्रचाराद्वार्त्तासमयविद्भ्यो वणिग्भ्यश्चेति'।**

अध्यक्षा राजपुरूषास्तेषां प्रचारात् सहवासात्। वार्त्ता वाणिज्यं तत्समयविद्भ्यो तदुपायज्ञेभ्यो वणिग्भ्यश्च तमर्थं प्राप्नुयात् इति शेषः। सन्निपत्योपकारकाणां लक्षणमुक्त्वा आरादुपकारकाणां तदाह – श्रोत्रेति। अत्र सन्निपत्योपकारकत्वं विभावोपकरणद्वारा प्रधानोपकारित्वम्। आरादुपकारकत्वं तु तेन प्रदाने जननीये रसाभिव्यक्तादुपयोगित्वं एतत्सूचनायैव पूर्वत्रेतिकारः।

**1/2/11 'श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामात्मसंयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विषयेषु आनुकूल्यतः प्रवृत्तिः कामः'।**

**1/2/12 'स्पर्शविशेषविषयत्वस्याभिमानिकसुखानुविद्धा फलवत्यर्थप्रतीतिः प्राधान्यात् कामः'।**

निरूपितत्वं षष्ट्यर्थः। विषयशब्दो विषयसन्निकर्षपरः जन्यत्वं सप्तम्यर्थः। आनुकूल्यं रसः विषयत्वं पंचम्यर्थः। प्रवृत्तिरनुभवः आत्मसहितमनः संयुक्त श्रोत्राद्यन्यतमनिरूपिततत्तद्विषय-संयोगजन्यं रसानुभवत्वमंग कामस्य लक्षणं आनन्दाभिव्यंजकत्वात् महानन्दाभिव्यंजक-मुख्यकामोपयोगितया चास्यामंगकामत्वं मुख्येति व्याप्तिवारणाय जन्यान्ते मुख्यकामस्य लक्षणवाक्यं स्पर्शविशेष इत्यादि। स्पर्शविशेष इन्द्रियविशेषसंयोगः तद्विषये तदर्थं योऽभिमानः अहमनेनाभियुक्ता अहमस्या नियोक्तेत्येवं रूपः तज्जन्यं यत्सुखं हर्षः तदनुविद्धा तदनन्तरभाविनी

फलवती आनन्दविषयिणी अर्थ्याप्रतीतिरनुभवः अर्थात् इन्द्रियविशेषसंयोगजन्यवृत्तिविशेषत्वं मुख्यकामत्वमिति फलितम् लक्षणं। मुख्यत्वं ब्रह्मानन्दाभिव्यंजकत्वं स्पर्शविशेषोद्देश्यकाभियोगाभिमानजन्यहर्षानन्तरभाविरसविषयकवृत्तिः मुख्यकाम इति सूत्रार्थः।तदुपायबोधनसाधनान्याह–

**1/2/13 'तं कामसूत्रान्नागरिकजनसमवायाच्च प्रतिपद्येत'।**

कामसूत्रादेतच्छास्त्रात् नगरे भवाः नागरिकाः चतुःषष्टिकलाकुशला जनाः तैस्सहवासाच्च तं पूर्वोक्तपुरूषार्थं ससाधनं सम्यक् प्राप्नुयादित्यर्थः।

एवं त्रिवर्गस्य लक्षणमुक्त्वा जातिभेदेन तस्यानुष्ठाने मुख्यगौणभावमाह–

**1/2/14 'तेषां समवाये पूर्वः पूर्वो गरीयान्'।**

तेषां धर्मादीनां समवाये समुदाये एकापेक्षा बुद्धिविषयत्वं समुदायशब्दार्थः। पूर्वः पूर्वः पूर्वस्य पूर्वस्येति शेषः गरीयान् प्राधान्येनानुष्ठेयः।

**1/2/15 'अर्थस्तु राज्ञस्तन्मूलत्वाल्लोकयात्रायाः वेश्यायाः कामश्चेति त्रिवर्ग–प्रतिपत्तिः'।**

अर्थस्त्विति तु शब्दात् ब्राह्मणस्य धर्म एवेति सूच्यते, राज्ञः सेव्य इति शेषः। राजपदं वैश्यस्याप्युपलक्षणं तन्मूलत्वात् अर्थाधीनत्वात्।

लोकयात्रायाः लोकव्यवहारस्य वेश्यापदं शूद्रस्याप्युपलक्षणं। च सत्त्वावधारणे अयं भावः – तृतीयस्य मुख्यत्वेऽपि आमुष्मिकपरमं तत्साधनतया यागादिरेव ब्राह्मणस्य प्राधान्येन इतरावप्राधान्येन राज्ञः प्रजापालनं चैव मुख्यधर्मतया तत् साधनत्वादर्थस्य स एव। शुद्रस्य तत्तदनधिकारेण काम एव सेव्य इति कामश्चेति सेव्य त्रिवर्गप्रतिपत्तिः। त्रिवर्गस्य स्वरूपं लक्षणं प्रतिपत्तिसाधनं चोक्तमित्यर्थः। यत्तु वीरभद्रेणोक्तं कामप्रतिपत्तिसाधनयोः एतत्सूत्रनागरिकजनपरिषदोर्मध्ये तत्प्रतिपत्तौ पूर्वोक्तगरिष्ठ इत्यर्थ इति तत् तेषां पूर्वः पूर्वः इति सूत्रपदस्वारस्यभंगात् उत्तरसूत्रसन्दर्भविरोधाच्चोपेक्ष्यम्। ननु धर्मस्य शास्त्रैकसमधिगम्यतयार्थस्य लौकिकत्वेऽपि तदुपायस्य तथात्वेन तच्छास्त्रसाफल्येऽपि कामस्य शास्त्रसाधनावबोधविधुरतिर्यगादिसेविततया किं शास्त्रेणेत्याशंकते –

**1/2/16 'धर्मस्यालौकिकत्वात्तदभिदायकं शास्त्रं युक्तम्। उपायपूर्वकत्वाच्चार्थ–सिद्धेः। उपायप्रतिपत्तिश्च शास्त्रात्'।**

**1/2/17 'तिर्यग्योनिष्वपि तु स्वयं प्रवृत्तत्वात्कामस्य नित्यत्वान्न शास्त्रेण**

**कृत्यमस्तीति आचार्याः'।**

धर्मस्य प्रवर्त्तनादेरलौकिकत्वाल्लोकप्रसिद्धत्वात् तदभिधायकं तत्प्रतिपादकं तदनुष्ठानप्रकारप्रतिपादकं च शास्त्रं श्रुतिस्मृत्यादिकं युक्तम्। अर्थवत् अर्थसिद्धेः अर्थस्य लौकिकत्वेऽपि तत्सिद्धेः तल्लाभस्य उपायपूर्वकत्वात् संविभागादिसाध्यत्वात् उपायप्रतिपत्तिश्च उपायज्ञानं शास्त्रादेव भवतीति तच्छास्त्रं युक्तमिति शेषः। कामस्य तु शब्दः पूर्ववैलक्षण्यसूचकः तिर्यगंचति गच्छत्याहारो येषां ते तिर्यंचो योनयः कारणं येषां ते तिर्यग्योनयः गवादयः अपि शब्दः कैमुत सूचनार्थः। तेष्वपि स्वयं शास्त्रमन्तरेण प्रवृत्तत्वात् सेव्यतया सिद्धत्वात् नित्यत्वात् कालाद्यनपेक्षितत्वाच्च शास्त्रेणानेन कृत्यं नास्तीति केचनाचार्या धर्मादिप्रवर्त्तकं मन्यन्ते। तन्मतं दूषयति –

**1/2/18 'सम्प्रयोगपराधीनत्वात् उपायमपेक्षते'।***

सम्प्रयोगः इन्द्रियविशेषसंयोगः। उपाय साधनं पुरूषकर्तृकं अपेक्षते इच्छति। कुतः पराधीनत्वात् योषिदधीनत्वात् तस्येति शेषः।

**1/2/19 'सा चोपायप्रतिपत्तिः कामसूत्रादिति वात्स्यायनः'।**

सा च सम्प्रयोगापेक्षिता उपायप्रतिपत्तिः साधनज्ञानं।

**1/2/20 'तिर्यग् योनिषु पुनरनावृतत्वात्स्त्रीजातेश्च ऋतौ यावदर्थप्रवृत्तेर-बुद्धिपूर्वकत्वाच्च प्रवृत्तीनामनुपायः प्रत्ययः'।**

तिर्यग्योनिषु पश्वादिषु विषये शास्त्रवैयर्थ्येऽपि न दोष इति शेषः।

कुतः तेषामनावृतत्वात् शास्त्रानधिकृतत्वात् स्त्रीजातेः ब्राह्मणादिस्त्रीणां सम्बन्धो विभक्त्यर्थः। ऋतौ ऋतुकाल एव यावदर्थं यावदनुभवं प्रवृत्तेः ब्राह्मणादीनां विहितत्वादिति शेषः। तासां प्रवृत्तीनां अबुद्धिपूर्वकत्वादितिच्छेदः। सौत्रत्वात्पररूपं ऋतुज्ञानं विना असम्भवात् प्रत्ययः। ऋतुकालबोधः अनुपायः शास्त्रव्यतिरिक्तोपायरहितः। अतः शास्त्रमर्थवदिति शेषः।

अयं भावः मनुष्याधिकारत्वाच्छास्त्रस्येति न्यायेन तदनधिकृतानां तिरश्चां तद्वैफल्येऽपि ऋतौ स्त्रियमुपेयादिति नियमपरिसंख्यान्यतरात्मकविधिना ऋतावेव स्त्रीणां गम्यत्वेन तज्ज्ञानस्य शास्त्राधीनत्वात् वृत्तिविशेषस्य सम्प्रयोगसाध्यत्वेन तस्य च सम्प्रयोज्याधीनत्वात् तस्याश्चोपायलभ्यत्वादुपायानां च शास्त्रैकसमधिगम्यत्वाच्चास्ति शास्त्रसाफल्यमिति। ननु

---

* The Full sutra is — सम्प्रयोगपराधीनत्वात् स्त्रीपुंसयोरूपायमपेक्षते।

आमुष्मिकपरमपुरूषार्थसाधनतया धर्मादिरेव ब्राह्मणादेः प्राधान्येन सेव्य इत्युक्तम्। 'सिद्धमन्नं परित्यिज्य' इत्यादि न्यायेन प्रत्यक्षफलपरित्यागेन सांशयिकफलधर्मानुष्ठानानुपत्तेः इति लोकायतिक शंकते।

**1/2/21 'न धर्मांश्चरेत्। एष्यत्फलत्वात् सांशयिकत्वाच्च'।**

**1/2/22 'को ह्यबालिशो हस्तगतं परगतं कुर्यात्'।**

**1/2/23 'वरमद्य कपोतः न श्वो मयूरः'।**

**1/2/24 'वरं सांशयिकात् निष्कादसांशयिकाः कार्षापणः इति लोकायतिकाः'।**

धर्मान् यागादीन् न चरेत् नाचरेत् समीक्ष्यकारीति शेषः। कुतः एष्यत्फलत्वात् कालान्तरभाविफलजनकत्वात् कालान्तरफलजननस्यापि सांशयिकत्वात् सन्दिग्धत्वात् अबालिशः प्रेक्षावान् हस्तगतं सिद्धफलं त्यक्त्वा परगतं कालान्तरभावि सन्दिग्धफलं कर्म कः कुर्यात्, न कोऽपि इत्यर्थः। इममेवार्थं दृष्टान्तेन विशदयति द्वितीयेन क्व उत्तरकाले मयूरो लभ्यश्चेदपि अद्य वर्त्तमानकाले कपोतः लब्धश्चेद्वरं, सांशयिकात् लाभालाभसन्दिग्धात् निष्कात् दीनारात् असांशयिकः निश्चितः कार्षापणः द्वादशपणसंघः* वरमित्यर्थः। तन्मतं दूषयति –

**1/2/25 'शास्त्रस्यानभिशंक्यत्वादभिचारानुव्याहारयोश्च क्वचित् फलदर्शनान्नक्षत्र–सूर्यचन्द्रताराग्रहचक्रस्य लोकार्थं बुद्धिपूर्वकमिव प्रवृतेर्दर्शनाद्वर्णाश्रमाचारस्थितिलक्षणत्वाच्च लोकयात्राया हस्तगतस्य च बीजस्य भविष्यतः सस्यार्थे त्यागदर्शनाच्चरेद्धर्मानिति वात्स्यायनः'।**

शास्त्रस्य श्रुतिप्रतिपाद्यफलसाधनत्वस्य अनभिशंक्यत्वात् सन्देहाविषयत्वात्, अभिचारः शत्रुक्षयः, अनुव्याहारः कर्मानन्तरभाविवृष्ट्यादिः तयोः फलयोः क्वचित् श्येनकारीर्यादौ प्रत्यक्षत्वात् चकारोऽभिन्नक्रमः। नक्षत्राण्यश्विन्यादीनि सूर्याचन्द्रौ प्रसिद्धौ (ताराग्रहा अंगारकादयः) तारास्तारकालिंगादयः ग्रह जीवादयः तेषां चक्रस्य समूहस्य एत–द्युक्तकालस्य वा लोकानुग्रहार्थं प्रवृत्तेः उदयादिरूपेण परिवर्त्तनस्य बुद्धिपूर्वकमिव बुद्ध्यतेऽनेनेति बुद्धिः मेषादिराशीशास्त्रं तन्मूलकज्योतिःशास्त्रं च तत्पूर्वकमिव तत्प्रतिपादनं यथा तथैव दर्शनात् प्रत्यक्षतो जनैर्दृश्यत्वाच्च धर्मांश्चरेत् इत्यनेनान्वयः। तस्य स्थितिरनुष्ठानं तद्रूपत्वाल्लोकमर्यादायाः एषः सेतुः विधरण इत्यादि श्रुतेः। हस्तगतस्य कृषीवलस्थस्य बीजस्य यवादेः भविष्यति आगामिफलसाधनस्य सस्यादेरर्थे यवादिदर्शनाच्चेत्यर्थः अयमभिसन्धिः। धर्मार्थे सांशयिकफलत्वं तावदसिद्धम्,

* Another reading — षोडशपणसंघः

अनादितया सर्वज्ञेश्वरप्रणीततया वा निर्दुष्टश्रुतिबोधितत्वेन। 'श्येनेनाभिरचन् यजेत्' कारीर्या वृष्टिकामो यजेत् इत्यादि श्रुतिबोधात्तद्दृष्ट्यादेः प्रत्यक्ष सिद्धत्वेन आमुष्मिकादित्यादि श्रुतिमूल–ज्योतिश्शास्त्रे बोधित नियतकालग्रहोदयादेर्दृष्टत्वेन सर्वत्र तन्निर्णयसम्भवात् यद्यप्युक्तं – भाविफलाय सिद्धफलत्यागो न युक्त इति तदपि न। भाविमहाफलापेक्षया सिद्धफलत्यागस्य कृषिवलादौ दर्शनात्। वस्तुतो विहितधर्मानुष्ठाने लोकमर्यादोच्छेदापत्तिः अतः आमुष्मिकपरमकामसाधनतया विहितार्थकामाभ्यां प्राधान्येन ब्राह्मणादिभिः धर्म एव सेव्य इति। नन्वेवमप्यर्थो गुर्वादिसेवादिना सम्पाद्य इत्येतदयुक्तम्। अन्वयादिव्यभिचारात्। किं तु अदृष्टमेवार्थादौ सर्वत्र कारणं। अतएव इन्द्रः कदाचित् शत्रून् जघान कदाचति् तैर्हत इत्यादिश्रुतिस्मृतिप्रसिद्धिरित्यसहायादृष्टवरणवादी शंकते –

**1/2/26 'नार्थांश्चरेत् प्रयत्नतोऽपि ह्येतेऽनुष्ठीयमाना नैव कदाचित्स्युः अनुष्ठीयमानापी यदृच्छया भवेयुः'।**

**1/2/27 'तत्सर्वं कालकारितमिति'।**

**1/2/28 'काल एव हि पुरूषार्थानर्थयोर्जयपराजययोः सुखदुःखयोश्च स्थापयति'।**

अर्थात् अर्थोपायान् नाचरेत् नानुतिष्ठेत्। कुतः एते उपाया यत्नतः प्रयत्नेन अनुष्ठीयमानाः क्रियमाणाः अपि न फलायोपकुर्युः। कदाचिदनुष्ठीयमानाः साधनानपेक्षलाभादिकं कलयतीति व्युत्पत्या कालोऽदृष्ट तत्कृतमिति हेतोः काल एव हि तौ पुरूषाभिमतोऽनभिमतयोः अर्थलाभालाभयोश्च तत्फलजयपराजययोः तत्फलसुखदुःखयोश्च स्थापयति पुरूषं तद्वन्तं करोतीत्यर्थः।

उक्तार्थमेव निदर्शनेन स्पष्टयति –

**1/2/29 'कालेन बलिरिन्द्रः कृतः। कालेन व्यपरोपितः। काल एव पुनरप्येनं कर्त्तेति कालकारणिकाः'।**

कालेनादृष्टेन बलिरित्युपलक्षणम्। नहुषस्यापि इन्द्रः कृतः इन्द्राधिपत्यं प्रापितः इन्द्रश्च स्वस्थानात् व्यावित इत्यर्थाद् अवगम्यते। व्यवरोपितः इन्द्रपदात् व्यावितः बलिरित्यनुषज्यते। एवं स्वस्थानच्युतमिन्द्रं कर्त्ता करोति स्वस्थानस्थमिति शेषः कालस्यैव कारणत्ववादिनः कालकारणिकारः अदृष्टस्य कारणत्वेऽपि नह्यर्थिनः पाकादौ प्रवृत्तिदर्शनेन अन्वयव्यतिरेककार्यत्वावच्छिन्नं उपायगोचरकृतेनापि कारणत्वे निश्चयेन विपक्षे सर्वव्यवहारविलोपापत्त्या च बल्यादेरपि तदनुकूलप्रयत्नश्रुतेश्च अदृष्टवद्दृष्टस्यापि

हेतुत्वमावश्यकमिति भवति गुरूसेवादेस्तद्धेतुत्वमिति समाधत्ते –

**1/2/30 'पुरूषकारपूर्वकत्वात्सर्वप्रवृत्तीनामुपायः प्रत्ययः'।**

सर्वप्रवृत्तीनां प्रवर्त्तयन्ति स्वेभ्यः पुरुषसाधनं इति प्रवृत्तयः। फलानि तासां पुरुषकारः पुरुषप्रयत्नः तत्पूर्वकत्वात् तत् साध्यत्वात् उपायः साधनं प्रत्ययः प्रत्येतव्य एवं गुरोः शास्त्रादिति शेषः।

एवं अन्वयेनोपपाद्य व्यतिरेकेण तदुपपादयति—

**1/2/31 'अवश्यम्भाविनोऽप्यर्थस्योपायपूर्वकत्वादेव। न निष्कर्मणो भद्रमस्तीति वात्स्यायनः'।**

अवश्यम्भाविनोऽपि अदृष्टजन्यस्यापि अर्थस्य फलस्य उपायपूर्वकत्वात् पुरूषप्रयत्नविषयसेवाद्युपायजन्यत्वात् निष्कर्मणो निरूपायस्य न भद्रमस्ति फलं नास्ति। अतोऽन्वयव्यतिरेकाभ्यामदृष्टमिव दृष्टमपि गुरुसेवा एकमर्थोपार्जनहेतुरित्यर्थः। ननु धर्मार्थयोरामुष्मिकफलसाधनतयापि हि कनिष्ठानिवर्त्तकतया सेव्यत्वेऽपि कामस्य तदभावात् प्रत्युतैहिकामुष्मिकानिष्ठहेतुत्वात् श्रुतिस्मृतिनिन्दितत्वाच्च नायं सर्वथा सेव्यं इति मन्दमतिशंकामुद्घाटयति –

**1/2/32 'न कामांश्चरेत्। धर्मार्थयोरेव प्रधानयोरन्येषां च सतां प्रत्यनीकत्वात्। अनर्थजनसंसर्गमसद्व्यवसायमशौचमनायतिं चैते पुरूषस्य जनयन्ति'।**

**1/2/33 'तथा प्रमादं लाघवमत्ययमग्राह्यतां च'।**

प्रधानयो विहितामुष्मिकफलसाधनतया प्रशस्तयोर्धर्मार्थयोरिव सेव्यत्वं युक्तम्। कुतः कामादेः अन्येषां स्वभिन्नानां सतां सत्संगादीनां आमुष्मिकादिफलसाधनानां प्रत्यनीकत्वात् विरोधित्वात् कामान् कामी तत्साधनादीन् न चरेत् न सेवेत। विरोधित्वेऽपि प्रतिपादयति – 'अनर्थजनेत्यादिना'। अनर्थजनप्रमादादिहेतुजनेन व्यवायः इन्द्रियघातसंयोगः। अशौचं अशुचिता आयतिरुत्तरकालफलं प्रमादोऽनवधानता लाघवं लघुत्वं अप्रत्ययोऽविवेकः अग्राह्यतासदपरिग्रहः उक्तार्थमेव नानाविधनिदर्शनप्रदर्शनेन विशदयति – किं चेत्यादिना'।

**1/2/34 'किं च बहवः कामवशगाः सगणा एव विनष्टाः श्रूयन्ते'**

**1/2/35 'यथा दाण्डक्यो नाम भोजः कामात् ब्राह्मणकन्यकामभिमन्यमानः सबन्धुराष्ट्रो विननाश'।**

**1/2/36 'देवराजश्चाहल्यां, अतिबलश्चकीचको द्रौपदीं, रावणश्च सीतामपरे चान्ये च बहवो दृश्यन्ते कामवशगाः विनष्टा इत्यर्थचिन्तकाः'।**

कामवशगाः कामलोलुपाः सगणाः सपरिवाराः एव न तु स्वमात्रं श्रूयन्ते महाभारतरामायणादौ इति शेषः। ब्राह्मणकन्यकां शुक्रसुतां अभिमन्यमानः अभियोक्तुमिच्छुः इत्यादि सवत्रानुषज्यते अर्थचिन्तकाः विरोधिलक्षणया अनर्थमात्रचिन्तकाः मन्यन्त इति शेषः। कामस्यासेवत्वे तत्साधनभूतयोर्धर्मार्थयोरपि निष्फलत्वेनासेव्यत्वापत्या 'स्वर्गकामो यजेतेत्यादि श्रुतिस्मृतीनामप्रामाण्यापत्तेः। शारीरमित्यादिभवद्वचनेनाहारादिवत् शरीरस्थितिहेतुतया विरूद्धांशत्यागेऽपि सर्वत्यागयोगादन्यथा सर्वस्यापि दोषग्रस्तत्वेन सर्वव्यवहारविलोपापत्तेरिति दूषयति —

**1/2/37 'शरीरस्थितिहेतुत्वादाहारसधर्माणो हि कामाः। फलभूताश्च धर्मार्थयोः'।**

शरीरस्थितिः शरीररक्षणं आहारसधर्माणः अशनादिसदृशाः कामः। गृही भवेदित्यादिश्रुतिस्मृतिविहिताः सेव्या इति शेषः। धर्मार्थयोः फलभूतः इतोऽपि सेव्या इत्यर्थः। दुष्टांशत्यागे नेतरसेव्यत्वम्।

सदृष्टान्तमुपपादयति–

**1/2/38 'बोद्धव्यं तु दोषेष्विव'।**

दोषेषु दुष्टेषु सस्यादिष्विव दोषवारणेन सेव्यत्वं बोद्धव्यं इत्यर्थः।

तदेव विशदयति–

**1/2/38 'न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। न हि मृगाः सन्तीति यवा नोप्यन्ते इति वात्स्यायनः'**

स्थाल्योदनपात्राणि अधिश्रयणं तेजः संयोगः पक्षिकाभावनिवृत्तये नञ्द्वयं। अतएव प्रसज्य प्रतिषेधे नञ्द्वयमिति वामनः। फलोपघातकत्वं भिक्षुकाणां साधनोपघातकत्वं मृगाणामिति भेदः। यद्यपि प्रमादादीनां कामानन्तरभावितया न फलतत्साधनोपघातकत्वमिति दृष्टान्तवैषम्यं तथापि तादृशेऽपि पाकादौ यथाशक्तिदोषपरिहारेण प्रवृत्तावनुपघातकसुपरिहार्यदोषनिवर्त्तनेन विहित कामादिप्रवृत्तिः कैमुतन्यायसिद्धेति सूचनाय दृष्टान्तोक्तिः।

उक्तार्थे अभियुक्तोक्तिं संवादयति 'एवमर्थं चेत्यादिनां'।

**'एवं अर्थं च कामं च धर्मं चोपाचरन्नरः।**
**1/2/39 इहामुत्र च निःशल्यमत्यन्तं सुखमश्नुते॥'**

**'किं स्यात्परत्रेत्याशंका कार्ये यस्मिन्न जायते।**
**न चार्थघ्नं सुखं चेति शिष्टास्तत्र व्यवस्थिताः॥**
**त्रिवर्गसाधकं यत्स्याद् द्वयोरेकस्य वा पुनः।**
1/2/40 **कार्यं तदपि कुर्वीत न त्वेकार्थं द्विबाधकम्॥'**

एवं पूर्वोक्तप्राधान्यादिरूपेण निःशल्यं दोषविनाकृतं इदमर्थादीनां विशेषणं।

अत्यन्तदुःखसंभिन्नं सुखमामुष्मिककामम् च शब्दः परस्परयोगसूचनार्थः। धर्मस्वरूपं कथयन् तस्यार्थादिहेतुत्वमाह – किं स्यादिति'। परत्र परलोके जन्यत्वं सप्तम्यर्थः। किंचित् स्यात् किंचित्फलजनकत्वं स्यात् न वा इति धर्मद्वयप्रकारिका यस्मिन् काले यत्कार्य विशेषकाशंका सन्देहं न जायते निर्दुष्टश्रुतिविहितत्वेन परिह्रीयते। न चार्थघ्नं ते हि आमुष्मिकार्थसाधनं सुखं तादृशसुखसाधनं च इति हेतौ शिष्टाः स्वस्वशाखाध्येतारः स्वशाखाध्येतृत्वं शिष्टत्वम्। प्रमादाधीतवेदे शूद्रादावतिव्याप्तये स्वपदं अतएव न वेदप्रामाण्ये–त्यादि तत्र व्यवस्थिताः तद् विषयकप्रवृत्तिमन्त इत्यर्थः। एवं साध्येषु प्रवृत्तिमुक्वा साधनेषु तामाह – 'त्रयाणामिति। त्रयाणां धर्मादीनां कार्यं कर्तुं योग्यं साधनं वेदाध्ययनादि। द्वयोः अर्थकामयोः ज्योतिष्टोमादि एकस्य एकैकस्य कल्पनेति कामसूत्रादि द्विबाधकं धर्मार्थविरोधि एकार्थं ऐहिकसुखमात्रहेतुः अविहितस्त्रीसेवनादि।

**इति श्री–कामसूत्रवृत्तौ साधारणे प्रथमेऽधिकरणे त्रिवर्गप्रतिपत्तिः द्वितीयोऽध्यायः समाप्तः।**

**अध्याय – 3**

# विद्यासमुद्देशप्रकरणम्

एवं त्रिवर्गं निरूप्य उपज्जीवकत्वं संगत्या तदंगविद्यास्तदध्ययनं कालं चाह –

1/3/1 **'धर्मार्थांगविद्याकालाननुपरोधयन् कामसूत्रं तदंगविद्याश्च पुरूषोऽ–धीयीत'।**

धर्मार्थाश्च धर्मार्थौ तयोरंगविद्याः अंगानां प्रयोजनादीनां प्रयोगबोधका अंगभूता वा विन्दन्त्येताभिरिति विद्याः। कल्पसूत्रमीमांसादयो बार्हस्पत्यकाव्यादयश्च अंगत्व चात्र परोद्देशप्रवृत्तव्यापारविषयत्वं जैमिन्युक्तं बोध्यम्। तासां अध्ययनकालो अनुपरोधयन् अनुपघ्नन् तत्काले ता अधीत्य कामसूत्रं कामतत्साधनं प्रतिपादकशास्त्रं तदंगविद्याः तेन पुरूषादौ प्रवर्त्तयितव्ये उपयोगिविद्या वक्ष्यमाणगीतादि चतुःषष्टिकलाः सहकारित्विमिहांगत्वं पुरूषोऽधीयीत गार्हस्थ्यात्पूर्वं इति शेषः।

कामसूत्रमित्यादि पुरूषपदवर्जमिहोत्तरसूत्रे चानुवर्त्तते –

1/3/2 **'प्राग्यौवनात् च युवतिः'** युवतिः कन्या। **प्रत्ता च पत्युरभिप्रायात्'।**

प्रत्ता विवाहसंस्कृता अभिप्रायात् एव सर्वं वाक्यं सावधारणमिति न्यायात्। ननु पुंसां धर्माद्यंगविद्यास्विवादुष्टार्थमध्ययनाधिकारोऽपि अनधीतशास्त्राणामपि योषितां सम्प्रयोगदर्शनेन व्यभिचारान्नात्र योषितामधिकृतिरित्याशंके –

1/3/3 **'योषितां शास्त्रग्रहणस्याभावादनर्थकमिह शास्त्रे स्त्रीशासनमित्याचार्याः'।**

गृह्यतेऽनेनेति ग्रहणमध्ययनं। तस्याभावादपि अभावेऽपि उपायप्रयोगदर्शनेन व्यतिरेक व्यभिचारादिति शेषः। इह कामशास्त्रे स्त्रीशासनं स्त्रीणामधिकारप्रतिपादनं अनधीतव्याकरणादीना-मभिज्ञव्यवहारदर्शनेन साधुशब्दादि प्रयोगेऽपि शास्त्राधिकृतिवत् एतत्प्रवीणव्यवहारदर्शनेनानधीतानां सम्प्रयोगेऽपि न तत्रानधिकार इति समाधत्ते –

1/3/4 **'प्रयोगग्रहणं त्वासाम्। प्रयोगस्य च शास्त्रपूर्वकत्वादिति वात्स्यायनः'।**

प्रयुज्यन्त इति प्रयोगा उपायास्तेषां ग्रहणं ज्ञानं आसामज्ञानां तज्ज्ञसंगाविति शेषः। चावधारणे शास्त्रमात्रपूरकत्वात् शास्त्रैकजन्यत्वादुक्तं नेत्यर्थः।

विपक्षे बाधकमाह – 'न केवलमित्यादिना'।

**1/3/5 'न केवलमिहैव। सवत्रैव हि लोके कतिचिदेव शास्त्रज्ञाः।**

सर्वजनविषयश्च प्रयोगः'।

**1/3/6 'प्रयोगस्य दूरस्थमपि शास्त्रमेव हेतुः'।**

**1/3/7 'अस्ति व्याकरणमित्यवैय्याकरणापि याज्ञिकाः ऊहं क्रतुषु साधुशब्दान् प्रयुञ्जते'।**

**1/3/8 'अस्ति ज्योतिषामिति पुण्याहेषु कर्म कुर्वते'।**

**1/3/9 'तथाश्वरोहा हस्त्यारोहाश्च गजानश्वाननधीत्यपि शास्त्रं विनयन्ते'।**

**1/3/10 'तथास्ति राजेति दूरस्थाऽपि जनपदा मर्यादान्नातिवर्त्तन्त इति तद्वदेतत्'।**

इह शास्त्रे उक्तरीतिरिति शेषः। किं तु सर्वत्रैव सर्वशास्त्रेष्वपि हि प्रसिद्धौ कतिचिदेव केचिदेव सर्वजनस्तत्तद्वर्णाः सम्प्रयोजयति प्रवर्त्तयतीति सम्प्रयोगेऽधिकार उक्तः स न स्यादिति शेषः। उक्तमेव सदृष्टान्तं स्पष्टीकरोति– 'प्रयोगस्येत्यादिना'। दूरस्थमपि अनधीतमपि हि सर्वत्रानुवर्त्तते विवेचयति साध्य साधुशब्दानिति व्याकरणं अवैय्याकरणा अनधीतव्याकरणाः याज्ञिकाः यज्ञप्रयोक्तारः ऊहं क्रतुषु ऊहयोग्यमन्त्रकविकृतिषु कर्मसमवेतदेवतादिप्रकाशकशब्दा–न्तरत्वमूहत्वं साधुत्वं संस्कृतत्वं। ज्योतिषं नक्षत्रकालादिप्रतिपादकं शास्त्रमिति हेतोरज्ञोऽपि तज्ज्ञवचनात् उदगयनशुक्लाहेषु कर्म उपनयनादि कुर्वते।

कुर्वते हि शास्त्रं अश्वादीननधिगतशास्त्रं विनयन्ते शिक्षयन्ति। जनपदास्तत्रत्याः प्रमाणाभावमाशंक्याप्रमाणमित्याह –

**1/3/11 'सन्त्यपि खलु शास्त्रप्रहितबुद्धयो गणिकाः राजपुत्र्यो महामात्रदुहितरश्च'।**

प्रहिता निपुणा दृष्टा इति शेषः। अनेन सर्वाः स्त्रियः एतत् शास्त्राधिकारिण्यः स्त्रीत्वात् गणिकादिवत् इत्यनुमानं सूचितम्। एवं स्त्रीणां अधिकारं प्रतिपाद्याध्यापकनाह –

**1/3/12 'तस्माद्वैश्वासिकाज्जनाद्रहसि प्रयोगाच्छास्त्रमेकदेशं वा स्त्री गृह्णीयात्'।**

तस्मादधिकृतत्वात् वैश्वासिकात् विश्वस्यात् प्रयोजयत्यध्यापयतीति प्रयोगात् एकदेशं उपायबोधकं रहसि अधीयीत।

**1/3/13 'अभ्यासप्रयोज्यांश्च चातुःषष्टिकान्योगान् रहसि एकाकिन्यभ्यसेत्'।**

अभ्यासप्रयोज्यान् आवृत्तिलभ्यान् चातुःषष्टिकान् स्वार्थे युज्यन्ते अधीयन्त इति योगान् विद्याः।

**1/3/14 'आचार्यास्तु कन्यानां प्रवृत्तपुरूषसंयोगा सहसंवृद्धा धात्रेयिका तथा च निरत्ययसम्भाषणा सखी। समानवयो मातृष्वसा। विस्त्रब्धा तत्स्थानीया वृद्धादासी पूर्वसंसृष्टा भिक्षुकी। स्वसा विश्वासप्रयोगात्'।**

प्रवृत्तपुरूषसंयोगा उपायैर्लब्धपुरूषसम्बन्धा सर्वत्रेतदनुषज्यते। साकं वर्धता धात्रीसुता निरत्ययभाषणा सन्ततभाषणा विश्वसनीया इति यावत्।तादृशी सखी समानवया विस्त्रम्भवती मातृष्वसा। तत्स्थानीयाप्तसंकेतवती दासी। पूर्वसंसृष्टा कंचित्कालं सहस्थिता युज्यत इति योगः। विश्वासवती स्वसा च। एताः कन्यानां आचार्याः भवन्तीति शेषः। एकश्चोऽनुक्तः समुच्चायकः।

एवं अंगविद्यासहितकामशास्त्रस्याध्ययनकालं तदधिकारिणश्च निर्दिश्यांगविद्याः प्रदर्शयति 'तद्यथेत्यादिना'। तथा ज्ञायन्ते तथा उच्यन्त इति शेषः।

**1/3/15 'गीतं' स्वरादिसन्दोह।**

**'वाद्यं'** गीतिकालपरिच्छेदकमृदंगाद्यंगभूतः। **'नृत्यं'** साभिनयांगविक्षेपविशेषः। **'आलेख्यं'** चन्दनादिना गण्डस्थलादौ नानारचना। **'विशेषकच्छेद्यं'** कस्तुर्यादिना ललाटे भाक्तयः। **'तण्डुलकुसुमवलिविकाराः'** ताण्डुलाश्च कुसुमानि च तैः वालंविकाराः कर्णभूषाविशेषरचनाः। **'पुष्पास्तरणं'** पुष्पैः शय्यारचनम्। **'दशनवसनांगरागाः'** दशनवसनेऽधरोष्ठेऽंगरागाः रंजकद्रव्यविशेषलांछनम्। **'मणिभूमिकाकर्म'** कृत्रिमपुत्रिकानिर्माणं। **'शयनरचनं'** शय्याकल्पनाचातुर्यम्। **'उदकवाद्यम्'** उदके वादनं 'उदकघातः' उदकुम्भघातेन शब्दोत्पादनम्। **'चित्रयोगाः'** चित्रकर्माणि। **'माल्यग्रथनविकल्पाः'** मालिकाहेतु पुष्पग्रथन–चातुर्याणि। **'शेखरापीडयोजना'** शेखरापीडे शिरोभूषणविशेषयोजना तद्रचनाचातुर्यम्। **'नेपथ्यसम्प्रयोगाः'** अलंकरणकौशलानि। **'कर्णपत्रभंगाः'** कर्णाभरणकल्पनाशिल्पानि। **'गन्धयुक्तिः'** वस्त्रादौ गन्धयोजनम्। **'भूषणयोजनं'** भूषणनिर्माणनैपुण्यम्। **'ऐन्द्रजालिकं'** अविद्यमानवस्तुप्रदर्शनम्। **'कौचुमाराश्च योगाः'** कुचुमारोक्तवशीकरणविद्याः। **'हस्तलाधवं'**

पश्यतो हरणम्। '**चित्रशाकयूषभक्ष्यविकारक्रियाः**' चित्ररसं यथा तथा शाकादिपाककौशल्यं। '**पानकरसासवरागयोजनानि**' पानके पेयद्रव्ये रसादिसम्पादनम्।

'**सूचीवानकर्माणि**' सूच्या प्रतिकृतिनिर्माणं। '**सूत्रक्रीडा**' संचालिका संचारणम्। '**वीणाडमरूकवाद्यानि**' वीणादीनां वादनानि। '**प्रहेलिका**' गूढाभिसन्धिवचनम् 'गृहे गृहे चलति सर्वप्रिया जीवति वैरिलोकान् मारयति बध्यते मुच्यते क्षणे क्षणे तथा जानीव यथा वृथान्तरं भवेत्। पाशकशारीति'। विदग्धमुखमंडनोक्तलक्षणम्।*

'**प्रतिमाला**' स्वस्मिन्नाननरचना। '**दुर्वाचकयोगाः**' सर्वविद्यलेखनानि। भागवते तु दुर्वचन योगाः इति दुष्टवचनचतुरतेत्यर्थः। '**पुस्तकवाचनं**' द्रुतश्रव्यपठनम् '**नाटकाख्यायिकादर्शनम्**' नाटकाख्यायिके सांगेत्यादि प्रतापरूद्रीयोक्तलक्षणे। '**काव्यसमस्यापूरणं**' काव्यं रसमयादिवाक्यं समस्यां पद्यैकदेशः। '**पट्टिकावेत्रवानविकल्पाः**' पट्टिकाभिः वेत्रैश्च बन्धनचातुर्यम्, '**तर्कुकर्माणि**' तुलादिना सूत्रनिर्माणानि। '**तक्षणम्**' तक्षकर्मा। '**वास्तुविद्या**' गृहनिर्माणम् '**रूप्यरत्नपरीक्षा**' सदसद्विवेचनम्। '**धातुवादः**' ताम्रादेः सुवर्णकरणम्। '**मणिरागाः**' पद्मरागादयः '**आकरज्ञानं**' आकरस्तन्निधिः। '**वृक्षायुर्वेदयोगाः**' वृक्षस्य शरीरस्याम्रादेर्वा उपयोगिवैद्यशास्त्रज्ञानं। '**मेषकुक्कुटलावकयुद्धविधिः**' लावक पक्षिविशेषः। '**शुकसारिकाप्रलापनम्**' प्रलापनं तद्वाक्यभाषणम्। '**उत्सादने संवाहने केशमर्दने च कौशलम्**' केशानां उत्सादनं समीकरणम् मर्दनं गन्धतैलादिना मार्जनम्। '**अक्षरमुष्टिकाकथनं**' अक्षराणां अंगुलिविन्यासविशेषसूचनम्।

'**म्लेच्छितकविकल्पाः**' स्वसंकेतितभाषाविशेषाः। '**देशभाषाविज्ञानं**' देशा–स्ततद्देशाः। '**पुष्पशकटिका**' पुष्पै शकटरचनम्। '**यन्त्रमातृका**'। '**धारणमातृका**'। '**संवाच्यम्**'।** यन्त्रं मत्स्यादिमातृकासाधनम्। धारणमातृका धारणं चिरालम्बनस्थितिः। संवाच्यं सम्यक्ज्ञानम्। '**मानसी**' चिन्ता तज्ज्ञानं। '**काव्यक्रिया**' काव्यनिर्माणं '**अभिधानकोश**' छन्दोविज्ञानं अभिदधते एकमर्थमिति अभिधानानि पर्यायपदानि तेषां कोश इव कोशाः ग्रन्थविशेषाः। '**छंदासि**' गायत्र्यादयः। '**क्रिया विकल्पाः**'*** नानाकार्य–करणचातुर्यम्। '**छलितयोगाः**' छद्मना कर्मकरणम्। '**वस्त्रगोपनानि**' सन्निहितवस्त्वज्ञापन-

---

* The Idefinition of प्रहेलिका as per विदग्धमुखण्डन –
'व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात्।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका।।'

** It is सम्पाठ्यम् in the published text of Kama Sutra.

*** It is क्रियाकल्पः in the published text of Kama Sutra.

चातुर्याणि। **'द्यूतविशेषाः'** 'अक्षक्रीडनकौशलानि'। निमित्तज्ञानं। **'आकर्षक्रीडा'** अपेक्षितस्य समीपानयनचतुरता। **'बालक्रीडनकानि'** कन्दुकादिखेलनानि। सर्ववस्तुप्रतिकृति-निर्माणं। **'वैनयिकानां वैजयिकीनां व्यायामिकीनां च विद्यानां ज्ञानम्'** विशेषेण नयन्त्यपेक्षितदेशं प्रापयन्तीति वैनयिक्योजलवनपादुकासिद्धयः। वैजायिकीनं विजयहेतुवा–क्सिद्धिघटकासिद्धादयः।व्यायामिक्यं मृगयाद्याः **'इति कामसूत्रांगविद्याः'**।

**1/3/16 'पांचालिकी चतुःषष्टिस्तस्याः प्रयोगानन्ववेत्य साम्प्रयोगिके वक्ष्यामः'।**

पांचालिकी पांचालसंज्ञाचतुःषष्टिः चतुराधिकषष्टिविद्याः आलिंगनचुम्बन–दशननखच्छेद्यसंवेशसीत्कृतपुरूषायितौपरिष्टकानामष्टधा विकल्पभेदाव–ष्टाकाश्चतुःषष्टिरितिवक्ष्यमाणाः तस्याश्चतुःषष्ट्याः प्रयोगानन्ववेत्य विशदीकृत्यसावान्तरभेदम्।

**1/3/16 'तदात्मकत्वात् सम्प्रयोगस्य'।**

तदात्मकत्वात् तद्विद्याधीनत्वात् तत्र वक्ष्याम इत्यर्थः। उक्तानां चतुःषष्टिकलानां प्रयोजनं प्रतिपाद्यति 'आभिरित्यादिना'।

**'आभिरभ्युच्छ्रिता वेश्या शीलरूपगुणान्विता।**
**लभते गणिकाशब्दं स्थानं च जनसंसदि।।**
**पूजिता सा सदा राज्ञा गुणवद्भिश्च संस्तुता।**
**प्रार्थनीयाभिगम्या च लक्ष्यभूता जायते।।**
**योगज्ञा राजपुत्री च महामात्रसुता तथा।**
**सहस्रान्तःपुरमपि स्ववशे कुरूते पतिम्।।**
**तथा पतिवियोगे च व्यसनं दारूणं गता।**
**देशान्तरेऽपि विद्याभिः सा सुखेनैव जीवति।।**
**कलानां ग्रहणादेव सौभाग्यमुपजायते।**
**देशकालौ त्वपेक्ष्यासां प्रयोगः सम्भवेन्न वा।।**
**नरः कलासु कुशलो वाचालश्चाटुकारकः।**
**1/3/17–22 असंस्तुतोऽपि नारीणां चित्तमाश्वेव विन्दति।।'**

'आभिः चतुःषष्टिकलाभिः अभ्युत्थिता समन्विता शीलं यत्स्वभावं रूपं सौन्दर्यादिगुणाः वशीकरणचातुर्यादयः,वेश्या जातिविशेषोद्भवा गणिका–शब्दं तद्वाच्यतां स्थानं स्थितिं लक्ष्यभूता दर्शनीया। योगज्ञा पूर्वोक्त–कलावती चकारादन्यापि।

सहस्रमन्तःपुराणि कलत्राणि यस्य तं तथा वशीकरणमिव देशान्तरे पत्यौ स्थितेऽपि इति शेषः। सुखेन प्रतिकृत्यादिना जीवत्येव। कलानां पूर्वोक्तानां प्रयोगस्तु सम्भवतु वा न वा असंस्तुतोऽपि अपरिचितोऽपि विन्दत्येव वशयत्येव अतः सर्वैरध्येतव्या इति भावः।

**इति साधारणे प्रथमेऽधिकरणे विद्यासमुद्देशः तृतीयोऽध्यायः।**

**अध्याय – 4**

# नागरकवृत्तप्रकरणम्

एवं तृतीयाध्याये विद्यास्तदधिकारिणश्च निरूप्योपजीवकत्वसंगत्या तासां प्रयोगस्तत्कालं चाह –

1/4/1 **'गृहीतविद्यः प्रतिग्रहजयक्रयनिर्वेशाधिगतैरर्थैरन्वयागतैरूभयैर्वा गार्ह–स्थ्यमधिगम्य नागरिकवृत्तं वर्त्तेत'**

गृहीता अभ्यस्ता विद्या येन स तथा अधिगतैरधिगमलब्धैरन्वयागतैः कुलक्रमागतैः वा उभयैरूभयविधैर्वा अर्थैः क्रमेण ब्राह्मणस्य प्रतिग्रह इत्यादिना सहितः। ब्राह्मणादिः गार्हस्थं कलत्रं। नगरे भवा नागरिकाः तेषां प्रवृत्तः चरितं वर्त्तेत कुर्यात्।

तदेव विशदयति – 'नगरेत्यादिना'।

1/4/2 **'नगरे खर्वटे महति वा सज्जनाश्रये स्थानं। यात्रावशाद्वा'।**

नगरे नानाविलासाश्रयराजधान्यां सज्जनाश्रये उक्तविद्या सज्जनवति महति खर्वटे ग्रामे यान्ति साकं त्रायन्त्यापद्भ्यः इति यात्रा सखायाः तेषां योगात् सहवासात् अन्यत्र वा स्थानं स्थितिं वर्त्तेत्यनुषज्यते।

1/4/3 **'तत्र भवनमासन्नोदकं वृक्षवाटिकावद्विभक्तकर्मकक्षं द्विवासगृहं कारयेत्'।**

तत्र उक्तान्यतमे देशे आसन्नोदकं सकलकलहंसविलसत्कमलवापीयुक्तं भवति विलासोपयोगीति भवनं वृक्षवाटिकावत्। नदत्कोकिलभ्रमरमलयमारूतविलसत्पुष्पवाटिकासहितं विभक्तकर्मकक्षं। विभक्तानि व्यवस्थितानि कर्माणि शयनासनभोजनविहारादीनि येषु तादृशानि कक्ष्याणि अवान्तरगृहाणि यस्मिन् द्विवासगृहात् महागृहद्वयम्।

1/4/4 **'वासगृहे'** विलासगृहे **'सुश्लक्ष्णं'** मृदुलमु **'भयोपधानं'** उभयत्र शिरः पादयोः

उपबर्हणयुतं **'मध्ये विनतं'** मध्ये उभयोपधानमध्यप्रदेशविनतं निम्नं **'शुक्लोत्तरच्छदं'**

अंशुकं शुद्धं उत्तरच्छदं उपरिवस्त्रं यस्मिन् तत्र बद्धवि–तानं ऊर्द्ध्वभागे लग्नं वितानं उल्लोचो यस्मिन् तत् **'शयनीयं'**। **'शय्या प्रतिशय्या च'** शय्यासमीपे आस्तरणान्तरम्। **'तस्य शिरोभागे कूर्चस्थानं'** सिंहासनं **'वेदिका च'**। तस्य शयनीस्य शिरोभागे शिरोलग्नप्रदेशापरभागे कूर्चस्थानं सिंहासनं वेदिका च। चकारादन्यदपि रमणीयं स्यादिति सर्वत्रानुषज्यते। **'तत्र रात्रिशेषमनुलेपनं माल्यं सिक्थकरण्डकं'** रात्रिशेषा यस्य दिनस्य तद्रात्रिशेषं यथा भवति तथा शय्यास्थाने अनुलेपनं तत्साधनं चन्दनादि **'माल्यं'** मालिका **'सिक्थकरंडकं'** कस्तुरीकज्जलकराटिकं **'सौगन्धिकपुटका'** सुगन्धद्रव्यपेटिका मुखवासकं एलालवंगादिकम्।

**'मातुलुंगत्वचत्वाम्'** प्रधानबीजपूर्य **'ताम्बूलानि च स्युः'**।वादनान्यपि **'भूमौ पतद्ग्रहः'**। समीपभुवि भूषणपेटिका। **'नागदन्तावसक्ता वीणा'** गजदन्तालंकृतविपंचिका **'चित्रफलकम्'** चित्रपट्टिका **'वर्त्तिकासमुद्गकः'** धूमवर्त्तिकाधानी **'यत्किंचित्पुस्तकम्'** कामसूत्रपुस्तकम् **'कुरंटकमालाश्च'** कुरंटककुसुममालिकाः **'नातिदूरे भूमौ वृत्तास्तरणम्'**। नातिदूरे समीपे वृत्तास्तरणं आसनविशेषः। **'समसूरकफलकं'** मसूरो धान्यं विशेषः तत्–सहितं **'आकर्षकफलकं'** लीलाशकटं **'द्यूतफलकं'** च। अक्षक्रीडापीठकम्। **'तस्य बहिः क्रीडाशकुनिपंजराणि'**। तस्य केलिगृहस्य बहिःप्रदेशे क्रीडासाधनशुकसारिका-विहारगृहं। **'एकं च तर्कुतक्षणस्थानमन्यासां च क्रीडानां'** तर्कुतक्षणे सूत्रतनूकरण-क्रीडाविशेषा। अन्यासां नृत्यगीतादीनां स्थानमित्यनुषज्यते। **'स्वास्तीर्णप्रेंखादोला च'**। **'वृक्षवाटिकायां'** स्थण्डिलपीठिका च। सकुसुमेति भवनविन्यासः। स्वास्तीर्णप्रेंखासक-शिपुवेगाडोला **'स्थंडिलपीठिका'** समभूमिफलकविशेषः **'इति पूर्वोक्तः सर्वो विन्यासः'** विन्यसनीयः। एवं

1/4/4 **'निवासस्थलभवननिर्माणं।'**

तत्रत्य वस्तूनि च निर्दिश्य प्रातरारभ्य कर्त्तव्यमाह 'स प्रातरित्यादिना'।

1/4/5 **'स प्रातरूत्थाय कृतनियतकृत्यः गृहीतदन्तधावनः मात्रयानुलेपनं धूपं स्त्रजमिति च गृहीत्वा दत्वा सिक्थकमलक्तकं च दृष्ट्वादर्शे मुखं गृहीतमुखवासताम्बूलः कार्याण्यनुतिष्ठेत्'।**

प्रातः उषसि कृतनियतकृत्यः कृतं नियतकृत्यं त्रिवर्गचिन्तादिस्मृत्युक्तकार्यं येन इत्येकं कर्म गृहीतं कृतमिति, द्वितीयं मात्रया किंचित् अनुलेपनं हस्तादौ, धूपं सुगन्धधूपं शिरोरूहेषु, स्त्रजं वक्षसि इति तृतीयं। सिक्थकं कस्तुरिकादि ललाटे, आलक्तकं पादयोः दत्वा धृत्वा

इति चतुर्थं। आदर्शे दर्पणे इति पंचमं। मुखवासकयुतमिति षष्ठं। कार्याणि उक्तानि वक्ष्यमाणानि च कुर्यात्।

**1/4/6 'नित्यं स्नानं सुगन्धजलादिना*। द्वितीयमुत्सादनं कचभरशोषणं।**

**तृतीयकः फेनकः। चतुर्थमायुष्यं आयुष्यमायुस्करं अलंकारविशेषः अत्र पादक्रमाविवक्षयायुष्यकर्मणः प्राधान्यं बोध्यम्। पंचकं दशकं वा प्रत्यायुष्यमित्यहीनं'।** प्रत्यायुष्यं यावज्जीवं इति पूर्वोक्तम्। दशकं पंचकं वाऽहीनं अविच्छिन्नं कार्यं। अहीनपक्षे दशकं, हीने पंचकं वा कार्यः इति वीरभद्रः। एवं प्रातःकृत्यमुक्त्वा मध्याह्नकृत्यमाह –

**1/4/6 'सातत्याच्च संवृतकक्षः स्वेदापनोदः'।**

असंवृते अंगरक्षकादिना अनावृते कक्षे यस्य तादृशो भवेत् तेन आवृतस्य सततभाविनः स्वेदस्यापनोदनो भवति। इदं अन्यकृत्तत्यस्याप्युपलक्षणम्।

**1/4/7 'पूर्वाह्णापराह्णयोर्भोजनम्'।**

अह्नः पूर्वो भागः पूर्वाह्णः पंचदशघटिकात्मकः। अह्नः अपरो भागः अपराह्णः सायाह्न इत्यर्थः, कुर्यादिति शेषः।

**1/4/7 'सायं चारायणस्य'।**

सायं रात्रावपि चारायणस्य मते भोजनं कुर्यादित्यनुवर्त्तते। अपराह्ण–कृत्यमाह –

**1/4/8 'भोजनान्तरं शुकसारिकाप्रलापनव्यापाराः'**
भोजनान्तरं भोजनश्रमापनुत्यनन्तरं –

**1/4/8 'लावककुक्कुटमेषयुद्धानि'** कारयेदिति शेषः।

**1/4/8 'तास्ताश्च कलाक्रीडाः'** कलाभिः पूर्वोक्ताभिः।

**1/4/8 'पीठमर्दविटविदूषकेषु चायत्ता व्यापाराः'**

---

* Compare Nāgara Sarvasva prescribing scented water for Kings bath—
सूक्ष्मैलाकस्तूरीकुष्टतगरपत्रचन्दनैः सुतनु।
मलयानिलंजलवासं रचय भूमिपालतिलकानाम्।। 4/10 N.S.

पीठमर्दादयो नर्मसचिवाः।

1/4/8 **'दिवाशय्या च'।**

च ताम्बूलचर्वणादि समुच्चायकः।

1/4/9 **'गृहीतप्रसाधनस्यापराह्ने गोष्ठीविहाराः'।**

गोष्ठे विहाराः सरससल्लापाः।

1/4/10 **'प्रदोषे च संगीतकानि'।** कार्याणीति यथायोगं सर्वत्र सम्बध्यते। गीतकं गानं तच्च मालवादि।

नितम्बिनीचुम्बितपद्मवक्त्रः समुल्लसत्कुण्डलवान् प्रमत्तः।
संगीतशालां विशति प्रदोषे मालाधरो मालवरागराज।। इति।
संगीतगंगाधरे स्वरमेलकलानिधिवचनात्।*

1/4/10 **'तदन्ते च प्रसाधिते वासगृहे संचारितसुरभिधूपे सहायस्य शय्यायामभिसारिकाणां प्रतीक्षणम्'।**

तदन्ते संगीतान्ते सहायस्य साप्तजनस्य शय्यायां तत्समीपे निषण्णस्येति शेषः। अभिसारिकाणां इति षष्ठी।

1/4/11 **'दूतीनां प्रेषणम्। च स्वयं वा गमनम्'।** चात्पीठमर्दादेः।

1/4/12 **'आगतानां च मनोहरैरालापैरूपचारैः ससहायस्योपक्रमाः'** उपक्रमाः वशीकरणादीनि।

1/4/13 **'वर्षप्रमृष्टनेपथ्यानां दुर्दिनाभिसारिकाणां स्वयमेव पुनर्मण्डनम्'।**

दुर्दिने अभिसारिकाणां नेपथ्यं कस्तूरीमकरीकादिमंडनम्। स्वयं नायकाचरेदिति शेषः।

1/4/13 **'मित्रजनेन वा परिचरणामित्यहोरात्रिकम्'।**

परिचरणं मंडनं कारयेत्। अहोरात्रिकं नायकमात्रस्य अहोरात्रकर्त्तव्यम्।

---

* This verse appears in नाट्यलोचनम् of त्रिलोचनादित्य and also संगीतदामोदर of शुभंकर। Here 'संगीतगंगाधरे' should rather be 'संगीतदामोदरे'।

**1/4/14 'घटानिबन्धनं'**

अन्योन्यं संमत्या उत्सवाद्यनुष्ठानं **'गोष्ठीसमवायः'** गोष्ठीभिरनुकूलालापैः समवायः। समविद्याशीलवित्तानां पण्यस्त्रीभिः सह स्थितिः। **'समापानकं'** समं उक्तैः समं आपानकं आसवादेः पानम्। **'उद्यानगमनं'** उक्ताभिः सह यानम्। **'समस्याः क्रीडाश्च प्रवर्त्तयेत्'**।

समस्याः काव्यादिसमस्याः पूरयेत्। क्रीडा वक्ष्यमाणाः।

एवं सम्भूय कर्त्तव्यानि निर्दिश्य विशदयति – 'पक्षेत्यादिना'।

**1/4/15 'पक्षस्य मासस्य वा प्रतीतेऽहनि सरस्वत्या भवने नियुक्तानां नित्यं समाजः'।**

पक्षस्य शुक्लपक्षस्य मासस्य वा वसन्तस्य सम्बन्धिनी प्रतीते अनुकूले सरस्वत्याः नृत्यगीतादेः भवने रचनायां नियुक्तानां कुशलानां समाजः सभाकार्यः।

**1/4/16 'कुशीलवाश्चागन्तवः प्रेक्षणमेकं दद्युः'**

आगन्तवः आगन्तुकाः प्रेक्षणकं उपायनं।

**1/4/16 'द्वितीयेऽहनि पूजा नियतं लभरेन्'।**

गायकादयः इति शेषः।

**1/4/16 'ततो यथाश्रद्धमेषां दर्शनमुत्सर्गो वा। व्यसनोत्सवेषु परस्परस्यैक-कार्यता'।**

ततः पूजानन्तरं यथा निजेच्छया दर्शनं द्रष्टुं स्थापनं व्यसनोत्सवेष्वेकवाक्यता येषामित्यन्वयः।

**1/4/17 'आगन्तूनां च कृतसमवायानां पूजनमभ्युपपत्तिश्च। इति गणधर्मः'।**

अभ्युपपत्तिरभिनन्दनं गणधर्मः संभूयकर्त्तव्यधर्मः।

**1/4/18 'एतेन तं तं देवताविशेषमुद्दिश्य सम्भावितस्थितयो घटा व्याख्याताः'।**

एतेन उक्तप्रकारेण उद्दिश्य आगतानामिति शेषः। घटा सम्भूय कर्त्तव्यविशेषाः।

**1/4/19 'वेश्याभवने च सभायामन्यतमस्योद्वसिते च समानविद्याशीलबुद्धि-वित्तवयसां सह वेश्याभिरनुरूपैरालापैरासनबन्धो गोष्ठी'।**

आलापैः निमित्तभूतैः आसनबन्धः एकत्र स्थितिः गोष्ठी समवायः।

**1/4/20 'तत्र चैषां काव्यसमस्या कलासमस्या वा'।**

तत्र समाजे काव्यसमस्या श्लोकैकदेशस्य कथनं कलाः पूर्वोक्तविद्याः तासां समस्या एकदेशप्रदर्शनमेकेन तदन्येन पूरणम्।

**1/4/21 'तस्यामुज्ज्वला लोककान्ताः पूज्याः। प्रीति समानाश्चाहारिताः'।**

**1/4/22 'परस्परभवनेषु चापानकानि'।**

तस्याः स्वस्य वापानकानि पेयानि वक्ष्यमाणद्रव्याणीति शेषः।च पौर्वापर्यसूचकः। तदेव विशदयति–'तत्रेति'।

**1/4/23 'तत्र मधुमैरेयसुरासवान्विविधवल्कलसम्भववन* फलहरित-कटुकाम्लोपदंशान्वेश्याः पाययेयुरनुपिवेयुश्च'।**

तत्र परस्परभवने मधुपौष्यं मैरेयं देश्विशेषोद्भवं सुरापैष्टं आसवो लावंगः विविधवल्कलसम्भवः वृक्षत्वग्विशेषः वनफलं धात्र्यादिहरितकी कटुकं तिक्तद्रव्यविशेषः।एतेषां उपदंशान् लवणशाकविशेषान्। इदमद्विजविषयं वक्ष्यति चाचार्यः।

**1/4/24 'एतेनोद्यानगमनं व्याख्यातम्'।**

एतेन वक्ष्यमाणप्रकारेण उद्यानगमनं तत्र कर्त्तव्यं च व्याख्यातं व्याख्यातप्रायं भवति।

**1/4/25 'तत्र पूर्वाह्न एव स्वलंकृतास्तुरगाधिरूढा वेश्याभिः सह परिचार-कैरनुगता गच्छेयुः'।**

तत्र वनविषये पूर्वाह्न एवं भुक्तेति शेषः। तुरगपदं रथादेरप्युपलक्षणं वेश्यापदं पत्न्या अप्युपलक्षकं।

**1/4/25 'दैवसिकीं च यात्रां तत्रानुभूय कुक्कुटलावकमेषयुद्धद्यूतैः प्रेक्षाभिरनुकूलैश्च चेष्टितैः कालं गमयित्वा अपराह्ने गृहीततदुद्यानोप–भोगचिह्नास्तथैव च प्रत्याव्रजेयुः'।**

दैवसिकीं यात्रां वसन्तोत्सवादिकं तत्र वनेऽनुभूय कृत्वा कुक्कुटादीनां युद्धयुतैस्तद्योजनैः

---

* In place of वल्कलसम्भववन the published text has लवण। Also the published text has शाकतिक्त after हरित which does not appear here.

प्रेक्षाभिः वृक्षादिनिरीक्षणैः चेष्टनैः लीलाचंक्रमणैः निमित्तभूतैरेतैः चिह्नानि आम्रादिमंजर्यः तथैव तुरगारोहणादियुता एव प्रत्याव्रजेयुः पुनर्निवर्तयेयुः।

**1/4/26 'एतेन रचितोद्ग्राहोदकानां ग्रीष्मे जलक्रीडागमनं व्याख्यातम्'।**

एतेन वक्ष्यमाणप्रकारेण उद्ग्राहाणि मकरादिरहितानि उदकानि येषु तानि रचितानि सोपानादिना तेषां कर्मणि षष्ठी क्रीडार्थं गमनं क्रीडागमनं व्याख्यातं भवति।

**1/4/27 'यक्षरात्रिः'** यक्षस्य कृष्णपक्षस्य रात्रिः।

**1/4/27 'कौमुदीप्रचारः'** कौमुदीप्रचारवति।

**'सुवसन्तकः'** वासन्तिकी वक्ष्यमाणक्रीडार्थां ग्राह्या तां दर्शयति।

**1/4/28 'सहकारभंजिका'** सहकारैः आम्रकुसुमैः भंजिका परस्परावतंसनम्।

**'अभ्यूषखादिका'** अपक्वचणकादिभक्षणक्रियाविशेषः। **'विसखादिका'** विसानां मृणालानां खादिका भुक्तिः। **'नवपत्रिका'** कृत्रिमविवाहलीला। **'उदकक्ष्वेडिका'** अन्योन्यं सुगन्धजलसेकः। **'पांचालानुयानं'** कृत्रिमपुत्रकलीला।

**'एकशाल्मली'** स्पृहयन्ती व्रतं एकस्यां स्पृहणीयायां शाल्मल्यां अधिरूह्य क्रीडा। **'यवचतुर्थी'** वैशाखशुक्लचतुर्थ्यां नायकानां परस्परं सुगन्धयवचूर्णप्रक्षेप इति पाश्चात्येषु प्रसिद्धाः। **'आलोलचतुर्थी'** श्रावण–शुक्लतृतीयां हिन्दोलक्रीडा। **'मदनोत्सवः'** मदनप्रतिकृतिपूजनम्। **'दमनभंजिका'** परस्परं सुगन्धविशेषावतंसनम्। **'होलाका'** वासन्तिकपरस्परं जलसेकसल्लापादि। **'अशोकोत्तंसिका'** अशोककुसुमैः शिरोभूषणरचना। **'पुष्पावचायिका'** पुष्पक्रीडा। **'कदम्बयुद्धानि'** कदम्बैः कदम्बमुकुलैः युद्धं यथाबलमन्योन्यप्रहरणम्। **'चूतलतिका'** चूतपल्लवावतंसनम्। **'इक्षुभंजिका'** इक्षुखंडमंडनम्।

**'तास्ताश्च माहिमान्यो देश्याश्च क्रीडा जनेभ्यो विशिष्टतरमाचरयेयुरिति सम्भूयक्रीडाः'*।**

माहिमान्यः शक्यनुरूपाः देश्यास्तत्तद्देशप्रसिद्धाः जनेभ्यः कुशलजनैरपि विशिष्टतरमधिकतरं आचारं आचरणं यथा भवति तथा आचरेयुः कारयेयुः सम्भूय मिलित्वा बहुभिः कार्या क्रीडा इति समाप्ता।

---

* BNS mentions the following additional games to those enumerated in the published text – यवचतुर्थी, आलोलचतुर्थी, मदनोत्सव, दमनभंजिका, होलाका, अशोकोत्तंसिका, पुष्पावचायिका, चूतलतिका, इक्षूभंजिका।

**1/4/29 'एकचारिणश्च विभवसामर्थ्याद्'।**

**1/4/30 'गणिकायाः नायिकायाश्च सखिभिर्वा नागरिकैश्च सह चरितमनेन व्याव्यातम्'।**

एकस्यां चरति विहरति एकत्र चरतीति एकचारी तस्य सखीभिः भार्याभिः नागरिकैश्च सखीभिः सहचरितं सहक्रीडनं गणिकायाः उक्तचतुःषष्टि–कलाभिज्ञायाः नायिकायाः वारांगनाया सखीभिः स्त्रीभिः नागरिकैः पुंभिश्च सहक्रीडनं वैभवसामर्थ्यात् वैभवे सति अनेन पूर्वोक्तप्रकारेण व्याख्यातं ज्ञेयम्। एकचारिणा वेश्यायाश्च प्रत्येकक्रीडां सम्भूयक्रीडां चोक्त्वा तयोर्नायकसंधायकान् पूर्वं च शब्दसूचितान् पीठमर्दादीन् सिंहावलोकनन्यायेन सलक्षणप्रयोजनं निर्दिशति –

**1/4/31 'अभिभवस्तु शरीरमात्रो मल्लिकाफेनककषायमात्रपरिच्छदः पूज्या–द्देशादागतः कलासु विचक्षणस्तदुपदेशेन* साधयेदात्मानमिति पीठमर्दः'।**

अभिभवनायिकापेक्षया किंचिदूनविभवः तु प्रकरणान्तरसूचकः शरीरमात्रः विविधालंकाररहितः मल्लिकाकुन्दमालिकाफेनकं नेपथ्यविशेषः काषायं कुसुमवस्त्रं एतदेव परिच्छेदः परिछिन्नस्यान्यद्व्यावर्तयतीति परिच्छेदः अलंकारः स यस्य पूज्यात् देशात् नायकसमीपाद् आगतः, कलासु पूर्वोक्तासु विचक्षणः प्रवीणः यः तदुपदेशेन तस्य नायकस्य वाक्येन नायिकासमीपं गत्वा गोष्ठ्यां तत्रत्यं कथासन्दर्भे वेशे तद्गृहप्रवेशने आत्मानं स्वयमेव साधयेत्। बहुमन्यते स पीठमर्द इत्यर्थः।

**1/4/32 'भुक्तविभवस्तु तत्रत्य एकगुणवान् सकलत्रगोष्ठयां वेशे च बहुमत–स्तदुपजीवी च विटः'।**

भुक्तभोगेन क्षपितविभवो यस्य तत्रत्य नायकसमीपवर्त्ती गुणवान् पूर्वोक्त– कलाभिज्ञः सकलत्र सदारः बहुमतः कुशलः तदुपजीवी तं नायकमुपसृत्य जीवामीति वादी यः स विटः। आलिकादिमान्।

**1/4/33 'एकदेशविद्यस्तु क्रीडनको विश्वास्य च विदूषको वैहासिको वा'।**

एकदेशविद्यस्तु सम्पूर्णकलानभिज्ञोऽपि क्रीडनकः क्रीडाकुशलः विश्वास्यः नायकस्यातिविश्वसनीयः चात् तदुपजीवी यः स विदूषकः वैहासिकोऽपि।

---

* 'गोष्ठ्या वेशोचिते च वृत्ते' that appears after विचक्षणस्तदुपदेशेन in the published text is not found here.

**1/4/34 'एते वेश्यानां नागराणां च मन्त्रिणः सन्धिविग्रहनियुक्ताः'।**

एते पीठमर्दादयो वेश्यानां नागराणां नायकानां मन्त्रिणः रहसि प्रियवक्तारः सन्धिविग्रहनियुक्ताः सन्धौ अपूर्वनायकघटने विग्रहे प्रणयकलहोत्पादने चात्पुनः सन्धाने नियुक्ताः नियोज्या भवन्ति।

गौणनियोज्यानाह –

**1/4/35 'एतैः भिक्षुक्यः कलाविदग्धाः मुण्डा वृषल्यो वृद्धगणिकाश्च व्याख्याताः'**

एतैः पीठमर्दादिभिः सन्ध्यादि कार्यस्य कर्त्तव्यत्वकथनेनेति शेषः। कलासु पूर्वोक्तासु विदग्धाः कुशलाः इदं सर्वत सम्बध्यते। भिक्षुक्यो भिक्षाव्याजेन संचारिण्यः मुण्डास्तापसवेषेण संचारिण्यो वृषल्यो दास्यः चादन्यो व्याख्याताः।

नियोज्यत्वेन एवं नागरिककृत्यमुक्त्वा ग्रामवासिकृत्यमाह—

**1/4/36 'ग्रामवासी च बहुमतः सजातान्विचक्षणान् कौतुहलिकान् प्रोत्साह्य नागरिकजनस्य वृत्तं वर्णयन् श्रद्धां जनयंस्तदेवानुकुर्वीत'।**

ग्रामवासी ग्रामीण बहुमतः सरूपवेषादिना बहुसंमतः चान्नगरिकवृत्ताभिज्ञः सजातान् अजानतो रूपादिमतः विचक्षणान् नर्मणि चतुरान् कौतुहलिकान् श्रोतुं कुतूहलाविष्टान् जनान्प्रतिवृत्तं कर्त्तव्यव्यापारं वर्णयन् बोधयन् प्रोत्साह्य श्रद्धां आचरणविश्वासं तदेव नागरिकवृत्तं अनुकुर्वीत आचरेत्।

**1/4/36 'गोष्ठी प्रवर्त्तयन् संगत्यामनुरंजयेत्।**

कर्मसु सहाय्येन चानुगृह्णीयादुपचरेत् चेति नागरिकवृत्तं' गोष्ठी नागरिककथां प्रवर्त्तयन् वर्णयन् संगत्यां स्वसंगतौ अनुरंजयेत् अनुवृत्तानुकुर्यात्। ततस्तान् कलाभिज्ञान् कृत्वा **'कर्मसु'** सम्भूय क्रीडासु **'अनुगृह्णीयात् सहाय्येन उपकारयेत्'** नियोजयेत्। चान्नायिका अपि नागरिकवृत्तवतीः कुर्यात् **'नागरिकवृत्तमिति'** समाप्तम्।

सिंहावलोकनन्यायेन पीठमर्दादीनां सन्ध्यादौ प्रवृत्तानां कर्त्तव्यगोष्ठीमार्योक्त्याह—

**1/4/37 'नात्यन्तं संस्कृतेनैव नात्यन्तं देशभाषया।**
**कथां गोष्ठीषु कथयन् लोके बहुमतो भवेत्'॥**

केवलसंस्कृतभाषया केवलदेशभाषया वा गोष्ठीषु सतीषु कथायां कांचिद्वर्णयन् पुमान् बहूनां स्वमतो न भवेत् किन्तूभाभ्यां वर्णयन्नित्यर्थः।

**1/4/38 'या गोष्ठी लोकविद्विष्टा या च स्वैरविसर्पिणी।**
**परहिंसात्मिका या च न तामवतरेद् बुधः॥'**

लोकविद्विष्टा सदस्यानभिमता स्वैरविसर्पिणी सन्दर्भरहिता परहिंसात्मिका परद्रोहसूचिका या गोष्ठी तां न वदेदित्यर्थः।

**1/4/39 'लोकचित्तानुवर्त्तिन्या क्रीडामात्रैककार्यया।**
**गोष्ठ्या सहचरन् विद्वान् लोके सिद्धिं नियच्छति'॥**

इति क्रीडासन्धिः। गोष्ठ्या सहचरन् गोष्ठीं कुर्वन् विद्वान् पीठमर्दादिः सिद्धिमभिमतं नियच्छति प्राप्नोति इति प्रकरणसमाप्तिसूचकः।

**इति वात्स्यायनसूत्रवृत्तौ प्रथमेऽधिकरणे चतुर्थोऽध्यायः समाप्तः।**

अध्याय–5

# नायक सहाय – दूतकर्म विमर्श प्रकरणम्

एवं चतुर्थे राजधान्यादौ निवासं तत्रत्यैः उद्यानक्रीडादिकं चांगभूतमुक्त्वा इदानीं अवसरसंगत्या गम्यानायिकास्तद्भेदाश्चाह—

**1/5/1 'कामश्चतुर्षु वर्णेषु सवर्णतः शास्त्रतश्चानन्यपूर्वाया प्रयुज्यमानः पुत्रीयो यशस्यो लौकिकश्च'।।**

चतुर्षु वर्णेषु ब्राह्मणादिषु मध्ये सवर्णतः सार्वविभक्तिकैस्तस्याः सः ब्राह्मणो ब्राह्मण्यामित्येव स्ववर्णसु। च शब्दात् स्वहीनवर्णासु शास्त्रतः ब्राह्मणाद्यन्यतमविवाहलब्धौ चादनुरक्तासु प्रयुज्यमानः सम्पादितः कामः सुखवृत्तिविशेषः। ब्राह्मणादेः पुत्रीयः स आमुष्मिकोपयोगि-पुत्रसम्पादकः यशस्यः नानादिगवच्छिन्नवृत्तिः स्वोत्कर्षविषयकज्ञानहेतुः लौकिकः अपकर्षविषयकतादृशज्ञानहेतुर्भवतीति शेषः।

**1/5/2 'तद्विपरीत उत्तमवर्णासु परिगृहीतासु च'।**

प्रतिषिद्धः उत्तमवर्णासु क्षत्रियस्य ब्राह्मणीत्येवं स्वस्वोत्कृष्टजातीयासु परपरिगृहीतासु परेषां कलत्रेषु सजातीयेष्वपि प्रयुज्यमानः कामः ब्राह्मणादेरिति चानुवर्त्तते। तद्विपरीतः उक्तानां पुत्रीयत्वादीनां विपरीतः आमुष्मिकानुपयोगि पुत्रापकर्षविषयकज्ञानर्योहेतुः। कुतः निषिद्धश्च तद्धेतौ न परदारानित्यादि श्रुतिनिषिद्धः।

**1/5/2 'अवरवर्णासु अनिरवसितासु वेश्यासु पुनर्भूषु च न शिष्टो न प्रतिषिद्धः'।**

अवरवर्णासु ब्राह्मणस्य क्षत्रियेत्येवं स्वहीनवर्णासु अनिरवसितासु अनिश्चितपुरूषविशेषासु वेश्यासु पुनर्भूषु पूर्वमन्यपरिगृहीता सती अन्येनोढा पुनर्भूः। न शिष्टकाम इति अनुवर्त्तते। ऋतुषु भार्यामुपेयात् इति वत् न विहितः स प्रतिषिद्धः। न परदारान् गच्छेदितिवन्नाति–निषिद्धः। यद्यपि ऋतौ भार्यागमनस्य रागप्राप्तत्वेन ऋतौ भार्यामुपेयादिति विधेः पंचपंचनखा भक्ष्या इत्यादि परसंख्याविधित्वेनेतरनिवृत्तिपरत्वाद् वेश्यादिगमनं निषिद्धमेव। तथापि न

परदारान् गच्छेदिति निषेधबलेन 'आग्नेयं चतुर्था करोति पुरोडाशं चतुर्था करोति' इतिवत्परदारमात्रपरमित्याशयेन निषिद्धमित्युक्तं। ननु तर्हि मन्वादिभिः वेश्यादिगमनं कुतो निषिद्धमित्याशंक्योक्तपुत्राद्यहेतुत्वादामुष्मिक यत्किंचित् दुःखहेतुत्वात् तथोक्तिः न तु परदारगमनवत्प्रवृत्तिप्रतिबन्धकबलवदनिष्टानुबन्धित्वादित्याह – 'सुखार्थत्वात्' आमुष्मिकदुःखसमानसुखहेतुत्वात् पुत्रीयाद्यहेतुत्वाच्चेति बोध्यम्।

यद्यपि ब्राह्मणस्य त्रिष्वित्यादिनाऽवरवर्णविवाहो मनुयाज्ञकल्क्याद्यभिहितः तथाप्यपत्नीत्वाभिप्रायेणाविहितत्वकथनम्।

**1/5/3 'तत्र नायिकास्तिस्त्रः कन्यापुनर्भूर्वेश्या चेति'।**

तत्र गम्यनायिकासु तिस्त्रः। तिस्त्रः एव कन्याः पत्न्यः चादवरवर्णाः।

**1/5/4 'अन्यकारणवशात् परपरिगृहीतापि पाक्षिकी चतुर्थीति गोणिकापुत्रः'।**

अन्यानि उक्तादिभ्यः कारणानि वक्ष्यमाणानि परपरिगृहीता परभार्या पाक्षिकी कदाचित् गम्या। कारणमेवाह –

**1/5/5 'सा यदा मन्यते स्वैरिणीयम्'।**

**1/5/6 'अन्यतोऽपि बहुशो खंडितचरित्रा तस्यां वेश्यायां इव गमनमुत्तमवर्णिन्यामपि न धर्मपीडाकारीति'।**

स नागरिकः इयं परभार्यापि अन्यतः अन्यपुरूषात् बहुशः बहुलं खंडितचरित्रा नाशितपातिव्रत्या अतः स्वैरिण्येवेति यदा मन्यते असाधारणलिंगैरनुमीयतेति तदा तस्या गमनं तन्निमित्तकसुखोत्पादनं न धर्मपीडाकारीति पतिव्रतायामिव नातिदोषाय।

**1/5/6 'पुनर्भूश्चेयम्'।**

**1/5/7 'अन्यपूर्वा न कापि शंकास्ति'।**

अन्यपूर्वां पूर्वमन्यभार्या सती यतः पुनर्भू स्वं प्राप्ताऽत तस्यां गमने शंका अन्यधर्मविषयिणी कारणान्तराण्याह– 'शंकितव्यमित्यादिना'।

**1/5/8 'पतिं वा महान्तमीश्वरमस्मदमित्रसंसृष्टमियमवगृह्य प्रभुत्वेन चरति। सा मया संसृष्टा तस्मादेनं व्यावर्त्तयिष्यति'।**

यद्वा अस्मदमित्रसंसृष्टं अस्माकममित्रेण शत्रुणा संसृष्टं अनुरक्तं महान्तमीश्वरं महाराजं

शंकितव्यमपकर्तृत्वशंकाविषयं क्रूरमिति यावत्। एतादृशमपि पतिमवगृह्य वशीकृत्य प्रभुत्वेन नियन्तृत्वेन इयं नायिका चरति तिष्ठति सा मया संसृष्टा वशीकृता सती तस्मात् अस्मच्छत्रोः एवं स्वपतिं व्यावर्तयिष्यति मित्रताशून्यं करोति निरूपितत्व पंचम्यर्थः इत्यादि द्वादशसूत्राणां परस्त्रियं प्रकुर्वीतेत्यग्रेणान्वयः।

**1/5/9 'विरसं वा मयि शक्तमपकर्तुं च प्रकृतिमापादयिष्यति'।**

शक्तं हिताहितकरणसमर्थं अपकर्तुकामं अपकरणेच्छुं अविरसं मित्रताशून्यं पतिमिति इयमित्यादि संसृष्टेत्यन्तं चेहानुवर्त्तते प्रकृतिं मम मित्रमापादयिष्यति कारयिष्यतीति वा।

**1/5/10 'तया मित्रीकृते न मित्रकार्यममित्रप्रतिघातमन्यद्वा दुष्प्रतिपादकं कार्यं साधयिष्यामि'।**

तया मित्रीकृतेन तन्निरूपितमैत्र्या साधनेन तत्पतिद्वारा मित्रकार्यं मित्रस्यास्मिन्मित्रस्य कार्यं अमित्रस्य शत्रोः प्रतिघातं अनिष्टं दुष्प्रतिपादकं मया दुःसम्पाद्यं अन्यत्कार्यं धनादिकं वा साधयिष्यामि प्राप्नुयामीति वा।

**1/5/11 'संसृष्टो वानया हत्वास्याः पतिमस्मद्भाव्यमैश्वर्यमेतदधिगमिष्यामि'।**

अनया संसृष्टः अनुरक्तः सन् अहमेतस्याः पतिं एतया हत्वा घातयित्वा अस्मात् अनेन तत्पतिना भाव्यं भोग्यं एतेन राज्यादिरूपमैश्वर्यं अधिगमिष्यामि प्राप्स्यामीति वा।

**1/5/12 'निरत्ययं वास्या गमनमर्थानुबद्धम्। अहं च निःसारत्वात्क्षीणवृत्त्युपायः। सोऽहमनेनोपायेन तद्धनमतिमहदकृच्छादधिगमिष्यामि।'**

अस्या अनया सहगमनं मेलनं निरत्ययं निरूपद्रवं अर्थानुबन्धि अर्थहेतुश्च। अहं च निस्सारत्वात् निर्धनिकत्वात् क्षीणवृत्त्युपायः अविद्यमानजीवनसाधनः अनेनोपायेन धनिकस्त्रीसमागमरूपेण अकृच्छ्रात् अनायासेन अहमधिगमिष्यामि प्राप्नुयामिति वा।

**1/5/13 'मर्मज्ञा वा मयि दृढमभिकामा सा मामनिच्छन्तं दोषविख्यापनेन दूषयिष्यति'।**

मर्मज्ञा मामकरहस्याभिज्ञा मयि दृढमभिकामा मां दृढमभिलषन्ती सा परकीया मामनिच्छन्तं स्वमनाभिलषन्तं दोषविख्यापनेन मदीयप्राक्तनदोषप्रकटनेन दूषयिष्यति अपयशस्करं करोतीति वा।

**1/5/14 'असद्भूतं वा दोषं श्रद्धेयं दुष्परिहारं मयि क्षेप्स्यति'**

मामभिकामा सा अनिच्छति मयीति शेषः। मयि अत्यन्तमुत्तर–सूत्रद्वयऽनुवर्त्तते। असद्भूतं अविद्यमानं श्रद्धेयं अनेन विश्वसितुं योग्यं दुष्परिहरं मया परिहर्तुमशक्यं दोषं अन्तःपुरद्रोहादिकं क्षेप्स्यति आरोपयिष्यति इति भीत्या –

**1/5/14 'येन मे विनाशः स्यात्'**

येन दोषारोपेण विनाशः प्राणवियोगः तादृशमिति पूर्वेणान्वयः।

**1/5/15 'अयतिमन्तं वा वश्यं पतिं मत्तो विभिद्य द्विषतः संग्राहयिष्यति'।**

अयतिमन्तं प्रतिवर्षे लभ्यधनं मत्सखं स्वस्याः वश्यं पतिं मत्तो विभिद्य विश्लेषयित्वा मयि विरक्तं कृत्वेति यावत्, द्विषतो मद्वेषिणा सह सार्वविभक्तिकस्तस्याः ग्राहयिष्यति अनुरक्तं कारयिष्यति वा।

**1/5/16 'स्वयं वा तै सह संसृज्येत्'।**

तैः मद्भ्रातृव्यैः संसृज्येत अनुरक्ता भवेत् तैः वह्वपकारयेत्। **'मदवरोधानां वा दूषयिता पतिरस्यास्तदहमपि दारानेव दूषयन् प्रतिकरिष्यामि।'**

अस्याः पतिः मदवरोधानां मत्परिग्रहाणां, कर्मणि षष्ठी, दूषयिता तत्तस्मादहमपि तस्य दारानेव दूषयन् दोषवतः कुर्वन् प्रतिकरिष्यामि तस्य प्रत्यपकारं करिष्यामीति वा।

**1/5/17 'राजनियोगाच्चान्तवर्त्तिनं शत्रुं वास्य निर्हनिष्यामि'**

एवं नाशीकृत्य तस्य अन्तर्वर्त्तिनं अधीनं शुत्रं राज्ञः शत्रुं राजनियोगात् निर्हनिष्यामि मारयिष्यामि।

**1/5/18 'यामन्यां कामयिष्ये सास्या वशगा। तां चानेन क्रमेणाधिगमिष्यामि'**

अन्यां यां श्यामां कामयिष्ये कामये सा अस्या वशगा सखी अतस्तां कामितामनेन एतदनुरागेण क्रमेण दिनक्रमेण अभिगमिष्यामि मदभिमुखीं करिष्यामीति वा।

**1/5/19 'कन्यामलभ्यां वात्माधीनमर्थरूपवतीं मयि संक्रामयिष्यति'।**

अलभ्यां अस्माभिरन्यथालभ्यां आत्माधीनां स्ववशां अर्थरूपवतीं अप्यर्थत इत्यर्थः। मनोरमं रूपमस्याः इति तथा कन्यां मुग्धां मयि संक्रामयिष्यति अनुरंजयिष्यत्येषेति वा।

**1/5/20 'ममामित्रो वास्याः पत्या सहैकीभावमुपगतस्तमनया रसेन योजयिष्यामि'।***

ममामित्रो मित्रं वास्या पत्या सहैकीभावमुपगतः मित्रत्वं गतः अतस्तमस्मद्मित्रं अनया प्रयोज्य कर्त्या रसेन वशीकरणौषधविशेषेण योजयिष्यामि मय्यनुरक्तं प्राणवियुक्तं वा कारयिष्यामि इति वा

**1/5/21 'इति साहसिक्यं न केवलं रागादेवेति। परपरिग्रहगमनकारणानि'।**

साहसिक्यं आमुष्मिकविरोध्यपि परस्त्रियं परदारगमनं रागादेव केवलं अनुरागमात्रेण हेतुना न प्रकुर्वीत न कुरूते जनः किं तु एवमादिभिः पूर्वोक्तैः परपरिग्रहस्य गमने कारणानि इति उक्तान्येव।**

**1/5/22 'एतरैव कारणैः महामात्रसम्बद्धा वा तत्रैकदेशचारिणी काचिदन्या वा कार्यसम्पादिनी विधवा पंचमीति चारायणः'***।**

महामात्रसम्बद्धा अवश्येन्द्रिया सती महामात्रैः महाराजसेनापतिभिः सम्बद्धा संयुक्ता विधवा एतैः अर्थानुबन्धिन्यादिभिः पूर्वोक्तैः कारणैः निमित्तैः गम्या। तत्र महामात्रमध्ये एकदेशेन एकस्मिन् चारिणी अनुरक्ता कार्यसम्पादिनी पूर्वोक्तधनादिस्वाभिमतकार्यसम्पादिनी अन्या कुलटा वा।

**1/5/23 'सैव प्रव्रजिता षष्ठीति सुवर्णनाभः'।**

सा उक्तकार्यकारिणी महामात्रसम्बद्धा प्रव्रजिता सन्यस्तभर्तृकापि।

---

* 'इत्येवमादिभिः कारणैः परस्त्रियमपि प्रकुर्वीत' part of the Sutra No. 1/5/20 is missing here.

** Gonikaputra was an authority in Artha Sastra also. No wonder then he considers wifes of influential people as important targets for sexual engagements. There he adds a caution against engaging the wives of certain persons where apprehension of harm is there. (7/5/31 K.S.)

The aforementioned schemings betray political/power culculations. His views are quoted in Kautilya's Artha Sastra.

*** Carayana also was an expert in polity. He was a minister of king Prasenjit. He counts a fifth type of nayika who is related to the King or ministers and is a widow. She could be used on highly placed government officials may be for expionage purpose.

**1/5/24 'गणिकाया दुहिता परिचारिका वानन्यपूर्वा सप्तमीति घोटकमुखः'।**

गणिकाया उक्तकलाभिज्ञवेश्यायाः तादृशी अनन्यपूर्वा पूर्वमुक्तैः अन्यैर्न भुक्ता दुहिता उक्तविशेषणद्वयवती परिचारिका दासी वा।

**1/5/25 'उत्क्रान्तबालभावा कुलयुवतिरूपचारान्यत्वादष्टमीति गोनदीर्यः'।**

उत्क्रान्तबालभावा उक्तः पूर्वोक्तः स चासावन्तः विशेषणं अनन्यपूर्वत्वकलाभिज्ञत्वरूपं बालायाः भावः बालात्वं अभिनवयुवतित्वं उत्क्रान्तबालभावौ अस्यास्त इति तथा कुलयुवतिः सत्कुलोद्भवा स्त्री उपकारान्यत्वात् अन्य ऐहिकसुखापेक्षयान्यः उपकारः आमुष्मिकोपकारि-पुत्रादिः अस्याः तत्वात् विशिष्यग्राह्येति शेषः। चारायणादिमतं दूषयत्याचार्यः–

**1/5/26 'कार्यान्तराभावादेतासामपि पूर्वास्वेवोपलक्षणम्, तस्माच्चतस्त्र* एव नायिका इति वात्स्यायनः'।**

एतासां विधवादीनां चतसृणां पूर्वासु कन्यापुनर्भूवेश्यापरकीयासु मध्ये आमुष्मिकविरोधित्वैहिकधनाद्युक्तसाधनत्वसाम्येन अनिषिद्धत्वसाम्येन च यथायोग्यं तृतीयादिष्वन्तर्भावः। कुतः कार्यान्तराभावात् उक्तकार्याद्धनादिरूपादन्यफलाभावात् तस्मात् अतः चतस्त्रः उक्ताः।

**1/5/27 'भिन्नत्वात्तृतीया प्रकृतिः पंचमीत्येके'।**

तृतीया प्रकृतिः बन्ध्यापि। कुतः भिन्नत्वात् बहुकालसुखहेतुत्वेन उक्ताभ्यो विलक्षणत्वात्।

एवं नायिकानां चातुर्विध्यमुक्त्वा नायकभेदमाह–

**1/5/28 'एक एव तु सार्वलौकिको नायकः'।**

तु पूर्वविच्छेदकः सार्वलौकिकः अस्या अयं पतिरिति सर्वजनविदितो नायक एक एव। एवकारव्यावर्त्तमेवाह –

**1/5/28 'प्रच्छन्नस्तु द्वितीयो विशेषालाभात्'।**

---

* For obvious reasons Vātsyāyana approved of Gonikaputra's addition of 'other's wife with considerations of other reasons'- 'अन्यकारणवशात् परपरिगृहीतापि' (1/5/4 K.S.) to the original three mentioned in 1/5/3 K.S.— तत्र नायिकास्तिस्त्रः कन्यापुनर्भूर्वेश्या चेति।

प्रच्छन्नः पतित्वेन सर्वैरविदितः विशेषलाभात् पूर्वस्मात् सुखातिशयलाभात् द्वितीयश्च नायक इत्यनुषज्यते। एवं नायिकाद्वयनायकभेदमुक्त्वा प्रत्येकं त्रैविध्यमाह–

**1/5/28 'उत्तमाधममध्यमतां च गुणागुणत एवैषां विद्यात्'।***

एषां एताश्च एते च नायिकानायकाः। तेषां गुणतः द्वादशांगुलत्वादि-वक्ष्यमाणलिंगपरिमाणात् अगुणतः तन्न्यूनपरिमाणतः उत्तमाधममध्यमतां उत्तमादिरतमत्वं अतस्त्रैविध्यमपि बोध्यः। एवं इह परोपयोगिनीः ऐहिकमात्रोपयोगिनीश्चोक्त्वा उभयानुपयोगिनीराह– अगम्या इत्यादिना'।

**1/5/29 'अगम्यास्त्वेवैताः'** एताः वक्ष्यमाणाः अगम्या एव उभयानुपयोगितयेति शेषः। तु पूर्ववैलक्षण्यार्थः।

**'कुष्ठिन्युन्मत्ता पतिता भिन्नरहस्या प्रकाशप्रार्थिनी गतप्राययौवनातिश्वेतातिकृष्णा दुर्गन्धा सम्बन्धिनी सखी प्रव्रजिता सम्बन्धिसखि श्रोत्रियराजदाराश्च'।**

कुष्ठिनी रोगविशेषवती भिन्नरहस्या अन्यासक्तात्वेन सर्वजनविदिता प्रकाशार्थिनी प्रकाशयोगेच्छुः सम्बन्धिनी सपिण्डा सखी भगिनीत्वेन व्यवहृता प्रव्रजिता तपस्वीवेषा सम्बन्धीः भ्राता सखा मित्रं श्रोत्रियः कुलाचारादिसम्पन्नः राजादेशाधीश एतेषां दाराश्च दृष्टादृष्टविरोधात् वर्ज्या इति शेषः।

**1/5/30 'दृष्टपंचपुरूषा नागम्या काचिदस्तीति बाभ्रवीयाः'।**

दृष्टपंचपुरूषा दृष्टाः कूटस्थमारभ्य परिगणिताः पंच पुरूषा यस्याः सा न अगम्या, गम्या।

**1/5/31 'सम्बन्धिसखिश्रोत्रियराजदारवर्जमिति गोणिकापुत्रः'**

कुष्टिन्यादिषु मध्ये सम्बन्धिन्यादिदाराः दृष्टादृष्टबलवदनिष्टहेतुतया सुतरां त्याज्याः। एवं नायिकानायकभेदात् संवर्ज्ज्यानुक्त्वा तत्संधायकमित्राण्याह –

**'सहपांसुक्रीडितमुपकारसम्बद्धं समानशीलव्यसनं सहाध्यायिनं**
**1/5/32 यश्चास्य मर्माणि रहस्यानि च विद्यात् यस्य चायं धात्रपत्यं सहसंवृद्धं'।**
**'पितृपैतामहमविसंवादकमदृष्टवैकृतं वश्यं ध्रुवमलोभशीलम-**
**1/5/33 परिहार्यममन्त्रविस्त्रावीति मित्रसम्पत्'।**

अस्य स्वस्य रहस्यानि रहसि कृतानि मर्माणि छिद्राणि दोषानीति यावत् यः विद्यात्

* BNS misses out the closing part of this Sutra-तांस्तूभयोरपि गुणागुणान्वैशिके वक्ष्यामः।

यस्य चायं मर्मेति पदत्रयमनुवर्त्तते यस्य पुरूषस्य रहस्यं मर्माणि अयं नायको विद्यात् तमविसंवादि अमिथ्यावादि अदृष्टवैकृतं अज्ञातसेर्ष्यालिंगं वश्यं स्वस्यानुकूलं ध्रुवं स्वस्मिन् स्थिरानुरागं अलोभशीलं अन्यालोभ्यस्वभावं अपरिहार्यमन्त्रस्तापि अपरिहार्यं अवश्यवक्तव्यमेव मन्त्रं परस्परकृतगोप्यगोष्ठीमध्ये परेभ्यः श्रावयतीति तथा इदं सर्वं सहपांसुक्रीडितमित्यादौ सर्वत्रान्वेति सहपांसुक्रीडितं सह स्वेन साकः पांसुभिः क्रीडितवान् क्रीडितं उपकारसम्बद्धं स्वोपकृतं समानशीलव्यसनं स्वेन समाने शीलव्यसने स्वभावनायिकाचिन्ते यस्य सहाध्यायिनं स्वेन समाने शीलव्यसने स्वेच्छा सह कामशास्त्राद्यध्येतारं धात्र्यपत्यं सहसंवृद्धं स्वेन सह वर्धितं पितृपैतामहं कुलदासं।

चारायणाभिमतमित्राण्याह–

**1/5/34 'रज़कनापितगोपालमालाकारगान्धिकताम्बूलिकशौंडिकभिक्षुकपीठमर्द– विटविदूषकमित्रास्तद्योषिन्मित्राश्च नागरिकाः स्युरिति चारायणः'।***

रजकादयस्तद्योषिता वा मित्राणि येषामिति बहुव्रीहिः।

**1/5/35 'यदुभयोः साधारणमुभयत्रोदारं विशेषतो नायिकायाः सुविस्त्रब्धं मित्रं'**

यत् मित्रं उभयोः स्वस्य संधेयाश्च साधारणं नायिका विशेषतो विशेषेण विस्त्रब्धं विश्वसनीयं, यश्च उभयत्र उभयोरपि उदाहारं उदकाहर्तृ तदपि मित्रमित्यन्ये। एवं मित्राण्युक्त्वा तेषां दौत्यनियुक्तानां कार्यमाह – 'तत्रदूतकर्म'।

**1/5/36 'पटुता धाष्ट्र्यमिंगिताकारज्ञानं अनाकुलत्वं परमर्मज्ञता प्रतारणकाल-ज्ञानं देशज्ञानं कार्येषु विषह्यबुद्धित्वं लघ्वी प्रतिपत्तिः सोपाया चेति दूतगुणाः'।**

तत्र नायिकाविषये दूतानां दौत्यनियुक्तानां उक्तानां कर्म उच्यते इति शेषः। धृष्टत्वं धौर्त्यं इंगिताकारज्ञानं नायकयोः इंगितमभिप्रायः आकारस्तदभिव्यंजकमुखविकासादिः अनाकुलत्वमचापल्यं परमर्मज्ञता परमर्मज्ञापनं कार्येषु विषह्यबुद्धित्वं शीघ्रप्रतिभासोपाया बुद्धिकौशल्यजन्यालघ्वी प्रतिपतिः अन्यदीयसूक्ष्मचिह्नदर्शनं। एवं मित्रादिकं तत्कर्म चोक्त्वा तद्वत् कार्यसिद्धिमभियुक्तोत्याह–

---

* The published text of Kama Sutra records वात्स्यायन instead of चारायण। However, the present commentary writer's assertion is a reiteration of his earlier statement 'चारायणाभिमतमित्राण्याह'।

**1/5/37 'आत्मवान्मित्रवान्युक्तो भावज्ञो देशकालवित्।**
**अलभ्यामप्ययत्नेन स्त्रियं संसाधयेन्नरः'॥**

आत्मा बुद्धिः प्राशस्त्ये मतुप् युक्तो युक्तिमान्।

**इति श्रीवात्स्यायनसूत्रवृत्तौ प्रथमाधिकरणे पंचमोऽध्यायः। समाप्ते चाधिकरणे पंचमोऽध्यायः। समाप्तं चाधिकरणं नायकसहायदूतीविमर्श इति समाप्तं। प्रथमाधिकरणं।**

# 2. साम्प्रयोगिक– अधिकरण

### अध्याय –1

## रतावस्थान – प्रकरण

भास्करनृसिंहकविना कृतिनामानां आनन्दसम्पदभिवृध्यै श्रीकामसूत्रवृत्तौ साम्प्रयोगिकमत्र तन्यते विशदम्।

साम्प्रयोगिक– अधिकरण – रतावस्थान प्रीतिविशेषप्रकरण

एवं अंगजातमुक्त्वा प्रधानं सप्रपंचं विशदयितुं पूर्वोक्तनायिकानायकयोः अवान्तरभेदे प्रधानभेदहेतुमाह–

**2/1/1 'शशो वृषोऽश्व इति लिंगतो नायकविशेषा। नायिका पुनर्मृगी वडवा हस्तिनी चेति'॥**

लिंगतो सुखहेतुत्वावयवविशेषेण न्यूनमध्यमाधिकमानेन आयामपरिणाहाभ्यां षण्णवद्वादशांगुलिमानेनेति यावत्। अवच्छिन्नत्वं तृतीयार्थं यथाक्रमं शशोवृषोऽश्व इति तत्तज्जातीयनायकविशेषाः। एवं नायिकाविशेषाश्च ध्येयाः।

**2/1/2 'तत्र सदृशसम्प्रयोगे समरतानि त्रीणि'।**

तत्र उक्तेषु मध्ये सदृशसम्प्रयोगे लिंगतस्तादृशयोर्यथाक्रमं शशस्य मृग्येत्येवं सम्बन्धे त्रीणि समरतानि। विपर्यये वृषस्य मृग्या तुरगस्य वडवया तस्यैव मृग्या वृषस्य करिण्या शशस्य वडवया तस्यैव करिण्येत्येवं लिंगतो न्यूनाधिकसम्प्रयोगेन सति 'विषमरतानि षट्'।

**2/1/3 'विषमेष्वपि पुरूषाधिक्यं चेदनन्तरसम्प्रयोगे द्वे उच्चरते। व्यवहितमेकमुच्चतररतम्।'**

विषमेषु षट्स्वपि मध्येऽनन्तरसंयोगे अनन्तरयोः सन्निहितयोः वृषाश्वयोः क्रमेण मृगीवडवाभ्यां संयोगे पुरूषाधिक्यमिति द्वे आद्ये व्यवहितं तृतीयं व्यवहितं एकं उच्चतररतम्।

2/1/3 **'विपर्यये पुनर्द्वे नीचरते'** विपर्यये विषमसंप्रयोग एव द्वे चतुर्थपंचमे।

2/1/3 **'व्यवहितमेकं नीचतररतम्'।** व्यवहितं चरमम्।

2/1/3 **'तत्र समानि श्रेष्ठानि'**

तत्र उक्तनवरतेषु श्रेष्ठानि सुखाधिक्यहेतुत्वादिति शेषः।

2/1/3 **'तरशब्दांकिते द्वे कनिष्ठे। मध्यमानि श्रेष्ठानि'।**

तरशब्दांकिते विषमेषु तरपदघटितनामनी तृतीयषष्ठे कनिष्ठे अतिजघन्ये अल्पसुखहेतुत्वात्, शेषाणि चत्वारि मध्यमानि अनतिसुखहेतुत्वात्।

2/1/4 **'साम्येति तूच्चाकं नीचांकाज्ज्यायः। इति प्रमाणतो नवरतानि'।**

साम्येति समरतेष्वपि उच्चाकं यत्किंचिदुक्ताधिकमानांकविशेषसंयोगजं नायकस्य नीचांकात् उक्तविपरीतजात् ज्यायः। सुखाधिक्यहेतुः प्रमाणतः गुह्यायामपरिणाहाभ्याम्।

2/1/5 **'यस्य सम्प्रयोगकाले प्रीतिरूदासीना वीर्यमल्पं क्षतानि च न सहते स मन्दवेगः'।**

संप्रयोगकाले नायिकयेति शेषः। यस्य पुरूषस्य प्रीतिः वृत्तिविशेषः उदासीनाल्पक्षतानि नायिकाकृतानि न सहते स मन्दवेगाख्यो नायकः।

2/1/6 **'तद्विपर्ययौ मध्यमचण्डवेगौ'।**

तस्मान्मन्दवेगाद्विपर्ययौ विपरीतधर्मौ यथाक्रमं मध्याधिकनायिकासम्प्रयोग-कालीनप्रीतिवीर्यनखक्षतसहनौ मध्यचण्डवेगाख्यौ नायकौ।

2/1/6 **'तथा नायिकापि'।**

तथा नायकवत् नायिकापि मन्दमध्यचण्डवेगा भेदेन त्रिविधा।

2/1/7 **'अत्रापि प्रमाणवदेव नवरतानि'।**

प्रमाणवत् षडंगुलाद्युक्तपरिमाणलिंगशशादिनायकत्रितयप्रयुक्तरतानीव अत्रापि उक्तमन्दमध्यचण्डवेगाख्यनायकप्रयुक्तान्यपि रतानि समविषमभेदेन नव भवतीति शेषः। अत्रापि उक्त मन्दादिवेगानां तादृशनायिकाभियोगे त्रीणि समरतानि। मन्दमध्यमयोः यथाक्रमं मध्यमन्दाभ्यां चण्डवेगया च योगे चत्वारि, चण्डस्य आभ्यां योगे द्वे इति विषमाणि षट् बोध्यानि।

**2/1/8 'तद्वत्कालोऽपि शीघ्रमध्यचिरकाला नायकाः'।**

कालतः शीघ्रमध्यचिरकालेन भोगार्थिन्यः इति शेषः। क्रमेण शीघ्रकाला–द्याख्या नायिकाश्चकारान्नायकाः तद्वत्त्रिविधाः तत्प्रयुक्तरतान्यपि नव–विधानीत्यर्थः। अत्रापि पूर्ववत्क्रमेण शीघ्रकालक्रमेण रताभियोगे त्रीणि समरतानि। तथा प्रथमस्य द्वितीयतृतीयाभ्यां द्वितीयस्य प्रथमतृतीयाभ्यां तृतीयस्य प्रथमद्वितीयाभ्यां योगे विषमाणि षट्।एवं सप्तविंशति रतानि। प्रथमनवके नेतरयोर्योगे त्वनन्तानीति बोध्यम्।ननु स्त्रीणां कण्डूव्यतिरेकेण सुखस्यैवाभावात् तदर्थं चिरकालसुरतार्थित्वं कथमित्याशंकते।

**2/1/9 'तत्र स्त्रियां विवादः'।**

तत्र नायिकानायकयोर्मध्ये स्त्रीसम्बन्धि भावो तृप्तौ विवाद्ः मानाभावः।

तदेव स्पष्टयति –

**2/1/10 'न स्त्री पुरूषवत् भावमधिगच्छति'।***

पुरूषवद् पुरूष इव वैधर्म्यदृष्टान्तः एवावधारणे वा भावं सुखं नाधिगच्छति। ननु तर्हि तस्याः रतौ कुतः प्रवृत्तिरित्यत आह–

**2/1/11 'सातत्त्यात्वस्याः पुरूषेण कण्डूतिरपनुद्यते'। ****

पुरूषेण तत्संयोगेन तस्याः स्त्रियः कण्डूतिः सातत्त्यात् नियमेनापनुद्यते।

**2/1/12 'सा पुनराभिमानिकेन सुखेन संसृष्टा रसान्तरं जनयति। तस्मिन् सुखबुद्धिरस्याः'।**

सा स्त्री पुनः आदौ आभिमानिकसुखेन अहमनेन प्रार्थितास्मीत्यभिमानाख्य–वृत्तिविशेषजसुखेन हेतुना पुरूषेण सह संसृष्टा सती ततः रसान्तरं कण्डूतिनिवृत्तिं जनयति प्राप्नोति। तस्मिन् कण्डूति अपगमेऽस्याः सुखबुद्धिः कण्डूतेर्दुःखहेतुत्वेन तदपगमे क्षुधितस्य तन्निवृत्ताविव भवति सुखधीरित्यर्थः। ननु पुरूषस्यैव सुखं स्त्रियास्तु कण्डूत्यपगमे

---

* According to Yashodhara this is the opinion of Svetaketu.

** The itching in vagina is caused by worms in blood stream. Yashodhara quotes from Nāgara Sarvasva in support.

रक्तजाः कृमयः सूक्ष्मा मृदुमध्योग्रशक्तयः।

स्मरसद्मसु कण्डूतिं जनयन्ति यथाबलम्।। 14/14 N.S.

सुखभ्रान्तिमात्रमित्युक्तमयुक्तं मानाभावात्। परसुखासुखयोः परेन्द्रियाग्राह्यत्वात् तव कथं सुखमिति प्रष्टुं ममैवं सुखमिति वक्तुं चाशक्यत्वेन शब्दाभावाल्लिंगाभावाच्चेति तटस्थः शंकते–

**2/1/13 'पुरूषप्रतीतेश्चानभिज्ञत्वात्कथं ते सुखमिति प्रष्टुमशक्यत्वात्'।**

**2/1/14 'कथमेतदुपलभ्यत इति चेत्'।**

पुरूषप्रतीतेः पुरूषसुखस्य स्त्रियः तदभावस्य चानभिज्ञत्वात् अस्या प्रत्यक्षत्वात् सुखं कथमस्ति वा नवेति प्रष्टुमशक्यत्वात् रहस्यसुखस्येति शेषः। इदमुत्तरस्याप्युपलक्षणम्। तथा च प्रत्यक्षाद्यभावात् एतत् स्त्रीपुरूषयोः सुखं तदभाववत्वं कथं केन प्रमाणेन उपलभ्यते ज्ञायते भवतेति शेषः।

पुरूषः भाववान् तदुद्देशेन प्रवृत्तत्वे सति तदितरप्रतिबन्धके निवृत्तिमांस्तद्दान् यथा याचकः स्वतो विरक्ते व्यभिचारवारणाय अत्यन्तं कार्यत्वावच्छिन्नं प्रति स्वस्य प्रतिबन्धकत्वादसिद्धिवारणायेतरपदं स्त्रीभावरहिता स्वाभाविकप्रवृतिनिवृत्ति – उभयशून्यत्वात् दासवत्पुरूषे व्यभिचारवारणायोभयपदमित्यनुमानात्तदवगम इत्याह –

**2/1/14 'पुरूषो भावमधिगम्य स्वेच्छया विरमति रमते वा अतस्तस्याः तद्भावो न स्त्रियमपेक्षते न त्वेवं स्त्रीत्यौद्दालकिः'।**

अधिगम्य लब्ध्वा स्वेच्छया स्त्र्यैणभावाधिगममज्ञात्वा विरमति रतेरिति शेषः।स्त्रियं स्त्रीसम्बन्धीभावाधिगमं नापेक्षते न प्रतीक्षते तस्यास्तदभावात् नत्वेवं स्त्री स्वेच्छया विरमति रमते वा। अतस्तस्यास्तदभावोऽनुमीयत इत्यर्थः। स्त्री तत्प्रयुक्तभाववती शीघ्रनिवृत्ते नायके सेर्ष्यात्वात् चिरप्रवृत्ते अनुरक्तत्वाच्च व्यतिरेकेण विरक्तवत् इति स प्रतिपक्षमाशंकते –

**2/1/15 'तत्रैतत्स्यात्। चिरवेगे नायके स्त्रियोऽनुरज्यन्ते, शीघ्रवेगस्य भावमनासाद्य अवसानेऽभ्यसूयिन्यो भवन्ति। तत्सर्वं भावप्राप्तेश्च लक्षणम् इति'**

तत्र पूर्वानुमाने एतद्वक्ष्यमाणं स्यात् स प्रतिपक्षं स्यात्। स्त्रियः चिरवेगे बहुकालरते नायकविषये अनुरज्यन्ते। अनुरक्ता हि ता एवं शीघ्रवेगस्य शीघ्रनिवृत्तनायकविषये अवसाने शीघ्रनिवृत्तौ निमित्तभूतायां अभ्यसूयिन्यश्च भवन्ति हि यदि भाववती न स्यात्तदाप्रवृतेऽनुरक्ताऽन्यस्मिन्नेर्ष्या च न स्यात्।न चेयं तथा तस्मान्न तथेत्यनुकूलतर्केण साध्यं साधयति तत्सर्वमित्यादिना तत्सर्वमनुरक्तत्वादिकं स्त्रियाः भावप्राप्तेरप्राप्तेश्च लक्षणं

साधकं भवतीत्यर्थः।इति शब्दः शंकासमाप्तौ। अतिपामायमानानुरागान–नुरागविषयदृढादृढकाष्ठादौ व्यभिचारेण दूषयति –

**2/1/16 'तच्च न। कंडूतिप्रतिकारोऽपि हि दीर्घकालं प्रिय इति। एतदुपपद्यत एव। तस्मात्सन्दिग्धत्वादलक्षणमिति'।**

तच्चानुरक्तत्वादिकं न साध्यसाधकमिति शेषः। कुतः दीर्घकाल यथा तथा कण्डूतिप्रतिकारः कण्डूतिः प्रतिक्रियते निवर्त्यतेऽनेनेति तथा काष्ठादिः प्रियः प्रीतिविषयो हि अपि शब्दाच्चिरं कण्डूत्यनिवर्त्तकस्तृणादितरप्रियो हि इति हेतौ तद्भावाभावसाधकमनुमानं उपपद्यत इति साध्यसाधकमेव तस्मात् उक्तानुमानात् संदिग्धत्वात् साधकहेत्वाभावाच्च लक्षणं अप्रामाण्यं स्त्रीणां भावप्राप्तिः इति शंकासमाप्तिसूचकः। स्त्रियः नायकादधिकभाववत्यः गर्भिणीत्वात् व्यतिरेकेण पुरूषः कण्डूत्यपनोदस्तु छायागन्धादिवदानुषंगिकमिति परिहरति 'संयोगेत्यादि'–

**'संयोगे योषितः पुंसां कण्डूतिरपनुद्यते।**
**2/1/17 तच्चाभिमानसंसृष्टम् सुखमित्यभिधीयते॥'**
**'सातत्त्याद्युवतिरारम्भात्प्रभृति भावमधिगच्छति।**
**पुरूषः पुनरन्त एव, तदुपपन्नतरं, न ह्यसत्यां॥**
**2/1/18 'रतिप्राप्तौ गर्भसम्भव उपपद्यत इति बाभ्रवीयाः'।**

पुंसां कर्त्तासंयोगे सति योषितः कण्डूतिरपनुद्यत इति यत् तत्तु अभिमानसंसृष्टं आभिमानिकं अतस्तस्मिंस्तद् बुद्धिरभिमानः सुखं आनुषंगिकं भावापागम इवाभिधीयते प्राप्यते। मुख्यं तु युवतिः आरम्भात्प्रभृति संयोगप्रभृति सातत्यात् अविच्छेदेन भावमिच्छाविशेषं सुखविशेषं वा उपगच्छति। पुरूषः पुनरन्त एव भावमुपगच्छतीत्यनुषंगरति तत्स्त्रीणां सातत्यं भावः उपपन्नतरं, कुतः रतिप्राप्तौ भावप्राप्तौ असत्यां गर्भसम्भवो न ह्युपपद्यतेऽतो भावोऽनुमीयत इति बाभ्रवीया मन्यन्ते। ननु स्त्रियः नारम्भं सततसुखवत्यः आरम्भे मध्यस्थचित्तत्वात् अनतिसहिष्णुत्वात् विरामाभीप्सत्वात् मध्ये रागाधिक्यत्वात् पुरूषवदिति प्रतिपक्षं शंकते–

**2/1/19 'अत्रापि तावेवाशंकापरिहारौ'।**

अत्रापि बाभ्रवीयानुमानेऽपि तावेव वक्ष्यमाणावेव द्रष्टव्या इति शेषः। शंकामेवाह–

**2/1/20 'भूयस्तत्रैतत्सातत्येन रसप्राप्तावारम्भकाले मध्यस्थचित्तता नातिसहिष्णुता च। ततः क्रमेणाधिको रागयोगः शरीरेऽपि च निरपेक्षत्वं अन्ते च विरामाभीप्सेत्येतदुपपन्नमिति'।**

तत्र सम्प्रयोगे स्त्रीणां सातत्येनाविच्छेदेन रसप्राप्तौ साध्यमानायां तदनुमानं स्यात् दोषयुक्तं स्यात्।अप्रयोजकत्वशंकां तर्केण परिहरति–'आरम्भकाल इति' साध्याभाव इति शेषः। आरम्भकाले सुरतारम्भे स्त्रीणां मध्यस्थचित्तता मन्दानुरागः अनुपपन्नमित्यनेनान्वयः। नातिसहिष्णुः नखक्षताद्यसहनं। ततः अनन्तरं क्रमेण उत्तरोत्तरम् अधिको रागयोगः उत्साहविशे–षाधिक्यं। तस्यैव विवरणं शरीरेऽपि च निरपेक्षत्वमपेक्षाभावः अतिनखक्षतादि सहिष्णुता अन्ते किंचित्कालानन्तरं विरामाभीप्सा रति निरपेक्षा। एतत् सर्वं उपपन्नं स्यात् न चैवं तस्मान्न तथा इति समाप्तौ। यत्तदुपक्रमे उदासीनस्वभावं व्यापारासहिष्णु च मध्ये व्यापारवच्च ततः तद्विरामवच्च तत् आरम्भमभिव्याप्यावच्छिन्नव्यापारवन्न भवति इति सामान्यव्याप्तौ कुलालचक्रे भ्रमरके च व्यभिचारेण दूषयति 'तच्चनेत्यादिना'।

**2/1/21 'तच्च न। सामान्येऽपि भ्रान्तिसंस्कारे कुलालचक्रस्य भ्रमरकस्य वा भ्रान्तावेव वर्त्तमानस्य प्रारम्भे मन्दवेगता ततश्च क्रमेण पूरणं वेगस्येत्येतदुपपद्यते। धातुक्षयाच्च विरामाभीप्सेति। तस्मादनाक्षेपः'।**

कुलालचक्रस्य कुलालसम्बन्धिघटनिर्माणाभिमुखचक्रस्य भ्रान्तावेव मानस्य भ्रमणयुक्तस्य भ्रमरकस्य क्रीडासाधनविशेषस्य च भ्रान्तिसंस्कारे भ्रमणव्यापारे सामान्येऽपि उपक्रममारभ्य सत्यपि प्रारम्भे विरामस्याप्युपलक्षण– मिदं। मन्दवेगता अल्पवेगता तदनन्तरं वेगस्य क्रमेण पूरणं वेगाधिक्य–वत्वं उपपद्यते। तस्माद्भ्रमणन्यूनाधिकभावः दृष्टः। तथा चारम्भप्रभृति–दृष्टभ्रमणस्यापि वेगतारतम्येन न्यूनाधिकभाव उपपद्यत इति भावः। विरामेच्छायां निमित्तमाह –'धात्विति'।रागादि धातुः।उक्तार्थेऽभियुक्तोक्तिं संवादयति –

**'सुरतान्ते सुखं पुंसां स्त्रीणां तु सततं सुखम्।**
**2/1/22 धातुक्षयनिमित्ता च विरामेच्छोपजायते'॥**

**2/1/23 'तस्मात् पुरूषवदेव रसव्यक्तिर्योषितोऽपि द्रष्टव्या'।**

पुरूषवदेव पुरूषापेक्षया अधिकैव व्यक्तिरभिव्यक्तिः। ननु इन्द्रियविशेषजन्यता–वच्छेदकजात्यवच्छिन्नसुखोद्देश्यकप्रवृत्तिमतोर्यूनोः कथं फलभेद इत्याशंक्य कर्तृत्वाधिकरणत्वनिमित्तकविजातीयाभिमानादिति परिहरति 'कथमित्यादिना।

**2/1/24 'कथं हि समानायामेवाकृतावेकार्थमभिप्रपन्नयोः कार्यवैलक्षण्यं स्यात्'।**
**2/1/25 'उपायवैलक्षण्यादभिमानवैलक्षण्याच्च'**

**'उपायवैलक्षण्यं च निसर्गात्। कर्ता हि पुरूषोऽधिकरणं युवतिः। अन्यथा क्रियां कर्त्ता प्रतिपद्यते अन्यथा चाधार इति। अभिमानवैलक्षण्यमप्युपाय–**

**2/1/26 वैलक्षण्यादभियोक्ताहमिति पुरूषोऽनुरज्यते। अभियुक्ताहमनेनेति युवतिरिति वात्स्यायनः'।**

आकृतौ जातौ समानायां इन्द्रियविशेषसंयोगजन्यतावच्छेदकतया फलद्वय एकस्यां सिद्धायां अर्थं तादृशैकजात्यवच्छिन्नफलं अभिपन्नयोः उद्दिश्यप्रवृत्तयोः यूनोरिति शेषः। कार्यवैलक्षण्यं फलतारतम्यं कथं कस्माद्धेतो स्यात् तर्हि हेतौ परिहरति –उपायवैलक्षण्यात् विजातीयव्यापारात् जन्यत्वं पंचम्यर्थः।

अभिमानवैलक्षण्यात् विजातीयमानसवृत्तिविशेषात् कार्यवैलक्षण्यमित्यनुषज्यते। सर्गात् कर्तृकरणत्वरूपधर्मभेदात् जन्यत्वं पंचम्यर्थः। उपायवैलक्षण्यं विजातीयक्रिया भवति।तदेव विशदयतिअन्यथा विजातीयां उपायवैलक्षण्यात् विजातीयक्रियातः अभिमानवैलक्षण्यं विजातीयाभिमानः भवति।तमेवाहअभियोक्ताहं योषित् वृत्तिसंयोगहेतुकृत्याश्रयः अभियुक्ता पुंकर्तृकसंयोगाश्रया। अनेन कर्त्तरि तृतीया। ननु कर्तृत्वादिभेदेन क्रियावैजात्यवत् तद्वैजात्येन फलस्य वैजात्यमेव स्यात् न तारतम्यमित्याशंक्य कर्त्ताधारयोर्भिन्नतया क्रियावैजात्येऽपि क्रियायाः संयोगद्वारा हेतुत्वेन संयोगस्य चैकत्वात् फलवैजात्यामिति समाधत्ते।

**2/1/27 'तत्रैतत्स्यादुपायवैलक्षण्यवदेव हि कार्यवैलक्षण्यमपि कस्मान्न स्यादिति। तच्च न। हेतुमदुपायवैलक्षण्यम्। तत्र कर्त्ताधारयोर्भिन्नलक्षण-त्वादहेतुमत्कार्यवैलक्षण्यमन्याय्यं स्यात्। आकृतेरभेदादिति'।**

तत्र तथा सति एतद्वक्ष्यमाणं दूषणं उपायवैलक्षण्यवत् कर्त्राधिकरणत्वभेदाद् क्रियावैजात्यवत् कार्यवैलक्षण्यं फलवैजात्यं कस्मात् हि हेतौ समाधत्ते तच्च नेति उपायवैलक्षण्यं वैजात्यं हेतुमत्कर्त्राधारभेदहेतुकं युक्तं।कुतः भिन्नलक्षणत्वात् भिन्नस्वरूपत्वात् कार्यवैलक्षण्यं फलवैजात्यं तु अहेतुमत् भिन्नासाधारणहेतुशून्यं अतः आकृतेः द्वारभूतसंयोगस्यान्याय्यमयुक्तम्। ननु फलमेकत्वावच्छिन्नं भवितुमर्हति संहतानेककारणजन्यत्वात्। घटादिवदित्यनुमानेन यूनोः पृथक्सुखं न स्यादित्याशंक्य मेषाद्यभिघातजन्यदुःखादौ व्यभिचारान्नेदमित्याह –

**'तत्रैतत्स्यात्। संहत्य कारकैरेकोऽर्थोऽभिनिवर्त्यते। पृथक् परस्परस्वार्थ-**
**2/1/28 साधकौ पुनरिमौ तदयुक्तमिति'।**

**'तच्च न। युगपदनेकार्थसिद्धिरपि दृश्यते। तद्यथा मेषयोरभिधाते**
**2/1/29 कपित्थयोर्भेदे मल्लयोर्नियुद्ध इति'।**

तत्र तथापि एतद्वक्ष्यमाणं कारणैः साधनैः संहत्य संभूय एकोऽर्थ एकं कार्यं निर्वर्त्यते निष्पाद्यते। हि प्रसिद्धौ। इति हेतोः इमौ युवानौ पृथक् प्रत्येकं परस्परस्वार्थसाधकौ

अन्योन्याभिमतसुखवन्तौ तत् इत्येतत् व्यभिचारेण दूषयति तच्च नेति। युगपत् संभूयार्थसाधनैः अनेकार्थसिद्धिः पृथक् फलं। तदेवाह –'मेषयोरिति' कर्त्तरि षष्ठि अभिघाते सति कपित्थयोः फलविशेषयोः भेदे नियुद्धे च अभिघाताख्यसंयोगे सति फलभेदो दृश्यत इति शेषः। तथा च पूर्वानुमाने सुखादिभिन्नत्वमुपाधिरिति बोध्यम्। ननु मललादीनां कर्तृत्वेनैक्यात् न व्यभिचार इत्याशंक्य एककार्यकारित्वपदार्थत्वादिनात्राप्यैक्यासम्भावात्स्वरूपासिद्धिरित्याह –

**2/1/29 'न तत्र कारकभेद इति चेदिहापि न वस्तुभेद इति'।**

तत्र मल्लयोः कर्तृत्वेनैक्यकारणात् कारकं साधनं इहापि यूनोरपि वस्तुवस्तुत्वेनैक्यात्। नन्वेवं सति फलतारतम्यमपि न स्यादित्यत आह –

**2/1/29 'उपायवैलक्षण्यं तु सर्गादभिहितं पुरस्तात्। तेनोभयोरपि सदृशी सुखप्रतिपत्तिरिति'।**

सर्गात् कर्तृत्वाधिकरणत्वलक्षणकारकभेदात् उपायवैलक्षण्यं क्रियाभेदः तस्मादभिमानभेद इति शेषः। तेन अभिमानवैलक्षण्येन सदृशी सजातीया इत्यभिहितं पुरस्तादित्यन्वयः। उक्तार्थे पृथक् संगतिमाह–

**2/1/30 'जातेरभेदाद् दम्पत्योः सदृशं सुखमिष्यते।**
**तस्मात्तथोपचर्या स्त्री यथाग्रे प्राप्नुयाद्रतिम्'।।**

जातेरभेदाद् शशमृगीत्यादिजात्यैक्यात् दम्पत्योर्मिथुनीभूतयोः यथा यज्जातीयलाभेन रतिं अनुरूपामिति शेषः। तथा तज्जातीया स्वसमानजातीयेति यावत् उपचर्या सम्पाद्या।

उपसंहरति –

**2/1/31 'सदृशस्य सिद्धत्वात् कालयोगिन्यपि* प्रमाणवदेव नव रतानि'।**

सदृशत्वस्य यूनोः सुखस्य तत्साजात्यस्य च सिद्धित्वात् साधितत्वात् कालयोगिन्यपि कालप्राप्तान्यपि रतभावशब्दार्थौ पर्यायैः स्फुटयति –

**2/1/32 'रसो रतिः प्रीतिर्भावो रागो वेगः समाप्तिरिति रति पर्यायाः।**
**सम्प्रयोगो रसं रहः शयनं मोहनं इति पर्यायाः'।**

रसादिशब्दाः सुखे तत्साधनवृत्तिविशेषश्च प्रयुज्यन्ते। सम्प्रयोगरतशब्दा–

---

* The published text of Kama Sutra has भावतोऽपि कालतः here, in addition.

वयवविशेषसंयोगवाचकौ रहशयनशब्दौ तत्पूर्वकालिकसंयोगविशेषवाचकौ संमोहनशब्द-स्तदनन्तरविशेषवृत्तिविशेषपरः तेषां पूर्वापरभावित्वात्पर्यायत्वकथनम्।

**2/1/33 'प्रमाणकालभावजानां सम्प्रयोगाणामेकैकस्य नवविधत्वात्तेषां व्यतिकरे सुरतसंख्या न शक्यते कर्तुं। अतिबहुत्वात्'।**

प्रमाणं लिंगपरिमाणं, कालः शैघ्र्यादिः, भावोऽत्र सुखजनकवृत्तिविशेषः। व्यतिकरो मिश्रणं इदं चोपपादितं प्राक् एवं समत्वादिभिः रतानां भेदमुक्त्वा फलभेदात् भेदमाह –

**2/1/34 'तेषु तर्कादुपचारान् प्रयोजयेदिति वात्स्यायनः'।**

तेषु रतेषु तर्क्यते लिंगादिनानुमीयत इति तर्कः भावः। तस्मादुपचारान् भेदान् प्रयोजयेत् जानीयात्। तानेवाह –

**2/1/35 'प्रथमरते चण्डवेगता शीघ्रकालता च पुरूषस्य, तद्विपरीतमुत्तरेषु'।**

प्रथमरते नवसंगमेन चण्डवेगता गाढसुखजनकता शीघ्रकालता शीघ्रकालविरामता पुरूषस्य। कर्त्ररि षष्ठि। उत्तरेषूत्तरोत्तरकालिकरतेषु तद्विपरीतं भावप्रधानो निर्देशः क्रमेण मन्दसुखजनकता अधिककालवत्ता च भवतीति शेषः।

**2/1/35 'योषितः पुनरेतदेव विपरीतम्। आधातुक्षयात्'।**

प्रथमरत इति उत्तरे आह – उत्तरेष्विति चानुवर्तते। योषित इति कर्त्तरि षष्ठि। एतदेव गाढागाढसुखजनकत्वशीघ्रमन्दकालिकत्वादि विपरीतं उक्तात् प्रथमे मन्दवेगता चिरकालिकता च उत्तरोत्तरेषु चण्डवेगता शीघ्रकालता चेति अवधिं आह – आधातुक्षयात्'। इन्द्रियोपरमपर्यन्तं।

**2/1/36 'प्राक् च स्त्रीधातुक्षयात्पुरूषधातुक्षय इति प्रायोवादः'।**

समवयसोः स्त्रीपुंसयोः कालक्रमेण स्त्रीधातुक्षयात् स्त्रीणां धातुक्षयात् इन्द्रियोपरमाद्वा प्रायोवादः। क्वचिद्विपरीतदर्शनात् औत्सर्गिकः। अथ सिंहावलोकनन्यायेन स्त्रीणामारम्भप्रभृति सुखमित्येतत् वृद्धोक्त्या दृढयति–

**2/1/37 'मृदुत्वादुपमृद्यत्वान्निसर्गाच्चैव योषितः।**
**प्राप्नुवन्त्याशु ताः प्रीतिमित्याचार्या व्यवस्थिताः'।**

मृदुत्वादुपमृद्यत्वात् कोमलत्वात् अभिघाताश्रयत्वात् रतिभेदानाह –

**2/1/39* 'अभ्यासादभिमानाच्च तथा सम्प्रत्ययादपि।**
**विषयेभ्यश्च तन्वंग्याः** विदुः प्रीतिं चतुर्विधाम्'।।*****

अभ्यासात् पुनः पुनरावृत्तेरभिमानात् संकल्पात् सम्प्रत्ययात् अन्यस्मिन् स्वकीयत्वासाध्यासात् विषयेभ्यः तन्वंग्याः यूनश्च। उक्तं विशदयति–

**2/1/40 'शब्दादिभ्यो बहिर्भूता या कर्माभ्यासलक्षणा।**
**प्रीतिः साभ्यासिकी ज्ञेया मृगयादिषु कर्मसु।।'**

मृगयादिषु कर्मसु विषये या प्रीतिः अभ्यासजा सा शब्दादिभ्यः शब्दादिविषयजन्यायाः बहिर्भूता भिन्ना अतः आभ्यासिकी।

**2/1/41 'अनभ्यस्तेष्वपि पुरा कर्मस्वविषयात्मिका।**
**संकल्पाज्जायते प्रीतिः या सा स्यादभिमानिकी'।।**

संकल्पादनभ्यस्तेष्वपि कर्मसु अविषयात्मिका विषयजभिन्ना पुरालाभात् प्राक् या प्रीतिः स्यादभिमानिकीत्यन्वयः। तामेवोदाहरति –

**2/1/42 'प्रकृतेर्या तृतीयास्याः स्त्रियाश्चैवोपरिष्टके।**
**तेषु तेषु च विज्ञेया चुम्बनादिषु कर्मसु।।'**

तृतीयास्याः प्रकृतेः यस्याः स्त्रियाश्चैव अनपत्याया औपरिष्टके वक्ष्यमाणे चुम्बनादिषु कर्मसु तेषु तेषु नखक्षतादिषु पुरा या प्रीतिः साभिमानिकीत्यर्थः।

**2/1/43 'नान्योऽयमिति यत्र स्यादन्यस्मिन्प्रीतिकारणे**
**तन्त्रज्ञैः कथ्यते सापि प्रीति सम्प्रत्ययात्मिका।।'**

अन्यस्मिन् विषये नायोऽयं किन्त्वहमेवेति विपर्ययात्मिका प्रीतिकरणं यत्र या बुद्धिर्भवति सा तज्जाप्रीतिः सम्प्रत्ययात्मिका।

---

* Bhaskar Narasimha Sastri places the 38th Karika at the end.

** The reading in the published Kama Sutra is 'तन्त्रज्ञाः' here.

*** Here the classification of factors behind love as per Vātsyāyana is as follows—(i) due to habit (ii) owing to feeling of true love (iii) out of understanding and accepting each other and (iv) being over-whelmed by costly and coveted gifts. Kalyana Malla in his Ananga Ranga seems to have rearranged these factors as per their weightage. For him first is (ii) above, second is (iv), third is (iii) and fourth is (i) above vide A.R.4/25.

**2/1/44 'प्रत्यक्षा लोकतः सिद्धा या प्रीतिर्विषयात्मिका।'**

या प्रीतिः स्त्रगादौ प्रत्यक्षस्वमनोवेद्या लोकतः सिद्धा सार्वलौकिकी विषयात्मिका प्रीत्यादि शब्दानां सुखे शक्तिः तद्धेतु वृत्तिविषये लक्षणेत्याह –

**2/1/44 'प्रधानफलत्वात् तत् स्यात् तदर्थाश्चेतरा अपि।'**

तदर्था प्रधानजनका इतरा रागादिवृत्तिविशेषा अपि प्रधानफलवत्वान्मुख्यप्रीतिसम्बन्धात् प्रीत्यादिशब्दबोध्या भवन्तीत्यर्थः।

**2/1/45 'एताः प्रीतीः परामृश्य शास्त्रतः शास्त्रलक्षणाः।**
**यो यथा वर्धते भावस्तं तथैव प्रयोजयेत्॥'**

शास्त्रलक्षणाः कारणभेदभिन्ना एता प्रीतीः शास्त्रतः उक्तशास्त्रात् परामृश्य ज्ञात्वा यो भावः सुखविशेषः यथा येन कारणेन तथा तेन कारणेनैव प्रयोजयेत् वर्धयेत्।

**2/1/38 'एतावदेव युक्तानां व्याख्यातं साम्प्रयोगिकम्।'**
**मन्दानामवबोधार्थं विस्तरोऽतः प्रवक्ष्यते॥'**

युक्तानां कुशलानां एतावतैव उक्तमात्रादेव व्याख्यातं व्याख्यातप्रायमवबोधार्थं सम्यक् ज्ञानाय अतः द्वितीयाध्याय प्रभृति।

**इति श्रीवात्स्यायनसूत्रवृत्तौ द्वितीयेऽधिकरणे प्रथमोऽध्यायः।**

अध्याय – 2

# आलिंगनविचारप्रकरणम्

एवं प्रथमे प्रधानं निरूप्योपजीवकत्वं संगत्या तदंगान्याह –

2/2/1 **'सम्प्रयोगांगं चतुष्षष्ठिरित्याचक्षते'।**
सम्प्रयोगस्य उक्तस्यांगत्वं परोद्देशप्रवृत्तकृतिविषयत्वं।

2/2/1 चतुःषष्ठिशब्दार्थे मतभेदानाह – **'चतुःषष्टिप्रकरणत्वात्'**

2/2/2 **'तच्छास्त्रमिदं चतुःषष्ठिरित्याचार्यवादः'।**

चतुषष्टिप्रकरणानि यस्मिन् तच्छास्त्रं कामशास्त्रम्।

2/2/3 **'कलानां चतुःषष्टित्वात्तासां च सम्प्रयोगांगभूतत्वात्कलासमूहो वा चतुःषष्टिरिति'।**

कलानां वक्ष्यमाणानाम्।

2/2/3 **'ऋचां दशतयीनां संज्ञितत्वात्। इहापि तदर्थसम्बन्धात्। पंचालसम्बन्धाच्चापि बह्वृचैरेषां पूजार्थं संज्ञा प्रवर्तिता इत्येके'।**

दशतयीनां ग्रन्थविशेषस्थानां ऋचां अर्थानुसारिपादव्यवस्थावन्मन्त्रं विशेषाणां संज्ञितत्वाद्दाशतयीसंज्ञादर्शनात् इहापि तदर्थसम्बन्धात् यत्किंचित् ऋचार्थबोधनात्पांचालसम्बन्धात् पांचालाधीतत्वसाम्यात् एषा चतुःषष्टिरूपा संज्ञापूजार्थं माहात्म्यसूचनार्थं।

2/2/4 **'आलिंगनचुम्बनदशननखच्छेद्यसंवेशनसीत्कृतपुरूषायितौपरिष्टकाना–मष्टधाविकल्पभेदादष्टावष्टकाश्चतुःषष्टिरिति बाभ्रवीयाः'।**

दशननखच्छेद्यं दशनच्छेदनं नखभेदनं च सीत्कृतं ध्वनिविशेषः पुरूषायितं पुरूषवदाचरणं औपरिष्टकं वक्ष्यमाणं अष्टधा विकल्पभेदात् प्रत्येकमष्टविधालिंगनाद्यवान्तरविशेषैः।

**2/2/5 'विकल्पवर्गाणामष्टानां न्यूनाधिकत्वदर्शनात् प्रहणनविरूतपुरूषोपसृप्तचित्ररतादीनामन्येषामपि वर्गाणामिह प्रवेशात्प्रायोवादोऽयम्। यथा सप्तपर्णो वृक्षः पंचवर्णो बलिरिति वात्स्यायनः'।**

आलिंगनाद्यष्टानां तदवान्तरवर्गाणां मध्ये केषांचित् वक्ष्यमाणरीत्या केषुचिदन्तर्भावेन प्रहणनादीनां वक्ष्यमाणलक्षणानां प्रवेशेन न्यूनाधिकत्वं सम्पत्तेः यथा न्यूनाधिकपर्णवत्यपि वृक्षे सप्तपर्णशब्दः न्यूनाधिकपर्णेऽपि बल्यादौ पंचवर्णशब्दः रूढ़ः तथा आलिंगनादिषु चतुःषष्टिशब्दोऽपि।

अत्र रतं द्विविधं गुह्येन्द्रियजं इतरेन्द्रियजं च द्वितीयमालिंगनादिभेदेनानेकविधं। पुनरपि द्विविधं प्रथमरतवत्कर्तृकं तदधिककर्तृकं च। तत्र द्वितीयं चतुर्विधमित्याह –

**2/2/6 'तत्रासमागतयोः प्रीतिलिंगद्योतनार्थमालिंगनचतुष्टयम्। स्पृष्टकं विद्धकं उद्घृष्टकं पीडितकमिति'।।***

तत्रालिंगनरतेषु मध्ये असमागतयोः पूर्वमसंयुक्तयोः यूनोः प्रीतिलिंगद्योतनार्थं प्रीतेरनुरागस्य लिंगं ज्ञापकं गाढालिंगनं तस्य द्योतकं आलिंगनचतुष्टयमुच्यते। तान्येवाह – 'स्पृष्टकमित्यादिना'।

**2/2/7 'सर्वत्र संज्ञार्थेनैव कर्मातिदेशः'।**

सर्वत्र स्पृष्टकादौ संज्ञार्थेनैव अन्यार्थगमनं व्याजेनैव कर्मातिदेशः आलिंगनाद्यभिनयज्ञापनं भवति। विशदयति –

**2/2/8 'सम्मुखागतायां प्रयोज्यायामन्यापदेशेन गच्छतो गात्रेण गात्रस्य स्पर्शनं स्पृष्टकम्'।**

प्रयोज्यायां नायिकायां सम्मुखागतायां सत्यां ईषत्स्पर्शनं स्पृष्टकम्।

**2/2/9 'प्रयोज्यं स्थितमुपविष्टं वा विजने किंचिद् गृह्णती पयोधरेण विद्धयेत्। नायकोऽपि तामवपीड्य गृह्णीयादिति विद्धकम्'।**

प्रयोज्यं नायकं विद्धकमीषद्वेधनं तदुभयमनतिप्रवृत्त सम्भाषणयोः।

---

* Later developments in this field are found in the Rasa Dipika commentary of T.M. Tripathi on Kuttanimatam of Damodara Gupta 'एवमेव अपराणि वात्स्यायनीये अनुक्तानि पद्मचुम्बनवेणुविदारितचुम्बनादीनि गौणीसुतादिकामशास्त्रेषु उपलभ्यते। एवं तत् (आलिंगन) सप्तधा यथा– आमोदालिंगनं, मुदितालिंगनं प्रेमालिंगनं, आनन्दालिंगनं, रूच्यालिंगनं, मदनालिंगनं, विनोदालिंगनं, इति कामशास्त्रम्।'—P.175 Kuttanimatam.

Edn—Krishnadas Sanskrit Series, Varanasi.

**2/2/10 'तदुभयम् उक्तद्वयं अतिगोष्ठीरहितयोः'।**

भवति। अग्रिमद्वयं सभागोष्ठीकयोरिति गम्यते।

**2/2/11 'तमसि जनसम्बाधे विजने वाऽथ शनकैर्गच्छतोर्नातिह्रस्वकालमुद्घर्षणं परस्परस्य गात्राणामुद्धृष्टकम्'।**

तमसि सजनेऽपि यत्किंचित्कालं उद्घर्षणं स्पृष्टसंघर्षणम्।

**2/2/12 'तदेव कुड्यसंदंशेन स्तम्भसंदंशेन वा स्फुटमवपीडयेत् इति पीडितकम्'।**

कुड्यसंदंशे स्वेन संदंशायमाने कुड्यादौ तदेव स्वगात्रेण तद्गात्रमेव पीडनात्पीडितकम्।

**2/2/13 'तदुभयमवगतपरस्पराकारयोः'।**

तदुभयं युग्मद्वयं अवगतपरस्पराकारयोः विज्ञातपरस्परेंगितयोर्भवति। सम्प्रयोगरहितसम्बन्ध्यालिंगनचतुष्टयमुक्त्वा तद्वत्कर्तृकं तच्चतुष्टयमाह –

**2/2/14 'लतावेष्टितकम् वृक्षाधिरूढकं तिलतण्डुलकं क्षीरनीरकमिति चत्वारि सम्प्रयोगे'।**

लतावेष्टितकं लतेवावेष्टनं वृक्षमिवाधिरोहणं वृक्षाधिरूढकं तिलतण्डुलयोरिव विसृष्टयोगस्तिलतण्डुलकं नीरक्षीरयोरिवाविस्पष्टसंयोगः नीरक्षीरकम्।

**2/2/15 'लतेव शालमावेष्टयन्ती चुम्बनार्थं मुखमवनमयेत् उद्धृत्य मन्दसीत्कृता तमाश्रिता वा किंचिद्रामणीयकं पश्येत्तललतावेष्टितकम्'।**

लतेव नायकमावेष्टयन्ती परिवेष्टयन्ती तस्य मुखं अवनमयेत् आकुंचयेत् उद्धृत्य तन्मुखमुन्नमय्य मन्दसीत्कृतं आश्रिता मन्दसीत्कृतवती मुखे किंचिद्रमणीयकं पश्येद्वा तल्लतावेष्टितकं भवति।

**2/2/16 'चरणेन चरणमाक्रम्य द्वितीयेनोरूदेशमाक्रमन्ती वेष्टयन्ती वा तत्पृष्ट–सक्तैकबाहुर्द्वितीयेनांसमवनमयन्ती ईषमन्दसीत्कृतकूजिता चुम्बनार्थ–मेवाधिरोढुमिच्छेदिति वृक्षाधिरूढकम्'।**

आक्रम्य निर्बध्य द्वितीयेन बाहुना तादृशारोहणं वृक्षाधिरूढकमिति उच्यते।

**2/2/17 'तदुभयं स्थितकर्म'।** स्थितयोः तिष्ठतोः।

**2/2/18 'शयनागतावेवोरूव्यात्यासं भुजव्यातासं संघर्षणमिव घनं संस्वजेते तत्तिलतण्डुलकम्'।***

शयनगतौ भुजव्यात्तासं च कृत्वा घनं संघर्षं यथा भवति तथा तिलतण्डुलवद्धृत्यया-श्लिष्टावयवत्वात्तिलतंडुलकम्।

**2/2/19 'रागान्धावनपेक्षितात्ययौ परस्परमनुविशत इवोत्संङ्गगतायां अभिमुखोपविष्टायां शयने चेति क्षीरजलकम्।**

उत्संगगतायां शयने स्वाभिमुखस्थितायां वा सत्त्यां रागान्धौ अनपेक्षितात्ययौ अनपेक्षितविश्लेषौ सन्तौ अनुविशत इव अन्योन्यशरीरे प्रतिष्ठाविव स्थितौ चेत् तत्क्षीरजलकम्।

**2/2/20 'तदुभयं रागकाले'।**

**2/2/21 'इत्युपगूहनयोगा बाभ्रवीयाः'।**

तदुभयमन्तरोक्तद्वयं रागकाले रागोदयानन्तरभाविशयनकाले कर्त्तव्यं उपगूहनं आलिंगनम्।

**2/2/22 'सुवर्णनाभस्य त्वधिकमेकांगोपगूहनचतुष्टयम्'।**

सुवर्णनाभस्य मते तु एकांगोपगूहनमेकैकांगस्य उर्वादेः एकैकांगेनैवालिंगनमधिकं उक्तम्।

**2/2/23 'तत्रोरूसंदंशेनैकमूरूद्वयं वा सर्वप्राणं पीडयेदित्यूरूपगूहनम्'।**

तेषु मध्ये ऊरूसंवेशनेन संदंशायमानस्योरूद्वयेन तस्य एकं सर्वप्राणं यावच्छक्ति उपगूहनमाद्यम्।

**2/2/24 'जघनेन जघनमवपीड्य प्रकीर्यमाणकेशहस्ता नखदशनप्रहणन–चुम्बनप्रयोजनाय तदुपरि लंघयेत्तज्जघनोपगूहनम्'।**

जघनेन स्वगुह्येनावपीड्य संघृष्य प्रकीर्यमाणाः व्यापृताः नखदशनं तच्छेदनं तदुपरि नायकोपरि लंघयेत् आरोहेत्।

---

* As per commentary writer of RR, Kanci Natha this Sutra comes from Gonardiya.

**2/2/25 'स्तनाभ्यामुरः प्रविश्य तत्रैव भारमारोपयेदिति स्तनालिंगनम्'।**

प्रविश्य गाढं निपीड्य तत्रैव उरः संश्लेष एव भावं प्रीतिं आवेशयेत्पर्यवसायेत्।

**2/2/26 'मुखे मुखमासज्याक्षिणी अक्ष्णोर्ललाटेन ललाटमाहन्यात्सा लालाटिकेति'।**

आसज्य संयोज्य तत्रापि अक्षिणी संयोज्याहन्यात् अभिघातयेत्।

**2/2/27 'संवाहनं नायकपादमर्दनाद्युपचारः प्रकारो विशेषः संस्पर्शनत्वात्'।***

**2/2/28 'पृथक्कालत्वाद् भिन्नप्रयोजनत्वात् असाधारणत्वात् नेति वात्स्यायनः'।**

संस्पर्शत्वात् संवाहनस्योपगूहनापेक्षया विजातीयसंयोगरूपत्वात् पृथक्कालत्वात् नायिकानुरागोत्पत्तिहेतुतया प्राथमिकत्वात् अतएव भिन्नप्रयोजनत्वात् असाधारणत्वात् सर्वेषां पाक्षिकत्वादिति यावत् न संवाहनस्योपगूहनान्तर्भाव इति शेषः।

प्रयोजनभेदमाह –

**'पृच्छतां श्रण्वतां चापि तथा कथयतामपि।**
**2/2/29 उपगूहविधिं कृत्स्नं रिरंसा जायते नृणाम्॥'**

**'येऽपि ह्यशास्त्रिताः केचित्संयोगरागवर्धनाः।**
**2/2/30 आदरेणैव तेऽप्यत्र प्रयोज्याः साम्प्रयोगिके॥'**

अशास्त्रिताः शास्त्रानुक्ताः रागः प्रीतिः संयोगाः आलिंगनविशेषाः ये केचित्साम्प्रयोगिके रते उपयोगित्वेन एवं मन्दरागवतां रतात्पूर्वं तदुपयोगित्वेनानेकविधाश्लेषानुक्त्वा उत्कटरतानुरागवतां नैव क्रमनियम इत्याह–

**2/2/31 'शास्त्राणां विषयस्तावत् यावन्मन्दरसाः नराः।**
**रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रमः॥**

मन्दरसाः मन्दानुरागिणः रति चक्रे उत्कटरागसुधासिन्धौ प्रवृत्ते निमज्जने सति शास्त्रोक्तालिंगनादिकं क्रमस्तत्क्रमः चोक्तो नेत्यर्थः।

**इति श्रीवात्स्यायनकामसूत्रवृत्तौ नरसिंहकृतौ द्वितीयेऽधिकरणे द्वितीयोऽध्यायः।**

---

* The published text is different as noted below:-
संवाहनमप्युपगूहनप्रकारमित्येके मन्यन्ते। संस्पर्शत्वात्।

Here Vātsyāyana has fererred to view of other experts. He however, refutes it in the following Sutra.

**अध्याय – 2**

# चुम्बनविकल्पप्रकरणम्

एवमालिंगनाद्युक्त्वा एककार्यकारित्वसंगत्या चुम्बनादिक्रियाः क्रमेण निरूपयिष्यन् तासामपि प्रधानतत्पूर्वकालिकत्वव्यवस्थां अव्यवस्थां चाह–

**2/3/1 'चुम्बननखदशनच्छेद्यानां न पौर्वापर्यमस्ति।**

रागयोगात् प्राक्संयोगादेषां प्राधान्येन प्रयोगः। प्रहणनसीत्कृतयोश्च सम्प्रयोगे'।

**2/3/2 'सर्वं सर्वत्र। रागस्यानपेक्षितत्वात्। इति वात्स्यायनः'।**

पौर्वापर्यं परस्परमिति शेषः। कुतः रागयोगात् अनुरागौत्कट्यात् प्राधान्येन प्रायशः सम्प्रयोगे तत्काले प्रयोग इत्यनुषज्यते। अव्यवस्थामाह– सर्वं उपगूहनादि सर्वत्र अव्यवस्थया कुतः अनपेक्षितत्वात् क्रमानपेक्षितत्वात्।

**2/3/3 'तानि प्रथमरते नातिव्यक्तानि त्वरितं विकल्पेन प्रयुञ्जीत। तथा भूतत्वाद्रागस्य'।**

प्रथमरते अभिनवनायिकासम्प्रयोगविषये तानि नखदशनच्छेदादीनि अव्यक्तानि अस्फुटानि त्वरितं परिमितं च यथा तथा विकल्पेनानियमेन प्रयुंजते तथा भूतत्वात् सर्वसमुच्चयानपेक्षितत्वादौत्कण्ठ्यादिति शेषः।

**2/3/3 'ततः परमत्वरया विशेषवत्समुच्चयेन रागसन्धुक्षणार्थम्'।**

ततः परं प्रथमसंयोगानन्तरं क्रमेण कालक्रमेण नखच्छेदादीनि रागसन्धुक्षणार्थं रागौत्कट्याय अत्वरयो अमितानि विशेषवदभिव्यक्तानि समुच्चयेन सम्प्रयुंजीतेत्यनुषज्यते कुर्यादित्यर्थः। तत्र चुम्बनान्याह –

**2/3/4 'ललाटालककपोलनयनवक्षः स्तनोष्ठान्तर्मुखेषु चुम्बनं'।**

**2/3/5 'ऊरूसन्धिबाहुनाभिमूलयोरपि लाटानाम्'।**

**2/3/6 'रागवशाद्देशप्रवृत्तेश्च सन्ति तानि तानि स्थानानि न तु सर्वजनप्रयो– ज्यानि इति वात्स्यायनः'।**

लाटानां लाटदेशः। ऊरूसन्धौ ऊरूजघनसन्धौ बाहुमूले नाभिमूले च लाटानां तद्देशीयानां चुम्बनं प्रसिद्धमिति शेषः। एवं रागवशात् देशप्रवृत्तेः तत्तद्देशाचाराच्च स्थानानि सीमन्तादिस्थानानि चुम्बने प्रसिद्धानि सर्वजनप्रयोज्यानि सार्वजनीनानि। चुम्बनविशेषानाह–

**2/3/7 'तद्यथा निमित्तकं स्फुरितकं घट्टितमेतत्त्रीणि कन्याचुम्बनानि'।**

निमित्तं अस्पन्दनं स्फुरितं यत्किंचित् स्पन्दनं घट्टितं पीडनं। कन्या मुग्धा। विशदयति–

**2/3/8 'बलात्कारेण नियुक्ता मुखे मुखमाधत्ते न तु विचेष्टत इति निमित्तकं'।**

बलात्कारेण नायकेच्छया नियुक्ता रतये समायुक्ता सती मुग्धमुखे नायकस्य मुखं स्वस्याः चेष्टते चुम्बनाय इति अव्यापृत्तिः।

**2/3/9 'वदने प्रवेशितं चौष्ठं मनागपत्रपावग्रहीतुमिच्छन्ती स्पन्दयति स्वमोष्ठं नोत्तरमुत्सहत इति स्फुरितम्'।**

ओष्ठं नायकस्यावगृहीतुं चुम्बितुं इच्छन्ती अपत्रपा तद्वती मनाक् ईषत् स्वं ओष्ठं स्पन्दयति यत्किंचिद्रागाभिव्यक्तेरिति शेषः। रागोद्रेकात् उत्तरं चुम्बनकर्म नोत्सहते न करोति इति स्पन्दनं स्फुरितमित्युच्यते।

**2/3/10 'ईषत्परिगृह्य विनिमीलितनयना करेण च तस्य नयने अवच्छादयन्ती जिह्वाग्रेण घट्टयति इति घट्टितकम्'।**

**2/3/11 'समं तिर्यगुद्भ्रान्तमवपीडितं'**

**2/3/12 निर्दशनमवपीडयेदित्यवपीडितकम् पंचममपि करणम्'।**

परिगृह्य रागो क्रीडास्वकराब्जेन अधरपललवमिति शेषः। विनिमीलितनयना विशेषेण मीलितनयना सती स्वजिह्वाग्रेण तत् इषत् घट्टयित्वा पंचममपि पंचविधमपि करणं कुर्यादित्यर्थः। तदेवाह – 'सममित्यादिना'।

समं ऋजु तथा तिर्यग् तिरश्चीनं तयोद्भ्रान्तं भ्रमणरूपेण पीडितं संदंश–मर्दनं अवपीडितं निर्दशनमर्दनं पंचमं विवृणोति – निर्दशनं दशनावमर्दनरहितं यथा तथा इति अवपीडनं अवपीडितमित्युच्यते।

* In the published text of Kama Sutra 'अंगुलिसंपुटेन पिण्डीकृत्य' comes at the beginning of this Sutra.

**2/3/13 'द्यूतं च तत्र प्रवर्त्तयेत्'।**

**2/3/14 'पूर्वमो*ष्ठसम्पादनेन जितं इदं स्यात्'।**

यदि मया जितं स्यात् पूर्वमादौ ओष्ठसम्पादनेन ओष्ठचुम्बनेन स्यात् भवितव्यमिति पणं कृत्वा तत्र चुम्बननिमित्तं पूर्वं द्यूतं प्रवर्त्तयेत्।

**2/3/15 'तत्र जिता सार्धरूदितं करं विधुनुयात् प्रणुदेद्दशेत्परिवर्त्तयेत् बलादाहूता विवदेत्।'**

तत्र द्यूते जिता सती सार्धरूदितं यथा तथा प्रणुदेत् स्वसमीपात् विनिवर्त्तयेत् परिवर्त्तयेत् पराङ्मुखी भवेत्। आहूता आकृष्टा विवदनमेवाह –

**2/3/15 'पुनरप्यस्तु पण इति ब्रूयात्'।** पुनः पणनिमित्तकद्यूतं।

**2/3/15 'तत्रापि जिता द्विगुणमायस्येत्'।**

तत्रापि द्वितीय द्यूते द्विगुणं पूर्वापेक्षया आयस्येत् सास्त्ररोदनादिकं कुर्यात्।

**2/3/16 'विस्त्रब्धस्य प्रमत्तस्य वाधरमवगृह्य दशनान्तर्गतं कृत्वा हसेत् उत्क्रोशेत् तर्जयेत्'**

विस्त्रब्धस्य नेयमेतादृशधूर्ते विश्वासवतः प्रमत्तस्य कार्यान्तरव्यापृतस्य वा अवगृह्य स्वकरकमलेन तत् स्वदशनान्तर्गतं अनिर्गतं निष्कासनाशक्यं च कृत्वा हसेत् नायकं पीडया तर्जयेत तमिति शेषः।

**2/3/16 'प्रनर्त्तितभ्रूलता चलन्नयनेन मुखेन हसन्ती तानि तानि च ब्रूयात्। इति चुम्बनद्यूतकलहः'।**

विहसन्ती हसन्ती वा तानि तानि तत्कृतनखव्रणादिदूषणानि ब्रूयात् शनकैरिति शेषः। चुम्बनानि तन्निमित्तद्यूतकलहौ च उक्ताः।

**2/3/17 'एतेन नखदशनच्छेदप्रहणनद्यूतकलहा व्याख्याताः'।**

एतेन चुम्बनद्यूतकलहकथनेन छेद्यं छेदनं परस्परनखछेदनदशनहस्तताडनानि च एतत् प्राथम्यहेतुत्वात् तज्जयनिमित्तकलहश्च व्याख्यातप्राय इत्यर्थः।

---

* It is 'अधर' ie the lower lip in the published text.

**2/3/18 'चण्डवेगयोरेव त्वेषां प्रयोगः। तत्सात्म्यात्'।**

**2/3/19 'तस्यां चुम्बन्त्यां एवोत्तरं गृह्णीयात्। इत्युत्तरोष्ठं रागदीपनम्'।**

चण्डवेगयोः उत्कृष्टरागवतोः यूनोः सात्म्यात् समानस्वभावात् चण्डवेगसात्म्याद्धेतोः तत् तस्मिन् सम्प्रयोगकाले तेषां पूर्वोक्तपरस्परचुम्बनादीनां प्रयोगः अनुष्ठानं स्यात्।

एवं स्त्रीकर्तृकं चुम्बनं उक्त्वा पुंकर्तृकं तदाह –

तस्यां अम्बुजास्यायां चुम्बन्त्यामेव स्वोष्ठं गृहीत्वा चुम्बन्त्यां सत्यामेव स्वयं उत्तरं तदीयोत्तरोष्ठं गृह्णीयात्। कुतः उत्तरोष्ठं तत्काले तदुत्तरोष्ठं चुम्बनं तस्याः रागदीपकं इति हेतोः।

**2/3/20 'ओष्ठसंदशनेनावगृह्यौष्ठद्वयमपि चुम्बेत्। इति सम्पुटकं स्त्रियाः पुरूषो वाऽजातव्यंजनस्य'।**

अजातव्यंजनस्याजायमानश्मश्रुणः पुनः ओष्ठद्वयं स्त्रीत्वस्या ओष्ठद्वयं पुमान् युवा च ओष्ठसंदंशेन संदंशाकारस्वस्योष्ठद्वयेन क्रमेणावगृह्य चुम्बेत्। इत्येतत्संपुटाख्यचुम्बनम्।

**2/3/21 'तस्मिन्नितरोऽपि जिह्वयास्या दशनान्घट्टयेत् तालु जिह्वां चेति जिह्वायुद्धम्'।**

इतरः नायकः अस्यापि तस्मिन् संपुटके जिह्वया स्वकीयया तस्याः तस्य च दशनान् तालुतद्गतां जिह्वां वा घट्टयेत् उपमृद्यात्।

**2/3/22 'एतेन बलाद्वदनरदनग्रहणं दानं च व्याख्यातम्'।**

एतेन संपुटककथनेन बलात् नायिकायाः वदनस्य कपोलयोः रदनानां रदनच्छदयोः च ग्रहणं चुम्बितुमिति शेषः। दानं स्वीयवदनरदच्छदयोः तस्यै।

**2/3/23 'समं पीडितमंचितं मृदु शेषांगेषु चुम्बनं स्थानविशेषादिति चुम्बनविशेषाः'।**

शेषांगेषु ओष्ठातिरिक्तपूर्वोक्तस्थानेषु स्थानविशेषानुगुण्येन अंचितं ईषत् स्पर्शनं मृदुपीडनं विना सम्यक् स्पर्शनं पीडितं दशनादिभिः पीडितं समं अनतिपीडनमिति चतुर्विधम् चुम्बनं इति दशस्थलेषु चुम्बनविशेषा उक्ताः।

**2/3/24 'सुप्तस्य मुखमवलोकन्त्या स्वाभिप्रायेण चुम्बनं रागदीपनम्'।**

सुप्तस्य कृत्रिमस्वापवतः कर्त्तरि षष्ठि तत्कर्तृकं मुखं तन्मुखमवलोकयन्त्याः सानुरागं

पश्यन्त्याः मुखमित्यनुषज्यते। तत्प्रति स्वाभिप्रायेण स्वानुगुणानुगुण्येन चुम्बनं रागदीपनं तदाख्यम्।

**2/3/25 'प्रमत्तस्य विवदमानस्य वान्यतोऽभिमुखस्य निद्राव्याघातार्थम् च्छलितकम्'।**

प्रमत्तस्य अनवहित इव स्थितस्य कर्त्तरि षष्ठी एवमग्रेऽपि विवदमानस्य कलहप्रिय इव स्थितस्य अन्यतः अन्यत्राभिमुखस्येव तन्मुखमित्यादि सर्वत्रानुवर्त्तते छलितकं छलिताख्यम्।

**2/3/26 'चिररात्रावागतस्य शयने प्रसुप्तायाः स्वाभिप्रायचुम्बनं प्रातिबोधिकम्'।**

शयने शेते इत्यस्मिन् इति शयने प्रसुप्तायाः वक्ष्यमाणकृत्रिमस्वापवत्याः सम्बन्धिमुखे तत् ज्ञात्वा चिरादागतस्य कर्त्तरि षष्ठी स्वाभिप्रायं स्वानुरागं यथा तथा प्रातिबोधिकं प्रतिबोधहेतुत्वात् तदाख्यं।

**2/3/27 'सापि तु भावजिज्ञासार्थिनी नायकस्यागमनकालं संलक्ष्य कृतकसुप्ता स्यात्'।**

सा नायकस्य भावं स्वस्यां रागं जिज्ञासार्थिनी ज्ञातुमिच्छन्ती सती आगमनकालं प्रतिदिनं स्वगृहं प्रति नायकागमनकालं संलक्ष्य स्वपिमीति निर्णीय सुप्ता कृतकसुप्ता भवति। मुग्धायाः चुम्बनप्रदर्शनप्रकारमाह –

**2/3/28 'आदर्शे कुड्ये सलिले वा प्रयोज्यायाश्छायायां चुम्बनमाकार-प्रदर्शनार्थमेव कार्यम्'।**

आदर्शे कुड्ये दर्पणे तु तुल्ये छायायां प्रतिबिम्बितमुखादौ आकारप्रदर्शनार्थं मुग्धायाश्चुम्बनप्रकारप्रदर्शनाय।

**2/3/29 'बालस्य चित्रकर्मणः प्रतिमायाश्चुम्बनं संक्रान्तमालिंगनं च'।**

बालस्य चित्रकर्मणः भित्यादिलिखितस्त्रियाः प्रतिमायाः कृत्रिमपुत्रिकायाः मुखादौ मुग्धासन्निधौ चुम्बनम्।आक्रान्तकं अतिसमीपदेशप्रापणं आलिंगनं च कार्यमिति शेषः।

**2/3/30 'तथा निशि प्रेक्षणके स्वजनसमाजे वा समीपे गतस्य प्रयोज्यायाः हस्तांगुलिचुम्बनं संविष्टस्य वा पादांगुलिचुम्बनम्'।**

निशि प्रेक्षणके देवतोत्सवादिनिरीक्षणसमये स्वजनसमाजे विवाहादौ समीपे प्रयोज्यासन्निधिं गतस्य कर्त्तरि षष्ठी उपविष्टस्य तस्या एव समीपे निषण्णस्य पूर्ववत् षष्ठी।

**2/3/31 'संवाहिकायास्तु नायकमाकारयन्त्या निद्रावशादकामाया इव तस्योर्वोर्वदनस्य निधानमूरूचुम्बनं पादांगुष्ठचुम्बनं चेति आभियोगिकाानि'।**

संवाहिकायाः प्रियपादसेवाकुर्वन्त्याः तद्व्याजेन रन्तुं नायकमाकारयत्याः अकामायाः लज्जया अकामनां सूचयन्त्या इव स्थिताया नायिकायाः सम्बन्धिवदनस्य निद्रावशात् निद्राव्याजेन तस्य नायकस्य ऊर्वोर्निधानं यत् तदेव चुम्बनं ज्ञेयं इति। तानि चुम्बनानि आभियोगिकानि रागोद्दीपकतया सम्प्रयोगोपकारकाणि मारसमररसिकयोः क्रीडनमाह –

**2/3/32 'कृते प्रतिकृतं कुर्यात्ताडिते प्रतिताडितम्।**
**करणेन च तेनैव चुम्बिते प्रतिचुम्बितम्'॥**

कृते नायकेन कपोलमर्दनादौ प्रतिकृतिं सा तदेव कुर्यात् ताडिते तेन हस्तादिकरणेन ताडने कृते तेनैव करणेन प्रतिताडितं भावे क्तः।

**इति श्रीनरसिंह कृत वात्स्यायनसूत्रवृत्तौ द्वितीयेऽधिकरणे तृतीयोऽध्यायः।**

अध्याय – 4

# नखक्षतजातिप्रकरणम्

एककार्यकारित्वसंगत्या चुम्बनान्युक्त्वा अन्तरंगत्वान्नखक्षतान्याह –

**2/4/1 'रागवृद्धौ संघर्षात्मकं नखविलेखनम्'।**

रागवृद्धौ रागोद्रेके सति यूनोः परस्परं नखलेखनं नखमुखकरणं क्षतविशेषः संघर्षणाख्यं भवति।

**2/4/2 'तस्य प्रथमसमागमे प्रवासप्रत्यागमने प्रवासगमने क्रुद्धप्रसन्नायां मत्तायां च प्रयोगः। न नित्यमचण्डवेगयोः'।**

तस्य नखक्षतस्य प्रथमसमागमे अभिनवतरूणीसम्प्रयोगे रागोद्रेकान्मुख्यः प्रयोग इत्यग्रिमेणान्वयः।प्रवासप्रत्यागमे प्रवासादूरदेशात् प्रत्यागमने पुनरागमने सति प्रथमसमागम इत्यनुवर्त्तते। प्रवासगमने स्वस्य तस्याः वा देशान्तरगमनप्रसक्तौ सत्यां क्रुद्धप्रसन्नायां प्रणयकलहेन क्रुद्धा सती प्रार्थनया प्रसन्ना तस्यां मत्तायां रागोद्रकवत्यां च नित्यं प्रतिदिनं न तस्य प्रयोगः चण्डवेगयोरिति हेतुगर्भविशेषणं यतोऽत्यन्तानुद्रिक्तरागौ भवतः।

**2/4/3 'तथा दशनच्छेद्यस्य सात्म्यवशाद्वा'।**

तथा नखक्षतस्यैव दशनच्छेद्यस्य दन्तक्षतस्यापि पूर्वोक्तरागकालो ज्ञेयः। सात्म्यवशात् सात्म्यं समानस्वभाववत्ता उभयोरप्यत्यन्तरागोद्रेककृतेति यावत्। तद्वशात् तादृशनित्यमपि नखदशनक्षतप्रयोग इत्यर्थः।

नखक्षतावान्तरभेदानाह –

**2/4/4 'आच्छुरितकं अर्द्धचन्द्रो मण्डलं रेखा व्याघ्रनखं मयूरपदकं शशप्लुतकं उत्पलपत्रकमिति रूपतोऽष्टविकल्पं'।**

आच्छुरितकादीनेव वक्ष्यमाणलक्षणानिरूपितः आकारभेदेन अष्टविधं नखक्षतमिति शेषः। तस्य स्थानान्याह –

**2/4/5 'कक्षौ स्तनौ गलः पृष्टं जघनं ऊरू च स्थानानि'।**

**2/4/6 'प्रवृत्तरतिचक्राणां न स्थानमस्थानं वा विद्यत इति सुवर्णनाभः'।**

प्रवृत्तरतिचक्रात्पृष्टजघनमूरू च स्थानानि प्रवृत्तरतिचक्राणां रागोद्रेकादिति शेषः। न स्थानं नोक्तस्थानगवेषणं अस्थानं अनुक्तस्थानत्यागः। तत् साधननखभेदेन देशभेदानाह –

**2/4/7 'तत्र सव्यहस्तेन प्रत्यग्रशिखराणि द्वित्रिशिखराणि वा चण्डवेग-योर्नखानि स्युः'।**

तत्र क्षतविषये साधनानि पार्श्वकृत्तनेन तीक्ष्णीकृतानि द्वित्रिशिखराणि चण्डवेगयोः अत्यन्तानुरक्तयोः यूनोः सव्यहस्ते वामकरे प्रत्यग्रशिखराणि मध्यकृन्तनादनेकाकाराणि वा।

**2/4/8 'अनुगतराजि सममुज्ज्वलममलिनमविपाटितं विवर्धिष्णु मृदुस्निग्ध–दर्शनमिति नखगुणाः'।**

अनुगतराजि अनुगतेन एकाकारेण राजत इत्यनुगतराजि भावप्रधानो निर्देशः। एवमग्रेऽपि समं अनिम्नोन्नतांग्रं उज्ज्वलं सप्रकाशं संमलिनं नीलादिरंजितं अविपाटितं अनिकृत्तं अतएव विवर्धिष्णु मृदुस्निग्धदर्शनं मसृणं यथा तथा दृश्यमानं एते नखगुणाः।

देशभेदेन तेषां गुणभेदमाह –

**2/4/9 'दीर्घाणि हस्तशोभीन्यालोके च योषितां चित्तग्राहीणि गौडानां नखानि स्युः'।**

हस्तौ शोभयन्तीति हस्तशोभीनि गौडानां नखानि लोके अवलोकने सति योषितां युवतिमात्रस्य चित्तग्राहिणी मनोहराणि।

**2/4/10 'ह्रस्वानि कर्मसहिष्णुनि विकल्पयोजनासु च स्वेच्छापातीनि दाक्षिणात्यानाम्'।**

दाक्षिणात्यानां नखानि कर्मसहिष्णूनि क्षतकर्मकुशलानि स्वेच्छया पुरूषेच्छया विकल्पयोजनासु विकल्पेन एकस्य द्वयोर्वा क्षतार्थं प्रसरणेषु सत्सु तथैव पातीनि क्षतकारीणि भवन्ति इति शेषः।

**2/4/11 'मध्यमान्युभयभांजि महाराष्ट्रकाणामिति'**

मध्यमानि नातिदीर्घ न ह्रस्वानि उभयथापि भांजि हस्तशोभित्वकर्मसहिष्णुत्वादि पूर्वोक्तोभयशोभावन्ति नखानि भवन्ति।

पूर्वोक्तात् आछुरितकादेः क्रमेण लक्षणान्याह –

**2/4/12 'तैः सुनियमितैः हनुदेशे स्तनयोरधरे वा लघुकरणमनुद्गतलेखं स्पर्शमात्रजननाद्रोमांचकरमन्ते सन्निपातवर्धमानशब्दमाच्छुरितकम्'।**

तैः सुनियमितैः सम्यक्प्रयुक्तैः तैः नखैः करणे तृतीया हनुदेशे कपोलोपरि स्पर्शमात्रजननात् अनुद्गतरेखं अनुद्गता अनभिव्यक्ता रेखा येन तदन्ते हन्वादिप्रान्ते अन्योन्यं रोमांचं करोति इति तथा सन्निपातवर्धमानशब्दः सन्निपातेन तत्तस्थलाभिघातेन वर्धमानः उत्पत्स्यमानः शब्दो येन तथाविधं अतएव लघु सूक्ष्मं करणं क्षतं आच्छुरितकम् तदाख्यम्।

**2/4/13 'प्रयोज्यायां च तस्यांगसंवाहने शिरसः कण्डूयने पिटकभेदने व्याकुलीकरणे भीषणेन प्रयोगः'।**

तस्याच्छुरितकस्य प्रयोज्यायां प्रयोगः कार्यः अंगसंवाहने अंगसेवायां निमित्ते सप्तमी। सर्वत्रकण्डूयनं कण्डूविमोचनं पिटकं कंचुकादिग्रन्थिव्याकुलीकरणं अवशाद् गात्रोत्क्षेपकरणं भीषणं भयजननं एषु निमित्तेषु।

**2/4/14 'ग्रीवायां स्तनपृष्टे च वक्रो नखपदनिवेशोऽर्धचन्द्रकः'**

नखपदनिवेशः नखमुखप्रवेशनं अर्धचन्द्रकः तदाकारत्वात्।

**2/4/15 'तावेव द्वौ परस्पराभिमुखौ मण्डलम्'**

तौ नखसन्निवेशौ परस्पराभिमुखौ चेत् मण्डलकं तदाख्यम्।

**2/4/16 'नाभिमूलककुन्दरवङ्क्षणेषु तस्य प्रयोगः'।**

तस्य मण्डलस्य नाभिमूलं जघनप्रदेशः ककुन्दरमुखं वंक्षणं बाह्वोस्सन्धयः।

**2/4/17 'सर्वस्थानेषु नातिदीर्घा लेखा'।**

सर्वत्र स्थानेषु पूर्वोक्तहनुप्रदेशादिषु नातिदीर्घा किंचिद्दीर्घा नखक्षतिः ऋज्वीरेखाख्या।

**2/4/18 'सैव वक्रा व्याघ्रनखकमास्तनमुखम्'**

**2/4/19 'पंचभिरभिमुखैर्लेखा चूचुकाभिमुखी मयूरपदकम्'**

अभिमुखैः परस्पराभिमुखैः पंचभिः नखैः चूचुकाभिमुखी स्तनमध्यकृतारेखा।

**2/4/20 'तत्सम्प्रयोगश्लाघायाः स्तनचूचुके सन्निकृष्टानि पंचनखपदानि शशप्लुतकम्'।**

तत्सम्प्रयोगश्लाघनाय चूचुककृतगाढतो अनुमोदाय सन्निकृष्टानि सन्निवेशितानि पदानि क्षतानि।

**2/4/21 'स्तनपृष्ठे मेखलापथे चोत्पलपत्राकृतीत्युत्पलपत्रकम्'।**

पृष्ठे अधोभागे मेखलापथे तत्स्थाने कृतानि नखक्षतानि।

**2/4/22 'ऊर्वोः स्तनपृष्ठे च प्रवासं गच्छतः स्मारणीयकं संहताश्चस्त्रतिस्त्रो वा लेखाः। इति नखकर्माणि।**

स्मारणीयकं स्वस्मृतिं तस्याः कुर्वन्त्यसंहताः परस्परसंश्लिष्टाः ऋजव रेखा ऊर्वोः स्तनपृष्ठे च प्रवासं गच्छतः पुंसः कर्त्तव्याः तदुक्तं संगीतगंगाधरे रतिरहस्ये –

**R.R.8/5 'अंगुष्ठजं नखमथो विनिवेश्य पृष्ठैः सर्वांगुलीकररूहैः उपरि स्तनस्य।**
**याश्चूचुकाभिमुखमेत्य भवन्ति रेखास्तज्ज्ञा मयूरपदकं तदुदाहरन्ति॥**

**R.R.8/6 'सर्वैः शशप्लुतमिदं करजैः कुचाग्रे ह्यन्वर्थमुत्पलदलस्तनगुह्यपृष्ठे।**
**रेखा घनास्त्रिचतुरा जघने स्तने वा स्मर्तुं प्रवासगमने विदधुर्विदग्धाः***

**2/4/23 'आकृतिविकारयुक्तानि चान्यान्यपि कुर्वीत'।**

आकृतिविकारयुक्तानि वक्रत्वाद्याकारविशेषयुक्तानि अन्यान्यपि अधिकं संख्यकान्यपि नखकर्माणि स्मृतये कुर्वीतेत्यर्थः।

**2/4/24 'विकाराणामनन्त्यादनन्तत्वाच्च कौशलविधेरभ्यासस्य च सर्वगामित्वाद्रागात्मकत्वाच्छेद्यस्य प्रकारान् कोऽभिसमीक्षितुमर्हतीत्याचार्याः'।**

भेद्यस्य जात्येकवचनं क्षतानां रागत्मकत्वात् रागविकारजन्यत्वात् विकाराणां रागजानां च कौशलविधेः स्वभावकुशलताया अभ्यासस्य बहुतररागानुष्ठानस्य सर्वगामित्वात् सर्वत्र सर्वेषां कौशल्यहेतुत्वात् प्रकारान् क्षतावान्तरभेदान् अभिसमीक्षितुं सम्यग्वक्तुं कोऽर्हति, न कोऽपीत्यर्थः यद्वा कश्चतुर्मुखः। इदमेव विशदयति –

**2/4/25 'भवति हि रागेऽपि चित्रापेक्षा। वैचित्र्याच्च परस्परं रागो जनयितव्यः।**

---

* From तदुक्तं संगीतगंगाधरे रतिरहस्ये to विदधुर्विदग्धाः– these lines are found only in G.O.M.L. copy (No. 8775) of the manuscript.

**वैचक्षण्ययुक्ताश्च गणिकास्तत्कामिनश्च परस्परं प्रार्थनीया भवन्ति। धनुर्वेदादिष्वपि हि शस्त्रकर्मशास्त्रेषु वैचित्र्यमेवापेक्ष्यते किं पुनरिहेति वात्स्यायनः'।**

रागे रागाभिव्यक्तिविषये चित्रापेक्षा चुम्बननखक्षतादि चातुर्यापेक्षा भवति। कुतः वैचित्र्यात् नखक्षतकर्माणि चातुर्याद्धेतोः परस्परं यूनोः रागो जनयितव्यः रागोद्रेको भवति यतः अतएव वैचक्षण्ययुक्ताः उक्तकर्माणि चातुर्यवत्यः। गणिकाः तादृशैश्च कामिभिः कामिनश्च तादृशीभिः। धनुर्वेदादिषु शस्त्रकर्मशास्त्रेष्वपि क्रियाप्रधानशास्त्रेष्वपि रागोद्रेकानपेक्ष्येष्वपि वैचित्र्यं चातुर्यं अपेक्षते। लोके तेषामेव भूरिपूजादर्शनात् इह रागोद्रेकार्थे क्षतादिकर्मणि वैचित्र्यमपेक्षत इति। किं पुनः।

**2/4/26 'न तु परपरिगृहीतास्वेवं कुर्यात्'**

परपरिगृहीतासु सधवासु एवं नखक्षतादिकं न कुर्याद् वपुरवधारणे।

**2/4/26 'प्रच्छन्नेषु प्रदेशेषु तासामनुस्मरणार्थं रागवर्धनार्थं च विशेषान् दर्शयेत्'।**

प्रच्छन्नेषु परादृश्येषु प्रदेशेषु अनुस्मरणार्थं अनुस्मृत्यर्थं रागवर्धनार्थं स्वस्मिन्विशेषान् नखक्षतभेदान् दर्शयेत् कुर्याद्वा। उक्तार्थे अभियुक्तसंमतिमाह –

**2/4/7 'नखक्षतानि पश्यन्त्या गूढस्थानेषु योषितः।**
**चिरोत्सृष्टापि अभिनवा प्रीतिर्भवति पेशला'॥**

गूढस्थानेषु वक्षोजादिपृष्ठभागेषु चिरोत्सृष्टापि कालविलम्बितापि अभिनवा अत्यन्तोद्रिक्ता कोमला।

अन्वयमुक्त्वा व्यतिरेकमाह –

**2/4/28 'चिरोत्सृष्टेषु रागेषु प्रीतिर्गच्छेत् पराभवम्।**
**रागायतनसंस्मारि यदि न स्यान्नखक्षतम्'॥**

रागायतनसंस्मारि रागायतनयोर्यूनोः संस्मारि संस्मरणकर्तृनखक्षतं गूढस्थलेषु न स्याद्यदि तदा रागेषु रागायतनेषु युवसु चिरोत्सृष्टेषु चिरकालवियुक्तेषु सत्सु प्रीतिः पराभवं न्यूनतां। एवं युवत्याः रागोद्रेकहेतुत्वमुक्त्वा यूनस्तदाह –

**2/4/29 'पश्यतो युवतिं दूरान्नखोच्छिष्टपयोधरम्।**
**बहुमानः परस्यापि रागयोगश्च जायते'।**

नखोच्छिष्टौ नखांकितौ परस्य यूनोऽपि बहुमानः अतिशयितसौन्दर्यबोधः ततो रागोद्रेकश्च पुरुषस्थानि तान्यप्येतादृशानीत्याह –

**2/4/30 'पुरूषश्च प्रदेशेषु नखच्छिन्नैर्विचित्रितः।**
**चित्तं स्थिरमपि प्रायः चलत्येव योषितः'॥**

प्रदेशेषु नाभिमूलादिषु नखचिह्नैर्नखक्षतैः चित्तमनुरागं स्थिरं दृढं युवत्यां करोति योषितः अभिप्रायं अन्तःकरणं चलयति स्वस्मिन् अनुरक्तं च।

**2/4/31 'नातः परतरं किंचित् अस्ति रागविवर्धनम्।**
**नखदन्तसमुत्थानां कर्मणां गतयो यथा'॥**

कर्मणां क्षतानां गतयो योगाः यथा रागविवर्धकाः रागोद्रेचकाः तथा उक्तक्षतात् परतरमन्यत् वर्धनं वर्धकं नास्तीत्यर्थः।

**इति श्रीभास्करनरसिंहशास्त्रिविरचितवात्स्यानसूत्रवृत्तौ द्वितीयाधिकरणे चतुर्थोऽध्यायः।**

अध्याय—5

# दशनच्छेद्यविधिप्रकरणम्

पूर्वोक्तसंगत्यैव दन्तक्षतान्याह –

**2/5/1 'उत्तरौष्ठं अन्तर्मुखं नयनमिति मुक्वा चुम्बनवद्दशनरदनस्थानानि'।**

चुम्बनवत् चुम्बनस्येव ललाटादीनि सप्तबोध्यानि।

**2/5/2 'समाः स्निग्धच्छाया रागग्राहिणो युक्तप्रमाणा निश्छिद्रास्तीक्ष्णाग्रा इति दशनगुणाः'।**

समास्समता अग्रे सर्वत्र भावप्रधानो निर्देशः। स्निग्धच्छायाः मसृणकान्ति रागग्राहिणः रागाभिव्यंजकत्वं युक्तप्रमाणाः अनतिनैपुण्यान्नात्यन्तं अनिच्छिद्राः परस्परमध्ये छिद्राहित्यं तीक्ष्णाग्राः अग्रे तैक्ष्ण्यं इति एते पंच।

**2/5/3 'कुण्ठा राज्युद्गता परूषाः विषमाः श्लक्ष्णाः पृथवो विरला इति च दोषाः'।**

कुण्ठाः अग्रावच्छेदेन वैषम्यं, राज्युद्गता मसृणकान्तिराहित्यं परुषा अतएव पारुष्यं विषमाः मूलावच्छेदेन वैषम्यं रागानभिव्यंजकत्वमिति यावत्। श्लक्ष्णाः कार्यक्षमौन्नत्याभावः पृथुता वैपुल्यं अनेन युक्तप्रमाणाभावः तीक्ष्णाग्रत्वाभावश्च सूचितः विरलाः सछिद्रतादोषाः दशनानाम्।

**2/5/4 'गूढकमुच्छूनकं बिन्दुर्बिन्दुमाला प्रवालमणिर्मणिमाला खण्डाभ्रकं वराहचर्वितकमिति दशनच्छेद्यविकल्पाः'।**

गूढकाद्या वक्ष्यमाणलक्षणा अष्टौ दन्तक्षतभेदाः।

**2/5/5 'नातिलोहितेन रागमात्रेण विभावनीयं गूढकम्'।**

नातिलोहितेन अनभिव्यक्तशोणितेन रागेण रक्तवर्णेन विभाव्यमनुमेयं ओष्ठादौ दन्तक्षतं गूढत्वात् गूढकमुच्यते।

**2/5/6 'तदेव पीडनादुच्छूनकम्'।**

तदेव दन्तक्षतमेव पीडनात् कपोलादेरतिशयक्षतेः उच्छूनताहेतुत्वादुच्छूनकम्।

**2/5/7 'तदुभयं बिन्दुरधरमध्य इति'।**

तदुभयं गूढकोच्छूनकद्वयं बिन्दुर्वक्ष्यमाणलक्षणश्च

**2/5/8 'उच्छूनकं प्रवालमणिश्च कपोले'।**

प्रवालमणिः वक्ष्यमाणलक्षणः कपोले भवति।

**2/5/9 'कर्णपूरकचुम्बनं नखरदनच्छेद्यमिति सव्यकपोलमण्डनानि'।**

कर्णपूरः कर्णाभरणं चुम्बनं च द्वन्द्वैकवद्भावः नखदशनछेद्यं तत्क्षतानि। अत्र कर्णपूरादिग्रहणं दृष्टान्तार्थम्।

**2/5/10 'दन्तौष्ठसंयोगाभ्यासनिष्पादनात्प्रवालमणिसिद्धिः'।**

दन्तौष्ठयोः संयोगस्य अभिघातस्य अभ्यासनिष्पादनात् निश्चलाभ्यासात् स्थिरीकरणादिति यावत् प्रवालमणिसिद्धिः प्रवाले मणिरिवांकस्य सिद्धिः भवति सैव प्रवालमणिरित्युच्यते।

**2/5/11 'सर्वस्येयं मणिमालायाश्च'।**

सर्वस्य च सर्वदर्शनसम्बन्धिनी त्वियं सिद्धिः मणिमालायाः मणिमालाकारत्वात्सम्बन्धिनी तदाख्या भवतीत्यर्थः। एकदशनकृतक्षतिः मणिः अनेकदशनकृता तु मणिमाला एवमग्रेऽपि।

**2/5/12 'स्वल्पदेशायाश्च त्वचो दशनद्वयसन्दंशजा बिन्दुसिद्धिः'।**

स्वल्पदेशा स्वल्पायाः त्वचः अधरगतायाः दशनद्वयसंदंशजा दशनद्वयमधरोत्तरं तदेतदुभयमपि चण्डवेगयोरिति दशनच्छेद्यानि। तदुभयं मालाख्यं स्तनपृष्ठकार्यं चेत्युभयं चण्डवेगयोः उद्भटरागयोः न संगतयोः भवति न सन्दंशं। बिन्दुतुल्यत्वाद्बिन्दुसिद्धिः।

**2/5/13 'सर्वैः बिन्दुमालायाश्च'।**

सर्वैः उत्तराधरदशनैः कृतासिद्धिः क्षतिः बिन्दुमालेव बिन्दुमाला तत्सम्बन्धिनी तदाख्या।

**2/5/14 'तस्मान्मालाद्वयमपि गलकक्षवङ्क्षणप्रदेशेषु'।**

तन्मालाद्वयं मणिबिन्दुमालाद्वयं गलकक्षवङ्क्षणप्रदेशेषु। कक्षं बाहुसन्धिः, वङ्क्षणं पार्श्वभागः।

**2/5/15 'ललाटे चोर्वोर्बिन्दुमाला'।** चोप्यर्थे।

**2/5/16 'मण्डलमिव विषमकूटयुक्तं खण्डाभ्रकं स्तनपृष्ठ एव'**

विषमकूटयुक्तं न्यूनाधिकदशनानि घातजन्यं मण्डलमिव मण्डलाकारं व्रणं खण्डाभ्रतुल्यत्वात्तदाख्यम्। तच्च स्तनपृष्ठ एव भवति। क्षतानां पंक्तित्वे मणिमाला, तद्वैपरीत्ये बिन्दुमालात्वं मण्डलाकारत्वे खण्डाभ्रकतेति भेदः।

**2/5/17 'संहताः प्रदीर्घा बाह्वोर्दशनपदराजयस्ताम्रान्तराला वराहचर्वितकं स्तनपृष्ठ एव'।**

संहतास्संश्लिष्टाः प्रदीर्घा आत्यायताः बाह्वोः बाहुलताः ताम्रान्तरालाः ताम्रशोणं अन्तरालं मध्यं यासां ताः दशनपदानां दन्तक्षतानां राजयः पंक्तयः तच्च स्तनपृष्ठ एव कार्यम्।

**2/5/18 'तदुभयमपि च चण्डवेगयोः। इति दशनच्छेद्यानि'।**

तदुभयं मालाख्यं स्तनपृष्ठ कार्यम्। तदुभयमपि चण्डवेगयोः उद्भटरागयोः नवसंगतयोः भवति।

**2/5/19 'विशेषके कर्णपूरे पुष्पापीडे ताम्बूलपलाशे तमालपत्रे चेति प्रयोज्यागामिषु नखदशनपदान्याभियोगिकानि'।**

विशेषके तिलकरचनासमये कर्णपुष्पपीडे कर्णयोः पुष्परचितावतंसनिवेशनवेलायां ताम्बूलपलाशे तच्चर्वणकाले तमालपत्रे गण्डयोस्तत्कल्पनासमये इति उक्तप्रकारेण प्रयोज्यायां गच्छन्ति तिष्ठन्तीति प्रयोज्यागामिनी स्तनादीनि तेष्वधिकरणेषु पदानि क्षतानि अभियोगकानि संयोगहेतु रागोद्रेजकानि कार्याणीति शेषः।

**2/5/20 'देशसात्म्याच्च योषित् उपचरेत्'।**

देशसात्म्यात् देशानुसारात् योषितः तत्रत्याः उपचरेत् चुम्बनाद्युपचारवतीः कुर्यात्। इदमेव विशदयति –

**2/5/21 'मध्यदेश्याः आर्यप्रायाः शुच्युपचारात् चुम्बननखदन्तपदद्वेषिण्यः'।**

मध्यदेश्यः आर्यावर्त्तगाः आर्यप्रायाः सत्वप्रधानाः अतएव शुच्युपचाराः अनुच्छिष्टक्रीडानुरागाः अतएव चुम्बनादिद्वेषिण्यः।

**2/5/22 'बाह्लीकदेश्या आवन्तिकाश्च'।**

**2/5/23 'चित्ररतेषु त्वासामभिनिवेशः'।**

रतेषु तु सुखधारणे।

**2/5/24 'परिष्वंगचुम्बननखदन्तचूषणप्रधानाः क्षतवर्जिताः प्रहणनसाध्या मालव्य आभीर्यश्च'।**

चूषणं सचूत्कारस्पर्शनं प्रहणनसाध्याः कुचादिमर्दनवश्याः।

**2/5/25 'सिन्धुषष्ठानां नदीनामन्तरालीया औपरिष्टकसात्म्याः'।**

सिन्धुषष्ठानां सिन्धुप्रभृतीनां षष्ठिसंख्यानामौपरिष्टकं मुखे जघनकर्म तत्र सात्म्या साभिलाषिण्यः।

**2/5/26 'चण्डवेगाः मन्दसीत्कृता अपरान्तिका लाट्यश्च'।**

चण्डवेगाः उत्कटरागिण्यः सीत्कृतं जिह्वातालुसंयोगजो ध्वनिविशेषः।

**2/5/27 'दृढप्रहणनयोगिन्यः खरवेगा एव अपद्रव्यप्रधानाः स्त्रीराज्ये कोसलायां च'।**

प्रहणनं समर्दनं खरवेगाः प्रचण्डरागाः अपद्रव्यं अभक्ष्यवस्तु स्त्रीराज्ये कामरूपे।

**2/5/28 'प्रकृत्या मृद्व्यो रतिप्रिया अशुचिरूचयो निराचारा आन्ध्र्यः'।**

अशुचौ चुम्बनादौ।

**2/5/29 'सकलचतुष्षष्टि प्रयोगरागिण्योऽश्लीलपरूषवाक्यप्रियाश्च शयने च सरभसोपक्रमा महाराष्ट्रिकाः'।**

सकलः सम्पूर्णः चतुषष्टिप्रयोगेषु अष्टाष्टकप्रयोगेषु रागो यासां, रभसो वेगः।

**2/5/30 'तथाविधा एव रहसि प्रकाशन्ते नागरिकाः'।**

तथाविधाः चतुःषष्टिकलारागादिमत्यः नागरिकाः।

**2/5/31 'मृद्यमानाश्चाभियोगान्मन्दं मन्दं प्रसिंचन्ति द्रविड्यः'।**

मृद्यमाना कुचाद्यवच्छेदेन अभियोगात् रतात् निमित्तपंचमी, प्रसिंचन्ति रज्यन्ते।

**2/5/32 'मध्यमवेगाः सर्वंसहा स्वांगप्रच्छादिन्यः परांगहासिन्यः कुत्सिताश्लीलपषपरिहारिण्यो वानवासिकाः'।**

मध्यमवेगाः मन्दरागिण्यः सर्वंसहा नखदन्तक्षतसहनशीलाः अंगदोषः कुत्सितः कुरूपी अश्लीलः अनलंकृतः वानवासिकाः यवन्यः।

**2/5/33 'मृदुभाषिण्योऽनुरागवत्यो मृद्व्यंङ्ग्यश्च गौड्यः'।**

अनुरागवत्यः प्रचण्डरागिण्यः।

**2/5/34 'देशसात्म्यात् प्रकृतिसात्म्यं बलीय इति सुवर्णनाभः। न तत्र देश्या उपचाराः'।**

सात्म्यं भावः प्रकृतिरन्तःकरणं अतः तत्र क्षतायोग्यप्रकृतौ देश्या देशयोग्या उपचाराः क्षतादयो न।

**2/5/35 'कालयोगाद्देशाद्देशान्तरमुपचारवेषलीलाश्चानुगच्छन्ति। तच्च विद्यात्'।**

देशात् जन्मदेशात् कालयोगात् कालवशात् देशान्तरमन्यदेशं गच्छन्तं पुरूषं स्त्रियं वा सामान्यतः अनुसृत्य उपचारवेषशीलाः जन्मदेशीय चुम्बनादिसहनवस्त्राद्यलंकरणचाक्षुषादि विलासाः चात् वाग्विलासाश्च गच्छन्ति आयान्ति। अत तेषां च तच्च जन्मदेशीयोपचारादिकं विद्यात् कुर्यात् तुष्टये। आलिंगनादिषु च रागवर्धनं पूर्वं विचित्रमुत्तरमुत्तरं च।

**2/5/36 'आलिंगनादिषु दशनक्षतांतेषु मध्ये पूर्वं पूर्वं दशनक्षतान्नखक्षतमित्यादि रागवर्धनं रागोद्रेजकं उत्तरमुत्तरं'।**

आलिंगनचुम्बनादिकं विचित्रं चित्रं रसजनकं भवति। च शब्दाच्छोभाकरं। एवं सामान्यतः क्षतान्युक्वा परस्परप्रयोज्यविशेषानाह –

**2/5/37 'वार्यमाणश्च पुरूषो यत्कुर्यात्तदनु क्षतम्।**
**अमृष्यमाणा द्विगुणं तदेव प्रतियोजयेत्'॥**

वार्यमाणश्च युवत्या हस्तान्निषेध्यमानोऽपि बलात्कारेण यत् दशनादिक्षतं यत्र यादृशं करोति तत्क्षतमसहमाना सती तदेवक्षतं द्विगुणं द्विरावृत्तं कुर्यात्। तदेवाह–

**2/5/38 'बिन्दोः प्रतिक्रिया माला मालायाश्चाभ्रखंडकं।**
**इति क्रोधादिवाविष्टा कलहान्प्रयोजयेत्'॥**

बिन्दोः स्तनपृष्ठादौ युवकृतस्य प्रवालमणेश्च माला युवत्या बिन्दुमाला प्रवालमाला च एवं गूढकस्य उच्छूनकं प्रतिक्रिया कार्या। मालायाः युवकृतायाः उभयविधायाः क्रमेणाभ्रकं खंडाभ्रकं चाद्वराहचर्वितकं कुर्यादिति। एवं क्रोधात् क्रोधेन आविष्टेव कलहान् कृतप्रतिकृतिः। उक्तार्थे अभियुक्तोक्तिमाह –

**2/5/39 'सकचग्रहमुन्नम्य मुखं तस्य ततः पिबेत्।**
**निमीलयेत् दशेच्चैव तत्र तत्र मदेरिता'॥**

शिखां गृहीत्वा निमीलयेत् नेत्रे दशेत् दशनक्षतानि कुर्यात्। तत्र कलहप्रशमनस्थले मदेरिता मत्ता।

**'उन्नम्य कण्ठं कान्तस्य संश्रिता वक्षसः स्थलीम्।**
**2/5/40 मणिमालां प्रयुंजीत यच्चान्यदपि लक्षितम्'॥**

लक्षितमभिमतं बिन्दुमालादि।

**2/5/41 'दिवापि जनसम्बाधे नायकेन प्रदर्शितम्।**
**उद्दिश्य स्वकृतं चिह्नं हसेदन्यैरलक्षिता'॥**

जनसम्बाधे जनसंमर्दस्थले दिवापि तस्मिन् स्वकृतं चिह्नं नखक्षतादि उद्दिश्य स्वां प्रदर्शितं नायकेन प्रदर्शितं चेत् दृष्ट्वा सहान्यैरलक्षिता सती हसेत्।

**2/5/42 'विकूणयन्तीव मुखं कुत्सयन्तीव नायकम्।**
**स्वगात्रस्थानि चिह्नानि सासूयेव प्रदर्शयेत्'॥**

नायकं कुत्सयन्तीव निन्दन्तीव मुखं स्वीयं विकूणयन्तीव ईषन्मुकलयन्ती स्वगात्रस्थानि तत्कृतानि चिह्नानि सासूयेव तद्दौर्बल्यादसूयन्तीव प्रदर्शयेत् तस्मै। फलमाह –

**2/5/43 'परस्परानुकूल्येन तदेवं लज्जमानयोः।**
**संवत्सरशतेनापि प्रीतिर्न परिहीयते'॥**

तत्तेषां क्षतानां एवं परस्परप्रदर्शनेन परस्परानुकूल्येन वर्धितपरस्परस्य रागेण लज्जमानयोः परस्परं ह्रीमतोर्यूनोः सम्बन्धिनी प्रीतिः संवत्सरशतेन व्यवधानेऽपि न परिहीयते न नश्यति।

**'इति श्रीकविपदवाक्यमानतत्त्वज्ञभास्करनरसिंहशास्त्रिकृत वात्स्यायनसूत्रवृत्तौ द्वितीयेऽधिकरणे पंचमोऽध्यायः।**

अध्याय – 6

# संवेशनविधिप्रकरणम्

एवं पूर्वांगकलापमुक्त्वा प्रधानं वक्तुमुपक्रमते –

**2/6/1 'रागकाले विशालयन्त्येव जघनं मृगी संविशेदुच्चरते'।**

मृगी उक्तलक्षणा रागकाले रागोद्रेके सति उच्चरत एव उपरिसुरत एव जघनं लिंगं विशालयन्ती विकासयन्ती सती संविशेत् कुक्कुटासनेन।

**2/6/2 'अवह्रासयन्तीव हस्तिनी नीचरते'।**

इहावधारणे नीचरत एव स्वस्यामधः स्थितायां कृत रत एव अवह्रासयन्ती संकोचयन्ती रागकाले संविशेदित्यनुषज्यते।

**2/6//3 'न्याय्यो यत्र प्रयोगः तत्र समपृष्टका'।**

यत्र यदा समतया प्रयोगः पार्श्वस्थितयोः सम्प्रयोगो न्याय्यो भवतीत्यर्थः। समपृष्टकावैपुल्यह्रासकर्त्री निवसेत् मृगी हस्तिनी वा।

**2/6/4 'आभ्यां वडवा व्याख्याता'।**

आभ्यां मृगीहस्तिनीभ्यां अयं भावः। मृगी उपरि सुरत एव विशालयेत् न तु नीचे। हस्तिनी तु नीचरते एव संकोचयेत् न तु उपरि। वडवा तु उपरि रते मृगीव विशालयेत्, अधोरते हस्तिनीव संकोचयेत्, पार्श्वरते तु तिसृणामपि संकोचविकासनाभावस्तुल्य इति।

**2/6/5 'तत्र जघने नायकं प्रतिगृह्णीयात्'।**
**2/6/6 'अपद्रव्याणि च सविशेषं नीचरते'।**

तत्र नीचपार्श्वोपरिरतेषु मध्ये नीचरते विषये सविशेषं विशिष्य अपद्रव्याणि मदनोदकादि गृह्णाति तादृशं नायकं जघने गृह्णीयात् धारयेत्।

**2/6/7 'उत्फुल्लकं विजृम्भितकं इन्द्राणी चेति त्रितयं मृग्या प्रायेण'।**

मृग्याः समोच्चरतसमये एतत्त्रितयं प्रायशः क्रमेण भवति। तदेवाह –

**2/6/8 'शिरो विनिपात्योर्ध्वं जघनमुत्फुल्लकम्'।**

मृग्याः शिरः विनिपात्य उत्तानं तल्पे पातयित्वा तस्याः जघनमूर्ध्वं कुर्यात् तदुत्फुल्लकम्।

**2/6/9 'तत्रापसारं दद्यात्'।**

**2/6/10 'अनीचे सक्थिनी तिर्यगवष्टभ्य प्रतीच्छेदिति विजृम्भितकं'।**

तस्याः उर्वो तिर्यक तिरश्चीनं अपरं प्रसारणं दद्यात् कुर्यात्। तत्र तिर्यगपसारितोर्वोः मध्ये नीचे सक्थिनी उरौ अवष्टभ्य अवसज्य प्रतीच्छेत् यभेत् इति एतद् विजृम्भितकमुच्यते।

**2/6/11 'पार्श्वयोः सममूरू विन्यस्य पार्श्वयोर्जानुनी निदध्यादित्यभ्यास–योगादिन्द्राणी'।**

मृग्याः ऊरू स्वपार्श्वयोस्समं साम्येन विन्यस्य संयुज्य स्वजानुनी तस्याः पार्श्वयोः अभ्यासपाटवेन दध्यात् विन्यसेत्।

**2/6/12 'तयोच्चतररतस्यापि परिग्रहः'।**

एतया इन्द्राण्या उच्चतररतस्य उक्तस्य परिग्रहः प्रकारः व्याख्यातो भवति।

**2/6/13 'सम्पुटेन प्रतिगृह्णीयात् नीचरते'।**

प्रतिगृह्णीयात् संयुज्यात्।

**2/6/14 'एतेन नीचतररतस्यापि हस्तिन्याः'।**

एतेन नीचतरन्यायेन व्याख्यातः।

**2/6/15 'सम्पुटकं पीडितकं वेष्टितकं वाडवकमिति'।**

हस्तिन्याः सम्प्रयोगे सम्पुटकादि चतुष्टयम् कुर्यात्।

**2/6/16 'ऋजुप्रसारितावुभावप्युभयोश्चरणाविति सम्पुटः'।**

स्वस्योभावपि चरणौ तस्या उभयोरपि चरणयोः ऋजुप्रसारितौ योषितौ चेत्सम्पुटको भवति।

**2/6/17 'स च द्विविधः – पार्श्वसम्पुट उत्तानसम्पुटश्च। तथा कर्मयोगात्'।**

तथा पार्श्वेण उपरि च स्थित्वा कर्मयोगात् सम्पुटीकरणात् स सम्पुटः इति द्विविधः इति योजना।

**2/6/18 'पार्श्वेण तु शयानो दक्षिणेन नारीमधिशयीतेति'**

शयानः सार्वत्रिकमेतत् शयानोऽपि दक्षिणेन नारीं नार्या दक्षभागान् तत्स्वयं वामभागेन।

**2/6/18 'सार्वत्रिकमेतत्'**

एतत् दक्षभागस्थितिः सार्वत्रिकं सर्वसम्प्रयोगनियतम्।

**2/6/19 'सम्पुटप्रयुक्तयन्त्रेणैव दृढमूरू पीडयेदिति पीडितकम्'।**

सम्पुटप्रयुक्तयन्त्रेण उक्तसम्पुटाकारकृतयोगेन युक्तः सन् दृढं सम्यक् ऊरू तस्याः अर्थात् स्वोरूभ्यां पीडयेत्। एतत्पीडितकम्।

**2/6/20 'ऊरू व्यत्यस्येदिति वेष्टितकम्'।**

पार्श्वरते परस्परमूरूव्यत्यस्येत् वैपरीत्येन संयुज्यात् वेष्टितकम्।

**2/6/21 'वडवेव निष्ठुरमवगृह्णीयात् इति वाडवकमाभ्यासिकम्'।**

निष्ठुरं यथा तथा पुंसः ध्वजं अभ्यासक्रमेण स्वयोनावगृह्णीयात् इत्येतत् वाडवकमुच्यते।

**2/6/22 'तदान्ध्रीषु प्रायेणेति संवेशनप्रकाराः बाभ्रवीयाः'।**

संवेशनप्रकाराः संवेशनभेदाः।

**2/6/23 'सुवर्णनाभास्तु'।**

**2/6/24 'उभावप्यूरू ऊर्ध्वाविति उद्भुग्नकम्'।**

ऊरू नार्याः ऊर्ध्वौ भवतश्चेत्।

**2/6/25 'चरणावुर्ध्वौ नायकोऽस्या धारयेदिति जृम्भितकम्'।**
**2/6/26 'तत्कुंचितावुत्पीडितकम्'।**

अस्याः चरणौ नायक उर्ध्वौ कृत्वा स्ववक्षसि धारयेत् चेत् उभयाख्यं भवति।

**2/6/27 'तदेकस्मिन्प्रसारितेऽर्धपीडितम्'।**

तस्या एव एकस्मिन्पादे प्रसारिते अधः अर्थात् द्वितीये स्वहृत्संलग्ने अर्धपीडितकम्।

**2/6/28 'नायकस्यांसभागः एकः द्वितीयकः प्रसारित इति प्रसारितकं पुनः पुनर्व्यात्यासेन वेणुविदारितम्'।**

एकः तस्याश्चरणः अंसे कृतः द्वितीयः अधः प्रसारितश्चेत् पुनः पुनः कंचित्कालं अधः प्रसारितस्य अंसादौ असंलग्नस्य अधः प्रसारणं इत्येकं आवृत्या व्यत्यासे सति।

**2/6/29 'एकः शिरस उपरि गच्छेत् द्वितीयकः प्रसारित इति शूलाचितकमाभ्यासिकम्'**

एकः तस्याः पादः शिरसः स्वस्य प्रसारितः तल्पे।

**2/6/30 'संकुचितौ स्वस्तिदेशे निदध्यादिति कार्कटकम्'।**

संकुचितौ तस्याः पादौ स्वस्य स्ववस्तिदेशे श्रोत्रदेशे।

**2/6/31 'ऊर्ध्वावूरू व्यत्यसेदिति पीडितकम्'।**

ऊर्ध्वौ स्वपार्श्वलग्नौ तस्या वामदक्षिणोरू।

**2/6/32 'जंघाव्यात्यासेन पद्मासनवत्'।**

जंघाव्यात्यासेन तस्याः सव्यदक्षिणजंघामात्रव्यात्यासेन पद्मासनतुल्यत्वात् पद्मासनवदित्युच्यते।

**2/6/33 'पृष्ठं परिष्वज्यमानायाः पराङ्मुखेन परावृत्तकमाभ्यासिकम्'।**

पृष्ठं स्वस्य परिष्विज्यमानायाः आलिंगन्त्याः अर्थात् स्वपृष्ठस्थयाः स्वकंठालम्बितभुजायाः पराङ्मुखेन स्वमुखनिरीक्षणाय तिर्यङ्मुखत्वे अभ्यासात्पूर्वकायस्य परावर्त्तने।

**2/6/34 'जले च संविष्टोपविष्टस्थितात्मकांश्चित्रान्योगान् उपलक्षयेत्। तथा सुकरत्वादिति सुवर्णनाभः'।**

2/6/35 **'वार्त्तं तु तत्। शिष्टैरपस्मृतत्वादिति वात्स्यायनः'।**

जले संविष्टा तिर्य्यक्कृतजानुः तया उपविष्टः ऊर्ध्वज्ञः स्थितः तिष्ठन् वार्त्तं असमीचीनं। कुतः अपस्मृतत्वात् निन्दितत्वात्।

2/6/36 **'अथ चित्ररतानि'** उच्यन्ते इति शेषः।

2/6/37 **'ऊर्ध्वस्थितयोः यूनोः परस्परोपाश्रितयोः कुड्यस्तम्भाश्रितयोर्वा स्थिररतम्'।**

ऊर्ध्वस्थितयोः तिष्ठतोः परस्परयोरुपाश्रितयोः परस्परकण्ठमध्यावलम्बयोः कुचकुम्भाश्रितयोर्वा तस्याः कुचौ सः तस्या कुम्भावंसौ सेत्येवं परस्परालम्बयोर्वा यूनोः रतं स्थितरतमित्युच्यते।

2/6/38 **'कुड्यापाश्रितस्य कंठावसक्तबाहुपाशायास्तद्धुजपंजरोपविष्टाया ऊरूपाशेन जघनमभिवेष्टयन्त्या कुड्ये चरणक्रमेण वलन्त्या अवलम्बितं रतम्'।**

कंठावसक्तबाहुपाशाया अर्थात् नायकस्य तद्भुजपंजरायास्तदालिंगिता च ऊरूपाशेन स्वस्या इत्यादिः। जघनं तस्येत्यादिः अतिवेष्ट्यन्त्या आच्छादयन्त्या कुड्ये तदवलम्बनकुड्ये चरणक्रमेण चरणयोः दृढसंयोगवलन्त्याः मध्यदेशं चालयन्त्या युवत्याः कुड्याश्रितस्य भित्यवलम्बितपृष्टस्य च रतम्।

2/6/39 **'भूमौ चतुष्पदस्थिताया वृषलीलयावस्कन्दनं धेनुकम्'।**

भूमौ शय्यायां चतुष्पदवत् गौरिव आस्थितायाः अधोमुखतया स्वकरालम्बितोन्नत-तल्पोपरिभागाया वृषलीलया वृषभवदधिष्ठिततद्गुल्फप्रदेशतश्च बाहुमूलप्रसारिततदिच्छा-गृहीतकुचकलशकरत्वेन अवस्कन्दनं नायकस्य तया रतं धेनुकमित्युच्यते।

2/6/40 **'तत्र पृष्ठमुरः कर्माणि लभते'।**

तत्र धेनुकरते पृष्ठं तस्याः उरः कर्माणि तदंगसंश्लेषादीनि।

2/6/41 **'अनेनैव योगेन शौनमैणेयं गर्दभाक्रान्तं मार्जारललितकं व्याघ्रावस्कन्दनं गजोपमर्दितं वराहघृष्टकं तुरगाधिरूढकमिति'।**

अनेनैव योगेन उक्तबन्धक्रमेणैव ज्ञेयम्।

**2/6/41 'यत्र यत्र विशेषो योगोऽपूर्वस्तत्तदुपलक्षयेत्'।***

यत्र बन्धे यो विशेषोऽस्ति तं विशेषं तत्र तत्र बन्धे लक्षयेत् लोकप्रसिद्ध्या जानीयात्। तथाहि –

'शय्यानमितांगरमणी कक्षाप्रदेशारूढ तदूरूनिक्षिप्तकरस्य पराङ्मुखस्य मणितरहितं चेच्छौनकम्। छागलं छागीवत्तल्पावस्थितकरचरणायाः जानुस्थितस्य तिर्यक् प्रसारितकरयुगस्य रतम्। अधःस्थितकान्ताकराभ्यां ऊर्वोक्षिप्तस्योर्ध्वकायस्य प्रसारितस्वकरोपमर्दितकुचयुगस्य रतं मैणेयमुच्यते। गर्दभीव भूसम्बन्धपादहस्तयात्यन्तविनम्रमस्तकया तया सह पश्चाद्भाग–स्थस्य रतं गार्दभम्। स्वैककरोघृतयुवतिपदद्वयस्यान्यकरावलम्बिततत्केश–कलापस्य रतं मार्जारम्।

................................................................ ......व्याघ्रावस्कन्दनम्।**

धराप्रसारितकरचरणायाः नितम्बसंघृष्टं** युगलस्य पार्श्वसक्तबाहुपाशस्य सत्वरसुरतं गजोपमर्दितम्।जानुकूर्पराभ्यामवनिं गतायाः उन्नमितपश्चाद्भागायाः शुण्डया कृतं स्वयोनौ प्रियतमावयवविशेषयोजनं वराहधृष्टकम्। सूकरीव शय्यातलविपुलीकृतहस्तपादायाः पार्श्वप्रसारित तद्ग्राहित कुचकलशकरस्य सदुत्कृतरतम्। तुरगाधिरूढकं तु तुरगीव धरणीलग्ननि–श्चलकरपादायाः पृष्ठप्रसारितहस्तद्वयकृतगाढालिंगनस्य तद्ग्राहितस्तनकुम्भस्य तिर्यक्कृतवदनचुम्बिताधरपल्लवस्य रतिः।'****

**2/6/42 'मिश्रीकृतसद्भावाभ्यां द्वाभ्यां सह संघाटकं रतम्'।**
**2/6/43 'वह्वीभिश्च सह गोयूथिकम्'।**

मिश्रीकृतसद्भावाभ्यां परस्परानुमतरत्यभिप्रायाभ्यां द्वाभ्यां युवतीभ्यां सह युगपद्रतम् बाह्यं अर्थात् क्रमेणान्तरं संघाटकमित्युच्यते।

एवं वह्वीभिस्ताभिः सहोक्तरतं गोयूथिकम्।

---

* Vātsyāyana has merely touched upon the ways of copulation of different animals Yashodhara has summarily commented upon the ways of animals mentioned by Vātsyāyana.

** It seems that a couple of lines relating to व्याघ्रावस्कन्दनम् are missing.

*** From 'युगलस्य पार्श्वसक्तबाहुपाशस्य' on page 93 to 'यथाभिमतं यथायोगं' on page 94 is found only in the GOML copy of the manuscript.

**** Bhaskara Narasimha Sastri in these lines from शय्यानमितांगरमणी ते चुम्बिताधरपल्लवस्य रतिः। apparently quotes on each type of animal copulation from some source not known to us.

**2/6/44 'वारिक्रीडितकं च'** तदाख्यं सिंहावलोकनेनाह – **'छागलमैणेयमिति तत्कर्मानुकृतियोगात्'।**

इति रतम्।तत्कर्मानुकृतियोगात् छागलादिव्यापारयोगात् छागलादिसंज्ञम्।

**2/6/45-46 'ग्रामनारीविषये स्त्रीराज्ये युवानोऽन्तःपुरसधर्माण इत्यैककस्याः परिग्रहभूतास्ते तामेकैकशो युगपच्च यथासात्म्यं यथायोगं च रंजयेयुः'।**

ग्रामनारीविषये कामरूपादिदेशविशेषे स्त्रीराज्ये केरलादौ युवानः अन्तःपुरसधर्माणः युवतीतुल्याः अर्थाद्युवत्यो युवतुल्याः परिग्रहभूताः कलत्रवदनुकूलाः ते युवानः एकैकशः क्रमेणैकैकयुगपत् सर्वे वा यथा सात्म्यं यथाभिमतं यथायोगं रंजयेयुः। तदेवाह –

**2/6/47 'एको धारयेदेनामन्यो निषेवेत वदनमन्यो जघनमन्यो मध्यमन्यो वारंवारेण व्यतिरेकेण च चेष्टेरन्'।**

धारयेत् विभृयात्। अन्यः एकः अन्यः इतरः निषेवेत स एकवत्तिष्ठेत्। वदनं सेवेत चुम्बेत सेवेतेति सर्वत्रानुषज्जते सेवनं यथायोग्यम् ज्ञेयम्। वारंवारेण पौनः पुन्येन अव्यतिरेकेण क्रमेण चाद्युगपत् चेष्टेरन् सेवेरन्।

**2/6/48 'एतया गोष्ठीपरिग्रहा वेश्या राजयोषापरिग्रहाश्च व्याख्याताः'।**

एतया देशविशेषयुवती वश्या नायकचेष्टया गोष्ठीगोपांगनावेश्यावारवनितापरिग्रहवत् कलत्रवदाचरन्तीति परिग्रहः युवानः तासां परिग्रहाः परिग्रहव्यापाराः।

**2/6/49 'अधोरतं पायावपि दाक्षिणात्यानां। इति चित्ररतानि'।**

अधोरतं अधस्थितनियोज्यकं आदेर्वारांगनादिषु प्रायेणेति शेषः।

**2/6/50 'पुरुषोपसृप्तकानि पुरुषायिते वक्ष्यामः'।**

पुरुषोपसृप्तकानि पुरुषवत् प्रयोजकवत् उपसृप्तकानि प्रयोज्यया कर्त्तव्यरतानि। उक्तबन्धविषये संमतिमाह –

**2/6/51 'पशूनां मृगजातीनां पतंगानां च विभ्रमैः।
तैस्तैरूपायैः चित्तज्ञो रतियोगान् विवर्धयेत्'॥**

पशूनां धेनुकादीनां मृगजातीनां हरिण्यादीनां पतंगानां हंसादीनां चकारात् चक्रादीनां तैस्तैरूपायैस्तत्तद्विलक्षणोपायजन्यैः विभ्रमैः बन्धविशेषैः चित्तज्ञैः।

**Bh.Pr./82** **'रागोऽनुवृत्तोऽवच्छिन्नो ह्यनुराग उदाहृतः'।**

इत्युक्तलक्षणान् वर्धयेत्। पश्चादि उपायजन्यं बन्धविशेषाश्च रतिरहस्यादौ प्रपंचिताः। तत्र दिङ्मात्रमुदाह्रियते।*

तथा हि –

**'विनमितनिजदेहा गुल्फारूढप्रियया**
**स्वकरपरिगृहीतोदरशय्यान्तभागाः।**
**भुजयुगकृतहस्ता स्वेच्छया संगृहीत–**
**S.R.P.D.3/40** **स्तनकलशयुगा स्याद्यत्प्रिया धेनुकं तत्'।।**
**'नम्रांग्याः कटिमारूह्य विमुखो रतिकूजितैः।**
**S.R.P.D.3/43-44** **तदूरूनिक्षिप्तकरो भवेच्छौनकलक्षणम्'।।**
**'कान्ताकरक्षिप्तवतस्तस्या वक्षोरूहद्वयम्।**
**S.R.P.D.3/46** **पीडयन् स्वकरेण स्याद्रतिमार्गं तदुच्यते।।**
**'पादहस्ता या प्रिये पश्चादुपस्थिते।**
**S.R.P.D.3/49** **अत्यन्तनम्रवदना रतिमेष्यति गार्दभः'।।**
**'करेण पादावुद्धृत्य गृहीत्वा शयने स्थितः।**
**S.R.P.D.3/42** **गृहीतचिबुको यत्स्यान्मार्जारो बन्ध उच्यते'।।**
**'पूंभावसंस्थितवती विमुखी प्रियस्य**
**पश्चान्निवृत्य च करेषु करौ निपीड्य।**
**या चक्रवद् भ्रमति चुम्बनमाचरन्ती**
**S.R.P.D.3/37** **तच्च क्रमबन्धमिति तन्निपुणाः वदन्ति'।।**
**S.R.P.D.3/36** **'कुर्वन्त्युपरति या चेद् भ्रामयेत् भ्रमणं विदुः'।**
इति विस्तरभयादुपरम्यते।

**2/6/52 'तत्सात्म्याद्देशसात्म्याच्च तैस्तैर्भावैः प्रयोजितैः।**
**स्त्रीणां स्नेहश्च रागश्च बहुमानश्च जायते'।।**

* Bhaskara Narasimha Sastri mentions Rati Rahasya but quotes from Kumara Harihara's Srngara Rasa Prabandha Deepika.

तथा स्त्रीभावानुसारात् देशसात्म्यात् देशानुसारात् प्रयोजितैः कृतैः भावैः भावयन्त्यन्तःकरणगतं भावं रत्याख्यं स्थायिभावं प्रापयन्तीति भावाः बन्धविशेषाः तैः।

तदुक्तं संगीतगंगाधरभावप्रकाशे –

'भावयन्नान्तरं भावं व्यापारो भाव इष्यते'* इति स्थायिभावस्वरूपम्।

तत्रैवोक्तम् –

**Bh.Pr.-p.144** **'प्रकाशानन्दचिद्रूपां रसतां प्रतिपद्यते।**

**प्रकृष्यमाणो यो भाव स्थायीति स निगद्यते'॥**

इति।

**Bh.Pr.-p.80** स्नेहः युवविषयः। **'मनसो यो द्रवीभावो** ** **विषयेषु ममत्वता।**

**अभयशंकावसानात्मा स एव स्नेह उच्यते'॥**

इति। तदुक्तलक्षणः। राग इति स्नेहप्रकर्षः।

**दुःखमपृथकं चिते सुखत्वेनैव रज्यते।**
**येन स्नेह प्रकर्षेण स राग इति कथ्यते॥*****

तदुदाहृतवचनात् बहुमानः स्वसन्तोषसूचकशिरः कम्पादिः।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ द्वितीयेऽधिकरणे षष्ठोऽध्यायः।**

---

* This line is– 'भावो भावान्तराण्यात्मभावं स्थायी तथानयेत्' in G.O.S. Edn of Bhava Prakasanam-P. 143.

** 'यद् द्रवार्द्रत्वं' in Bhava Prakasanam.

*** Compare lines in Bhava Prakasanam. p. 81

सुखदुःखात्मकं भोग्यं सुखत्वेनाभिमन्यते।
येन रागः स इत्युक्तो रञ्जनाद्विषयात्मनोः।।

अध्याय – 7

# प्रहणन–सीत्कारप्रकरणम्

एवमालिंगनादिबाह्यरतमिन्द्रियविशेषसंयोगरूपान्तररतं चोक्त्वा तदनन्तरकृत्यं वक्तुं भूमिकां रचयति –

2/7/1 **'कलहरूपं सुरतमाचक्षते। विवादात्मकत्वाद्वामशीलत्वाच्च कामस्य'।**

तस्य रागवशत्वात् प्रहणनमंगम्। कामस्य रागस्य विवादात्मकत्वात्। विवादः यूनोः वाचा वाक्प्रतिहतिः तदात्मकत्वात् तद्धेतुकत्वात् वामशीलत्वात् वामेन विरूद्धेन क्रोधादिकृतः प्रतिकृत्या वर्धनशीलत्वात् तदंगरतं कलहरूपं कलहेन योनिलिंगयोरभिघाताख्य संयोगेन निरूप्यते क्रियत इति तथाविधमाचक्षते रसज्ञाः। तस्य तादृशसुरतस्य रागवशात् रागवर्धननिमितं प्रहणनं प्रयोज्यांगाभिघातः।

2/7/2 **'प्रहणनस्थानानि चांसौ शिरः पृष्ठमुरः स्तनान्तरं जघनं पार्श्वं इति स्थानानि'।**

तरूणकर्तृकाभिघाताश्रयाः अंसौ तस्या भुजशिरः जघनपार्श्वं जघनस्य गुह्यस्य पार्श्वसन्निहितदेशः।

2/7/3 **'तच्चतुर्विधम्। अपहस्तकं प्रसृतकं मुष्टिः समतलकमिति'।**

तत्प्रहणनं अपहस्तादिकं वक्ष्यमाणलक्षणं क्रमेणांसादिकृतम्।

2/7/4 **'तद्भवं हि सीत्कृतं तस्यार्तिरूपत्वात्। तदनेकविधम्'।**

सीत्कृतं सीदिति जिह्वातालुसंयोगजशब्दविशेषः। तच्च तत्कृतं चेति तद्भवम्। अपहस्तकादि प्रहणनजन्यं भवति। हि प्रसिद्धौ। तच्च सीत्कृतं आर्तिरूपत्वात् आर्ताविव जायमानत्वसाम्यात् अनेकविधं अनेकप्रकाराणामुपलक्षणम्। तान्येवाह–

2/7/5 **'विरूतानि चाष्टौ'।**

2/7/6 **'हिंकारस्तनितकूजितरूदितदूत्कृतसूत्कृतफूत्कृतम्'।**

विरूतं विजातीयध्वनिः। अष्टौ सीत्कृतं विना अष्टविधानि हिंकारः हिंगितिकंठजशब्दविशेषः स्तनितं घनवद्घोषणं कूजितं गलरवविशेषः, रूदितं मिथ्याश्रुमोचनकालिकं ध्वनिविशेषः एवं दूत्कृतादयोऽप्यनुकरणशब्दविशेषाः। एवमेकवारप्रहणने सीत्कृतादिकमुक्त्वा रागात्तदावृत्तावाह–

**2/7/7 'अम्बार्थाः शब्दाः वारणार्थाः मोक्षणार्थाश्चालमर्थास्ते ते चार्थयोगात्'।**

अम्बार्थाः अम्बावाचकाः अम्बाऽक्केत्यादयः, वारणार्थाः मामेत्यादयः मोक्षणार्थं मुञ्चेत्यादयः अलमर्थाः पूर्णमित्यादयः अर्थसंयोगात् अर्थस्य प्रणहनस्य सम्प्रयोगात् पुनः पुनः करणात् प्रयोक्तव्याः।

**2/7/8 'पारावतपरभृतहारीतशुकमधुकरहंसकारंडवदात्यूहचक्रवाकलावक–विरूतानि च सीत्कृतभूयिष्ठानि विकल्पशः प्रयुंजीत'।**

पारावतादयः पक्षिविशेषाः तेषां रूतानीव रूतानि सीत्कारबहुलानि विकल्पशः ऐच्छिकविकल्पेन प्रयुंजीत। अपहस्तकादीनां स्वरूपं कथयन्तज्जन्यसीत्कृतादीनां प्रयोगव्यवस्थामाह–

**2/7/9 'उत्संगमुपविष्टायाः पृष्ठे मुष्टिना प्रहारः'।**

**2/7/10 'तत्र सासूयेव स्तनितरूदितकूजितानि प्रतिघातांश्च प्रयोजयेत्'।**

उत्संगं अंकं पृष्ठे अंसप्रदेशे अभिघातः ताडनं मुष्टिरित्युच्यते।तत्र मुष्टिप्रहरणे सति सासूयेव तस्य स्वाभिमतमपि सक्रोधेव प्रतिघातान् पुनर्मुष्ट्याभिघातं च कुर्यात्। बहुवचनेन एकप्रहरणे बहुप्रहरणं गम्यते।

**2/7/11 'युक्तयन्त्रायाः स्तनान्तरेऽपहस्तेन प्रहरेत्'।**
**2/7/12 'मन्दोपक्रमं वर्धमानरागमापरिसमाप्तेः'।**
**2/7/13 'तत्र हिंकारादीनामनियमेनाभ्यासेन च तत्कालमेव प्रयोगः'।**

युक्तयन्त्रायाः संयुक्तायाः अपहस्तेन अंगुष्ठमूलेन स्तनान्तरे स्तनमध्ये प्रहरणमपहस्तकमित्युच्यते। तच्च मन्दोपक्रमं स्वल्पारम्भं वर्धमानरागं रागवर्धकं आपरिसमाप्तेः रतावसानपर्यन्तं भवति। तत्र अपहस्तके हिंक्कारादीनामनियमेन अनियमेन स्वेच्छया अभ्यासेन आवृत्त्या तत्कालं तावत्कालं यावत्सुरतमिति यावत् प्रयोगः कार्य एव।

**2/7/14 'शिरसि कुंचितांगुलिना करेण विवदन्त्याः फूत्कृत्य प्रहणनं तत्प्रसृतकम्'।**

**2/7/15 'तत्रान्तर्मुखेन कूजितं फूत्कृतं च'।**
**2/7/16 'रतान्ते च श्वसितरूदिते'।**
**2/7/17 'वेणोस्फुटकः शब्दानुकरणं दूत्कृतम्'।**
**2/7/18 'वदरस्येवाप्सु निपततः फूत्कृतम्'।**

विवदन्त्याः कृतप्रतिकृतिमत्याः शिरसि सीत्कृत्य स्वयं तत्र तदा अन्तर्मुखेन मुखान्तर्भागेन कंठतालुभ्यां रतान्ते रतकर्मावसाने श्वसितरूदिते निश्वासमिथ्यारोदने स्फुटतः विदीर्णात् वायुप्रवेशमार्गवत् इति यावत्। सूत्कृतं भारापगमे मुखतो निःसृतः शब्दः सूत्कृतम्, तदनुकरणं फूत्कृतं धमनिकाविव ध्वनिविशेषः। बदरस्य फलविशेषस्य अप्सु निपततः पातात् अमिघाताख्यशब्दयोगात् जातो ध्वनिविशेषः फूत्कृतः। एतानि रतान्ते भवन्ति।

**2/7/19 'सर्वत्र चुम्बनादिषूपक्रान्तायाः ससीत्कृतमनेनैव प्रत्युत्तरम्'।**

चुम्बनादिषु रतान्तेषु युवकृतेषु प्रवृत्तेषु सर्वत्र सर्वेषु सीत्कृतं सीत्कृतादिसहितं यथा तथा उपक्रान्तायाः प्रवृत्तायाः प्रत्युत्तरं त्वत्कृतस्येदं फलमिति यूनः प्रत्युत्तरदानमनेनैव सीत्कृतादिकरणेन कृतमिति भवति।

**2/7/20 'रागवशात् प्रहणनाभ्यासे वारणमोक्षणालमर्थानां शब्दानामम्बार्थानां च'।**

रागवशात् रागोत्कृष्ट्यात् प्रहणनानां उक्तयुवकृतमुष्ट्यादीनां अभ्यासे आवृत्तौ सति शब्दानां वारयेत्यादीनां प्रयोगो भवति।

**2/7/20 'सुरतान्ते श्वसितरूदितस्तनितमिश्रीकृतप्रयोगा विरूतानां च'।**

श्वसितं सूत्कृतं इत्येतैः मिश्रितानां अम्बार्थानां प्रयोगोच्चारणं विरूतानां वीनां पारावतादीनां एतदेवाह –

**2/7/20 'रागावसानकाले जघनपार्श्वयोस्ताडनमतित्वरया चापरिसमाप्तेः'।**

रागावसानकाले धातुक्षरणकाले परिसमाप्तेः रतविरामक्रोधादिवत्वरया अतिवेगेन जघनपार्श्वयोः अर्थात्ताभ्यां ताडनं नोदनं *समतलकमित्युच्यते।

---

* At the time of reaching climax incessant hitting on the sides and thighs of the female partner was termed as समतल/समतलक by post-Vātsyāyana writers on Kāma Śāstra as mentioned by Yashodhara who makes a passing reference to this slight difference in the name of this act - 'समतलेनेति पारिशेष्यात्।अन्ये समतलकेन' इति पठन्त्येव' । Bhaskara Narasimha Sastri follows those who are referred to as अन्ये by Yashodhara.

**2/7/21 'तत्र लावकपरभृतहंसविकूजितं त्वरयैवेतिस्तननप्रहणनयोगाः'।**

तत्र समतलके सति हंसविकूजितं हंसादीनां कूजितमिव कूजितं त्वरया सवेगं कुर्यात्। इति उक्तप्रकारेण स्तनितप्रहणनयोगाः। प्रहरणादीनां मुष्ट्यादीनां स्तनितादीनां विरूतानां पौर्वापर्येण योगाः प्रयोग विज्ञेयाः।

**'पारुष्यं रभसत्वं च पौरुषं तेज उच्यते।**
**2/7/22 अशक्तिरार्तिर्व्यावृत्तिरबलत्वं च योषितः'॥**

**'रागात्प्रयोगसात्म्याच्च व्यत्ययोऽपि क्वचित् भवेत्।**
**2/7/23 न चिरं तस्य चैवान्ते प्रकृतरेव योजनम्'॥**

पारुष्यं वाचि नखक्षतादिषु च काठिन्यं रभसत्वं अनयोरेव वेगः तेजो धातुः त्रितयं पौरुषं पुरुषवृत्त्येव अशक्तेः वाक्क्षतादौ मृदुत्वं आर्त्तेवानुकृतिः व्यावृत्तिः वेगमान्द्यानुकृतिः अबलत्वं अधातुत्वं स्वरूपधर्मा रति शेषः। रागात् रागोद्रेकव्यत्यासात् प्रयोगसात्म्यात् उपरि रतादिबन्धविशेषस्वभावात् व्यत्ययः तेजोवर्जस्त्रीपुंधर्मव्यत्यासः क्वचित्कदाचित् योजने रते तस्य पुरूषस्यैव प्रकृतेन स्वभावादेव अन्ते धातुक्षयकाल एव। न चिरं अतिवेगः भवति। सिंहावलोकनन्यायेन प्रहणनानि तत्स्थानानि चाह –

**2/7/24 'कीलामुरसि कर्त्तरीं शिरसि विद्धां कपोलयोः सन्दंशिका स्तनयोः पार्श्वयोश्चेति पूर्वैः सह प्रहणनमष्टविधमिति'।**

कीलांशवदंगुल्या क्षतिं कर्त्तरीं लोहविकारेणेव अंगुलीभ्यां चर्मकृन्तनं विद्धां रेखां सन्दंशिकां लोहमयीभिरिवांगुलीभिः दृढयोग इति एतानि चत्वारि पूर्वैरिवहस्तकादिभिः सह प्रहणनस्थानं तत्तत्स्थानकर्त्तव्यप्रहणनानि। कीलादीनां देशविशेष एव प्रयोग इत्याह –

**2/7/24 'दाक्षिणात्यानां कीलानि च तद्युवतीनामुरसि दृश्यते'।** दाक्षिणात्यानां कर्त्तरि षष्ठी।

**2/7/24 'देशसात्म्यं तदिति'।**

**2/7/25 'कष्टमनार्यवृत्तमनादृतमिति वात्स्यायनः'।**

तत्कीलादिकं देशसात्म्यं देशविशेषाचारात्तत्रैव कार्यम्। कुतः कष्टं दुःखहेतुः अतएव अनार्यं आर्यापरिगृहीतं नादृतं सर्वैः नादर्त्तव्यम्।

**2/7/26 'तथान्यदपि देशसात्म्यात्प्रयुक्तमन्यत्र न प्रयुंजीत'।**

अन्यदपि उक्तान्यदन्तनखक्षतं देशसात्म्यप्रयुक्तं देशविशेषाचरितं अन्यत्र देशान्तरे।

**2/7/27 'आत्ययिकं तु तत्रापि परिहरेत्'।**

तत्रापि तस्मिन्नपि देशे आत्ययिकं अतिदुःखहेतुकीलादिकं परिहरेत्। शिष्टैर्न कार्यं अकार्यत्वमेव। सनिदर्शनं विशदयति – रतीत्यादिना।

**2/7/28 'रतियोगे हि कीलया गणिकां चित्रसेनां पांचालराजो* जघान'।**

रतियोगे रत्यर्थं रतिकाले चित्रसेनां तदाख्यां जघान हतवान्।

**2/7/29 'कर्त्तर्या कुन्तलः शातकर्णिः शातवाहनो महादेवीं'।**

शातवाहनः स्वार्थे अण् शातकर्णिः शतकर्णापत्यं महादेवीं तदाख्यां गणिकां** जघानेत्यनुषज्यते।

**2/7/30 'नरदेवः कुपाणिः विद्धया दुष्प्रयुक्तया नटीं काणां चकारेति'।**

दुष्प्रयुक्तया अतिदुःसहया काणां, अतो नैव कार्यमित्यर्थः। उक्तं संवादयति नास्तीत्यादिना।

**2/7/31 'नास्त्यत्र गणना काचिन्न च शास्त्रपरिग्रहः।**
**प्रवृत्ते रतिसंयोगे राग एवात्र कारणम्'॥**

रतिप्रयुक्तसम्प्रयोगे प्रवृत्ते सति आरब्धे सति अत्र नखदशनक्षतादौ गणना इयत्ता शास्त्रपरिग्रहः शास्त्रमूलकता राग एव परस्परानुराग एव अत्र क्षतादौ –

**2/7/32 'स्वप्नेष्वपि न दृश्यन्ते ते भावास्ते विभ्रमाः।**
**सुरतव्यवहारेषु ये स्युस्तत्क्षणकल्पिताः'॥**

सुरतव्यतिहारेषु स्त्रीपुंकर्तृव्यत्ययेषु सुरतेषु प्रवृत्तेषु सत्सु ये भावाः भाव्यन्ते स्थिरीक्रियन्ते राग एभिरिति भावा नखक्षतादयः विभ्रमाः भ्रूविक्षेपादिविलासाः तत्तत्क्षणकल्पिताः तत्तत्क्षणे रतोत्सवे युवभ्यां कल्पिताः ये ते स्वप्नेऽपि मानसिकवृत्तिष्वपि न दृश्यते न विषयीक्रियते।

---

* 'चोलराजो' in the published text.

** The published text carries the name of the queen as महादेवीं मलयावतीम्। However, BNS mentions– 'महादेवीं तदाख्यां गणिकां'।

**2/7/33 'यथा हि पंचमी धारामास्थाय* तुरगः पथि।**
**स्थाणु श्वभ्रं दरीं वापि वेगान्धो न समीक्षते'॥**

प्लुतादिषु पंचमीं धारां गतिविशेषं वेगान्धः वेगोत्कौट्यान्नयनहीन इव रागार्तौ कामवशगौ सुरतसंतौ सुरतसंमर्दे रतिकालिकसंघर्षणे प्रवृत्तौ ततश्चंडवेगौ उत्कटरागौ संतौ प्रवर्त्तेते कीलादौ अत्ययं अनंतरक्लेशं न समीक्षेते न विचारयतः।

**2/7/34 'तस्मान्मृदुत्वं चंडत्वं युवत्या बलमेव च।**
**आत्मानश्च बलं ज्ञात्वा योगान् युंजीत शास्त्रवित्'॥**

तस्मात् दुःखहेतुत्वात् प्रयोज्यायाः युवत्याः मृदुत्वं अवयवेषु काठिन्यं चंडत्वं च बलं शक्तिः योगान् रतादीन्।

उक्तमुपसंहरति –

**2/7/35 'न सर्वदा न सर्वासु प्रयोगाः साम्प्रयोगिकाः।**
**स्थाने देशे च काले च योग एषां विधीयते'॥**

साम्प्रयोगिकाः सुरतकालिकाः प्रयोगाः कीलादयः न सर्वासु तत्रापि न सर्वस्थानेषु तत्रापि न सर्वदेशेषु तत्रापि न सर्वदा किं तु स्थाने कुचादौ, देशे दक्षिणादौ, काले अभिनवरतिकाले चात् तत्तद्देशे एषां कीलादीनां योगः प्रयोगः।

**इति श्रीकविपदवाक्यतत्त्वज्ञभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ द्वितीयेऽधिकरणे सप्तमोऽध्यायः।**

---

* Another reading is 'सम्प्राप्य'।

अध्याय – 8

# पुरूषायितप्रकरणम्

एवमधोरतान्युक्त्वा एकार्थत्वसंगत्या उपरिरतान्याह –

2/8/1 **'नायकस्य सन्तताभ्यासात्परिश्रममुपलभ्य रागस्य चानुपशमं, अनुमता तेन तमधोऽवपात्य पुरूषायितेन साहाय्यं दद्यात्'।**

युवतिः रताभ्यासात् रतावर्तनात् नायकस्य परिश्रमं क्लान्ततां रागस्य सुरतानुरागस्य अनुपशमं चोपलभ्य ज्ञात्वां तेन नायकेन अनुमता आज्ञप्ता सती तं पुरूषं अवपात्य अधः पातयित्वा पुरूषायितेन पुरुषवदुपरिस्थित्यादिव्यापारेण साहाय्यं रतानुकूल्यं दद्यात् कुर्यात्।

2/8/2 **'स्वाभिप्रायाद्वा विकल्पयोजनार्था'।**

2/8/3 **'नायककुतूहलाद्वा'।**

स्वस्याभिप्रायात् उपरिसुरताभिप्रायज्ञानात् शिल्पप्रयोजनार्था स्वस्या रतचातुर्यज्ञापनप्रयोजनार्थित्वेन ज्ञाता सती नायककुतूहलाद्वा नायकस्य स्वकृतोपरिरतनिरीक्षणौत्कट्याद्वा तेनानुमतेत्याद्यनुवर्त्तते।

2/8/4 **'तत्र युक्तयन्त्रेणैवेतरेणोत्थाप्यमाना तमवपातयेत्'।**

तत्र उपरिरतविषये युक्तयन्त्रेण सम्प्रयोगवतैव इतरेण पुरूषेण उत्थाप्यमाना पर्यंकात् तं पुरूषमवपातयेत् स्वस्थाने योजयेत्।

2/8/4 **'एवं च रतमविच्छिन्नरसं तथा प्रवृत्तमेव स्यात्। इत्येकोऽयं मार्गः'।**

एवं सति तथा प्रवृत्तं अविच्छेदेन विद्यमानं रतं सम्प्रयोगः अविच्छिन्नरसं अविच्छिन्नानन्दवृत्तिमदेव मार्गं प्रकारः। उपरिरतस्येति शेषः।

2/8/5 **'पुनरारम्भेणादित एवोपक्रमेत्। इति द्वितीयः'।**

अशक्या रतं विच्छिद्य उपर्यारूह्य रतारम्भे तु आदित एव चुम्बनादिकमारभ्यैव उपक्रमेत् कुर्यात्। कृतिप्रकारमेवाह –

**'सा विप्रकीर्यमाणकेशकुसुमा श्वासविच्छिन्नहासिनी वक्त्रसंसर्गार्थं स्तनाभ्यामुरः प्रविश्योपपीडयन्ती पुनः पुनः नमयन्ती शिरो याश्चेष्टाः पूर्वमस्यै प्रदर्शितवांस्ता एव प्रतिकुर्वीत'।**

विप्रकीर्ण केशकुसुमा उत्थानात्प्रकीर्यमाणकेशतद्गतकुसुमा श्वासविच्छिन्नहासिनी श्वासेन श्रमजनितश्वासेनापरिमितहासलीलावक्त्रसंसर्गार्थं तदीय वक्त्रचुम्बनार्थं उरस्तस्य प्रविश्यारूह्य उपपीडयन् गाढमालिंगन्ती शिरः तदीयं पुनः पुनः अधरकपोलादि चुम्बनार्थं नमयन्ती स्वाभिमुखमाकर्षयन्ती सती या चेष्टाः नखदशनक्षतादिव्यापाराः पूर्वं तस्योपरिस्थितिकाले अस्यै प्रदर्शिताः तेन कृताः।

**2/8/6 'पातिता प्रतिपातयामीति हसन्ती प्रतितर्जयन्ती च ब्रूयात्। पुनश्च ब्रीडां प्रदर्शयेत्'।**

पातिता पुराहं त्वया प्रतिपातयामि इदानीं अहं त्वां प्रतिकृतये पातयामि अधः इति प्रतितर्जयन्तीमप्रागल्भ्यं पश्येति भीषयन्तीव पुनः पुनः मध्ये मध्ये।

**2/8/6 'श्रमं विरामाभीप्सां च'।**

तदन्ते विरामाभीप्सां उपरमेच्छां दर्शयेत् ज्ञापयेत्।

**2/8/6 'पुरूषोपसृप्तैरेवोपसर्पेत्'।**

पुरूषेणाधोरते उपसृप्तैः कृतव्यापारैः उपरिसुरते तमुपसर्पेत् योजयेत्।

**2/8/7 'तानि च वक्ष्यामः'।**

तानि पूर्वं पुरूषकर्त्तव्यानि च। तथा हि –

**2/8/8 'पुरूषः शयनागताया योषितस्तद्वचमाक्षिप्ताया इव नीवी विश्लेषयेत्'।**

तद्वचनाक्षिप्तचित्तायाः तस्य स्वस्य वचनैः चाटूक्तिभिः आक्षिप्तं अभिमुखीकृतं यस्यास्तस्या इव स्थितायाः योषितः नीवीं स्वयं विश्लेषयेत्।

**2/8/8 'तत्र विवदमानां कपोलचुम्बनेन पर्याकुलयेत्'।**

तत्र तदा विवदमानायां अनिच्छन्तीव जल्पन्तीं पर्याकुलयेत् सम्यक् स्वाधीनीकुर्यात्।

**2/8/9 'स्थिरलिंगश्च तत्र तत्रैनां परिस्पृशेत्'।**

ततोऽप्यवशां तत्र तत्र कुचकपोलादौ परिस्पृशेत् तेन स्पृष्ट्वा वशं नयेत्।

**2/8/10 'प्रथमसंगता चेत् संहतयोश्चोर्वोरन्तरे घट्टनम्'।**

**2/8/11 'कन्यायाश्च'।**

प्रथमं विवादं विनैव तदा संहतयोः संश्लिष्टयोरुर्वोस्तस्याः अन्ते मध्ये घट्टनं प्रसृतं कुर्यात्। कन्यायाः विवदमानायाः कपोलचुम्बनादिना वशीकृतायाश्चैवं कार्यम्।

**2/8/12 'तथा स्तनयोर्हस्तकक्षयोरंसग्रीवायामिति'।**

**2/8/13 'स्वैरिण्यां यथासात्म्यं यथायोगं च'।**

स्तनयोः हस्तयोः कक्षयोश्च संहतयोः तथा प्रसृतकं कुर्यात्। स्वैरिण्यां तु यथासात्म्यं यथास्वभावं यथायोगं यथारागं च तत्कार्यम्।

**2/8/13 'अलके चुम्बनार्थमेनां निर्दयमवलम्बेत्'।**

निर्दयं दृढं चुम्बनार्थं मुखादौ चुम्बनाद्यर्थं।

**2/8/13 'हनुदेशे चांगुलिसम्पुटेन'।**

अंगुलिसम्पुटेन संहतांगुलिभिः च विकल्पे अवलम्बेत्।

**2/8/14 'तत्रैतरस्या ब्रीडा निमीलनं च'।**

तत्र तदा इतरस्याः नायिकाया ब्रीडया नेत्रयोः निमीलनं च भवति।

**2/8/14 'प्रथमसमागमे कन्यायाश्च'।**

**2/8/15 'रतिसंयोगे चैषा कथमनुरज्यत इति प्रवृत्या परीक्षेत्'।**

प्रथमसमागमे कन्यायाश्च स्वाननुभूतस्त्रीसंगमे कन्याया मुग्धायाश्च समागमे सति एषा रतिसंयोगे प्रीतिसम्प्रयोगे विषये कथमनुरज्येत् कथं वा व्याप्रियात् इति तस्याः प्रवृत्तिं परीक्षेत् तावत्पर्यन्तं व्यापृत्य तत उपासीत।

**2/8/16 'युक्तयन्त्रेणोपसृप्यमाणा यतोदृष्टिमावर्तयेत् तत्रैनां पीडयेत्। तद्रहस्यं युवतीनामिति सुवर्णनाभः'।**

युक्तयन्त्रेण रतप्रविष्टेन पुंसा उपसृप्यमाणा चुम्बनक्षतादीना सेव्यमाना सती यतः यद्यत्स्वांगं प्रति दृष्टिं नेत्रमावर्त्तयेत् प्रवर्त्तयेत् तत्र तत्र तदंगे चुम्बनक्षतादिना एनां ब्रीडयेत् स्वाभिप्रायज्ञानेन लज्जितां कुर्यात्। रहस्यं रागोद्रेजकम्।

**2/8/17 'गात्राणां स्रस्तता नेत्रयोर्निमीलनं ब्रीडानाशः समधिका च रतियोजनेति स्त्रीणां भावलक्षणम्'।**

गात्राणां करपादादीनां स्रस्तता स्वेदः ब्रीडानाशः स्वयमपि चुम्बनादिकरणं रतियोजना सुखलाभः इति हेतोः भावलक्षणं भावस्यातिशयसुखस्य लक्षणं ज्ञापकं उक्तस्वेदादित्रयं भवति।

**2/8/18 'हस्तौ धुनोति कम्पते दशति स्विद्यति'**

स्विद्यते हस्तपादादिकं स्विद्यत इव मनः **'उत्थातुं न ददाति'** दृढ़संश्लेषेण उत्थानं नकारयतीति **'पादेन हन्ति'** च तदीय पादं रतावसाने रतकालिकधतुक्षये **'पुरूषस्यातिवर्त्तनम्'** निवर्त्तनमित्येतद् अनधिकभावलक्षणमनधिकः युवत्यपेक्षयान्यूनो भावः सुखं तस्य लक्षणं ज्ञापकं पुरूषस्य भवति।

**2/8/19 'तस्याः प्राग्यन्त्रयोगात्करेण संबाधं गज इव संक्षोभयेत् आमृदुभावात्ततो यन्त्रयोजनम्'।**

युवा यन्त्रयोगात् प्राक् रतारम्भात् पूर्वं आमृदुभावात् कामोदकस्रवणेन मृदुत्वोपपत्तिपर्यन्तं करेण स्वकरकमलेन संबाधगजो रतापेक्षिगजः तादृशकरिण्या इव तस्या यन्त्रं योनिप्रान्तं संक्षोभयेत् संमृद्यात्। ततः मृदुत्वानन्तरं यन्त्रयोजनं रतं कुर्यात्।

रतविशेषानाह –

**2/8/20 'उपसृप्तकं मंथनं हुलः अवमर्दनं पीडितकं निर्घातः वराहघातः वृषाघातः चटकविलसितं सम्पुट इति पुरूषोपसृप्तानि'।**

पुरूषोपसृप्तानि पुरूषकर्तृकरतविशेषाणि।

**2/8/21 'न्याय्यमृजुसम्मिश्रणमुपसृप्तकम्'।**

न्याय्यं यथाद्वारं ऋजु अवक्रं संमिश्रणं संयोजनम्।

**2/8/22 'हस्तेन लिंगं सर्वतो भ्रामयेदिति मन्थनम्'।**

हस्तेन स्वकीयेन गृहीत्वा सर्वतः योनेः सर्वप्रदेशेषु।

**2/8/23 'नीचीकृत्य जघनमुपरिष्टात् घट्टयेदिति हुलः'।**

जघनं तद्द्वारं नीचीकृत्य मेहनात्पश्चात्कृत्वा उपरिष्टात् तदूर्ध्वप्रदेशेषु घट्टयेत् तेन संघर्षयेत् इत्येतत्।

**2/8/24 'तदेव विपरीतं सरभसमवमर्दनम्'।**

तदेव संघट्टनमेव विपरीतं जघनमुपरि कृत्वा तस्याधः प्रदेशकृतम्।

**2/8/25 'लिंगेन समाहत्य पीडयंश्चिरमवतिष्ठेत् इति पीडितकम्'।**

समाहत्य भगपूर्वापरभागम्।

**2/8/26 'सुकरमुत्कृष्य वेगेन स्वजघनमवपीडयेत् इति निर्घातः'।**

स्वजघनं सुकरं दूरं उत्कृष्य उर्ध्वमाकृष्य वेगेन अवपीडयेत् योनिदेशमवघातयेत्।

**2/8/27 'एकत एव भूयिष्ठमवलिखेदिति वराहघातः'।**

एकत एव भगैकभागे भूयिष्ठं पुनः पुनः अवलिखेत् संघृष्यात्।

**2/8/28 'एष एवोभयतः पर्यायेण वृषाघातः'।**

एष अभिघातः मदनसदनपूर्वोत्तरभागयोः पर्यायेण कृतः।

**2/8/29 'सकृन्मिश्रितमनिष्क्रमय्य तत्र तत्रैव द्वित्रिश्चतुरिति घट्टयेत् इति चटकविलसितम्'।**

सकृत् एकवारं मिश्रितं संयुक्तं स्वलिंगं अनिष्क्रमय्याविंयुज्य तत्र तत्रैव द्वारपूर्वमध्यापरभागेषु क्रमेण द्वित्रिश्चतुर्वारम्।

**2/8/30 'रागावसानिकं व्याख्यातं करणं सम्पुट इति'।**

रागावसानिकं रागावसानपर्यन्तं करणं मंथनादिप्रयोगः सम्पुट इति व्याख्यातम् कामशास्त्रतत्त्वज्ञैः।

**2/8/31 'तेषां स्त्रीसात्म्याद्विकल्पेन प्रयोगः'।**

तेषां मंथनादीनां स्त्रीसात्म्यात् स्त्रीस्वभावपर्यालोचनया कार्यः। एवमतिदेष्टुं पुंकृतकरणे धर्मानुक्त्वा योषित्कर्तृके तस्मिन्कांश्चिद्विशेषानुपदर्शयति –

**2/8/32 'पुरूषायितेषु सन्दंशो भ्रमरकः प्रेंखोलितमित्यधिकानि'।**

पुरूषवदाचरति यस्मिन् रते नायिका तत्पुरूषायितं। कर्त्तरि क्तः। उपरिसुरतमित्यर्थः वाचनिकोऽयमतिदेशः।

**2/8/33 'वाडवकेन लिंगमवगृह्य निष्कर्षयन्त्याः पीडयन्त्या वा चिरमवस्थानं सन्दंशः'।**

वाडवकेन वडवयेव विपुलितेन यन्त्रेण अवगृह्य निःशेषं योजयित्वा निष्कर्षयन्त्याः किंचित्किंचिदुत्क्षेपयन्त्याः यन्त्रं संकुच्य संकुच्य पीडयन्त्या वा योषितः कर्त्र्या चिरमवस्थानं व्यापारान्तरं विना स्थितिः

**2/8/34 'युक्तयन्त्रा चक्रवद्भ्रमेदिति भ्रमरक आभ्यासिकः'।**

**2/8/35 'तत्रेतरः स्वजघनमुत्क्षिपेत्'।**

युक्तयन्त्रा गृहीतयन्त्रा सती चक्रवद् भ्रमेत् तत्र भ्रमणकाले इतरः नायकः स्वं जघनं लिंगं उत्क्षिपेत्। पुनःपुनः उत्क्षेपणेन योजयेत् इति अयं भ्रमरकः आभ्यासिकः अभ्यासैकसाध्यः।

**2/8/36 'जघनमेव दोलायमानं सर्वत्र भ्रामयेदिति प्रेंखोलितकम्'।**

सर्वत्र पूर्वापरदेशयोः दोलायमानं दोलावदारमाणं यथा तथा भ्रामयेत् कुर्यात्।

**2/8/37 'युक्तयन्त्रैव ललाटे ललाटं निधाय विश्राम्येत'।**

श्रान्ता सती युक्तयन्त्रैव ललाटे यूनः।

**2/8/38 'विश्रान्तायां च पुरूषस्य पुनरावर्त्तनमिति पुरूषायितानि'।**

विश्रान्तायाः अशक्तौ पुंसः पुनः पूर्ववत् आवर्त्तनमधोरतारम्भः यावद्रागावसानं भवति।

उक्तं संवादयति –

**2/8/39 'प्रच्छादितस्वभावापि गूढाकारापि कामिनी।**
**विवृणोत्येव भावं स्वं रागादुपरिवर्त्तिनी'॥**

भाव्यते स्थिरीक्रियते राग एभिरिति भावाश्चुम्बनादयः अधोरते अनिष्पादिताः स्वस्याः भावा यया अतएव गूढरागा अज्ञापितरागा रागात् रागौत्कट्यात् उपरिवर्त्तिनी उपरिसुरतप्रवृत्ता चेत् भावं चुम्बनादि विवृणोति सम्यक्कुर्यादेव। नायक कार्यमाह –

**2/8/40 'यथा शीला भवेन्नारी यथा च रतिलालसा।**
**तस्या एव विचेष्टाभिस्तत्सर्वमुपलक्षयेत्'॥**

तस्या विचेष्टाभिः चुम्बनादिव्यापारैः शीलं स्वभावं ज्ञात्वा यथा शीला यादृशस्वभाववती यथा रतिलालसा च यादृशरतिलोला च तत्सर्वं तदनुकूलव्यापारमुपलक्षयेत् कुर्यात्।

पुरूषायितायोग्या आह –

**2/8/41 'न त्वेवर्त्तौ न प्रसूतां न मृगीं न च गर्भिणीम्।**
**न चातिव्यायतां नारीं योजयेत्पुरूषायिते'॥**

ऋतौ पुष्पिणीं प्रजातां अभिनवप्रसूतां मृगीं न्यूनयन्त्रां अतिव्यायतां अतिस्थूलाम्।

**इति कविपदवाक्यमानतत्त्वज्ञभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ द्वितीयाधिकरणेऽष्टमोऽध्यायः।**

अध्याय – 9

# औपरिष्टकप्रकरणम्

प्रसंगसंगत्या नायिकाविशेषे रतविशेषमाह –

2/9/1 **'द्विधा तु तृतीयाप्रकृतिः स्त्रीरूपिणी पुरुषरूपिणी चेति'।**

तृतीया प्रकृतिः बन्ध्यास्त्रीरूपिणी स्त्रीवेषादिमती, पुंरूपिणी तद्वेषादिमती चेति। द्विधानुद्विधा खलु।

2/9/2 **'तत्र स्त्रीरूपिणी स्त्रिया वेषमालापं लीलां भावं मृदुत्वं भीरूत्वं मुग्धतामसहिष्णुतां ब्रीडां चानुकुर्वीत'।**

तत्र तयोर्मध्ये स्त्रियाः वेषं प्रकटितकुचकेशादि आलापनं तज्जातीयलीला, भ्रूविलासादिभावं निर्देशादिकं मृदुत्वं वदनादौ भीरूत्वं चकिताक्षित्वादि मुग्धता सौन्दर्यं असहिष्णुता परसौन्दर्यासहनं ब्रीडां नायकमुखेक्षणादौ अनुकुर्वीत कुर्यात् सा स्त्रीरूपिणीत्युच्यते।

2/9/3 **'तस्या वदने जघनकर्म। तदौपरिष्टकमाचक्षते'।**

जघने जघने इव कुर्यात्।

2/9/4 **'सा ततो रतिमाभिमानिकीं वृत्तिं च लिप्सेत्'।**

तत औपरिष्टकानन्तरं आभिमानिकीं अहमनेन नियुक्तास्मि इत्यभिमानजन्यां वृत्तिं मनोरूपां रतिं सुखम्।

2/9/5 **'वेश्यावच्चरितं प्रकाशयेत्। इति स्त्रीरूपिणी'।**

2/9/6 **'पुरूषरूपिणी तु प्रच्छन्नकामा पुरुषं लिप्समाना संवाहकभावमुपचरेत्'।**

ततः वेश्येव चरितं रतानुकूलव्यापारं कुर्यात्। पुरूषरूपिणी तद्वेषालाप–

लीलामृदुत्वाभीरूत्वामुग्धतासहिष्णुताऽव्रीडानुकारिणी प्रच्छन्नकामा उप–गूहित तदुद्रेकावयवा संवाहकभावं तदीय पादादिसंमर्दनं।

**2/9/7 'संवाहनेन च परिष्वजन्ती गात्रैरूरु नायकस्य गृह्णीयात्'।**

संवाहनेन तद्व्याजेन परिष्वजन्ती आलिंगन्ती।

**2/9/8 'प्रसृतपरिचयोरुमूलं संस्पृशन्ती'।**

**2/9/9 'स्थिरलिंगतामस्योपलभ्य पाणिमंथनेन परिघट्टयेत्'।**

प्रसृतपरिचया संवाहनावृत्त्या प्रचुरोरुमूलंसंश्लेषवती क्रमेण ऊरुमूलं तज्जघनं मंथ्यतेऽनेनेति मंथनं पाणिरेव मंथनं तेन परिघट्टयेत् तल्लिंगं मथ्नीयात्।

**2/9/9 'चापलमस्य कुत्सयन्ती हसेत्'।**

चापलं अत्यन्तरतौत्कंठ्यं कुत्सयन्तीव।

**2/9/10 'कृतलक्षणेनाप्युपलब्धवैकृते न चोद्यते चेत्'***

कृतलक्षणेन कृतं स्वस्या लक्षणं लिंगोपमर्दनादिज्ञापकं यस्य तेनापि उपलब्धवैकृतेन उपलब्धं दृष्टं वैकृतं पुरूषवेषादि येन न चोद्यते चेत् नारभ्यते चेत् तदा।

**2/9/11 'पुरूषेण तु चोद्यमाना विवदेत् कृच्छ्रेण चाभ्युपगच्छेत्'।**

चोद्यमाना ज्ञात्वा पुरूषेण रताय प्रेर्यमाणा सती विवदेत् किमेतदिति यत्किंचित् ब्रूयात्।

**2/9/12 'तत्र कर्माष्टविधं समुच्चयप्रयोज्यम्'।**

तत्र ततः तेन कृच्छ्रेण यत्नाधिक्यात् योजितेव समुच्चयेन कर्त्तव्यमष्टविधं वक्ष्यमाणप्रकारं कर्म औपरिष्टकं उपगच्छेत् लभेत।

**2/9/13 'निमित्तं पार्श्वतोदष्टं बहिः सन्दंशः** चुम्बितकं परिमृष्टं आम्रचूषितकं संगर इति'।**

---

* 'स्वयमुपक्रमेत्' is additionaly there in the published text.

** The text misses out 'अन्तःसन्दशः' here; however later it is included while explaining each type of औपरिष्टक कर्म।

**2/9/14 'तेष्वेकैमभ्युपगम्य विरामाभीप्सां दर्शयेत्'।**

**2/9/15 'इतरश्च पूर्वस्मिन्नभ्युपगते तदुत्तरमेवापरं निर्दिशेत् तस्मिन्नपि सिद्धे तदुत्तरमिति'।**

तेषु निमित्तादिषु मध्ये अभ्युपगम्य अनुभूय विरामाभीप्सां निवृत्त्याकांक्षासूचकमिव स्थितं पिधानादि व्यापारं दर्शयेत् कर्त्तुमुद्यच्छेत्। तदा इतरश्च नायकोऽपि पूर्वस्मिन्नौपरिष्टके अभ्युपगते समाप्ते सति तदनन्तरमेवेति तदविच्छेदेनैवापरं द्वितीयमुपरिष्टकं निर्दिशेत् आरभेत्। तस्मिन्नपि सिद्धे निवृत्ते तदनन्तरमेव तदुत्तरमिति एवं प्रकारेणाष्टविधं प्रयोज्यं तेषां क्रमेण लक्षणान्याह–

**2/9/16 'करावलम्बितमोष्ठोपरि विन्यस्तमपविद्धमुखं विधुनुयात्तन्निमित्तम्'।**

पुरूषः करावलम्बितं स्वकरेण गृहीतं उष्ठौपरि तस्या विन्यस्तं स्वमेहनमपविध्य संघृष्य विधुनुयात् सर्वतश्चालयेत् निमननं निक्षेपः तद्रूपत्वान्निमित्तम्।

**2/9/17 'हस्तेनाग्रमवच्छाद्य पार्श्वतो निदर्शनमोष्ठाभ्यां अवपीड्य भवत्वेतावदिति सान्त्वयेत्। तत्पार्श्वतोदष्टम्'।**

हस्तेन स्वस्याः अग्रं शेफसः अवच्छाद्य धृत्वा निदर्शनं यथा तथा पार्श्वं लिंगपार्श्वद्वयमवपीड्य संघृष्य स्थितायां सत्यां नायकः भवत्वेतावदिति तां सान्त्वयेत्। पार्श्वतो दंशनरूपत्वात्पार्श्वतोदष्टम्।

**2/9/18 'भूयश्चोदिता सम्मीलितौष्ठी तस्याग्रं निष्पीड्य कर्षयन्तीव चुम्बेत् इति बहिः सन्दंशः'।**

भूयः सान्त्वनेन मोचने पुनः चोदिता नोदिता सम्मीलितौष्ठी सन्दंशितौष्ठद्वया तस्य गुह्यस्याग्रं निष्पीड्य कर्षयन्ती ओष्ठाभ्यां पार्श्वमाकर्षयन्ती विमुंचेत् न त्यजति चेत् बहिः सन्दंशः बहिरेव सन्दंशनात्।

**2/9/19 'तस्मिन्नेवाभ्यर्थनया किंचिदधिकं प्रवेशयेत्। सापि चाग्रमोष्ठाभ्यां निष्पीड्य निष्टीवेत् इति अन्तः सन्दंशः'।**

अभ्यर्थनया तस्मिन् व्यक्ते सति किंचिदधिकं पूर्वापेक्षया प्रवेशयेत्। प्रवेशयति चेत्तदा ओष्ठाभ्यामग्रं निष्पीड्य निष्ठीवेन्निरस्येत् दूत्कुर्यात्। अन्तःसन्दंशः अन्तः प्रविष्टस्य सन्दंशनात्।

**2/9/20 'करावलम्बितस्यौष्ठवद् भ्रमणं चुम्बितकम्'।**

**2/9/21 'तत्कृत्वा जिह्वाग्रेण सर्वतो घट्टनमग्रे च व्यधनमिति परिमृष्टकम्'।**

तत्पूर्वोक्तं सर्वतः पार्श्वयोः अग्रेण अग्रावच्छेदेन इति एतत् परितो मर्शनात् घट्टनात्।

**2/9/22 'तथाभूतवदेव रागवशादर्धप्रविष्टं निर्दयमवपीड्य मुंचेत् इत्याम्रचूषितकम्'।**

तथाभूतवदेव पूर्ववदेव कृत्वा रागवशात् तदौत्कंठ्यात् आम्रफलवत् चोषणात्।

**2/9/23 'पुरूषाभिप्रायादेव गिरेत्पीडयेत् चापरिसमाप्तेरिति संगरः'।**

पुरूषाभिप्रायात् तदिंगितज्ञानात् संगिरणात् संगरः।

**2/9/24 'यथार्थं चात्र स्तननप्रहणनयोगाः। इत्यौपरिष्टकम्'।**

स्तननप्रहणनयोगा इव त इव अत्र औपरिष्टकेऽपि निमित्तादिकं यथार्थं अन्वर्थं ज्ञेयम्।

**2/9/25 'कुलटा स्वैरिण्यः परिचारिकाः संवाहिकाश्चाप्येतत् प्रयोजयन्ति'।**

**2/9/26 'तदेतन्न कार्यम्। समयविरोधादसभ्यत्वाच्च'।**

कुलं त्यक्वा अटन्ति स्वेच्छयेति तथा कुल एव स्थित्वा स्वेच्छं रह ईरयन्ति तथा परिचारिकाः अलंकर्त्रीजातीयाः संवाहिकाः पादसेविकाजातीयाः। एतदौपरिष्टकं न कार्यम् सभ्यैः। कुतः समयविरोधात् शिष्टाचारविरोधात् असभ्यत्वात् अयोग्यत्वात् प्रायश्चित्तस्मरणम्।

**2/9/26 'पुनरपि ह्यासां वदनसंसर्गे स्वयमेवार्त्तिं प्रपद्येत। इत्याचार्याः'।**

स्वयमार्त्तिमेव आर्त्तिमपि गुह्यावच्छेदेन।

**2/9/27 'वेश्याकामिनोऽयमदोषः। अन्यतोऽपि परिहार्य इति वात्स्यायनः'।**

वेश्याकामिनः विटस्य अयं निमित्तादिः अदोषः अपरिहार्यो दोषः प्रायेण तासां तत्कामित्वात् अन्यतः अन्यत्ररतानां अपिस्त्वर्थः।

**2/9/28 'तस्माद्यास्त्वौपरिष्टकमाचरन्ति न ताभिः सह संसृज्यन्ते प्राच्याः'।**

तस्मान्निन्दितत्वात् या वेश्याः।

**2/9/29 'वेश्याभिरेव न संसृज्यन्ते अहिच्छत्रिकाः'।**

अहिच्छत्रपुरीनिवासिनः।

**2/9/29 'संसृष्टा अपि मुखकर्म तासां परिहरन्ति'।**

**2/9/30 'निरपेक्षाः साकेतकाः संसृज्यन्ते'।**

संसृष्टा अपि वेश्याभिः तासां वेश्यानां निरपेक्षाः प्रामाणिकाः साकेताः अयोध्यकाः स्यात् साकेतमयोध्यायामिति कोशात्। सम्प्रयुज्यन्ते।

**2/9/31 'न तु स्वयमौपरिष्टकं आचरन्ति नागरिकाः'।**

सम्प्रयुज्यन्ते ताभिः स्वयं स्वेच्छया।

**2/9/32 'सर्वमविशंकया प्रयोजयन्ति सौरसेनाः'।**

सर्वमौपरिष्टकाष्टकं सौरसेनिकाः तद्देशीयाः एवं देशविशेषसंवादे स्वयं परिष्करोति एवमित्यादिना–

**'एवं ह्याहुः—को हि योषितां शीलं शौचमाचारं चरित्रं प्रत्ययं वचनं वा श्रद्धातुमर्हति। निसर्गादेव हि मलिनदृष्टयो, एता न परित्याज्यास्तस्मादासां स्मृतित एव शौचमन्वेष्टव्यम्।* एवं ह्याहुः—**

**'वत्सप्रस्त्रवणे मेध्यः श्वा मृगग्रहणे शुचिः।**
**2/9/33 शकुनिः फलघातेषु स्त्रीमुखं रतिसंगमे'॥**

**'शिष्टविप्रतिपत्तेः स्मृतिवाक्यस्य च सावकाशत्वाद्देशस्थितेरात्मनश्च**
**2/9/34 प्रकृतिप्रत्ययानुरूपं प्रवर्त्तेतेति वात्स्यायनः'।**

---

* This cynical view was prevalent during those days that women in general were of impure character and as such they should not be trusted; but at the sametime they should not be abandoned; they should be made use of the way one uses river, road, pub, assembly hall etc. and their company enjoyed.

CP. 'यथा नदी च पन्थो च पानागारं सभा प्रपा।
एवं लोकित्थियो नासं कुज्झन्ति पण्डिता।।' – अनभिरति जातक

also- पक्वान्नमिव राजेन्द्र सर्वसाधारणाः स्त्रियः।
तस्मात्तासु न कुप्येत् न रज्येत् रमेत च।।

आहुः प्राज्ञः शीलं स्वभाव शौचं शुचित्वं आचारं प्रकृतिं चरित्रं अनुष्ठानं प्रत्ययं निश्चयं श्रद्धातुं इत्थमेवेति निश्चेतुं कोऽर्हति, न कोऽपि। कुतः निसर्गात् स्वभावात् मलिनदृष्टयो अत्यन्तरजस्तमोमिश्रचित्ताः हि हेतौ, एताः स्वीयात्वेन स्वीकृताः स्त्रिय एव। न परित्याज्याः नोपेक्ष्याः किं तु यथा भावं तोषयितव्या इति शेषः। तासां शौचं शुचित्वं तु स्मृतितः शास्त्रादेव तस्मात् अनुपेक्षणीयत्वात् अन्वेष्टव्यं ज्ञातव्यम्।स्मृतिमेवाह इति आहुः मन्वादयः प्रस्रवणे गवां स्तन्यस्रवणे वत्सः तद्वत्समुखं मेध्यं शुचिः मृगग्रहणे शशादिसंघर्षणे श्वा तन्मुखं, फलघाते तच्छेदने विषये शकुनिः तदास्यं, रतिसंगमे रतिहेतु रते शुचिः नात्रोच्छिष्टदोष इति भावः। शिष्टानां प्रामाणिकानां विप्रतिपत्तेः आचारविसंवादात् स्मृतिवाक्यस्य वत्स – इत्याद्युदाहृतस्य सावकाशत्वात् अपांसुलस्त्रीविषयत्वाद्देशस्थितेः देशाचारात् आत्मनः स्वस्य चात् तस्याः प्रकृतिः स्वभावः प्रत्ययोऽनुरागः अनुरूपमनुकूलं योग्यं च चुम्बनाद्यौपरिष्टकान्तं प्रवर्त्तेत कुर्यात् वात्स्यायन इति परोक्षोक्ति रामो जयतीतिवत् प्रागल्भ्यं सूचनार्थः।

2/9/35 **'सुमृष्टकुण्डलाश्चापि युवानः परिचारकाः।**
**केषांचिदेव कुर्वन्ति नराणामौपरिष्टकम्'॥**

परिचारकाः राजसेवकाः अस्त्रीकाः केषांचित् ग्राम्याणां कुर्वन्ति।

2/9/36 **'तथा नागरिकाः केचिदन्योन्यस्य हितैषिणः।**
**कुर्वन्ति रूढविश्वासा प्रायः परपरिग्रहम्'॥**

नागरिकाः नगरस्था अप्यस्त्रीकाः परपरिग्रहं परपरिग्रह इव परस्परमौपरिष्टकम्।

2/9/37 **'पुरूषाश्च तथा स्त्रीषु कर्मैतत्किल कुर्वते।**
**व्यासस्तस्य तु विज्ञेयो मुखचुम्बनवद्विधिः'॥**

तस्य औपरिष्टकस्य स्त्रीपुंसप्रयोज्यस्य व्यासः विभक्तिः भेदः भिन्नः मुखचुम्बनवत् स्त्रीपुंप्रयोज्यमुखचुम्बनस्येव विधिः अनुष्ठानप्रकारः।

एवं उपर्यधोभेदेन रतभेदमुक्त्वा सिंहावलोकनन्यायेन तृतीयं रतमाह –

2/9/38 **'परिवर्त्तितदेहौ तु स्त्रीपुंसौ यत्परं रते।**
**युगपत्संप्रयुज्येते कोकिलः* स किलोच्यते'॥**

परिवर्त्तितदेहौ पार्श्वस्थितावित्यर्थः। शिष्टविप्रतिपत्तेरित्यादिना सूचितमौपरिष्टकनिषेधं विशदयति तस्मादित्यादिना।

* In the published text the world is 'काकिलः'

**2/9/39 'तस्माद्गुणवतस्त्यक्त्वा चतुरांस्त्यागिनो नरान्।
वेश्याः खलेषु रज्यन्ते दासहस्तिपकादिषु'॥**

गुणवतः सौन्दर्यादिमतः चतुरान् कलाकुशलानपि त्यागिनः औपरिष्टकस्य जनान् शिष्टान् खलेषु अपवित्रेषु।

**2/9/40 'न त्वेवं ब्राह्मणो विद्वान् मन्त्री वाक्यविशारदः।
गृहीतप्रत्ययो वापि कारयेदौपरिष्टकम्'॥**

एवं शिष्टगर्हितमौपरिष्टकं विद्वान् विवेकी ब्राह्मणः तदादिः वाक्यविशारदः नीतिज्ञः मन्त्री जात्यन्तरो वा गर्हितप्रत्ययः अतिराग्यपि न कारयेत् न कुर्यात् वत्सेत्यादिशास्त्रं व्यवस्थापयति –

**2/9/41 'न शास्त्रमस्तीत्येतावत्प्रयोगे कारणं भवेत्।
शास्त्रार्थान्व्यापिनो विद्यात्प्रयोगांस्त्वेकदेशिकान्'॥**

प्रयोगे अनुष्ठाने शास्त्रं सामान्यं शास्त्रं एतावदेतावन्मात्रं भवेत् कुतः शास्त्रार्थान् सामान्यशास्त्रप्रतिपद्यान् व्यापिनः अव्यवस्थया प्रतीयमानप्रयोगान् शिष्टानुष्ठानानि एकदेशिकान् व्यवस्थितान् विद्यात् जानीयात्। तत्र दृष्टान्तमाह –

**2/9/42 'रसवीर्यविपाका हि श्वमांसस्यापि वैद्यके।
कीर्त्तिता इति किं तस्मात् भक्षणीयं विचक्षणैः'॥**

श्वमांसस्य रसः रसविशेषः वीर्यं तद्वर्धनं विपाकः औदर्यवर्धनं आदिशब्देन शरीरपुष्टिः। विचक्षणैः शिष्टैः भक्षणीयं किं, न भक्षणीयमेवेत्यर्थः तस्य श्वपाकादिविषयत्वात्। तेषां गतिमाह –

**2/9/43 'सन्त्येव पुरूषाः केचित् सन्ति देशास्तथाविधाः।
सन्ति कालाश्च येष्वेते योगाः न स्युः निरर्थकाः'॥**

पुरूषाः अपवित्राः देशास्तथाविधाः कालास्तेषामेव रागोद्रेककालाः योगाः औपरिष्टकादयः। उपसंहरति –

**2/9/44 'तस्माद्देशं च कालं च प्रयोगं शास्त्रमेव च।
आत्मानं चापि सम्प्रेक्ष्य योगान्युंजीत वा न वा'॥**

तस्मात् निन्दितत्वात् देशं निन्दितानिन्दितं कालं च तथा प्रयोज्यां तथा विधां शास्त्रं व्यवस्थितं कालं पवित्रापवित्रादिस्वरूपं सम्प्रेक्ष्य पर्यालोच्य योगान् चुम्बनाद्यौपरिष्टकान् तान्।

**2/9/45 'अर्थस्यास्य रहस्यत्वाच्चलत्वान्मनसस्तथा।**
**कः कदा किं कुतः कुर्यादिति को ज्ञातुमर्हति'॥**

अस्य व्यवस्थितस्य रहस्यत्वात् शास्त्रगम्यत्वात् कः पुमान् कदा काले किं कर्म कुतः कुतश्चित् हेतोः अतः इदं औपरिष्टकं सर्वसाधारण्येन निषिद्धमित्येव घोषितव्यमित्यर्थः।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ द्वितीयेऽधिकरणे नवमोऽध्यायः।**

अध्याय – 10

# रतारम्भावसानिकप्रकरणम्

एवं बाह्याभ्यन्तरोभयरतमुक्त्वानन्तरकर्त्तव्यमुपदेष्टुं प्रयोगसौकर्याय वृत्तं संक्षेपेणानु-वदति नागरिक इत्यादिना –

**'नागरिकः सह मित्रजनेन परिचारकैश्च कृतपुष्पोहारे संचारितसुरभिधूपे रत्यावासे प्रसाधिते वासगृहे कृतस्नानप्रसाधनां युक्त्या पीतांस्त्रियं**
2/10/1 **सान्त्वनैः पुनः पानेन चोपक्रमेत्'।**

**'दक्षिणतोऽस्या उपवेशनं केशहस्ते वस्त्रान्ते नीव्यां वा अवलम्बनं।**
2/10/2 **रत्यर्थं सव्येन बाहुनानुद्धतः परिष्वंगः'।**

**'पूर्वप्रकरणसम्बन्धैश्च परिहासानुरागैर्वचोभिरनुवृत्तिः।**
2/10/3 **गूढाश्लीलानां च वस्तूनां समस्यया परिभाषणम्'॥**

**'सनृत्तं अनृत्तं वा गीतं आरभ्यते एभिः स्यात्तासु संकथा पुनः**
2/10/4 **पानेनोपच्छन्दनम्'।**

**'जातानुरागायां कुसुमानुलेपनताम्बूलदानेन शेषजनविसृष्टिः। विजने च यथोक्तैरालिंगनादिभिरेनामुद्धर्षयेत्। ततो नीवीविश्लेषणादिय-**
2/10/5 **थोक्तमुपक्रमेत्। इत्ययं रतारम्भः'।**

नागरिकः कृतः पुष्पोपहारः पुष्पशय्या यस्मिन् संचारितः प्रसारितः सुरभिधूपः सुगन्धिधूपो यस्मिन् रत्याधाने रतिः रतिसाधनरतं अधीयतेऽस्मिन्निति रतिसाधनम्। प्रसाधिते वितानतोरणाद्यलंकृते वासगृहे केलिगृहे स्नानमंजनं प्रसाधनं नेपथ्यकृतेन यया तां ईषत्पानेन मत्तप्रायां स्त्रियं मित्रजनेन परिचारकैश्च सह युक्या हासेक्षणादिना सान्त्वनैः मधुरवचनैः पुनः पानेन सहपानेन च ताम्बूलादिदानेन उपक्रमेत् क्रमेण वशं नयेत्। ततः अस्या दक्षिणतः दक्षिणभागे उपवेशनं स्वस्य स्थितिं कुर्यात्। तस्याः केशहस्ते केशेषु हस्तयोर्वा

रत्यर्थं तद्धेतु रतार्थं अवलम्बनं स्वदक्षहस्तसंयोजनमनुद्धतः अगाढः परिष्वंगः आलिंगनं च। पूर्वप्रकरणसम्बद्धैः प्रकर्षेण क्रियत इति प्रकरणं अधिकरणं तत्सम्बद्धैः प्रतिपादितैः अनुवृत्तिः तस्याः वशीकरणम्। गूढमस्पष्टं अश्लीलव्रीडाकरं वस्तूनां तादृशार्थप्रतिपादकानां समस्यया एकदेशेन सनृत्तं साभिनयं गीतं स्वरसन्दोहः वादित्रं गानकालपरिच्छेदकातोद्यध्वनिः उभयं च कारयेत्। कालेषु भूतकालेषु अवस्थासु बाल्याद्यवस्थासु स्वस्यान्येषां वासं कथाविनोदकं चरित्रप्रतिपादनं पानेन पायनेन उपच्छन्दनं उन्मादनम्। जातानुरागायां लिंगैरूद्रिक्तानुराग–वत्तयाज्ञातायां सत्यां कुसुमं तन्मालानुलेपनं चन्दनं ताम्बूलं सोपस्करसुपत्राणि एतेषां दानेन शेषजनानां नृत्तगीतादिप्रवृत्तानां मित्रदासादिजनानां च विसृष्टिः प्रस्थापनम्। ततः विजने तदितरजनरहिते देशे यथोक्तेः पंचमाध्यायोक्तैरालिंगनादिभिः गाढालिंगनचुम्बननखक्षतादिभिः उद्धर्षयेत् बाह्यरतं कुर्यात् इत्यर्थः। ततः बाह्यरतेनात्यन्तरागोद्रेके सति यथोक्तं सप्तमाध्यायोक्तं अधोरतादिकमान्तरमुपक्रमेत् कुर्यादित्ययं रतारम्भः रतारभ्यते एभिः साधनैरिति रत्यारम्भो रतसाधनानि इति उक्तरीत्या ज्ञेयः। एवं प्रयोगवचनमुक्त्वा प्रकृतं रतावसानिकमाह –

**2/10/6 'आवसानिकं रागमतिबाह्यासंस्तुतयोरिव सव्रीडयोः परस्परमपश्यन्तोः पृथक् पृथक् बहिर्भूमिगमनम्'।**

आवसानिकं धातुक्षरणान्तं रागहेतुरतं अतिवाह्य परिसमाप्य असंस्तुतयोः अपरिचितयोः इव सव्रीडयो परस्परमुखनिरीक्षणह्रीमतोः अतएव परस्परमपश्यतो यूनोः पृथक्प्रत्येकं बहिर्भूमिगमनं केलिगृहात् भिन्नबाह्यप्रदेशगमनं भवति।

**2/10/6 'प्रतिनिवृत्य च व्रीडायमानयोरूचितदेशोपविष्टयोस्ताम्बूलग्रहणमच्छीकृतं चन्दनमन्यद्वानुलेपनं तस्या गात्रेषु स्वयमेव निवेशयेत्'।**

प्रतिनिवर्त्य पादक्षालनादिकं कृत्वा व्रीडायमानयोः व्रीडिताविवाचरतो रूचिरदेशोपविष्टयोः समन्दगन्धवहत् हृदयानन्ददेशस्थयोः सतोः ताम्बूलग्रहणं तच्चर्वणं ततो नायकः अच्छीकृतं कर्पूरादिना अतिशीतलीकृतमन्यद्वानुलेपनं रक्तागर्वादि तस्याः नायिकायाः गात्रेषु निवेशयेत् अनुलेपयेत्।

**2/10/7 'सव्येन बाहुना परिष्वज्य चषकहस्तः सान्त्वयन् पाययेत्'।**

बाहुना स्वस्य चषकहस्तः दक्षकरगृहीतपानपात्रः सान्त्वयन् मधुमधुरालापैर्लालयन्।

**2/10/7 'जलानुपानं च खंडखाद्यकमन्यद्वा सात्म्ययुक्तमुभावप्युपयुंजीयाताम्'।**

एलोशीरादिवासितशीताम्बुपानं खंडखाद्यकं इक्षुखंडादिकं अन्यद्वा केलिफलादिकं सात्म्ययुक्तं स्वभावानुगुणं उभौ युवानौ उपयुंजीयातां भुंजीयाताम्।

**2/10/8 'अच्छरसकं यूषमम्लयवागूं भृष्टमांसोपदंशानि पानकानि चूतफलानि मातुलुंगचुक्रकाणि सशर्कराणि यथादेशसात्म्यं मृदुविशदमिति च विदश्य तत्तदुपाहरेत्'।**

अच्छरसकं सुगन्धवासितमधुरं यूषं पक्वमुद्गादिरसं अम्लांजवीरादिरसयुक्तां यवागुं ओदनरसं पानकानि द्राक्षादिफलोदकानि मातुलुंगचुक्रकाणि बीजपूरत्वचः यथादेशसात्म्यं देशस्वभावानुसारेण तत्र उक्तवस्तुमध्ये तत्तद्वस्तु विदश्य स्वयमर्धं खात्वा इदं वस्तु मधुरं इदं मृदुकोमलं इदं विशदं समीचीनमिति च निर्दिश्य उपाहरते् खादयेत्।

**2/10/9 'हर्म्यतलस्थितयोरूर्ध्वस्थितयोर्वा चन्द्रिकासेवनार्थं आसनम्'।**

हर्म्यतलस्थयोः चन्द्रशालामध्यस्थितयोः ऊर्ध्वं प्रासादोपरि आसनमुपवेशनम्।

**'तत्रानुकूलाभिः कथाभिरनुवर्त्तनम्'।**

तत्रानुकूलाभि मनोरमाभिः अनुवर्त्तनं अन्योन्यानुरंजनम्।

**2/10/9 'तदंकसंलीनायाः चन्द्रमसं पश्यन्त्या नक्षत्रपंक्तिव्यक्तीकरणं। अरून्धतीध्रुवसप्तर्षिमालादर्शनम् च। इति रतावसानिकम्'।**

'तदंकसंलीनायाः स्वांकोपविष्टस्वबाहुसंश्लिष्टायां व्यक्तीकरणं तत्तत् नाम्ना ज्ञापनं दर्शनं प्रदर्शनं। रतावसानिकं रतान्ते तद् गात्राणि निवर्त्तकं। तत्रैतद् भवति तत्रास्मिन्नर्थे एतद् वृद्धवाक्यम्–

**2/10/10 'अवसानेऽपि च प्रीतिरूपचारैरूपस्कृता।**
**सविश्रम्भकथायोगैः रतिं जनयते पराम्'॥**

अवसाने रतस्य विरतौ च, चान्मध्ये उपचारैः उक्त तत्तदाचरणैः उपस्कृतावर्थिता सविश्रम्भकथायोगैः सानुरागप्राचीननायकगोष्ठीभिः प्रीतिः रागः परां चिरस्थायिनीं उक्तमेव विवृणोति –

**2/10/11'परस्परप्रीतिकरैरात्मभावानुवर्त्तनैः।**
**क्षणात्क्रोधपरावृत्तैः क्षणात्प्रीतिविलोकितैः'॥**

**2/10/12 'हल्लीसक क्रीडनकैः गायनैर्लाटरासकैः।**
**रागलोलार्द्रनयनैः चन्द्रमण्डलवीक्षितैः'॥**

**2/10/13 'आद्ये सन्दर्शने जाते पूर्वं ये स्युः मनोरथाः।**
**पुनर्वियोगे दुःखं च तस्य च प्रीतिकीर्त्तनैः॥**
**कीर्त्तनान्ते च रागेण परिष्वंगैः सचुम्बनैः।**
**तैस्तैश्च भावैः संसक्तैर्यूनोः स्नेहो विवर्धते'॥**

आत्मभावानुवर्त्तनैः अन्योन्यस्य स्वभावानुसरणैः क्रोधपरावृत्तैः प्रणयकलहेन परस्परनिरीक्षणैः हल्लीसकक्रीडनकैः रासक्रीडाभिः गायनैः गानैः लाटरासकैः देशविशेषक्रीडनैः रागलोलार्द्रनयनैः पानरक्तलज्जालोलानुरागार्द्रनिरीक्षणैः तस्य सर्वस्य प्रतिकीर्त्तनैः अन्योन्यकथनैः कीर्त्तनान्ते उक्तकथनान्ते स्वभावैः प्रकृत्यनुगुणैः संसक्तैः चेष्टाभिः एवं रतावसानिकं परिसमाप्य रतानामेव सिंहावलोकनन्यायेन कालप्रयोज्यविशेषाभ्यां भेदमाह –

**2/10/14'रागवदाहार्यरागं कृत्रिमरागं व्यवहितरागं पोटारागं खलरतं अयन्त्रितरतमिति रतविशेषाः'।**

तेषां क्रमेण लक्षणान्याह –

**2/10/15 'सन्दर्शनात्प्रभृत्युभयोरपि प्रयत्नकृते समागमे प्रवासप्रत्यागमने कुपितप्रसन्नायाश्च रागवत्'।**

सन्दर्शनप्रभृति रागपूर्वकपरस्परनिरीक्षणमारभ्य यत्नलब्धैः प्रवासप्रत्यागमने प्रोषितस्य पुनरागमनान्तरभाविनि कुपितप्रसन्नायाः प्रणयकुपिता सती या प्रसन्ना तस्याः सम्बन्धिनीसमागमे रते रागवत् अतिरागजन्यत्वाद्रागवदिति संज्ञा भवति।

**2/10/16 'तत्रात्माभिप्रायाद्यावदर्थं च प्रवृत्तिः'।**

**2/10/17 'मध्यस्थरागयोरारब्धं यदनुरज्यते तदाहार्यरागम्'।**

तत्र रते आत्माभिप्रायं स्वेच्छापर्यन्तं वा यावदर्थं धातुक्षयपर्यन्तं वा मध्यस्थरागयोः उपक्रमे मन्दरागयोर्यूनो रते बाह्यरते जाते अनुरागोद्रेके सति इत्यनन्तररतमारब्धं तत्त्रितयं वैच्छिकत्वादाहार्यरागम्।

**2/10/18 'तत्र चातुःषष्टिकैर्योगैः सात्म्यानुविद्धैः सन्धुक्ष्य सन्धुक्ष्य रागं प्रवर्त्तयेत्'॥**

**2/10/19'यत्कार्यहेतोरन्यत्रसक्तयोर्वा तत्कृत्रिमरागम्'।**

**2/10/20 'तत्र समुच्चयेन योगाञ्शास्त्रतः पश्येत्'।**

चातुःषष्टिकैः चुम्बनाद्यष्टाष्टकैः अत्रत्य चतुःषष्टिप्रकरणोक्तैर्वा योगैः सात्म्यानुविद्धैः प्रयोज्यस्वभावानुसारेण प्रयुक्तैः योगैः साधनैः रागं प्रीतिं सन्धुक्ष्य सन्धुक्ष्य अतिशयेन वर्धयित्वा तत्र रते प्रवर्त्तयेत्। प्रवर्त्तनमिति यत्कार्यहेतोः कार्यान्तरवशात् अन्यत्र कार्यान्तरे सक्तयोः आसक्तमनसोर्यूनोः यत्तत्र प्रवृत्तिः तद्वा कृत्रिमत्वाकृत्रिमरागं। तत्र कृत्रिमरागे योगान् चतुःषष्ट्यात्मकान् शास्त्रतः तदनुसारेण पश्येत् प्रयुंज्यात्।

**2/10/21 'पुरुषस्तु हृदयप्रियामन्यां मनसि निधाय व्यवहरेत्। सम्प्रयोगात्प्रभृति रतिं यावत्। तद्व्यवहितरागम्'।**

पुरुषस्तु पुमानेव हृदयप्रियां इतोऽप्यतिप्रियां निधाय ध्यायन् प्रयोगप्रभृति बाह्यरतिमारभ्य रतिं यावत् रागपरिसमाप्तिपर्यन्तं यत्र रते व्यवहरेत् प्रवर्त्तयेत् तनोर्व्यवधानात्तथा।

**2/10/22 'न्यूनायां परिचारिकायां वा यावदर्थं प्रयोगस्तत्पोटारतम्'।**

न्यूनायां स्वापेक्षया या न्यूनजात्युत्पन्नायां परिचारिकायां राजादेः यावदर्थं धनलाभपर्यन्तं प्रयोगः सम्प्रयोगः। तदुदरनिमित्तत्वात्तदाख्यम्।

**2/10/23 'तत्रोपचारान्नाद्रियते'।**

तत्र पोटारागे उपचारान् चतुःषष्टियोगान् नाद्रियेत् नातिकुर्यात्। तासां तादृशप्रीत्यहेतुत्वादित्यर्थः।

**2/10/24 'तत्र वेश्याया ग्रामीणेन सह यावदर्थं खलरतम्'।**

तथा यूनः राजकीय एव वेश्यायाः ग्रामीणेन ग्रामाद्यधिपतिना सह यावदर्थं धनलाभावधि यद्रतं तत्खलकर्तृकत्वात् तदाख्यम्।

**2/10/25 'ग्रामव्रजप्रत्यन्तयोषिद्भिश्च नागरकस्य'।**

ग्रामः नगरादीषु न्यूनः व्रजोत्पन्नजनाश्रयः तयोः प्रत्यासन्नाः स्वस्थान–समीपवर्त्तिन्यः नागरिकस्य वा यद्रतं तदपि खलप्रयोज्यकत्वात्तदाख्यम्।

**2/10/26 'उत्पन्नसंभ्रमयो परस्परसात्म्यानुकूल्यात् अयन्त्रितरतम्। इति रतानि'।**

परस्परसात्म्यानुकूल्यात् यूनोरन्योन्यस्वभावैक्यात् उत्पन्नविस्रम्भयोः अनतियत्नेन लब्धानुरागयोः यद्रतं तत् अयत्नलब्धत्वात्तदाख्यं इति रतानि।

एवं प्रासंगिकं परिसमाप्य नक्षत्रदर्शनादिविनोदैः निरस्तरतिखेदयोः पुन रतारम्भाय रागोद्रेजकं प्रणयकलहाख्यकम् हि –

**2/10/27'वर्धमानप्रणया तु नायिका सपत्नीनामग्रहणं तदाश्रयमालापं गोत्रस्खलितं वा न मर्षयेत्'।**

वर्धमानप्रणयां क्रमशो वर्धिष्यमाणप्रीतिमती अनुनायिका उपनायिका सपत्नीनामग्रहणं प्रवृद्धरागवन्नायिकान्तरनामोच्चारणं युवकर्तृकं तदाश्रयं सपत्नीविषयं गोत्रस्खलितं वा भ्रान्त्या तन्नामकथनं वा न सहेत्।

**2/10/27'नायकव्यलीकं च'।**

नायकान्तरनामग्रहणं स्वयं न कुर्यात्।

**2/10/28'तत्र सुभृशं कलहः'।**

तत्र तदा सुभृशं सुष्ठु मृदुभृशं च कलहः कार्यः। तमेवाह –

**2/10/28'रूदितमायासः शिरोरूहाणामवक्षोदनं प्रहणनमासनाच्छयनाद्वा मह्यां पतनं माल्यभूषणावमोक्षो भूमौ शय्या च'।**

आयासः अतिनिःश्वासः अवक्षोदनं प्रकिरणं प्रहणनं उरसः। नायक कृत्यमाह–

**2/10/29'तत्र युक्तरूपेण साम्ना पादपतनेन वा प्रसन्नायां सानुनयमुपक्रम्य शयनमारोहयेत्'।**

तत्र तदा युक्तरूपेण तत्कालोचितेन साम्ना प्रियवचनेन उपक्रम्योद्धृत्य शयनं शय्याम्।

**2/10/30'तस्य च बन्धनमुत्तरीयेण योजयन्ती विवृद्धक्रोधा सकचग्रहण–मस्यास्यमुन्नमय्य पादेन बाहौः शिरसि वक्षसि पृष्ठे वा सकृद्विस्त्रि–रवहन्यात् यावद्द्वारदेशं गच्छेत्। तत्रोपविश्याश्रुकरणमिति'।**

**2/10/31'अतिक्रुद्धापि द्वारदेशाद्भूयो न गच्छेत्। दोषवत्वादिति दत्तकः'।**

उत्तरीयेण तदीयेन।

**2/10/31'तत्र युक्तितोऽनुनीयमाना प्रसादमाकांक्षेत्' कुर्यात्।**

**2/10/31'प्रसन्नापि तु सकषायैरेव वाक्यैरेनं तुदतीव'।** सकषायैरेव सेर्ष्यैरेव।

**2/10/31 'प्रसन्ना रतिकांक्षिणी परिरभ्येत्'।**

तदुक्तीः स्वोद्वा प्रसादितां परिरभ्येत् संश्लिष्य शय्यां प्रापयेत्।

**2/10/32 'स्वभवनस्था निमित्तात्कलहिता तथाविधचेष्टैव नायकमभिगच्छेत्'।**

अथवा निमित्तादुक्तात् कलहिता तथाविधचेष्टैव विकीर्णकेशादिमत्येव स्वभवनस्था स्ववासगृहान्तरस्था सती नायकं नाभिगच्छेत्'

**2/10/33 'तत्र पीठमर्दविटविदूषकैर्नायकप्रयुक्तैरूपशमितरोषा तैरेवानुनीता तैः सहैव तद्भवनमधिगच्छेत्'।**

तत्र स्वगृहे नायकप्रयुक्तैः तत्प्रेषितैः पीठमर्दादिभिः पूर्वोक्तलक्षणैः प्रशमितरोषा तेन नायकेन च अनुनीता तेनैव सह तत् भर्तृगृहं नायकगृहं।

**2/10/33 'तत्रैव वसेदिति प्रणयकलहः'।**

तत्रैव नायकगृह एव व्यवसेन्निवसेत्। पीठमर्दादिनां कलहप्रशमनप्रागल्भ्यं सूचयन् तद्धेतु चतुःषष्टिविद्यां अन्वयव्यतिरेकाभ्यां स्तौति एवमित्यादिना–

**'एवमेतां चतुःषष्टिं बाभ्रव्येण प्रकीर्त्तितम्।**
**2/10/34 प्रयुंजानो वरस्त्रीषु सिद्धिं गच्छति नायकः'।।**

**'ब्रुवन्नप्यन्यशास्त्राणि चतुःषष्टिविवर्जितः।**
**2/10/35 विद्वत्संसदि नात्यर्थं कथासु परिपूज्यते'।।**

**'वर्जितोऽप्यन्यविज्ञानैरनया यस्त्वलंकृतः।**
**2/10/36 स गोष्ठ्यां नरनारीणां कथास्वग्रं विगाहते'।।**

**'विद्वद्भिः पूजितमेनां खलैरपि सुपूजिताम्।**
**2/10/37 पूजितां गणिकासंघैर्नन्दिनीं को न पूजयेत्'।।**

**'नन्दिनी सुभगा सिद्धा सुभगंकरणीति च।**
**2/10/38 नारीप्रियेति चाचार्यै शास्त्रेष्वेषा निरूच्यते'।।**

**'कन्याभि परयोषिद्भिर्गणिकाभिश्च भावतः।**
**2/10/39 वीक्ष्यते बहुमानेन चतुःषष्टिविचक्षणाः'।।**

एतां पूर्वोक्तां अन्यानि शास्त्रान्तराणि अग्र्यं श्रेष्ठ्यं नन्दिनी प्रयोक्तुरानन्दिनी सुभगा श्रोतुर्मनोरमा सिद्धा अपरिचितवश्यहेतुः सुभगंकरणी।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरवासीभास्करनरसिंहशास्त्रिविरचित–वात्स्यानसूत्रवृत्तौ द्वितीयेऽधिकरणे दशमोऽध्यायः।**

**समाप्तं चेदं साम्प्रयोगिकं द्वितीयमधिकरणम्**

**Note :**

Hitherto Vātsyāyana discussed the technical aspects of various sexual acts. This sub chapter takes up the issue from lovers' angle. It begins with lovers meetings in a pleasant and conducive atmosphere; their embarking upon the act which culminates in their copulation. Thereafter when their passions have subsided they once again come together and engage in pleasant exchange which heighten and brighten their love for each other. The following lines that appear in the fragmentary work Dattaka Sutra corroborate this—

**'दर्शनं स्पर्शनं तासां हासं सम्भाषणं तथा।**
**एतत्कामरसं प्रोक्तं शेषं व्यायामलक्षणम्'।।**

Later, he speaks of factors behind different types of sexual engagements. He closes by eulogizing 'NANDINI' ie the collective name for sixty four sexual acts discussed earlier.

This concept of 'Nandini' metamorphosed to concepts of 'Anangasthana' and 'Chandrakaladhikara' in later works on Kāma Śāstra. 'Nandini' was highly acclaimed and coitio. 'Angangasthana' in fact is the narration of countespoil of 'Nandini'. Of course the role of moon digits detailed in 'Chandrakaladhikara' was an insightful addition to the scheme.

श्रीः

# 3. 'कन्यासम्प्रयुक्तकं नाम तृतीयमधिकरणम्'

अध्याय–1

## वरणसंविधानप्रकरणम्

एवं रत्याख्यसुखानुभवे द्वारं रतं सप्रपंचं निरूप्य तत्करणमूलं जनविभावाख्यं सप्रपंचं निरूपयिष्यन् तत्रापि पुत्राद्यानुषंगिकानेकफलहेतुतयाऽभ्यर्हिततमं पत्नाख्यविभावं निरूपयामीति सूचयितुं तस्य पुत्राद्यनेकफलहेतुत्वं पूर्वोक्तमनुवदति –

3/1/1 **'सवर्णायां अनन्यपूर्वायां शास्त्रतोऽधिगतायां धर्मोऽर्थः पुत्रः सम्बन्धः पक्षवृद्धिरनुपस्कृता रतिश्च'।**

सवर्णायां सजातीयायां अनन्यपूर्वमन्यापरिगृहीतायां शास्त्रतः विवाहसंस्कारेणाधिगतायां लब्धायां सम्प्रयोगः कृतश्चेत् धर्मोऽप्रत्यवायः यज्ञादिर्वा अर्थः यशः सम्बन्धः सजातीयानुबन्धः पक्षवृद्धिः वंशाभिवृद्धिः अनुपस्कृता बलवदनिष्ठा ननु बद्धारतिरानन्दानुभवः चाद्बहूपकारः भवति।

3/1/2 **'तस्मात्कन्यामभिजनोपेतां मातापितृमतीं त्रिवर्षात्प्रभृतिन्यूनवयसं श्लाघ्याचारे धनवति पक्षवति सम्बन्धिप्रिये सम्बन्धिभिश्चाकुलेकुले प्रसूतां प्रभूतपितृपक्षां रूपशीललक्षणसम्पन्नामन्यूनाधिकाऽविनष्ट-केशनखदन्तकर्णाक्षिस्तनीमरोगप्रकृतिशरीरां तथाविध गुण एव श्रुतवान् शीलयेत्'।**

अभिजनोपेतां सुप्रसिद्धकुलीनां त्रिवर्षात्प्रभृतिदशवर्षाधिकन्यूनवयसं स्वस्मात् श्लाघ्याचारे वैदिकाचारसम्पन्ने पक्षवति पुत्रपौत्रसम्पन्ने सम्बन्धिप्रिये सम्बन्धिषु पुत्रदुहित्रादिषु रागवति सम्बन्धिभिः ज्ञातिभिरकुले वितते प्रभूतपितृपक्षां प्रबृद्धपितृवंशां रूपं सौन्दर्यं शीलं सद्वृत्तिः लक्षणं विपुलनेत्रादि श्रुतवान् चतुःषष्टिविद्यासम्पन्नः शीलयेत् परिणयेत्।

**3/1/3 'यां गृहीत्वा कृतिनमात्मानं मन्येत'**

यस्यां प्रीतिस्तां वृणेतेति पूर्वेणान्वयः।

**3/1/3 'न च संयुक्तामन्यैर्निन्द्यां प्रवृत्तिरिति घोटकमुखः'।**

अन्यैः पूर्वसंयुक्तां परिगृहीतां न च शीलयेत्।कुतः तस्यां परिगृहीतायां।

**3/1/4 'तस्या वरणे मातापितरौ सम्बन्धिनश्च प्रयतेरन्'।**

तस्या स्वप्रीतिविषयायाः वरणे पुत्राद्यर्थं याचनविषये।

**3/1/4 'मित्राणि च गृहीतवाक्यान्युभयसम्बद्धानि'।**

**3/1/5 'तान्यन्येषां वरयितॄणां दोषान् प्रत्यक्षानागमिकांश्च सुखं श्रावयेयुः'।**

गृहीतवाक्यानि विश्वसनीयवचनानि उभयसम्बद्धानि वधूवरसम्बन्धिनी मित्राणि वरस्य अन्येषां स्वाभिमतात् पितृणां पित्रादीनां आगारिकासुखं गार्ह्यदुःखं च तानि नायिकामातापित्रादीन् प्रति।

**3/1/5 'कौलान्पुरूषानभिप्रायसंवर्धनानन्यांश्च नायकगुणान् च। विशेषतश्च कन्यामातुरनुकूलांस्तदात्वायतियुक्तान्दर्शयेयुः'।**

कौलान् वंशपरम्परा सिद्धान् पौरूषान् अभिप्रायसंवर्धनान् वधुमात्रादेर्वरानुरागवर्धकान् नायकगुणान् विद्याविनयादीन् रूपशीलादीन् अनुकूलादीन् धनकुशलतादीन् तदात्वायतियुक्तान् तात्कालिकभाविसुखसूचकान् प्राप्तियुक्तान् नायकगुणान् तद्गुणबोधकवाक्यानि दर्शयेयुः ब्रूयुः।

**3/1/6 'दैवचिन्तकरूपश्च शकुननिमित्तग्रहबललग्ननक्षत्रलक्षणदर्शनैः नायकस्य भविष्यन्तमर्थसंयोगं कल्याणमनुवर्णयेत्'।**

दैवचिन्तकरूपः ज्योतिःशास्त्रज्ञाः शकुनं भाविसूचकं विप्रयुग्मादिदर्शनं निमित्तं तत्सूचकदक्षिणाक्षिस्फुरणादिग्रहबललग्नं केन्द्रकोणादिस्थितगुर्वादिमल्लग्नोत्पत्तिलक्षणं नक्षत्रमादित्याद्युत्पत्तिलक्षणं विशालाक्षित्वादि एतेषां दर्शनैः पर्यालोचनेन अर्थसंयोगं धनसम्पत्तिं कल्याणं पुत्रपौत्रादिसमृद्धिं अनुवर्त्तयेत् वधूमातापितृनिकटे ब्रूयात्।

**3/1/7 'अपरे पुनरस्यान्यतो विशिष्टेन कन्यालाभेन कन्यामातरमुन्मादयेयुः'।**

अपरे वरसम्बन्धिनः विशिष्टेन शीलसम्पत्त्यादिगुणवतः अन्यतः तस्मादन्यकुलात् अस्य वरस्य कन्यालाभेन कन्यालभ्यत इति कथनेन उन्मादयेयुः शीघ्रप्रदाने प्रोत्साहयेयुः।

**3/1/8 'दैवनिमित्तशकुनोपश्रुतीनामानुलोम्येन कन्यां वरयेच्च दद्याच्च'।**

एवं बन्धुभिः परस्परानुकूल्ये सम्पादिते उभयोर्मातापितृभिः दैवं नक्षत्रगणकादिनिमित्तं मनः प्रसादादि शकुनं परस्परगृहगमनकाले सजलकुम्भसुवासिनीयुग्मदर्शनादि उपश्रुतिः। तात्कालिकशुभवाक्यादिः। एतेषां आनुलोम्येनानुसारेण दद्यात् दातुं निश्चिनुयात्।

**3/1/9 'न यदृच्छया केवलमात्मात्रोपयमेदिति घोटकमुखः'।**

यदृच्छया स्वेच्छया केवलं शकुनादिकं विना अत्र विवाहादौ आत्मावधूवरपित्रादिः नोपयमेत् परिणेतुं न यतेत्। कन्यादोषानाह– सुप्तामित्यादिना।

**3/1/10 'सुप्तां रूदतीं निष्क्रान्तां वरणे परिवर्जयेत्'।**

**3/1/11 'अप्रशस्तनामधेयां च दत्तां गुप्तां घोणां पृषतां ऋषभां विनतां विकटां मुंडां शुचिदूषितां स्वावरिकां सांकरिकां राकां फलिनीं पालीं गुल्मिनीं व्यंगां मित्रां अनुजां वर्षां च वर्जयेत्'*।**

**3/1/12 'नक्षत्राख्यां नदीनाम्नीं** वृक्षनाम्नीं च गर्हितां।<br>लकाररेफोपान्तां च वरणे परिवर्जयेत्'॥**

निष्क्रान्ता वरणावसरे धावन्ती अप्रशस्तनामधेयां घासगुल्मादिनाम्नीं दत्तां पुनर्भुवं गुप्तां अन्योद्देशेनरक्षितां घोणां चिपिटनासिकां पृषतां विवर्णविप्रुषां ऋषभां वृषस्कन्धां विनतां अतिनम्रां विकटां वक्रां मुंडां शिरोरूहशून्यां शुचिदुषितां अमंगलप्रायां स्वावरिकां स्वीयदूषणपरां शांकरिकां वृषलीं राकां चंडीं गुल्मिनीं गुल्मरोगवतीं व्यंगां न्यूनाधिकांगीं मित्रां वयस्यां अनुजां सपिंडां फलिनीं अभिव्यक्तस्तनी पालीं शारवतीं गर्हितां निन्दितगुणां लकाररेफोपान्तं तदुपान्तनाम्नीम्।

---

* Sutras 3/1/10 to 3/1/13 and 3/1/15 have been taken from Apastamba Grihya Sutra. 'इत्येके' in 3/1/13 has been identified as Apastamba by Bhaskara Narasimha Sastri.

* Kosambi's observation in this regard-

"Pargiter sawÖÖ that marrying women with river-names was considered dangerous by the Manu-smriti (P.135: MS.3.9.)Ö That this derived from an original custom of sacrifice to or by the river-goddess of some quite human husband has not struck him at all,Ö" D.D. Kosambi in the study of Ancient Indian Tradition (P.200)

**3/1/13 'यस्यां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिः। नेतरामाद्रियेतेत्येके'।**

निबन्धः रागपूर्वकसम्बन्धः नाद्रियेत न बृणुयात् एके आपस्तम्बादयः।

**3/1/14 'तस्मात्प्रदानकाले कन्यामुदारवेषां दर्शनविषये स्थापयेयुः'।**

तस्मात् स्वापादिमतीनां निषिद्धत्वात् प्रदानकाले वरणकाले उदारवेषां अलंकृतां दर्शनविषये तेषां दृष्टिप्रदेशे।

**3/1/14 'आपराह्णिकं वा नित्यप्रसाधितायाः सखीभिस्सह सह क्रीडा यज्ञविवाहादिषु जनसमवायेषु प्रायत्निकं दर्शनम्'।**

नित्यप्रसाधितायाः अपराह्णे नित्यमलंकृतायाः क्रीडां क्रीडाकाले आपराह्णिकं तात्कालिकं यज्ञविवाहादिषु जनसमुदायेषु चरन्त्या वा प्रायत्निकं यत्नपूर्वकं दर्शनकार्यम्।

**3/1/14 'तथोत्सवेषु च'।**

उत्सवेषु देवतानां तथा दर्शनं कार्यम्। कुतः –

**3/1/14 'पण्यसधर्मत्वात् कन्यानां'।**

पण्यं क्रय्यं तत्सधर्मत्वात् तत्तुल्यत्वात् परीक्ष्य ग्राह्यत्वादिति यावत्।

**3/1/15 'वरणार्थमुपगतांश्च भद्रदर्शनान्प्रदक्षिणवाचश्च सुहृत्सम्बन्धिसंगतान् कुलपुरूषान्मंगलैः प्रतिगृह्णीयुः'।**

**3/1/16 'कन्यां चैषामलंकृतामन्यापदेशेन दर्शयेयुः'।**

**3/1/17 'दैवं परीक्षणं चावधिं स्थापयेयुः। आ प्रदाननिश्चयात्'।**

वरणार्थं कन्यां प्रार्थयितुमागतान् स्वगृहं भद्रदर्शनान् सौम्यदृष्टीन् प्रदक्षिणवाचः कल्याणवक्तृन् सुहृत्सम्बन्धिसंगतान् सुहृद्भिः सम्बन्धिभिः वन्धुभिश्च सहागतान् कुलपुरूषान् वरपित्रादीन् मंगलैः गन्धताम्बूलादिभिः प्रतिगृह्णीयुः पूजयेयुः। अन्यापदेशेन कार्यान्तरव्याजेन तैर्वृतायां तत्पित्रादयः आप्रदाननिश्चयात् निश्चितदानसिद्धिपर्यन्तं दैवमैश्वरं परीक्षणं इच्छामात्रं चाददृष्टं अवधिं नियामकं स्थापयेयुः ब्रूयुः।

**3/1/18 'स्नानादिषु च नियुज्यमाना वरयितारं सर्वं भविष्यतीति उक्त्वा तदहरेवाभ्युपगच्छेयुः'।**

देशप्रवृत्तिसात्म्याद्वा वरयितारः कन्यावरणकर्त्तारः स्नानादिषु वरस्य स्नातकगोदानिकर्त्तव्येषु नियुज्यमानाः वधूपित्रा विज्ञापिताः सन्तः अभ्युपगच्छेयुः स्वगृहे आभ्युदयिकं कर्म कुर्युः।

**3/1/19 'देशप्रवृत्तिसात्म्याद्वा'।**

देशचारः स्वात्म्यं स्वकुलाचारः सद्यो वा कुर्यात्।

**3/1/19 'ब्राह्मप्राजापत्यार्षदैवानामन्यतमेन विवाहेन शास्त्रतः परिणयेत्'**

स्वीकुर्यात् स्वगृह्योक्तप्रकारेण।

**3/1/19 'इति वरणविधानम्'।**

ब्राह्मैर्विवाहः आहूयालंकृत्य दानं प्राजापत्यः सहधर्मं चरतामिति परिभाष्य यत्र कन्या दीयते स आर्षः यत्र गोमिथुनमादाय कन्या प्रदीयते, स दैवः यस्मिन्यज्ञानुष्ठाने वितते ऋत्विजे शक्यलंकृता कन्या दीयते। तदुक्तं मिताक्षरायाम् –

**Yaj.Sm 3/58 'ब्राह्मे विवाहे आहूय दीयते शक्यलंकृता'।**

**Yaj.Sm 3/59 'यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोद्वयम्' इत्युक्वा'**

**Yaj.Sm3/60 'चरतां धर्मं सह या दीयतेऽर्थिने स काय इति'।**

शास्त्रतः स्वं गृह्योक्तप्रकारेण परिणयेत् स्वीकुर्यात्। वरणविधानं वरणविवाहोभयप्रकारः उक्तः।

**3/1/20 'समस्याद्याः सहक्रीडा विवाहं मंगलानि च।**
**सदृशैरेव कार्याणि नोत्तमैर्नापि चाधमैः'॥**

समस्याद्याः श्लोकैकदेशकथनतत्पूरणाद्याः विवाहमंगलानि विवाहादिशुभकर्माणि सदृशैः सहजातिशीलविद्यौदार्यादिभिः समानैरेव कार्याणि उत्तमाधमादिसम्बन्धादेवाभियुक्तोक्त्या विशदयति–

**3/1/21 'कन्यां गृहीत्वा वर्त्तेत प्रेष्यवद्यत्र नायकः।**
**तं विद्यादुच्चसम्बन्धं परित्यक्तं मनीषिभिः'॥**

प्रेष्यवत् दास इव यत्र कन्यागृहे उच्चैः सम्बन्धं उच्चैरूत्कृष्टैः परित्यक्तं परित्याज्यम्।

**3/1/22 'स्वामिवद्विचरेद्यत्र बान्धवैः स्वैः पुरस्कृतः।**
**अश्लाघ्यो हीनसम्बन्धः सोऽपि सद्भिर्निगद्यते'॥**

बान्धवैः श्वशुरादिभिः पुरस्कृतः सेवितस्सन् स्वामिवत् राजेव यत्र सम्बन्धे हीनैः सम्बन्धः विवाहः।

**3/1/23 'परस्परसुखास्वादा क्रीडा यत्र प्रयुज्यते।**
**विशेषयन्ती चान्योन्यं सम्बन्धः स विधीयते'॥**

परस्परसुखस्वादा अन्योन्यनिरपेक्षसुखानुभववत् सम्बन्धिनी क्रीडा परस्पर–दानप्रतिग्रहादिलीला यत्र विवाहे अन्योन्यं वधूवरसम्बन्धिनः विशेषयन्ती सन्मानयन्ती इति सम्बन्धः समसम्बन्धः।

आगतावाह –

**3/1/24 'कृत्वापि चोच्चसम्बन्धं पश्चात् बन्धुषु सन्नमेत्।**
**न त्वेव हीनसम्बन्धं कुर्यात् सद्भिः विगर्हितम्'॥**

उच्चैः उत्तमेन बन्धुषु श्वशुरादिषु सन्नमेत् विनीतो भवेत् स्वभार्यां स्वगृहं नेतुमिति शेषः। नीचैः कुलाचारहीनैः।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासीभास्करनरसिंह-शास्त्रिकृतवात्स्यायनसूत्रवृत्तौ कन्यासम्प्रयुक्तके तृतीयेऽधिकरणे प्रथमोऽध्यायः।**

# कन्याविस्त्रम्भणप्रकरणम्

एवं विवाहमुक्त्वा उपजीवकत्वसंगत्या ततः कर्त्तव्यमाह –

**3/2/1 'संगतयोः त्रिरात्रमधःशय्या ब्रह्मचर्यं अक्षारलवणमाहारस्तथा सप्ताहं सतूर्यमंगलस्नानं प्रसाधनं सहभोजनं प्रेक्षासम्बन्धिनां च पूजनम्'।***

संगतयोः विवाहसम्बद्धयोः कार्यः आसप्ताहमितिच्छेदः मंगलस्नानं मंगल–हेतुत्वभ्यंजनपूर्वकं प्रेक्षासम्बन्धिनां विवाहं दृष्ट्वा बन्धुवर्गस्य। इति सार्ववर्णिकम्।

**3/2/1 'इति एतत् सार्ववर्णिकम्'।**

सर्ववर्णसाधारणम्।

**3/2/2 'तस्मिन्नेतां निशिविजने मृदुभिरूपायैः उपक्रमेत्'।**

तस्मिन् विवाहदिन एव उपायैः मुखनिरीक्षणादिभिः उपक्रमेत् तां वशयितुम्। त्रिरात्रमवचनमित्याचार्याः। त्रिरात्रं विवाहदिनमारभ्य रात्रित्रयावधि अवचनं तत्सम्भाषणरहोहासादिवर्जं स्थेयमिति केचिदाचार्याः।

**3/2/3 'त्रिरात्रं अवचनं हि स्तम्भमिव विमना नायकं पश्यन्ती कन्या**

निर्विष्टो दूना परिभवेच्च तृतीयामिव प्रकृतिमिति बाभ्रवीयाः'।

त्रिरात्रं तत्पर्यन्तं अवचनं रहसि सम्भाषणरहितं नायकं स्तम्भमिव पश्यन्ती अतएव विमनाः निर्विष्टो दूनाभृतोत्कृष्टखेदा सती तृतीयाप्रकृतिमिव एनं परिभवेत् अवमंस्येत्। अतो नो वास्तव्यमिति दूषयन्ती। कुतः–

**3/2/4 'उपक्रमेत् विस्त्रम्भयेच्च न तु ब्रह्मवर्चसमतिवर्त्तेत इति वात्स्यायनः'।**

---

* CP. त्रिरात्रमक्षारलवणाशनौ स्यातामधः शयीतां संवत्सरं न मिथुनमुपेयातां द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः।
– पाराशर गृह्य सूत्र –

उपक्रमेत् विवाहदिन एव रहः सम्भाषणादिकमारभेत्। स्वस्मिन् तां विस्रम्भां कुर्यात्, ब्रह्मवर्चसं ब्रह्मचर्यं।

**3/2/5 'उपक्रममाणश्च न प्रसह्य किंचिदाचरेत्'।**

प्रसह्य बलात्कारेण किंचित्किंचिदपि चुम्बनादिः। कुतः

**3/2/6 'कुसुमसधर्माणो हि योषितः सुकुमारोपक्रमास्तास्त्वनधिगतविश्वासैः प्रसभमुपक्रम्यमाणाः सद्यः सम्प्रयोगद्वेषिण्यो भवन्ति। पुरूषद्वेषिण्यो वा। तस्मात्साम्नैवोपचरेत्'।** उपक्रमेत्।

कुसुमसधर्माणः अतिकोमलचित्ताः अतः सुकुमारोपक्रमाः मन्दं मन्दमनुरंजनीयाः। अनधिगतविश्वासैः अप्राप्तदृढानुरागैः पुरूषैः प्रसभः बलात् उपक्रम्यमाणाः चुम्बनादिषु व्याप्रियमाणाः सत्यः पुरूषद्वेषिण्यः एतादृशनायकविरक्ताः कालान्तरेऽपि सम्प्रयोगद्वेषिण्यो वा भवेयुः। साम्नैव शनैस्तन्मत्यनुसारेणैव उपक्रमेत् आलिंगनादौ, तदेव विशदयति –

**3/2/7 'युक्त्यापि तु यतः प्रसरमुपलभेत् तेनैवानुप्रविशेत्'।**

यतः यया युक्त्या उपायेन प्रसरमवकाशं उपलभेत् प्राप्नुयात् तेनैवोपायेनानुप्रविशेत् अनुरंजयेत्।

**3/2/8 'तत्प्रियेणालिंगनेनानतिकालत्वात्'।**

तत्प्रियेण वा नायिकाप्रियेणापि आलिंगनेन स्वल्पकालं मृदुतां योजयेत्। कुतः अनतिकालत्वात्तत्प्रीतेः।

**3/2/9 'पूर्वकायेन चोपक्रमोऽविषह्यत्वात्'।**

पूर्वकायेन च मुखेनैव उपक्रमः परिरम्भस्य। कुतः अविषह्यत्वात् सर्वांगालिंगनस्य।

**3/2/10 'दीपालोके विगाढयौवनायाः पूर्वसंयुतायाश्च'*।**

दीपालोके दीपयति मनोभुवमिति दीपो यौवनं तस्यालोके रतम् भावपरीक्षणे यतमानः तस्यां प्रवृद्धयौवनायां सत्यां पूर्वसंयुतायाः पूर्वोक्तगाढालिंगनादयो भवेयुः नेदानीमित्यर्थः।

---

* Bhaskara Narasimha Sastri misses out the second part of the sutra – 'बालाया अपूर्वायाश्चान्धकारे'।

**3/2/11 'अंगीकृतपरिष्वंगायाश्च वदनेन ताम्बूलदानं। तदप्रतिपद्यमानां सान्त्वनवाक्यैः शपथैः प्रतियाचितैः पादपतनैश्च ग्राहयेत्'।**

अंगीकृतपरिष्वंगायाः स्वीकृतोर्ध्वकायमृदुलाश्लेषायाः सत्याः ताम्बुलदानं चर्वितैकदेशवीटीप्रदानं। अप्रतिपद्यमानां अनंगीकुर्वन्तीं सान्त्ववचनैः मधुरवचनैः शपथैः त्वदधीनत्वप्रतिज्ञानैश्च सम्प्रार्थ्य तत्प्रतिग्राहयेत्।

**3/2/11 'व्रीडायुक्तापि योषिदत्यन्तक्रुद्धापि न पादपतनमतिवर्त्तते इति सार्वत्रिकम्'**

पादपतनं नायकस्य नातिवर्त्तते नोल्लंघयेत्।

**3/2/12 'ताम्बूलदानप्रसंगेण च मृदुविशदमकाहलमास्यचुम्बनम्'।**

विशदमुचितमकाहलं अनतिशब्दम्।

**3/2/13 *'तत्र सिद्धामालापयेत्'।**

**3/2/14 'तदालापश्रवणार्थं यत्किंचिदल्पाक्षराभिधेयमजानन्निव पृच्छेत्'।**

अल्पाक्षराभिधेयं स्वल्पपदालापनीयं।

**3/2/15-16 'तत्र निष्प्रातिपत्तिमनुद्वेजयन्ननिर्भर्त्सयन् तत्राप्यवदन्तीं निर्बध्नीयात्'।**

तत्रापि भूयः प्रयत्नेऽपि निर्बध्नीयात् पादपतनादिना भूयः प्रार्थयेत्।

**3/2/17 'सर्वा अपि कन्या पुरूषेण प्रयुज्यमानम् वचनं विषहन्ते। न तु लघुमिश्रामपि वाचं वदन्तीति घोटकमुखः'.।**

विषहन्ते गृह्णन्ति लघुमिश्रां लघ्वाक्षरां न वदन्ति हि।

**3/2/18 'निर्बध्यमाना तु शिरःकम्पेन प्रतिवचनानि योजयेत्'।**

निर्बध्यमाना पुरूषेण योजयेत् सूचयेत्।

**3/2/18 'कलहे तु न शिरः कम्पयेत्'।**

कलहे आग्रहे कृते तु किंचित्कालं शिरः तदपि।

* BNS misses out this sutra.

**3/2/18 'इच्छसि मां नेच्छसि वा कि तेऽहं रूचितो न रूचितो वेति पृष्टा चिरं स्थित्वा निर्बध्यमाना तदानुकूल्येन शिरः कम्पयेत्'।**

इच्छसि इदानीं रूचितः इष्टः स्थित्वा तूष्णीं निर्बध्यमाना अतिबलात्कृता तदानुकूल्येन नायकमत्यानुसारेण।

**3/2/19 'प्रपंच्यमाना तु अतिसम्भाषणानिर्बध्यमाना विवदेत्'।** क्रुध्येत्।

**3/2/20 'संस्तुता चेत् सखीं चानुकूलामुभयतोऽपि विस्रब्धामन्तरा कृत्वा कथायोजनम्। तस्मिन्नधोमुखी विहसेत्। तां चातिवादिनीमधिक्षिपेत् विवदेच्च'।**

संस्तुता परिचिता चेत् उभयत उभयोरपि विश्वस्तां अनुकूलां गोष्ठीचतुरां सखीं अन्तरा कृत्वा मध्ये नियोज्य कथायोजनं गोष्ठीप्रवर्त्तनं कुर्यात्। तस्मिन् कथाप्रसंगे सख्या क्रियमाणे नायिका अधोमुखी विहसेत्। तां सखीमतिवादिनीं प्रियानुरक्तबहुप्रलापिनीं अधिक्षिपेत् निराकुर्यात् विवेदत् प्रतिवदेत्।

**3/2/20 'सा तु परिहासात् सर्वमिदमनयोक्तमित्यनुक्तमपि ब्रूयात्'।**

सा सखी अनुक्तमपि तया नायकं प्रति तत्समक्षं ब्रूयात्।

**3/2/20 'तत्र तामपनुद्य प्रतिवचनार्थमभ्यर्थ्यमाना तूष्णीमासीत। निर्बध्यमाना तु नाहमेवं ब्रवीमीत्यव्यक्ताक्षरमनवसितार्थं वचनं ब्रूयात्'।**

नायिका च तत्र गोष्ठीविषये अवरूध्यमाना मुखपिधानेन निरून्धती निर्बध्यमाना तर्हि त्वया किमुक्तमिति नायकेन भूयो भूयः पृच्छ्यमाना अनवसितार्थं अनिश्चितार्थं ब्रूयात् शनैः।

**3/2/20 'नायकं च विहसन्ती कदाचित्कटाक्षैः प्रेक्षेत – इत्यालापयोजनम्'।**

तदा सकृत्सकृत्कटाक्षैः रागमसृणतिर्यगीक्षणैः प्रेक्षेत। तं आलापयोजनं नायिकालापयितृव्यापारः।

**3/2/21 'एवं जातपरिचया चानिर्वदन्ती तत्समीपे याचितं ताम्बूलं स्त्रजविलेपनमिति निदध्यात्। उत्तरीये वास्य निबध्नीयात्'।**

ततः यत्किंचित् जातपरिचया उत्पन्नविश्वासा निर्वदन्ती अनालापन्ती सती याचितं तेन इति इत्यादिकं तत्समीपे नायकसमीपे।

**3/2/22 'तथायुक्तामाच्छुरितकेन स्तनमुकुलयोरूपरि स्पृशेत्'।**

**3/2/23 'वार्यमाणश्च त्वमपि मां परिष्वजस्व ततो नैवमाचरिष्यामीति स्थित्या परिष्वंजयेत्। परिष्वजमानः स्वहस्तमानाभिप्रदेशात्प्रसार्य निवर्तयेत्'।**

नायकश्च तथायुक्तां ताम्बूलदिस्थापनव्यग्रां आच्छुरितकेन नखक्षतविशेषेण मर्दयेत् किंचित्तुदेत् वार्यमाणः करकमलेन तत्कर्मणि निरूध्यमानः सन् परिष्वजस्व सर्वांगेन ततः तदा एवं उक्तक्षतं स्थित्या शपथेन परिष्वंजयेत् स्वत एव सर्वांगालिंगनप्रवृत्तां कुर्यात्। परिष्वजमानायाः परिष्वंगव्यग्रायाः आनाभिप्रदेशात् नाभिप्रदेशपर्यन्तमेव निवर्तयेत् विरमेत्।

**3/2/23 'क्रमेण चैनामुत्संगमारोप्याधिकमधिकमुपक्रमेत्। अप्रतिपद्यमानां च भीषयेत्'।**

क्रमेण उक्तेन उत्संगं स्वस्य अप्रतिपद्यमानां अधिकमनिच्छन्तीं इव स्थिताम्

**3/2/24 'अहं ते खलु दशनपदानि अधरे करिष्यामि स्तनपृष्ठे च नखपदं। आत्मनश्च स्वयं कृत्वा त्वया कृतमिति सखीजनस्य ते वक्ष्यामि'।**

कोमले अधरे स्तनपृष्ठे च दशनपदानि रदननखांकानि आत्मनश्च मुखादौ पदं क्षतं स्वयं स्वनखदन्तैः कृतं मम मुखादौ।

**3/2/24 'सा त्वं किमत्र प्रतिपत्स्यत इति बालविभीषितैः बालप्रत्यायनैश्च शनैरेनां प्रतारयेत्'।**

अत्र एतादृशवाक्यै सा मत्प्रतिकूला किं प्रतिपत्स्यसे किं वक्ष्यसि बालभीषितैः बालमिव भीषणवाक्यैः बालप्रत्यायनैश्च तामेवं लालनवचनैः प्रतारयेत्।

**3/2/25 'द्वितीयस्यां तृतीयस्यां च रात्रौ किंचिदधिकं विस्त्रम्भितां हस्तेन योजयेत्'।**

**3/2/26 'सर्वांगिकं चुम्बनमुपक्रमेत्'।**

द्वितीयस्यां वैवाहिकादह्नः किंचित्किंचित् विस्रब्धां अनुकूलितां हस्तेन हस्ताभ्यां योजयेत् सर्वांगं स्पृशेत् सर्वांगिकं सर्वांगभवं यथा तथा उपक्रमेत् कुर्यात्।

**3/2/27 'उर्वोश्चोपरि विन्यस्तपाणिः संवाहनक्रियायां सिद्धायां क्रमेणोरूमूलमपि संवाहयेत्'।**

ऊर्वोः तस्याः संवाहनक्रियायां पादसमर्दनादौ सिद्धायां स्वेनकृतायां ऊरूमूलमपि तस्याः।

**3/2/27 ‘निवारिते संवाहने को दोष इत्याकुलयेदेनां तच्च स्थिरीकुर्यात्’।**

**3/2/27 ‘तत्र सिद्धायां गुह्यदेशाभिमर्शनम्’।**

निवारते तया अनुकूलयेत् अंगीकारयेत्। तच्च तत्र कर्मणि स्थिरीकुर्यात् निश्चलीकुर्यात्। ततः क्रमेण ऊरूमूलसंवाहने सिद्धायां स्थिरीभूतायां सत्यां परिवर्तनं विमोचनं संवाहनं पुनः कार्यम्।

**3/2/28 ‘रशनावियोजनं नीवीविस्त्रंसनं वसनपरिवर्त्तनमूरूमूलसंवाहनं च। एते चास्यान्यापदेशात्’।**

ते उक्तचुम्बनादयः चादन्येऽपि स्वाभिमतव्यापाराः अस्य नायकस्य अन्यापदेशात् अन्यत्र कालान्तरे परस्पररागाभिवर्धनद्वारा अपदेशात् अभ्यासाय भवन्ति।

**3/2/28 ‘न त्वकाले व्रतखण्डनम्’ ।**

न तु युक्तयन्त्रां अप्रौढां अतएवायोग्यकाले न रंजयेत् न सम्प्रयुंज्यात् रतद्वेषापत्तेः शास्त्रविरोधाच्चेतिभावः। किं तु –

**3/2/29 ‘अनुशिष्याच्च’।**

तामुत्तरकालोपयोगितया शिक्षयेत् चात् अनुरागवतीं कुर्यात्।

3/2/29 **‘आत्मानुरागं’** आत्मनस्तस्यामनुरागं **‘प्रदर्शयेत्’** प्रकटयेत्।

3/2/29 **‘मनोरथांश्च पूर्वकाननुवर्णयेत्’** पूर्वकान् परिणयपूर्वकालिकान् मनोरथान् परस्परखेलनवांछाः अनुवर्णयेत् तां प्रतिब्रूयात्।

**3/2/29 ‘आयत्या च तदानुकूल्येन प्रवृत्तिं प्रतिजानीयात्। सपत्नीभ्यश्च साध्वसमवच्छिन्द्यात्। क्रमेणाविमुक्तकन्याभावामनुद्वेजयन्नुपक्रमेत्। इति कन्याविस्त्रम्भणम्’।**

आयत्यामुत्तरकाले तदानुकूल्येन तस्याः वध्वाः आनुकूल्येन चित्तानुसारेण प्रवृत्तिं स्वस्थितिं प्रतिजानीयात् शपेत साध्वसं भाविभयं अविच्छिन्द्यात् न भविष्यतीति प्रतिजानीयात् क्रमेण एवं मासवर्षक्रमेण विमुक्तकन्याभावां वर्धमानवयोवशादभिव्यक्तस्तनजघनलावण्यादिमतीं अनुद्वेजयन् अनतिपीडयन् उपक्रमेत् तत्तत्कालानुसारेण विलासेषु यतेत। विस्रम्भणं विश्वासनप्रक्रियां उक्तं द्रढयितुमार्योक्तिमाह – एवमादिना।

**3/2/30 'एवं चित्तानुगो बालामुपायेन प्रसाधयेत्।**
**तथास्य सानुरागा च विस्त्रब्धा चैव जायते'॥**

चित्तानुगः तच्चित्तानुसारेण प्रवर्त्तमानः उपायेन उक्तोपायैः प्रसाधयेत्। कालक्रमेण वशं नयेत्। तदा चित्तानुवर्त्तनेन सानुरागा वर्धमानप्रीतिमती विस्त्रब्धा अन्याननुरक्ता चात् चुम्बनादिकुशलापि।

**3/2/31 'नात्यन्तमानुलोम्येन न चातिप्रातिलोम्यत।**
**सिद्धिं गच्छति कन्यासु तस्मान्मध्येन साधयेत्'॥**

आनुलोम्येन मत्यनुवर्त्तनेन प्रतिलोमतः भीषणेन सिद्धिं वश्यतां मध्येन उभाभ्याम्।

**3/2/32 'आत्मनः प्रीतिजननं योषितां मानवर्धनम्।**
**कन्याविस्त्रम्भणं वेत्ति यः स तासां प्रियो भवेत्'॥**

प्रीतिः सुखं जनयतीति जननं योषितां कर्त्तरि षष्ठी, मानं पूजां कन्याविस्त्रम्भणं कन्याविश्वासपद्धतिम्।

**3/2/33 'अतिलज्जान्वितेत्येवं यस्तु कन्यामुपेक्षते।**
**सोऽनभिप्रायवेदीति पशुवत्परिभूयते'॥**

अतिलज्जान्वितां स्वमुखच्छायानिरीक्षणेऽप्यतिह्रीमतीकन्यां बालां अनभि-प्रायवेदीमत्तात्पर्यानभिज्ञः पशुवत् अचतुर इति परिभूयते ताभिः।

**3/2/34 'सहसा वाप्युपक्रान्ता कन्याचित्तमविन्दता।**
**भयं चिन्तां समुद्वेगं सद्यो द्वेषं च गच्छति'॥**

चित्तं तच्चित्तं अविन्दता अजानता यूना सहसा प्रौढकार्येण उपक्रान्तापि विषयीकृतापि चिन्तां दुःखं समुद्वेगं चित्तचांचल्यं गच्छति तद्विषये।

**3/2/35 'सा प्रीतिप्रयोगमप्राप्य तेनोद्वेगेन दूषिता।**
**पुरूषद्वेषिणी वा स्याद्विद्विष्टा वा ततोऽन्यगाः'॥**

प्रीतियोगं नायके प्रीतिलेशमपि तेन भयादिसहितेन दूषिता कलुषिता पुरूषद्वेषिणी पुरूषसामान्यद्वेषणी विद्विष्टा स्वनायकमात्रद्वेषवती सती अन्यगा चतुरपुरूषान्तरानुरक्ता भवेदिति शेषः।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासीभास्करनरसिंहशास्त्रि-विरचितवात्स्यायनसूत्रवृत्तौ तृतीयेऽधिकरणे द्वितीयोऽध्यायः।**

**अध्याय –3**

# बालोपक्रमणप्रकरणम्

एवं धनिकस्य गुणवतः कन्या बन्धुद्वारा कन्यावरणं विवाहानन्तरं दूतीद्वारा स्वस्य वा तदनुरंजनं चोक्त्वा इदानीं धनहीनस्य गुणहीनस्य च स्वत्त एव बाल्यप्रभृति–मातृसुताद्यनुरंजनप्रकारमाह–

**3/3/1 'धनहीनस्तु गुणयुक्तोऽपि मध्यमगुणो हीनापदेशो वा प्रातिवेश्यः मातृपितृभ्रातृषु च परतन्त्रो वा बालवृत्तिरूचितप्रदेशो वा कन्यामलभ्यत्वान्न वरयेत्'।**

गुणयुक्तोऽपि चतुःषष्टिविद्याकुशलोऽपि धनहीनः धनवानपि मध्यमगुणः यत्किंचित्कलाभिज्ञः गुणहीनो वा प्रातिवेश्यः समीपगृहवासी भ्रातृषु बालवृत्तिः क्रीडनपरः अतएव उचितप्रवेशः परगृहेषु निःशंकप्रवेष्टा अलभ्यत्वाद्धनादिहीनतया दुर्लभत्वात्कन्यायाः कन्यां वरयेत्।अन्य द्वारा गुणवती वृत्त्वा तामनुरंजयामीति न यतेत किं तु –

**3/3/2 'बाल्यात्प्रभृति त्वेनां स्वयमेवानुरंजयेत्'।**

एनां प्रतिवेश्याम्।

**3/3/3 'तथायुक्तश्च मातुलानुवर्त्ती दक्षिणापथे बाल एव मात्रापित्रा च वियुक्तः परिभूतकल्पो वा धनोत्कर्षादलभ्यां मातुलदुहितरमन्यस्मै वा पूर्वदत्तां साधयेत्'।**

**3/3/4 'अन्यामपि बाह्यां स्पृहयेत्'।**

मातुलानुवर्त्ती तदाज्ञाकारी दक्षिणापथे स्वकार्यसिध्युपयोगिमार्गे युक्तः स्थितः चात् भ्रात्राावियुक्तः रहितः अनतिधनः अतएव परिभूतकल्पः सर्वैः नातिमानितः गुणी बालः धनोत्कर्षात् स्वापेक्षया धनाधिक्यात् अलभ्यां स्वप्रयत्नं विना दुष्प्राप्यां पूर्वदत्तां पूर्वसंकल्पितामपि साधयेत् वशयेत्। अन्यां मातुलसुतादिभिन्नां बाह्यामनुकूलाम्।

3/3/5 **'बालायामेवं सति धर्माधिगमे संवननं श्लाघ्यमिति घोटकमुखः'।**

बालायां परस्परबाल्यावस्थायां एवं वक्ष्यमाणरीत्या धर्माधिगमे क्रीडनलाभे सति संवननं वशीक्रियाः 'वशीक्रिया संवननमित्यमरः'। श्लाघ्यं अप्रयत्नसाध्यं भवति।

3/3/6 **'तया सह पुष्पावचयं ग्रथनं गृहकन्दुकपुत्रिकाक्रीडायोजनं भक्तं वा पाककरणमिति कुर्वीत। परिचयस्य वयसश्चानुरूप्यात्'।**

तया बालया सह पुष्पावचयं कुसुमलवनक्रीडाग्रथनं पुष्पाणां मालाकरणं गृहकन्दुकक्रीडायोजनं गृहादिभिः क्रीडाकरणं भक्तं भोजनमिति एतत् चात्सम्बन्धस्य।

3/3/7 **'आकर्षक्रीडा पंजिकाक्रीडा मुष्टिकानि मध्यमांगुलिग्रहणं षट्पाषाण–कादीनि च देश्यानि'।**

आकर्षक्रीडा परस्परबद्धांगुल्याद्याकर्षणपूर्वकं भ्रमणं पट्टिकाक्रीडा चित्रपटलेखनं मुष्टिकं मुष्टिपिहितवस्तुप्रश्नतदुत्तररूपलेखनं षट्पाषाणकं वर्तु–लमसृणानतिस्थूलोपलक्रीडनं आदिना यष्टिक्रीडादेश्यानि तत्तद्देशप्रसिद्धक्रीडनानि।

3/3/7 **'तत्सात्म्यात् कन्यास्वभावानुसारात् कार्याणि तदाप्तदास-चेटिकाभिस्तया सहानुक्रीडेत्'।**

चेटिका प्रेष्या अनुक्रीडेत् अनु किंचित्कालानन्तरम्।

3/3/8 **'उदकक्ष्वेडितकानि'** जलक्रीडा चादुभयाभिमतानि **'सुनिमीलितकं'** नेत्रपिधानक्रीडा मानसिकं परस्पराभिप्रायकथनं **'लवण' 'वीथिकम्'**

बालखेलनविशेषः **'अनिलताडितकं'** परस्परांगे फूत्करणं **'गोधूमपुंजिका'** गोधूमैः पद्मस्वस्तिकादिरचनं **'अन्यानि देश्यानि'** अन्यानि वराटिकाखेलनादीनि।

3/3/9 **'यां च विश्वास्यामस्यां मन्येत तया सह निरन्तरां प्रीति कुर्यात्'।**

विश्वास्यां विश्वसितुं योग्याम्।

3/3/9 **'परिचयांश्च बुध्येत्'।**

परिचयान् स्नेहोपायान् बुध्येत् कुर्यात्।

**3/3/10 'धात्रेयिकां चास्याः प्रियहिताभ्यां अधिकमुपगृह्णीयात्'।**

धात्रेयिकां उपमातरं चान्मातरं च प्रियहिताभ्यां प्रियं तत्कालेष्टं हितं भाविसुखहेतु अधिकं अस्या उपगृह्णीयात् उपकुर्यात्।

**3/3/10 'सा हि प्रियमाणा विदितकाराप्यप्रत्यादिशन्ती तां तां च योजयितुं शक्नुयात्'।**

सा धात्रेयी प्रियमाणा अनुकूला विदिताकारा नायकतात्पर्याभिज्ञापि अप्रत्यादिशन्ती अनिवारयन्ती तां तस्याभिमतां योजयितुं घटयितुम्।

**3/3/10 'अनभिहितापि प्रत्याचार्यकम्'।**

**3/3/11 'नायकस्याविदिताकारापि हि गुणानेवानुरागान् प्रकाशयेत्'।**

अनभिहिता अप्रेरिता अविदिताकारा नायकतात्पर्यानभिज्ञा आचार्यकं प्रति नायिकापित्रादिकं प्रतिनायकस्य गुणान्।

**3/3/11 'यथा प्रयोज्यानुरज्येत'।**

प्रयोज्या नियुक्ता यथानुरज्येत तथैव प्रकाशयेदिति पूर्वेणान्वयः।

**3/3/12 'यत्र यत्र कौतुकं प्रयोज्यायास्तदनु प्रविश्य साधयेत्'**

यत्र यस्मिन् वस्तुनि प्रयोज्याया बालायाः कौतुकमिच्छास्ति तत्कृत्रिमपुत्रिकादिकमनुप्रविश्य यत्नं कृत्वा साधयेत् सम्पाद्य तस्यै दद्यात्। तान्येवाह –

**3/3/13 'क्रीडनकद्रव्याणि वाऽपूर्वाणि यान्यन्यासां क्वचिद्विरलशो विद्येरन् तान्यस्या अयत्नेन सम्पादयेत्'।**

क्रीडनकद्रव्याणि शारादीनि अपूर्वाणि अतिरम्याणि अन्यासां राजमहिष्यादीनाम्।

**3/3/14 'तत्रापि क्वचित् कन्दुकमनेकभित्तिचित्रमल्पकालान्तरितमन्यदन्यच्च प्रदर्शयेत्'।**

अनेकभक्तिनानारचनावत् चित्रं विविधवर्णवत् अल्पकालान्तरितमभिनवं अन्यत् भ्रमरकादिं।

**3/3/14 'तथा सूत्रदारूगवलगजदन्तमयीं दुहित्रिकां मधूच्छिष्टपिष्टमृन्मयींश्च'।**

सूत्रं पट्टादि दारू शाल्मलादि तन्मयीं गवलो मृगविशेषः गजः प्रसिद्धः तद्दन्तमयीं दुहितृकां क्रीडापुत्रिकां प्रदर्शयेत्।

**3/3/15 'भक्तपाकार्थस्य महानसस्य प्रदर्शनम्'।**

भक्तं भक्ष्यभोज्यादि।

**3/3/16 'काष्ठसम्प्रयुक्तयोर्मेषयोश्च तथैवाजैडकानां देवकुलगृहकाणां मृद्विदलकाष्ठनिर्मितानां शुकपरभृतमदनसारिकालावककुक्कुटतित्तिरि–पंजरकाणां विचित्राणां चाकृतियुक्तानां जलभाजनानां च यन्त्रकाणां वीणिकानां पिंडोलिकानां कंडोलिकानां पेट्टलिकानां अलक्तकमनः–शिलाहरितालहिंगुलकश्यामकादीनां चन्दनकुंकुमयोः पूगफलानां ताम्बूलपत्राणामिति कालयुक्तानां शक्तिविषये प्रच्छन्नं दानं प्रकाशद्रव्याणां तु प्रकाशे यथा च सर्वाभिप्रायसंवर्धकमेवं मन्येत।'**

काष्ठसम्प्रयुक्तयोः चन्दनादिदारूनिर्मितान्योन्यसंश्लिष्टयोः मेषयोः मेषीमेषयोः प्रदर्शनम्। तथा काष्ठमयानां अजैडकानां तन्मिथुनानां च देवकुलगृहकाणां काष्ठादिरचितानां स्वीयदेवतागृहबालकुलखेलनगृहकाणां च द्विदलं वंशादिः शुकादयः पक्षिविशेषाः तेषां पंजरिकाणां निवासगृहाणां विचित्राणां चाकृतियुक्तानां विचित्राकारयुक्तानां जलभाजनकानां यन्त्राणां धारायन्त्राणां वीणिकानां विपंचिकानां कंडोलिकापिंडोलिके कचसज्जीकरणसाधनविशेषौ पेटलिका तत्स्थापनमंजूषा अलक्तकं लाक्षामनःशिलागैरिकादिधातुः हरितालं पीतद्रव्यविशेषः हिंगुलमतिरिक्तद्रव्यविशेषः श्यामलकं कज्जलं आदिना हरिद्रासुगन्धिद्रव्यपरिग्रहः। कालयुक्तानां तत्तत्कालिकपुष्पफलादीनां शक्तिविषये यथाशक्ति तत्राप्यतिप्रीतिहेतुनामलक्तकादीनां प्रच्छन्नं रहसि दानम्। प्रकाशद्रव्याणां प्रकटप्रदानयोग्यानां कन्दुकादीनां प्रकाशे अन्यसन्निधौ दानं कार्यम्। सा बाला सर्वाभिप्रायवर्धकं सर्वस्वाभीष्टपूरणक्षममेनं स्वं यथा मन्येत तथा कुर्यात्।

**3/3/17 'वीक्षणे च प्रच्छन्नमर्थयेत्'।**

वीक्षणे तत्कर्तृकस्वमुखनिरीक्षणे सति प्रच्छन्नं परैरदृष्टं यथा तथा अर्थयेत् दृष्ट्यैव प्रार्थयेत्।

**3/3/17 'तथा कथायोजनम्'।**

कथायोजनं प्राचीननायकवरणादिकथनम्।

**3/3/18 'प्रच्छन्नदानस्य कारणमात्मनो गुरूजनाद्भयं ख्यापयेत्'।**

गुरूजनात् तस्याः मात्रादेः।

**3/3/18 'देयस्य चान्येन स्पृहणीयत्वम्'।**

देयस्य त्वद्दत्तकन्दुकादेः अन्येन कन्याजनेन स्पृहणीयत्वं ख्यापयेदिति।

**3/3/19 'वर्धमानानुरागां चाख्यानके मनः कुर्वन्तीमन्वार्थिमिः कथाभिश्चित्त–हारिभिश्च रंजयेत्'।**

आख्यानके प्राचीननायकवृत्तान्तश्रवणे अन्वार्थिभिः स्वकार्योपयुक्ताभिः इति वर्धमानानुरागां उक्तदानादिनांकुरितरागाम्।

**3/3/20 'विस्मयेषु प्रयुज्यमानां अद्भुतगोष्ठीश्रवणेनाश्चर्यवतीमैन्द्रजालिकैः हस्तलाघवादिभिः विस्मापयेत् अतिशयेत्। कलासु कौतुकिनीं तत्कौशलकेन गीतप्रियां श्रुतिहरैर्गीतैः। आश्वयुज्याष्टमीचन्द्रकैः कौमुद्यामुत्सवेषु यात्रायां ग्रहणे गृहाचारे वा विचित्रैरापीडैः कर्णपत्रभंगैः सिक्थकप्रधानैरंगुलीयकभूषणदानैश्च। नो चेद्दोषकराणि मन्येत'।**

कलासु चतुःषष्ठीविद्याप्रयोगेषु कौतुकिनीं उत्सुकां तत् कौशलकेन स्वकलाकौशल्यप्रकटनेन गीतैः गानप्रयोगैः कौमुद्यां चन्द्रिकासेवायां कौतुकिनीं आश्वयुज्यां अष्टमीचन्द्रकैः आश्वयुज्ये मासि या अष्टमी तस्यां ये चन्द्रकराः प्रसृतचन्द्रकलाः तत्सवनैः उत्सवेषु विवाहाद्युत्सवेषु यात्रायां देवतोत्सवगमनकाले ग्रहणे गौर्यादिव्रतस्वीकारसमये गृहाचारे कुलदेवतापूजादौ आपीडैः कुसुमशेखरैः सिक्थकप्रधानैः सीमन्तभूषणप्रमुखैः कर्णभूषणविशेषैः दोषकराणि असमीचीनानि एतानि भूषणानि इति यथा च न मन्येत तथैनां तोषयेदिति शेषः।

**3/3/21 'अन्यपुरूषविशेषाभिज्ञां धात्रेयिकां चास्याः पुरूषप्रवृत्तां चातुःषष्टिकान्योगान् ग्राहयेत्'।**

अभिज्ञां कलाभिज्ञत्वेन पुरूषान्तरे तथैव मन्यमानां अस्या बालाया धात्रेयिकामुपमातरं च योगान् विद्याः।

**3/3/22 'तद्ग्रहणोपदेशेन च प्रयोज्यायां रतिकौशलं आत्मनः प्रकाशयेत्'।**

तासां विद्यानां ग्रहणोपदेशेन अध्यापनव्याजेन प्रयोज्यायां नायिकायां प्रति आत्मनः

स्वस्य रतिकौशलं सुखाधिक्यहेतुबाह्याभ्यन्तररतचतुराम्।

**3/3/23 'उदारवेषश्च स्वयमनुपहतदर्शनश्च स्यात्'।**

स्वयं च स्वयमपि उदारवेषः मनोहरवस्त्रालंकारवान् अनुपहतदर्शनः प्रसन्नदृष्टिमान् स्यात् सर्वदा।

**3/3/23 'भावं च कुर्वतीमिंगिताकारैः सूचयेत्'।**

भावं रागं इंगिताकारैः रागसूचकस्मितादिभिः सूचयेत्।

**3/3/24 'युवतयो हि संसृष्टमभीक्ष्णदर्शनं च पुरूषं अपरिभूदर्शनं प्रथमं कामयन्ते। कामयमाना अपि तु नाभियुंजतेति प्रायोवादः'।***

यतः संस्पृष्टं सन्निहितं अभीक्ष्णदर्शनं पुनः पुनः स्वामेवानिरीक्षन्तं अपरिभूतदर्शनं मनोरमवेषसौम्यदृष्टिं कामयमाना अपि अन्तर्गतरागा अपि नाभियुज्यन्ते झटिति न संयुज्यन्ते हि अतः उज्ज्वलवेषादिमता भाव्यमित्यर्थः।

**3/3/25 'तानिंगिताकारान् वक्ष्यामः'।**

तान् स्त्रीकर्तृकानिंगिताकारान् भावसूचकाकारविशेषान्।

**3/3/26 'सम्मुखं न वीक्षते'।**

संमुखाभिमुखं यथा तथा न वीक्षते नायकम्।

**3/3/26 'वीक्षिता व्रीडां दर्शयति'।**

**3/3/26** वीक्षिता नायकेन **'तत्तदात्मनोऽंगमन्यापदेशेन प्रकाशयति'**

तत्तदंगं मुखकुचादिकं अन्यापदेशेन कार्यान्तरव्यापृतिव्याजेन।

**3/3/26 'प्रमत्तं प्रच्छन्नं वा नायकमतिक्रान्तं च वीक्षते'।**

प्रच्छन्नं यवनिकाद्यन्तरितं प्रयान्तं गच्छन्तं अतिक्रामन्तं नयनपथातीतम्।

* Bhaskara Narasimha Sastri omits the closing part of the sutra – 'इति बालायामुपक्रमाः'।

**3/3/27 'पृष्टापि किंचित्सस्मितमव्यक्ताक्षरमनवसितार्थं मन्दं मन्दं अन्यतोमुखी कथयतीति'।**

पृष्टापि नायकेन स्वयं न वदति अनवसितार्थं असम्यगनवबुद्धार्थं अन्यतोमुखी वस्त्वन्तरं निरीक्षणव्यग्रेव।

**3/3/27 'तत्समीपे च चिरं स्थानमभिनन्दति'।**

तत्समीपे तस्य स्वसमीपे।

**3/3/27 'दूरे स्थिता पश्यतु मामिति मन्यमाना परिजनं सवचनविकारमाभाषते'।**

पश्यतु नायकः परिजनं सखीं सवचनविकारं सस्मितभ्रूविभ्रमवचनम्।

**3/3/27 'तं च देशं न मुंचति'।**

तं नायकं दृष्टिगोचरदूरप्रदेशं न मुंचति कार्यान्तरव्याजेन।

**3/3/28 'यत्किंचिद्दृष्ट्वा विहसितं करोति'।**

दृष्टा तेन हसितं मन्दहासम्।

**3/3/28 'तत्र कथामवस्थानार्थं'** चिरस्थितये कथागोष्ठीं **'मन्दमनुबध्नाति'। तत्र** तादृशदेशे एवावस्थानार्थं चिरस्थितये कथागोष्ठीं मन्दं मन्दमनुबघ्नाति करोति।

**3/3/28 'बालस्यांकगतस्य चुम्बनमालिंगनं च करोति'।** नायकं च निरीक्षन्ती। **'परिचारिकायास्तिलकं रचयति'।** रचयति मुखे नायकज्ञापनार्थं।

**3/3/28 'परिजने सावष्टम्भा च तां लीलां दर्शयति'।**

नावष्टम्भा सौन्दर्याभिनिवेशा लीलां भ्रूविलासादि परिजने तत्समीपे।

**3/3/29 'तस्मिन्मित्रेषु विश्वसिति'।** तस्य नायकस्य।

3/3/29 तदेवाह– **'वचनं चैषां बहुमन्यते पूजयति 'तत्परिचारकैः सह प्रीतिं संकथां द्यूतमिति च करोति'।** तत्परिचारकैः नायकसेवकैः संकथा संल्लापं।

**3/3/29 'स्वकर्मसु चैतान्प्रभविष्णुरिव नियुंक्ते तेषु च नायककथामन्यस्य कथयत्स्ववहिता श्रृणोति'।**

स्वकर्म स्वस्या पेटिका कराटिकाद्यानयनकर्मसु एतान् नायकदासान् प्रभविष्णुरिव स्वामिनीव तेषु तद्दासेषु कथां कलाकुशलादिगुणान् अन्यस्य समीपे कथयत्सु सत्सु अवहिता एकाग्रचित्ता।

**3/3/30 'धात्रेयिकानोदिता नायकस्योदवसितं प्रविशति'।**

नोदिता प्रेरिता तया सह उदवसितं गृहम्।

**3/3/30 'तामन्तरा च कृत्वा तेन सह द्यूतं क्रीडामालापं च योजयितुमिच्छति'।**

तां पालिकां योजयितुं कर्तुम्।

**3/3/30 'अनलंकृता दर्शनपथं परिहरति'।**

दर्शनपथं नायकस्य दृष्टिगोचरताम्।

**3/3/30 'कर्णपत्रमंगुलीयकं स्रजं वा नायकेन याचिता सधीरमेव गात्रादवमुच्य तस्या हस्ते ददाति'।**

सधीरं निर्विकारं यथा तथा सख्याः तस्य।

**3/3/30 'तेन च दत्तं नित्यं धारयति'।** दत्तं स्रगादिकं।

**3/3/30 'अन्यवरसंकथासु विषण्णा भवति'।**

अन्यवरसंकथासु वरान्तरप्रशंसासु सतीषु विषण्णा पराङ्मुखी।

**3/3/30 तत्पक्षैश्च न संसृज्यत इति।**

तत्पक्षैः वरान्तरपक्षपातिभिः न संसृज्यते न सह वसति इति प्रकारे अलंकृता चान्यं न पश्यतीत्यादि।

**3/3/31 'दृष्ट्वैतान् भावसंयुक्तानाकारानिंगितानि च।**
**कन्यायाः सम्प्रयोगार्थं तांस्तान्योगान्विचिन्तयेत्'॥**

भावसंयुक्तान् युवतय इति सूत्रोक्तानुरागयुक्तान् एताननलंकृतेत्यादिनोक्तानि सम्प्रयोगार्थं अतिवशीकरणार्थं तांस्तान् गरिष्ठान् योगानुपायान् स्वकलाकुशलताप्रकाशनरूपान् विचिन्तयेत् कुर्यात्।

**3/3/32 'बालक्रीडनकैर्बालां कलाभिर्यौवने स्थितां।**
**वत्सला चापि गृह्णीयाद्विश्वास्यजनसंग्रहात्'॥**

बालक्रीडनकैः बाल्यक्रीडाभिः कन्दुकमहानसप्रदर्शनादिभिः कलाभिः चतुःषष्टिकलाप्रयोगैः प्रदर्शनैः वत्सलां धात्र्यादीनां विश्वास्यजनसंग्रहात् तदनुरक्तधात्रीजनप्रीतितः।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासीभास्करनरसिंहशास्त्रि–विरचितवात्स्यायनसूत्रवृत्तौ तृतीयाऽधिकरणे तृतीयोऽध्यायः।**

अध्याय –4

# एकपुरूषाभियोगप्रकरणम्

एवं तृतीये सालभंजिकाादिनामर्पणेन बालाया रागोत्पादनं उत्पन्नरागायां इंगिताकार–प्रदर्शनं चोक्त्वा उपजीवकत्वसंगत्या ततः तत्संस्पर्शनसंश्लेषणादिकमाह –

**3/4/1 'दर्शितेंगिताकारां कन्यामुपायतोऽभियुंजीत'।**

उपायतः समीपं गतः सन् अभियुंजीत संस्पर्शनाद्यर्थं यतेत्।

**3/4/2 'द्यूते क्रीडनकेषु च विवदमानः साकारमस्याः पाणिमवलम्बयेत्'।**

नायिकया सह द्यूते अक्षादिभिः प्रवृत्ते क्रीडनकेषु कन्दुकादीनां प्रवृत्तेषु विवदमानः यत्किंचित् व्याजेन साकारं ससात्विकभावं अवलम्बयेत् गृह्णीयात्।

**3/4/3 'यथोक्तं स्पृष्टकादिकमालिंगनविधिं निदध्यात्'।**

**3/4/4 'पत्रच्छेद्यक्रियायां स्यात् अभिप्रायसूचनं मिथुनमस्या दर्शयेत्'।**

पत्रच्छेदक्रियायां शब्दविशेषाय मुष्ट्यग्रे कमलदलाभिहननक्रीडायां स्वाभिप्रायसूचनम्। तया सह सम्प्रयोगेच्छासूचकं मिथुनं पत्रान्तरितहस्तद्वयप्रयोगं दर्शयेत्। सहासनेत्रसंज्ञया तस्यै प्रदर्शयेत्।

**3/4/5 'एवं अन्यदन्यद्विरलशो दर्शयेत्'।**

एवमन्यत्कन्दुकादिक्रीडायां अन्यत्कन्दुकादिमर्दनादिना स्वाभिप्रायं विरलशः किंचित्किंचित् क्रीडाव्यवधानेन।

**3/4/6 'जलक्रीडायां दूरतोऽप्सु निमग्नः समीपमस्या गत्वा स्पृष्ट्वा चैनां तत्रैवोन्मज्जयेत्'।**

दूरतः अस्या दूरदेशे तत्रैव तत्प्रदेश एव उन्मज्जेन्निमज्य स्थापयेत्।

**3/4/7 'नवपत्रिकादिषु च सविशेषं भावनिवेदनम्'।**

नवपत्रिकादिषु रसालपल्लवादिषु सविशेषं सतूर्यं भावनिवेदनस्वाभिमतलेखनं तत्प्रेषणं च कुर्यात्।

**3/4/8 'आत्मदुःखस्यानिर्वेदेन कथनम्'।**

आत्मदुःखस्य कदाचित् तदनवलोकनजन्यानिर्वेदेनादैन्येन कथनं तस्यै।

**3/4/9 'स्वप्नस्य च भावयुक्तस्य'।** भावयुक्तस्य स्वाभिमततद्विवाहादिविषयस्य कथनम् तस्या इत्यनुषज्यते **'अन्यापदेशेन'।**

**3/4/10 'प्रेक्षणके स्वजनसमवाये वा समीपोवेशनं तत्रान्यापदिष्टं स्पर्शनम्'।**

प्रेक्षणके उत्सवादिप्रेक्षकजनतायां अन्यापदेशेन वस्त्वन्तरनिरीक्षणव्याजेन समीपे तस्याः तत्र तत्समीपे अन्यापदिष्टं वस्त्वन्तरग्रहणछद्मकृतं स्पर्शनं कुर्यात्।

**3/4/11 'अपाश्रयार्थं चरणेन चरणस्य पीडनम्'।**

अपाश्रयणार्थं पुरोदृष्टा प्रत्यंगसर्पणमिषेण चरणस्य तस्याः।

**3/4/12 'ततः शनकैरेकैकामंगुलिमभिस्पृशेत्'।**

ततः पादाभिघातानन्तरं शनकैः एकैकांगुलिग्रहणाभिमतक्रमेणाभिमृशेत् गृह्णीयात् सर्वाः।

**3/4/13 'पादाग्रेण नखाग्राणि च घट्टयेत्'।** तदभिमतौ नखाग्राणि घट्टयेत् उन्मृद्यात्।

**3/4/14 'तत्र सिद्धां पदात्पदमभिकांक्षेत्'।**

तत्रोक्तकर्मणि पदात्पदं उत्तरोत्तरकर्म प्रति अभिकांक्षेत् योजयेत्।

**3/4/15 'क्षान्त्यर्थं च तदेवाभ्यसेत्'।**

क्षान्त्यर्थं उत्तरोत्तरकार्यसहनार्थं तदेव रागवृद्धये कृतमेव पुनः पुनः कुर्यात्।

**3/4/16 'पादशौचे पादांगुलिसन्दंशेन तदंगुलिपीडनम्'।**

पादशौचे पादप्रक्षालनकर्मणि पादांगुलिसन्दंशेन।

**3/4/17 'तस्य द्रव्यस्य समर्पणे प्रतिगृहे वा तद्गतो विकारः'।**

तद्गतः भावसूचकः विकारनेत्रादेः।

**3/4/18 'आचमनार्थोदकेन निषेकः'।**

निषेकः तद्वक्षोजादिषु निषेचनम्।

**3/4/19 'विजने तमसि च द्वन्द्वमासीनः क्षान्तिं कुर्वीत समानदेशशय्यायां वा'।**

**3/4/20 'तत्र यथार्थमनुद्वेजयतो भावनिवेदनम्'।**

चो विकल्पे समानदेशे एकप्रदेशे शय्यायां पर्यंके वा द्वन्द्वमासीनः तस्या साकमासीनः उपविष्टः क्षान्तिं कृतं क्षमस्वेति प्रार्थनां तत्र तदा यथार्थं तन्मत्यनुसारेण अनुद्वेजयिता तस्याः क्रोधाहेतुना वाक्येन भावनिवेदनम् परिणयादिस्वतात्पर्यसूचनं कुर्यात्।

**3/4/21 'विविक्ते च किंचिदस्ति कथयितव्यमित्युक्त्वा निर्वचनं भावं च तत्रोपलक्षयेत्। यथा पारदारिके वक्ष्यामः'।**

विविक्ते जनान्तररहितदेशे चोऽवधारणे उक्वा सजन एव कदाचिदुदीर्य निर्वचनं विजनेत्यादिपूर्वोक्तभावनिवेदनम्। तत्र स्वभावनिवेदनान्तरं भावं च स्वपरिणयविषयकतदभिप्रायमपि उपलक्षयेत्। मुखप्रसादादिवक्ष्यमाणलक्ष्मभिर्जानीयात्।

**3/4/22 'विदितभावस्तु व्याधिमपदिश्यैनां वार्त्ताग्रहणार्थं स्वमुदवसितमानयेत्'।**

विदितभावः ज्ञाततदीयस्वानुरागः सन् व्याधिं तच्छद्म उपदिश्य प्रकटयेदाकारयेत्।

**3/4/23 'आगतायाश्च शिरःपीडने नियोगः'।**

स्वशिरः पीडने शिरोवेदनानिवर्त्तकतन्मर्दने नियोगो योजनं कार्यः।

**3/4/23 'पाणिमवलम्ब्य चास्याः साकारं नयनयोर्ललाटे च निदध्यात्'।**

अवलम्ब्य स्वपाणिना गृहीत्वा नयनयोः स्वस्य।

**3/4/24 'औषधापदेशार्थं चास्याः कर्म विनिर्दिशेत्'।**

अपदेशार्थं आनयनाय कर्मगमनं। तदेवाह –

**3/4/25 'इत्थं त्वया कर्त्तव्यं। न ह्येतदृते कन्याया अन्येन कार्यमिति'।**

इदं लघुकार्यं अन्येन अन्यस्मिन् कर्म न कार्यं हीनसामर्थ्यं हि इति निर्दिशेदिति पूर्वेण सम्बन्धः।

**3/4/25 'गच्छन्तीं पुनरागमनानुबन्धमेनां विसृजेत्'।**

आगमनानुबन्धं शीघ्रं आगच्छेत्युक्तिपूर्वकम्।

**3/4/26 'अस्य च योगस्य त्रिरात्रं त्रिसन्ध्यं च प्रयुक्तिः'।**

अस्य योगस्य कन्यानियोजनरूपकार्यस्य त्रिसन्ध्यं प्रतिदिनं त्रिकालम्।

**3/4/27 'अभीक्ष्णदर्शनार्थमागतायाश्च गोष्ठीं वर्धयेत्'।**

आगतायां सत्यां गोष्ठीं नवनवगाथाम्।

**3/4/28 'अन्याभिरपि सह विश्वासनार्थमधिकमधिकं चाभियुंजीत। न तु वाचा निर्वदेत्'।**

अन्याभिः तद्धात्रेयिकादिभिः सह विश्वासनार्थं स्वस्मिन् बालिकाया अधिकविश्वासोत्पादनार्थं अधिकमधिकं गोष्ठ्यादिकं अभियुंजीत कुर्यात् न निर्वदेत् ताः प्रति स्वतात्पर्यं न वदेत्।

**3/4/29 'दूरगतभावोऽपि कन्यासु न निर्वादः'।***

दूरगतभावोऽपि कालान्तराभिमतसम्प्रयोगविषयोऽपि निर्वादः कंठोक्तिः कन्यास्वविषये न सिध्यति न सिद्धिहेतुः।

**3/4/30 'यदा च बहुसिद्धां मन्येत तदैवोपक्रमेत्'।**

बहुसिद्धां स्वस्मिन्नधिकमनुरक्तां उपक्रमेत्। परिणयादौ सिद्धिकालमाह –

**3/4/31 'प्रदोषे निशि तमसि च योषितो मन्दसाध्वसाः सुरतव्यवसायिन्यो रागवत्यश्च भवन्ति। न च पुरूषं प्रत्याचक्षते। तन्मात्रकालं प्रयोजयितव्या इति प्रायोवादः'।**

---

* BNS does not mention 'सिध्यतीति घोटकमुखः' at the end of this sutra as it appears in the published text Vātsyāyana ascribed the authorship of this Sutra to Ghotakamukha.

मन्दसाध्वसाः ध्वस्तभयाः रागवत्यः उद्रिक्तरागाः। तदा न प्रत्याचक्षते न निषेधयन्ति तत्कालं प्रदोषादौ प्रयोजयितव्याः वशीकार्याः।

एवं मध्यमानां वशीकरणोपायमुक्वा प्रसंगान्मुग्धाप्रौढयोस्तमाह –

**3/4/32 'एकपुरूषाभियोगानां त्वसम्भवे गृहीतार्थया धात्रेयिकया सख्या वा तस्यामाविर्भूतया तमर्थमनिर्वदन्त्या सहैनामंकमारोपयेत्'।**

पुरूषेणाभियुज्यन्तेऽंकादिषूपवेशयितुमभिमन्यन्त इति पुरूषाभियोगाः एका असहायास्ताश्चताः तासामसम्भवेऽलाभे गृहीतार्थया स्वीकृतोत्कोचया तस्यां कन्यायां आविर्भूतया उद्रिक्तप्रीत्या तमर्थं स्वकृताकारोपणसंश्लेषणादिकृत्यं अनिर्वदन्त्या बहिरप्रकटयन्त्या धात्रेयिकया सख्या वा सह।

**3/4/32 'अथ यथोक्तमभियुंजीत'।**

अथ अंकारोपणानन्तरं यथोक्तं कपोलचुम्बनगोष्ठीकथनादि अभियुंजीत कुर्यात्'

**3/4/33 'स्वां वा परिचारिकामादावेवास्यास्सखीत्वेन प्रणिदध्यात्'।**

आदौ बाल्यप्रभृति प्रणिदध्यात् योजयेत्।

**3/4/34 'यज्ञे विवाहे यात्रायामुत्सवे व्यसने प्रेक्षावृत्ते जने तत्र तत्र दृष्टेंगिताकारां परीक्षितभावमेकाकिनीमुपक्रमेत्'।**

उत्सवे कुलदेवतादेः व्यसने बालकामापदौ तत्र तत्र आपणनद्यादितीरे जने इतरजने प्रेक्षावृत्ते अन्यावलोकनव्यग्रे सति दृष्टेंगितकारां अतएव परीक्षितभावां ज्ञाततात्पर्यां कांचिदेकाकिनीं सती उपक्रमेत् स्पर्शनादौ।

**3/4/35 'न हि दृष्टभावा योषितो देशे काले च प्रयुज्यमाना अपि व्यावर्तन्त इति वात्स्यायनः'।**

हि तथा हि दृष्टभावाः इंगिताकारैः निश्चिततात्पर्याः देशे विविक्ते काले तमसि वा प्रयोज्यमानाः संस्पृश्यमाना अपि नासंश्लिष्टाः न व्यावर्त्तन्ते न परावर्त्तन्ते।

**3/4/35 'एक पुरूषाभियोगाः इति'।**

एवं कुलधनशीलविद्याबान्धवादिसम्पन्नस्य तादृशकन्यापरिणयतदनुरंजन–प्रकारं

तदन्यतमहीनस्य मातुलादिसुताप्रातिवेश्यादिवश्योपायान् कन्दुक–प्रदानादीन् चोक्त्वा तदन्यतमहीनकन्यायाः पुरूषवशीकरणोपायानाह –मन्दापदेशादित्यादिना।

**3/4/36 'मन्दापदेशा गुणवत्यपि कन्या धनहीना कुलीनापि समानैरयाच्यमाना मातापितृवियुक्ता वा ज्ञातिकुलवर्त्तिनी वा प्राप्तयौवना पाणिग्रहणं स्वयमभीप्सेत'।***

गुणवत्यपि धनादिसम्पन्नापि मन्दापदेशा अकुलीना वा कुलीनापि कुलशीलवत्यपि धनविद्याहीना अतएव समानैः कुलीनैः अयाच्यमाना अवृता वा ज्ञातिकुलवर्तिनी अन्तद्र्वेषपितृसम्बन्धिगृहवासिनी कुलीनापि इत्याद्यनुषज्यते। प्राप्तयौवना सतीति त्रितयस्य विशेषणं।

**3/4/37 'सा तु गुणवन्तं शक्तं सुदर्शनं बालप्रीत्याभियोजयेत्'।**

सा तु गुणवन्तं शक्तं पुष्टांगं सुदर्शनं सुरूपं बालप्रीत्या बालखेलनानुरागेण युक्तः प्रातिवेश्य पैतृष्वस्त्रेयादि युवानं हावभावदिभिरनुरंजयेत्।

**3/4/38 'यं वा मन्येत मातापित्रोरसमीक्षया स्वयमप्ययमिन्द्रियदौर्बल्यान्मयि प्रतिवर्तिष्यत इति प्रियहितोपचारैरभीक्ष्णदर्शनेन च तमावर्जयेत्'।**

स्वयं अयं नायकः इन्द्रियदौर्बल्यात् इन्द्रियाधीनत्वात् मातापित्रोरसमीक्षया अवश्यत्वाच्च स्वयमपि स्वतएव मद्ब्यावृत्तिं विनैव मयि प्रवर्तयिष्यति अनुरज्यत इति यं वा मन्येत तं प्रियहितोपचारैः चक्षुर्मनोहितचन्दनताम्बूलादिदानैः अभीक्ष्णदर्शनेन पुनः पुनः सविलासविलोकनेन च आवर्जयेत् वशं नयेत्।

**3/4/39 'माता चैनां सखीभिर्धात्रेयिकाभिश्च सह तदभिमुखीं कुर्यात्'।**

माता कन्यायाः एनां अलंकृतां तदभिमुखां नायकदृष्टिपथवर्त्तिनीं।

**3/4/40 'पुष्पगन्धताम्बूलहस्ताया विजने विकाले च तदुपस्थापनम्'।**

विकाले प्रदोषादौ ताम्बूलहस्तायाः स्वपुत्र्याः कर्मणि षष्ठी तदुपस्थापनं नायकसमीपप्रेषणं कुर्यात्।

---

* त्रीणि वर्षाण्युदीक्षेत् कुमार्युतुमती सती।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम्।। 9/90 मनु स्मृति

**3/4/40 'कलाकौशलप्रकाशने वा संवाहने शिरसः कंडूयने पीडने चौचित्यदर्शनम्'**

कलाकौशलप्रकाशने कलासु चतुःषष्ठिविद्यासु कौशलप्रकाशनं स्वकुशलताप्रकटनं संवाहनं नायकपादादेः शिरसः तस्यैव पीडने व्यथानिवर्त्तकमृदुमर्दने औचित्यदर्शनं स्वचातुर्यप्रदर्शनम्।

**3/4/40 'प्रयोज्यस्य सात्म्ययुक्ताः कथायोगाः'।**

प्राचीननायकवृत्तान्तकथनानि च कुर्यात्।

**3/4/40 'तान् बालायामुपक्रमेषु च यथोक्तमाचरेत्'।**

बालायां विषये उपक्रमेषु वशीकरणार्थं यथोक्तं नायकस्य पूर्वोक्तं यदुपायजातं तानुपायान् बालानायकेनाचरेत्। तदेवाह –

**3/4/41 'न त्वेवानुरागादपि पुरूषं स्वयमभियुंजीत'।**

नायिका अनुरागातिशयादपि नाभियुंजीत चुम्बनालिंगनादौ प्रथमं न यतेत। कुतः।

**3/4/41 'स्वयमभियोगिनी हि युवतिः सद्यः सौभाग्यं जहातीत्याचार्याः'।**

स्वयं नायकप्रवृत्तिं विना प्रथमतः स्वयमेवाभियोगिनी पुरूषेण संयुक्तासौ भाग्यं जहाति वल्लभवाल्लभ्यं त्यजति तद्धीना भवतीत्यर्थः हि हेतौ। अतो नाभियुंजीतेति पूर्वेणान्वयः।

**3/4/42 'तत्प्रयुक्तानां त्वभियोगानामानुलोम्येन ग्रहणं'।**

**3/4/43 'परिष्वक्ता च न विकृतिं भजेत्। श्लक्ष्णमाकारमजानतीव प्रतिगृह्णीयात्'।**

तत्प्रयुक्तानां नायककृतानां अभियोगानां स्पर्शनचुम्बनादीनां आनुलोम्येन आनुकूल्येन ग्रहणं अनुमोदनं कुर्यात्। परिष्वक्ता गाढालिंगिता सती विकृतिमत्यन्ताधीरतां न भजेत् न प्राप्नुयात्। किं तु आकारं परिष्वंगादिजन्यसुखं अतिशयेनानुभवन्त्यपि श्लक्ष्णं किंचिदप्यजानतीव अननुभवन्तीव।

**3/4/43 'वदनग्रहणे बलात्कारः'**

वदनग्रहणे अधरामृतपानार्थं तेन क्रियमाणे बलात्कारः किंचित् स्वयं प्रतिषिध्यते न बलात् स्वीकरणं कारयेत्।

**3/4/44 'रतिभावनामभ्यर्थ्यमानायाः कृच्छ्राद् गुह्यस्पर्शनम्'**

रतिभावनां रतिसुखविशेषो भाव्यते उत्पाद्यतेऽनयेति रतिभावना सुरतक्रीडा तां प्रति अभ्यर्थमानायाः नायकेन प्रार्थ्यमानायाः युवत्याः कर्त्र्याः कृच्छ्रात् तन्निर्बन्धादिव गुह्यसंस्पर्शनं स्वभगस्पर्शनं भवति।

**3/4/45 'अभ्यर्थितापि तु नातिविवृता'** प्रकटितमदनसदनदेशा **'स्वयं न स्यात्'** न भवेत्। निरतकालात् सुरतकालात् अन्यत्रकालान्तरे सल्लापचुम्बनादौ अभ्यर्थितापि नायकेन अतिप्रार्थितापि।

**3/4/46 'यदा तु मन्येतानुरक्तोऽयं न व्यावर्तयिष्यत इति तदैवैनभियुंजाना बालभावं विमोक्षेत्'।**

अयं युवा मयि अनुरक्तः अतिरागी न व्यावर्तयिष्यत इति कदापि न त्यजतीति यदैनं मन्येत निश्चिनुयात् तदैवाभियुंजाना रतये नियुज्यमाना सती तेन बालभावं कन्यात्वं विमोक्षेत् त्यजेत्। तेन सह सयुज्यादित्यर्थः।

**3/4/47 'विमुक्तकन्याभावा च विश्वास्येषु प्रकाशयेत्। इति सोपावर्त्तनम्।'**

विमुक्तकन्याभावा रहः तेन संयुक्ता सती क्रमेण विश्वास्येषु सखीधात्र्यादिषु प्रकाशयेत् अयं मद्भर्त्ता भवत्विति वदेत् इति सोपावर्त्तनम्। स्वयं वरणप्रकारः। एवं परस्परवृतयोर्विवाहः कार्य इति।

**अत्र प्राचीनवचनान्याह –**

**3/4/48 'कन्याभियुज्यमाना तु यं मन्येताश्रयं सुखम्।**
**अनुकूलं च वश्यं च तस्य कुर्यात्परिग्रहम्'॥**

आश्रयं धवं सुखं तत्करं परिग्रहं तत्परिणयं कुर्यात् अन्यथा दोषमाह –

**3/4/49 'अनपेक्ष्य गुणान्यत्र रूपमौचित्यमेव च।**
**कुर्वीत धनलोभेन पतिं सापत्नकेष्वपि'॥**

यत्र पुरूषे रूपसौन्दर्यं औचित्यमनुकूलतां चात् सुखहेतुत्वमिति गुणान् अनपेक्ष्य अनपेक्षन्ती सापत्नकेषु सपत्नीत्वादिदोषसम्भावनायां सत्यां धनलोभेन तं पतिं वृणुयाच्चेत् स्वाभिमतं न लभत इति शेषः।

**3/4/50 'तत्र युक्तगुणं वश्यं शक्तं बलवदर्थिनम्।**
**उपायैरूपयुंजीत कन्या न प्रतिलोभयेत्'॥**

तत्र तस्मात् युक्तगुणं स्वाभिमतगुणं शक्तं स्वाभीष्टदाने बलवत् निरोगिणं अर्थिनं स्वापेक्षिणं युवानं उपायैः पूर्वोक्तताम्बूलदानाद्युपचारैः उपयुंजीत वशयेत् न प्रतिलोभयेत् तत्प्रतिकूलं नाचरेत्।

अगतौ वरणीयमाह –

**3/4/51 'वरं वश्यो दरिद्रोऽपि निर्गुणोऽप्यात्मवान्नरः।**
**गुणैर्युक्तोऽपि वा नैव बहुसाधारणः पतिः'॥**

धनहीनोऽपि अनतिधनोऽपि वश्यः अनुकूलश्चेत् वरमीषत्प्रियः निर्गुणः सौन्दर्यादिगुणहीनोऽपि आत्मवान् बलादिमान् वरं गुणैः धनसौन्दर्यादिभिः बहुसाधारणः बह्वीषु सक्तश्चेत् न वरम्। कुतः –

**3/4/52 'प्रायेण धनिनां दारा बहवो निरवग्रहाः।**
**बाह्ये सत्युपभोगेऽपि निर्विस्रम्भा बहिःसुखाः'॥**

धनिनां तन्मात्रवतां बहवः अनेके अतएव निरवग्रहाः अस्वाधीनपतिकाः अतएव च बहिःसुखा बहिः पत्युरस्मात्सुखेच्छावशतः बाह्ये वस्त्रालंकारादिरूपे उपभोगे तत्साधने सत्यपि तस्मिन्निर्विस्रम्भाः निरनुरागा भवन्ति अतो नैतादृशो वरणीय इत्यर्थः।

**3/4/53 'नीचो यस्त्वभियुंजीत पुरूषः पलितोऽपि वा।**
**विदेशगतिशीलश्च न स संयोगमर्हति'॥**

नीचः जात्यादिना पतितः वृद्धः विदेशगतिशीलः देशान्तरगमनस्वभावश्च यः पुरूषः अभियुंजीत स्वयमेव संयोक्तुमिच्छतोऽपि स संयोगं संयोक्तुं नार्हति।

**3/4/54 'यदृच्छयाभियुक्तो यो दंडद्यूताधिकोऽपि वा।**
**सपत्नीकश्च सापत्यो न स संयोगमर्हति'॥**

यदृच्छया दैवगत्या कदाचित् अभियुंक्ते वृणुते दंडद्यूताधिकः दंडाधिकोऽतिक्रूरः द्यूताधिकः तदेकव्यसनः सपत्नीकः बहुभार्यः सापत्यः सपत्नीसन्तानवान् यः संयोगं सम्प्रयोक्तुं अकीर्त्तिकरत्वात् निष्प्रयोजनत्वाच्चेति भावः।

**3/4/55 'गुणसाम्येऽभियोक्तॄणामेको वरयिता वरः।**
**तत्राभियोक्तरि श्रैष्ठ्यमनुरागात्मको हि सः'॥**

अभियोक्तॄणां वरणार्हपुरूषाणां गुणसाम्ये कुलविद्यादिसाम्ये सति वरयिता स्वयं प्रार्थयिता एक एव वरः वरणीयः। कुतः तत्र स्वयं वरयितरि अभियोगार्हे पुरूषे श्रैष्ठ्यं सर्वगुणोत्तमं स्वयं वरणमस्ति स स्वयं वरणगुणः अनुरागात्मकः तदर्थको हि अतः स एव वरणीयः।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञद्वैतमतध्वान्तभास्करनरसिंहशास्त्रिकृत–**
**वात्स्यायनसूत्रवृत्तौ तृतीयाधिकरणे चतुर्थोऽध्यायः।**

अध्याय –5

# विवाहयोगप्रकरणम्

पूर्वाध्यायमुख्यप्रतिपाद्यमनुवदति – एकपुरूषाभियोगः अभियोगतश्च कन्यायाः प्रतिपत्तिः। एवं कन्यावरयो परस्परानुमत्या साक्षात्वरणप्रकारमुक्त्वा तदसंभवे धात्र्यादिद्वारकं वरणं साक्षात्परम्परया वा वृतानामुपजीवकत्वसंगत्या परिणयभेदांश्चाह– 'प्राचुर्येणेत्यादिना'।

**3/5/1 'प्राचुर्येण कन्याविविक्तदर्शनस्यालाभे धात्रेयिकामुपगृह्योपसर्पेत्'।**

विविक्तदेशस्य विजनप्रदेशस्य नायकमात्रवतः प्राचुर्येण पुनः पुनः अलाभे सति कन्यां धात्रेयिकां प्रति उपगृह्य स्वाभिप्रायमुक्त्वा उपसर्पेत् नायकसमीपं प्रेषयेत्। प्रेषिता च सती साऽप्रेषितेव तत्समीपे नायककुलशीलसौन्दर्यकलाकौशल्योचितज्ञत्वानुरक्तत्वादिगुणान् गोष्ठीप्रसंगेनोक्त्वा तमनुरंजयेत्। तदीय गुणांश्च ज्ञात्वा तेनापि प्रार्थिता एनामपि तदनुरक्तां कुर्यादित्याह –

**3/5/2 'सा चैनामविदिता नाम नायकस्य भूत्वा तद्गुणैरनुरंजयेत्'।**

सा धात्रेयी नायकस्याविदितनामा अज्ञातरागेव तत्प्रेषितेवेति यावत् एनां नायिकां तद्गुणैः नायकगुणैः कथाप्रसंगेन नायकगुणकीर्त्तनैः अनुरंजयेत् तस्मिन्ननुरक्तां कुर्यात्। तत्प्रकारमेवाह–

**3/5/2 'तस्याश्च रूच्यान्नायकगुणान् भूयिष्ठं परिवर्णयेत्'।**

नायकगुणकीर्त्तनानन्तरं रूच्चा तद्गुणशुश्रुषाज्ञानेन भूयिष्ठं सविस्तारम्।

**3/5/3 'अन्यवरयितृणां च दोषान् अभिप्रायविरूद्धान् प्रतिपादयेत्'।**

अन्यवरयितृणां उक्तनायकेतरसम्भावितनायकानां दोषान् गुणान् अभिज्ञत्वादीन्वक्ष्यमाणान् अभिप्रायविरूद्धान्नायिकानभिमतान्।

**3/5/4 'मातापित्रोश्च गुणानभिज्ञतां लुब्धतां च चपलतां च बान्धवानाम् च'।**

तथा मातापित्रोः अन्यवरपित्रोः चात् भ्रात्रादीनां गुणानभिज्ञतां गुणां अन्येषां चात्कुरूपित्वादि परिग्रहः।

अन्वयव्यतिरेकदृष्टान्ताभ्यां स्वोक्तार्थं दृढयेदित्याह –

**3/5/5 'ताश्चान्या अपि समानजातीयाः कन्याः शकुन्तलाद्या भर्त्तारं प्राप्य संयुक्ता मोदन्ते स्म ताश्चास्या निदर्शयेत्'।**

**3/5/6 'महाकुलेषु सापत्नकैर्बाध्यमाना विद्विष्टाः दुःखिताः परित्यक्ताश्च दृश्यन्ते'।**

पाश्चात्याः प्राचीनाः समानजातीयाः नायकेन विश्वामित्रकन्या शकुन्तला कण्वाश्रमे रहसि सखीसमक्षं स्वाभिमतं दुष्यन्तं राजानं वरयामासेति भारतप्रसिद्धिः प्रदर्शयेत् प्रतिपादयेत्। महाकुलेषु उत्पन्ना अपि स्वरूच्या परिणीताः सापत्नकैः सपत्नीत्वादिदोषैः बाध्यमाना अतएव विद्विष्टा नायकेन अतएव परित्यक्ता दुःखिताश्च दृश्यन्ते इति तस्या वदेत् इत्यनुषज्यते।

**3/5/7 'आयतिं चास्य वर्णयेत्'।**

**3/5/8 'सुखमनुपहतमेकचारितां वश्यतां नायकानुरागं च वर्णयेत्'।**

आयतिं शुभोदर्कं सुखं सुखीत्वमेकचारितां वश्यतां एकपत्नीव्रतत्वं वश्यतां एतस्याः।

**3/5/9 'समनोरथायां वास्यामपायं साध्वसं व्रीडां च हेतुभिरवच्छिन्द्यात्'।**

अस्यां नायिकायां समनोरथायां उक्तगुणश्रवणेन तत्संगाभिलाषायां ज्ञातायां सत्यां अपायं तदलाभचिन्ता साध्वसं लोकात् व्रीडां स्वयं नायकवरणे हेतुभिः तदनुरागरहस्यस्थलतदागमननिदर्शनप्रदर्शनादिभिः।

**3/5/10 'दूतीकल्पं च सकलमाचरेत्'।**

एवं दूतीकल्पं कुट्टिनीव धात्रेयी सकलं उक्तपरस्परानुरागसन्धानप्रकारं कुर्यात्। तथापि लज्जितां प्रत्याह –

**3/5/11 'त्वामजानन्तीं नाम नायको बलात् ग्रहीष्यतीति तथा सुपरिगृहीतं स्यादिति प्रयोजयेत्'।**

अजानन्ती नाम रहसि कार्यान्तरव्यापृतामिव स्थितां त्वामिति हेतोः सुपरिगृहीतं तदभिमतपरिग्रहं स्यात् भवति हि इति तथा इत्यपि प्रयोजयेत् वदेत्।

एवं तृतीयाध्यायमारभ्य वधूवरयोः साक्षात् धात्र्यादिद्वारा च परस्परवरणप्रकारमुक्त्वा विवाहभेदानाह –

**3/5/12 'प्रतिपन्नामभिप्रेतावकाशवर्त्तिनीं नायकः श्रोत्रियागारादग्निमानाय्य कुशान् परिस्तीर्य यथास्मृति हुत्वा त्रिः परिक्रमेत्'।**

**3/5/13 'ततो मातरि पितरि च प्रकाशयेत्'।**

इति प्रतिपन्नामनुकूलां अभिप्रेतावकाशवर्त्तिनीं परस्पराभिमतविजनदेशस्थां यथास्मृति स्वगृह्योक्तप्रकारेण परिणयेत् 'नातिचरामीति ब्रूयात्'। मातरि पितरि अन्योन्यं मातापित्रोः इति प्रकाशयेत्। अग्निसाक्षिकं गान्धर्वेण प्रकारेण परिणीतमिति वदेत्।

**3/5/14 'अग्निसाक्षिका हि विवाहा न निवर्त्तन्त इत्याचार्यसमयः'।**

नातिवर्तन्ते नान्यथा भवन्तीति आचार्याणां आर्याणां समयः सिद्धान्तः। अतो निर्भयं वदेत् इत्यर्थः।

**3/5/15 'दूषयित्वा चैनां शनैश्शनैः स्वजने प्रकाशयेत्'।**

अथवा एनां वशीकृतां दूषयित्वा स्वभोगेनान्यानुपयुक्तां कृत्वा स्वजने तन्मातृपित्रादिजने।

**3/5/16 'तद्बान्धवाश्च यथा कुलस्य भंगं परिहरन्तो दंडभयात्तस्मै एवैनां दद्युः तथा योजयेत्'।**

तद्बान्धवा कन्यासम्बन्धिनः कुलस्य स्ववंशस्य भंगं अयशः परिहरन्तः अनिच्छन्तः दंडभयाच्च महाराजात् तस्मै स्वसंयोजितनायकायैव यथा दद्युस्तथा घटयेत् धात्रेयीति शेषः।

**3/5/17 'अनन्तरं च प्रीत्युपग्रहेण रागेण तद् बान्धवान् प्रीणयेत् इति'।**

अनन्तरं विवाहानन्तरं प्रीत्युपग्रहैः प्रीतिदानैः अनुरागेण सेवामधुरवाक्यादिना तान् तदीयान्।

**3/5/18 'गान्धर्वेण विवाहेन च चेष्टयेत्'।**

एवं गान्धर्वेण परस्परसंयोगानन्तरं भाविना चेष्टयेत् संस्कुर्यात्।

पैशाचं परिणयमाह –

**3/5/19 'अप्रतिपद्यमानायामन्तश्चारिणीमन्यां कुलप्रमदां पूर्वसंसृष्टां प्रीयमाणां चोपगृह्य तया सह विषह्य सावकाशमेनामन्यकार्यापदेशेनानाययेत्'।**

अप्रतिपद्यमानायां पूर्वोक्तोपायैरवशीकृतायामपि मातुलादिसुतायां सत्यां अन्तश्चारिणीं पौनःपुन्येन तद्गृहगामिनीं कुलप्रमदां कुलपालिकां पूर्वसंसृष्टां प्राक्परिचितां प्रियमाणां उत्कोचसन्तुष्टां उपगृह्य दूती कृतकृत्यतया सह तद्व्याजेन अन्यकार्यापदेशेन उत्सवाद्यवलोकनव्याजेन प्रसह्य बलात्कारेणापि एनामुक्तस्वाभिमतां सावकाशं विजनदेशं आनाययेत् प्रापयेत्।

**3/5/20 'ततः श्रोत्रियागारादग्निमिति समानं पूर्वेण'।**

ततः आनयानान्तरं पुरन्ध्रीसमक्षं श्रोत्रियागारेत्यादि पूर्वोक्तप्रकारेण परिणीय शनैर्बन्धुषु प्रकाशयेत्।

**3/5/21 'आसन्ने च विवाहे मातरमस्यास्तदभिमतदोषैरनुशयं ग्राहयेत्'।**

**3/5/22 'ततस्तदनुमतेन ग्राहयित्वा प्रातिवेश्यभवनं निशि नायकमानाय्य श्रोत्रियागारादग्निमिति आहृत्येति समानं पूर्वेण'।**

विवाहे पूर्वोक्तपरिणये बन्ध्वादिकर्तृके आसन्ने अतिसन्निहिते सति अस्या नायिकामातरं प्रति तदभिमतदोषैः बन्ध्वभिमतवरान्तरदोषोक्तिभिः अनुशयं तस्मिन् द्वेषं च कारयेत् तस्मिन् गुणोत्कर्षं च ग्राहयेत्।

पुरन्ध्र्यादिभिः कारयेत् तदनुमतेन कन्यामातृसंमत्या ग्राहयित्वा कुट्टिन्यादिभिरानाय्य इति। इत्यादि समानं शनैः बन्धुप्रकाशनान्तं पूर्वेण पूर्वोक्तप्रकारेण उक्तमेव भंग्यन्तरेणाह–

**3/5/23 'ज्येष्ठं वा भ्रातरं समानवयसं वेश्यासु परस्त्रीषु वा प्रसक्तमसुकरेण सहाय्यदानेन प्रियोपग्रहैश्च सुदीर्घकालमनुरंजयेत्। तदन्ते च स्वाभिप्रायं ग्राहयेत्'।**

**3/5/24 'प्रायेण हि युवानः समानशीलव्यसनवयसां वयस्यानामर्थे जीवितमपि त्यजन्ति। ततस्तेनैवान्यकार्यापदेशेन तामानाययेत्। विसह्यां सावकाशमिति समानं पूर्वेण'।**

वेश्यासु साधारणासु परस्त्रीषु परपरिग्रहेषु प्रसक्तमनुरक्तं समानव्यसनवयसां स्वसमं चात्कन्यापरिचितं पुरूषं भ्रातरं परिकल्प्य असुकरेण महता सहाय्यदानेन उपकारकरणेन प्रियोपग्रहैः प्रियवाक्यैरनुरंजयेत् स्वाधीनीकुर्यात्। तदन्ते तदनन्तरं स्वाभिप्रायं कन्याविशेष–परिणयरूपं ग्राहयेत् निवेदयेत्। समानशीलव्यसनवयसां समानानि स्वसमानानि शीलं सद्वृत्तिः व्यसनं दुर्वृत्तिः अतएव वयस्यानां सखीनामर्थे कार्याय हि प्रसिद्धौ। अतस्तस्मादेव ग्राहयेत्। ततः स्वाभिप्रायकथनान्तरं तेनैव सख्या इत्यादि समानं प्रकाशयेदित्यन्तम्।

**3/5/25 'अष्टमीचन्द्रिकासु च धात्रेयिका मदनीयमेनां पाययित्वा किंचिदात्मनः कार्यमुद्दिश्य नायकस्य विषह्यं देशमानयेत्। तत्रैनां मदात्संज्ञाम-प्रतिद्यमानां दूषयित्वेति समानं पूर्वेण'।**

उत्कोचहर्षितया धात्रेयिकया कन्याधात्र्या मदनीयं मदकरं किंचिद्वस्तु नायकः आत्मनः कार्यमुद्दिश्य नायकस्य स्वस्यदेशं गृहं तत्र स्वगृहे एनामानीतां दूषयित्वा श्रोत्रियागारेत्याद्युक्तप्रकारेणान्यानुपयुक्तां कृत्वा समानं बन्धुप्रकाशनम्।

**3/5/26 'सुप्तां चैकचारिणीं धात्रेयिकां वारयित्वा संज्ञामप्रतिपद्यमानां दूषयित्वेति समानं पूर्वेण'।**

एकचारिणीं एकाकिनीं धात्रेयिकया स्वयं तोषितया वरयित्वा स्वगृहमानाय्य संज्ञां प्रबोधं कन्यां इति श्रोत्रियागारादित्यादि समानं प्रकाशनान्तम्।

राक्षसविवाहमाह –

**3/5/27 'ग्रामान्तरमुद्यानं वा गच्छन्तीं विदित्वा प्रभूतसहायो नायकस्तदा रक्षिणो वित्रास्य हत्वा वा कन्यामपहरेदिति विवाहयोगाः'।**

तदा तत्काले रक्षिणः तस्याः अपहरेत् श्रोत्रियागारादिति समानं पूर्वेण। विवाहयोगाः विवाहप्रकाराः।

**3/5/28 'पूर्वः पूर्वः प्रधानं स्याद्विवाहो धर्मतः स्थितेः।**
**पूर्वाभावे ततः कार्यो योग उत्तर उत्तरः'॥**

पूर्वः गान्धर्वः प्रधानं राक्षसाद्यपेक्षया श्रेष्ठः। कुतः धर्मतः अनुमतिपूर्वकत्वेन धर्म्यात् स्थितेः कारणात्। अतः पूर्वाभावे गान्धर्वाद्यसम्भवे। गान्धर्वस्य श्रैष्ठ्यमेवाह–

**3/5/29 'व्यूढानां हि विवाहानामनुरागः फलं यतः।**
**मध्यमोऽपि हि सद्योगात् गान्धर्वस्तेन पूजितः'॥**

व्यूढानां कृतानामनुरागः परस्परानुरागः मध्यमोऽपि ब्राह्माद्यपेक्षया मध्यमनिर्दिष्टोऽपि सद्योगतः सिद्धफलयोगात्।

**3/5/30 'सुखत्वादबहुक्लेशात् प्रयोगाचरणादपि।**
**अनुरागात्मकत्वाच्च गान्धर्वं प्रवरो मतः'॥**

सुखत्वात् तत्करत्वात् अबहुक्लेशात् सम्पादने बहुश्रमराहित्यात्प्रयोगाचरणात् लोकाविरूद्धाचरणात् अनुरागात्मकत्वात् तत्पूर्वकत्वात्।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासिद्वैतमतमत्तद्विरदसिंह भास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ तृतीयाधिकरणे विवाह–योगोनाम पंचमोऽध्यायः। समाप्तं चाधिकरणम्।**

**Note :**

1. During those days experts treated women from the perspective of sexual engagement. They devided them in three broad categories – young girl (बाला)ĭ youthful woman (तरूणी) and mature woman (प्रौढा).

**बालेति गीयते नारी यावच्छोडशवत्सरम्।**
**ततः परं च तरूणी यावच्च त्रिंशतं भवेत्॥**

**तदूर्ध्वं अभिरूढ़ा स्याद्यावत् पंचाशतं पुनः।**
**वृद्धा ततः परं ज्ञेया सुरतोत्सववर्जिता॥ 16/2,3 N.S.**

(Upto the age of sixteen a woman is called young girl. Thereafter upto thirty years of age she is treated as youthful woman. Above thirty years and upto fifty years of age she is considered a mature woman. Beyond fifty years of age she is an old woman and hence ineligible for the festival of sex.)
In this third Adhikarana, Vātsyāyana mainly focuses on the first category i.e. girl (बाला) young girl. He calls upon the husband/lover to tread softly in persuading the young wife for engaging pleasures of sex; by first winning her over with attractive gifts, toys kitchen utensils, ornaments etc.

2. He in fact, asks them, not to engage them in sexual act for first three nights after marriage. He obviously takes the cue from Parashara Grihya Sutra -

**'संवत्सरं न मिथुनमुपेयातां द्वादशरात्रं षडरात्रं त्रिरात्रमन्ततः'**

K.8.– पाराशर गृह्यसूत्र

(One must abstain from sex with wife for one year (where may be the girl is very young;) in other cases this abstention could be brought down to twelve nights or six nights but definitely not less than three nights.)

3. This exercise of detailed demarcation of age of both women and men reflects the attention experts and law givers gave towards initiating young girls to sexual union. In the Adi-Ula on Ceraman of 9th Cen AD women are described as follows—

| **NAME** | **Age in years** |
|---|---|
| Pedai | 5 – 8 |
| Pedumbai | 9 - 10 |
| Mangai | 11 – 14 |
| Mandanai | 15 – 18 |
| Arivai | 19 – 24 |
| Terivai | 25 – 29 |
| Perilampen | 30 – 56 |

Men are classified as under –

Batan 1-7 yrs, Mili 8-10, Maravon 11-14, Tiravon 15 yr, Kalai 16 yr, Vidalai-17-30, Mudu Mohan beyond 30 yrs

The UL compositions (Tamil)-

"describe a deity or hero going in procession through the street where courtesans live and the womenfolk there from young onwards giving expression to their love for the deity or the hero"

P.71 - V. Raghavan in
– Srngara Manjari.
Hyderabad Archaeological
Dept. Publication

# 4. भार्याधिकारिकं नाम चतुर्थमधिकरणम्

**अध्याय – 1**

## एकचारिणीवृत्तप्रकरणम्

एवं गान्धर्वाद्यन्यतमविवाहेन भार्यात्वं प्राप्तायाः अवसरसंगत्या पत्यौ वर्त्तनप्रकारमाह–

4/1/1 **'भार्यैकचारिणी गूढविस्रम्भा देववत्पतिमानुकूल्येन वर्त्तेत'।**

4/1/2 **'तन्मतेन कुटुम्बचिन्तामात्मनि सन्निवेशयेत्'।**

एकस्मिन् पत्यौ चरति वर्तत इति तथा रूढविस्रम्भा प्रवृद्धविश्वासा सति देववत् देवमिव पतिं प्रति अनुकूलवर्त्तनमेवाहतन्मते सा पतिद्वारानुमतप्रकारेण कुटुम्बचिन्तां पुत्रमित्रदासीदासादिपोषणप्रकारं आत्मनि सन्निवेशयेत्। आत्माधीनं कुर्यात्।

4/1/3 **'वेश्म च शुचि सुसंमृष्टस्थानं विरचितविविधकुसुमं श्लक्ष्णभूमितलं हृद्यदर्शनं त्रिषवणं विरचितबलिकर्म पूजितदेवतायनं कुर्यात्'।**

4/1/4 **'न ह्यतोऽन्यद्गृहस्थानां चित्तग्राहकमस्तीति गोनर्दीयः'।**

सुसंमृष्टस्थानं सम्मार्जनशोधितं शुचि गोमयादिना लिप्तं श्लक्ष्णभूमितलं शय्याप्रदेशे विचित्ररचितनानाकुसुमं त्रिषवणं कालत्रये विरचितबलिकर्मतंडुलादिचूर्णरचितपिपीलिकाद्यर्थरंगवल्लीवत् अतएव हृद्यदर्शनं द्रष्टुं मनोहरं वेश्म निवासगृहं अत उक्तगुणगृहात्।

4/1/5 **'गुरुषु मित्रवर्गेषु भृत्येषु नायकभगिनीषु तत्पतिषु च यथार्हं प्रतिपत्तिः'।**

गुरुषु श्वश्रुश्वश्शुरादिषु मित्रवर्गेषु नायकस्य यथार्हं सेवनविनयपोषणभाषणादिभिर्यथायोग्यं प्रतिपत्तिर्विश्वासः कार्यः।

4/1/6 **'परिपूते स्थाने हरितशाकवप्रानिक्षुस्तम्बांजीरकसर्षपाजमोदशतपुष्पात–मालगुल्मांश्च कारयेत्'।**

4/1/7 **'कुब्जकामलकमल्लिकाजातीकुरंटकनवमालिकातगरनन्द्यावर्तजपागुल्मा–**

**नन्यांश्च बहुपुष्पान् बालकोशीरकपातालिकांश्च वृक्षवाटिकायां च स्थंडिलानि मनोज्ञानि कारयेत्।**

परिपूते परिशुद्धे स्थाने निष्कुटगृहारामे हरितशाकवप्रान् हरित्वर्णशाक–विशेषकेदाराणि इक्षुस्तम्बान् जीरकादि गुल्मविशेषान् कुंजकं सेवन्तीकात–कादिगुल्मान् पुष्पविशेषान् तद्गुल्मविशेषान् कारयेत्। बालकोशीरकपातालिकांश्च बालकादयः सुगन्धगुल्मविशेषाः वृक्षवाटिकायां चोच्छ्रितानि वितृणानि अकंटकानि च स्थंडिलानि। स्थंडिलानि वीथिकाः।

4/1/8 सामान्येषु देशेषु समप्रदेशेषु – **'कूपं वापीं दीर्घिकां वा खानयेत्'।**

कूपं रज्वादिभिर्जलग्रहणयोग्यं वापीं सोपानमार्गेणोदकग्रहणयोग्यां दीर्घिकां सरः।

4/1/9 **'भिक्षुकीश्रमणकुलटाकुहकेक्षणिकामूलकारिभिः न संसृज्येत्'।**

भिक्षुकी तद्व्याजेन सर्वगृहसंचारिणी श्रमणी तापसवेषेण कुहकेक्षणा सविलासेक्षणा मूलकारिका विविधौषधकारिणी न संसृज्येत् सख्यं न कुर्यात्।

4/1/10 **'भोजने च रूचितमिदमस्मै द्वेष्यमिदं पथ्यमिदमपथ्यमिदं इति च विन्द्यात्'।**

अस्मै पत्यै इदं शाकादिरूचितमिष्ठं पथ्यं देहानुकूलं भोजने विन्द्यात् विदित्वा दद्यात्।

4/1/11 **'स्वरमागच्छतो बहिरूपश्रुत्य किं कृत्यमिति सज्जा भवनमध्ये तिष्ठेत्'।**

आगच्छतः गृहं प्रति स्वरं शब्दं बहिः गृहात् किं किंचित् कृत्यं कार्यं इति परिसमाप्य सज्जा तत्सेवा सन्नद्धा।

4/1/12 **'परिचारिकामपनुद्य च स्वयं पादौ प्रक्षालयेत्'।**

अपनुद्य निवार्य पादौ पत्युः।

4/1/13 **'नायकस्य च न विमुक्तभूषणं विजने सन्दर्शनं तिष्ठेत्'।**

विमुक्तभूषणा त्यक्तालंकारा सति विजने विविक्ते दर्शने दृष्टिपथे।

4/1/14 **'अतिव्ययमसद्व्ययं वा कुर्वाणं रहसि बोधयेत्'।**

अतिव्ययलब्धान् असद्व्ययं नटविटादिदानम्।

**4/1/15 'विवाहयज्ञगमनं सखीभिः सह गोष्ठीं देवताभिगमनमित्यनुज्ञाता कुर्यात्'।**

विवाहःपित्रादिगृहे बाल्यसहवासिनीभिः देवताभिगमनं देवता तद्दर्शनाय अनुज्ञातायाः भर्त्राः अन्यथा न।

**4/1/16 'सर्वक्रीडासु च तदानुलोम्येन प्रवृत्तिः'।**

सर्वक्रीडासु कन्दुकगानादिकेलिषु तदानुलोम्येन पत्यनुमत्यैव कार्या।

**4/1/17 'पश्चात्संवेशनं पूर्वमुत्थानमनवबोधनं च सुप्तस्य'।**

पश्चात्पतिशयनान्तरं संवेशनं शयनं पूर्वं पत्युत्थानात् अनवबोधनं च सुप्तस्य अनवबोधनं महत्कार्यमन्तरा प्रबोधनं न कार्यम्।

**4/1/18 'महानसं सुगुप्तं स्याद्दर्शनीयं च'।**

महानसं पाकशालां, पाकशाला सुगुप्तं सर्वदृष्ट्यगोचरं दर्शनीयं मनोहरं च स्यात्। यथा स्यात् तथा कुर्यात्।

**4/1/19 'नायकापचारेषु न किंचित्कलुषिता निर्वदेदधिक्षेपवचनम्'।**

नायकापचारेषु तत्कृतापराधेषु कलुषिता विक्षिप्तचित्ता सती अधिक्षेपवचनं तन्निदावाक्यं किंचिदपि न निर्वदेत्।

**4/1/20 'जनसमक्षं किं तु मित्रजनमध्यस्थमेकाकिनं वाप्युपालभेत'।**

मित्रजनमध्यस्थं उभयाप्तजनमध्यगतं उपालभेत। तदपचारं ब्रूयात्।

**4/1/20 'न च मूलकारिका स्यात्'।**

**4/1/21 'न ह्यतोऽन्यमप्रत्ययकारणमस्तीति गोनर्दीयः'।**

मूलकारिका प्रथमतः स्वयमेव तदपचारकारिणी न स्यात् कुतः अतः विश्वस्ते प्रथमापराधकरणात् अप्रत्ययकारणं नायकस्याविश्वासकारणं यतो नास्ति।

**4/1/22 'दुर्व्याहृतं दुर्निरीक्षितमन्यतो मन्त्रणं द्वारदेशावस्थानं निरीक्षणं वा निष्कुटेषु मन्त्रणं विविक्तेषु चिरमवस्थानमिति वर्जयेत्'।**

दुर्व्याहृतं कटुकभाषणं दुर्निरीक्षितं क्रूरदृष्टिं अन्यतः अन्येन मन्त्रणं गुप्तपरिभाषणं द्वारदेशावस्थानं बहिर्द्वारदेशस्थितं निरीक्षणं मार्गयायिजननिरीक्षणं निष्कुटेषु गृहोपवनेषु मन्त्रणं विचारः विविक्तेषु प्रदेशेषु चिरावस्थानं दीर्घकालस्थितिम्।

**4/1/23 'स्वेददन्तपंकं दुर्गन्धांश्च बुध्येत्'।**

स्वेददन्तपंकं स्वस्याः स्वेदप्रयुक्तमालिन्यं दुर्गन्धान् स्वेदप्रयुक्तानेव बुध्येत् ज्ञात्वा परिहरेत्।

**4/1/24 'बहुभूषणं विविधकुसुमानुलेपनं विविधागंरागसमुज्वलं वास इत्याभिगामिको वेषः'।**

बहुभूषणं तद्धारणं अनुलेपनं चन्दनधारणं विविधरागसमुज्वलं विचित्रं वासः तद्धारणं आभिगामिकः भर्तृसमीपगमनकालिकवेषः।

**4/1/25 'प्रतनुश्लक्ष्णाल्पदुकूलता परिमितमाभरणं सुगन्धिता नात्युद्धतं अनुलेपनं तथा पुष्पाणि शुक्लान्यल्पानीति वैहारिको वेषः'।**

प्रतनु शुक्लाल्पदुकूलामृदुधवलस्वल्पदुकूलद्वयं सुगन्धिता सुगन्धयुक्तं नात्युद्धतं अनत्यधिकं अनुलेपनं चन्दनं वैहारिकः गार्हव्यापृत्तिकालिको वेषः धार्य इति वा।

**4/1/26 'नायकस्य व्रतमुपवासं वा स्वयमपि करणेनानुवर्तेत'।**

व्रतं देवतापूजादिनियमं उपवासं एकादशीत्यादिः करणेनाचरणेन।

**4/1/26 'वारितायां च नाहमत्र निवारयितव्येति तद्वचसो निवर्तनम्'।**

वारितायाः व्रतविषये नायकेन निवारितायाश्च अत्र व्रतोपवासविषये न निवारितव्या निवारणानर्हा इति। एवं तद्वचसः नायकनिवारणवचनस्य निवर्त्तनं निषेधनं कार्यं भवति।

**4/1/27 'मृद्विदलकाष्ठचर्मलोहभांडानां काले समर्घग्रहणं'।** द्विदलो वंशः मृदादिभांडानां काले तत्काले समर्घेण अल्पमूल्येन ग्रहणं विक्रयणम्।

**4/1/28 'लवणस्नेहयोश्च'** स्नेहो घृतादि चात्तांडुलादेः ग्रहणं। **'गन्धद्रव्यकटुकभाण्डौषधानां च दुर्लभानां भवने प्रच्छन्नं निधानम्'।** कटुकं त्रिकटुकं निधानं स्थापनं कार्यम्।

**4/1/29 'मूलकालुकपालंकी दमनकाम्रातकैर्वारूकत्रपुसवार्त्ताक-कूष्मांडकालाबुसूरणशुकनासास्वयंगुप्तातिलपर्णिकाग्निमन्थलशुन-पलांडुसर्वौषधानां च बीजग्रहणं'।**

मूलमधिकं करोतीति मूलकं कुत्सितं लक्यते आस्वाद्यत इति कुलकं पटोलिकाकुलकः 'पटोलस्तिक्तकः पटुरित्यमरः' पालक्यं उपोतकी दमयति दुर्गन्धं इति दमनं सुगन्धिगुल्मविशेषः, त्रपुसं गजदन्तफलं शुकनासा तदाकारशलाटुकलताविशेषः। स्वयंगुप्तादयो लताविशेषाः। लशुन पलांडू प्रसिद्धौ।

**4/1/29 'काले वापश्च'।**

काले तत्तद्बीजोवाप योग्यकाले वापः। क्षेत्रे बीजप्रक्षेपश्च कार्यः।

**4/1/30 'स्वस्य रहस्य* परेभ्यो नाख्यानम्'।** स्वस्य स्वीयस्य रहस्यस्य अभिप्रायस्य 'भर्तृमन्त्रितस्य' च मन्त्रितस्य गुप्तपरिभाषितस्य च अनाख्यानमकथनम्।

**4/1/31 'समानास्त्रियः सपत्नीः कौशलेन उज्वलतया पाकेन मानेन तथोपचारैरतिशयीत'।**

समानास्त्रियः सपत्नीः कौशलेन कलाकौशल्येन उज्वलतया सौन्दर्यादिना वा पाकेन तच्चातुर्येण उपचारैः चरणसंवाहनाद्युपचारैः मानेन पूजया च अतिशयीत भर्तुरधिकप्रीतिं सम्पाद्यातिक्रमेत्।

**4/1/32 'सांवत्सरिकमायं संख्याय तदनुरूपं व्ययं कुर्यात्'।**

आयं द्रव्यलाभं तदनुरूपं तदनुसारेण।

**4/1/33 'भोजनावशिष्टात् गोरसात् सारग्रहणं'।**

भोजनावशिष्टात् भुक्तशेषात् गोरसात् घृतात् जलमिश्रितात् अग्नितप्तात् सारग्रहणं स्थिरांशस्वीकारः कार्यं।

**4/1/33 'तथा तैलगुडयोः'** तथा भुक्तावशिष्टयोः सजलयोस्तप्तयोः ग्रहणं, **'कर्पासस्य च सूत्रकर्त्तनं'** सूत्रकर्त्तनं तत्करणं भर्तुरूपवीतस्य **'सूत्रस्य वानम्।**

---

* It is सारस्य in the published text which means wealth while BNS has taken it is as रहस्य i.e.- secret.

**शिक्यरज्जुपाशवल्कलसंग्रहणम्'।** तन्त्रं सूत्रकर्त्तनसाधनं वानं तत्सज्जीकरणसाधनं।

**4/1/33 'कुट्टनकंडनावेक्षणम्'।**

कुट्टनं उलूखलादिकंडनं शाकादिविदलनसाधनाय सविशेषः तयोरवेक्षणं अवेक्ष्य रक्षणं।

**4/1/33 'आचमात्तुषकणकडंगरकाणां उपयोजनम्'।**

आत्तुषकणं तुषकणमभिव्याप्य आचं भक्ष्यं कडंगरकाणां वलीवर्दादीनामुपयोजन-मुपयोक्तव्यम्।

**4/1/33 'भृत्यवेतनभरणज्ञानम्'।**

वेतनं प्रतिमासं देयत्वेन निर्णीतं भरणं अन्नादिना पोषणं उभयोः ज्ञानं विचारः। **'कृषिपशुपालनपोषणचिन्तां'** पालनं हिंसकेभ्यो रक्षणं पोषणं वर्धनं चिन्ता तद्व्यासंगः।

**4/1/33 'वाहनविधानयोगाः'** वाहनानां शकटादीनां विधानं तक्षकद्वाराकरणं योगः सम्पादनं। **'मेषकुक्कुटलावकशुकशारिकापरभृतमयूरवानरमृगावेक्षणं'** एषां गार्हाणामवेक्षणं संरक्षणम्।

**4/1/33 'दैवसिकस्य व्ययस्य पिंडीकरणं विद्यात्'।**

दैवसिकस्य दिवसभवस्य पिंडीकरणं परिसंख्यायैकीकरणं विद्यात् कुर्यात्।

**4/1/34 'तज्जघन्यानां च जीर्णवाससां संचयस्तैर्विविधरागैः शुद्धैर्वा कृतकर्मणां परिचारकाणामनुग्रहो मानार्थेषु च दानमन्यत्र वोपयोगः'।**

तज्जघन्यानां ऊनमूल्यकानां जीर्णानां च वाससां संचयः संग्रहः कार्यः। तैः जीर्णवस्त्रैः कृतकर्मणां कृष्यादिकर्मकारिणां परिचारकाणां गृहदासानां च अनुग्रहः परितोषः कार्यः। उत्सवे विवाहादि उत्सवे मानार्थिषु बहुमानापेक्षिषु विषये जघन्यमूल्यानां दानं अन्यत्र बन्धुगृहोत्सवेषु।

**4/1/35 'सुराकुम्भीनामासवकुम्भीनां च स्थापनं'।**

सुरापैष्टि आसवं पौष्पं स्थापनं रक्षणं इदमन्त्यजातिविषयं वर्णचतुष्टयस्य तन्निषेधात्।

4/1/35 **'क्रयविक्रयावायव्ययावेक्षणम्'।**

अवेक्षणं परिशीलनम्।

4/1/36 **'नायकमित्राणां च स्रगानुलेपनताम्बूलदानैः पूजनं न्यायतः'। प्रीत्या।**

4/1/37 **'श्वश्रूश्वशुरपरिचर्या'।** पादसेवनं, वाक्यश्रवणादिकं।

4/1/37 **'तत्पारतन्त्र्यमनुत्तरवादिता' च।**

तत्पारतन्त्र्यं तदुक्तं कार्यकरणं अनुत्तरवादिता प्रतिकूलोत्तरादानम्।

4/1/37 **'परिमिताप्रचंडालापकरणमनुच्चैर्हासः'।**

परिमितं स्वल्पं अप्रचंडं अपरूषमतारं चालापकरणं सम्भाषणं अनुच्चैर्हासः कदाचिन्मन्दहासः।

4/1/37 **'तत्प्रियाप्रियेषु स्वप्रियाप्रियेष्विव वृत्तिः'।**

तत्प्रियाप्रियेषु नायकशारीरसुखासुखेषु वृत्तिर्वर्तनम्।

4/1/38 **'भोगेष्वनुत्सेकः'।**

4/1/39 **'परिजने दाक्षिण्यम्'।**

4/1/40 **'नायकस्यानिवेद्य न कस्मैचिद्दानम्'।**

4/1/41 **'स्वकर्मसु सुहृत्परिजननियमनम्'।**

अनुत्सेकः अलोलुपता परिजने दासजने दाक्षिण्यं कारूण्यविशेषः अनिवेद्य सति सामीप्ये अविज्ञाप्य कस्मैचित् ब्राह्मणाय न दानम्।वस्त्रादेः स्वकर्मसु स्वापेक्षितवस्त्रताम्बूलाद्यानयनविषये सुहृत्परिजननियमनं नायकमित्रपरिचारकनियोजनं कार्यं।

4/1/41 **'उत्सवेषु चास्य पूजनमित्येकचारिणीव्रतम्'।** अस्य पतिहितपरजिनस्य।

4/1/42 **'प्रवासे च मंगलमात्राभरणा देवतोपवासपरा वार्त्तायां स्थिता गृहानवेक्षेत'।**

मांगल्यं मंगलसूत्रताटंकवलयादि दैवोपवासपरा देवतापूजनैकपरा नासक्ता वार्त्तायां भर्तुः क्षेमविचारे गृहान्पूर्वोक्तगृहकर्मणि अवेक्षेत विचारयेत।

**4/1/43 'शय्या गुरूसमीपे'।**

गुरूसमीपे श्वश्रूसन्निधौ। शय्या शयनं कार्या।

**4/1/43 'तदभिमता कार्यप्रतिपत्तिः'।**

तदभिमता गुरूजनसंमता कार्यप्रतिपत्तिः तदनुष्ठानम्'।

**4/1/43 'नायकाभिमतानां'** तदिष्टानामर्थानां **'पदार्थानां उपार्जने'** सम्पादने **'प्रति संस्कारे'** संरक्षणे **'च यत्नः'** प्रयत्नः कार्यः।

**4/1/44 'नित्यनैमित्तिकेषु कर्मसूचितो व्ययः'।**

नित्यनैमित्तिकेषु अग्निहोत्राग्रयणादिषु उचितः अपेक्षितः।

**4/1/44 'आरब्धानां कर्मणां समापने मतिः'।**

तदराब्धानां नायकोपक्रान्तानां कर्मणां सर्पबलिप्रभृतीनां परिसमापने ऋत्विजा।

**4/1/45 'ज्ञातिकुलागमनमन्यत्र व्यसनोत्सवाभ्याम्'।**

व्यसनमापत् उत्सवो विवाहादि ताभ्यामृतेऽन्यत्र कालान्तरे ज्ञातिकुलं प्रति स्वभर्तृसम्बन्धिगृहान्प्रति अगमनं गमनाभावः परिपाल्यः।

**4/1/45 'तत्रापि नायकपरिजनानुनयानातिकालमवस्थानं'।**

तत्रापि व्यसनोत्सवयोः अपि नायकपरिजनैः भर्तृदासिभिः अनु सहसम्बन्धिगृहं प्रतियाता सती अतिकालं दीर्घकालं अवस्थानं निवासं न कुर्यात्।

**4/1/45 'अपरिवर्तितप्रवासवेषता च'।**

उत्सवे सम्बन्धिगृहगमनकालेऽपि अपरित्यक्तप्रोषितभर्तृकावेषतया भाव्यम्

**4/1/46 'गुरूजनानुज्ञातानं करणमुपवासानाम्'।**

गुरूजनानुज्ञातानां श्वश्रूप्रभृतिसंमतानां उपवासानां एकदश्यादौ।

**4/1/46 'परिचारकैः शुचिभिः आज्ञाधिष्ठितैः अनुमता क्रयविक्रयकर्मणां सारस्या स्थापनम्'।**

आज्ञाधिष्टितैः तत्कारिभिः शुचिभिराप्तैः परिचारकैः भर्तुः अनुगता सहिता कृतानां क्रयादिकर्मणां सम्बन्धिसारस्य आयव्ययरूपस्याप्यायनं लिखाप्य स्थापनं कुर्यात्।

**4/1/46 'तनूकरणं शक्या व्ययानाम्'।**

व्ययानां दैनन्दिनधनव्ययानां शक्या स्वचातुर्येण तनूकरणं भर्तृसन्निधिकालिकात्संकोचनम्।

**4/1/47 'आगते च प्रकृतिस्थाया एव दर्शनम्'।**

आगते पत्यौ प्रकृतिस्थायां प्रवासवेषयुक्ताया एव दर्शनं योजयेत् तस्य।

**4/1/47 'दैवतपूजनमुपहाराणां चाहरणमितिप्रवासचर्या'।**

दैवतपूजनं तदागमनाय प्रार्थितं उपहाराणां पत्यर्थोपार्जितापूर्वपदार्थानां चादासनपाद्योदकानामिति प्रवासचर्या प्रोषितभर्तृकाक्रिया।

अत्र प्रसिद्धश्लोकानाह–

**4/1/48 'सद्वृत्तमनुवर्तेत नायकस्य हितैषिणी।**
**कुलयोषा पुनर्भूर्वा वेश्या वाप्येकचारिणी'॥**

नायकस्य हितैषिणी तत्प्रीत्यभिलाषिणी कुलयोषा पत्नी पुनर्भूः भोगार्थमन्येन गृहीतान्यस्त्री एकचारिणी एकपुरूषमात्रनिरता वेश्या तज्जातीया सद्वृत्तं पूर्वोक्तसतीचरित्रं अनुवर्तेत कुर्यात्। यद्येवं तर्हि –

**4/1/48 'धर्ममर्थं च कामं च लभन्ते स्थानमेव च।**
**निःसपत्नं च भर्त्तारं नार्यः सद्वृत्तमास्थिताः'॥**

सद्वृत्तमास्थिता नार्यः धर्मे आमुष्मिकं फलं अर्थं ऐहिकफलं कामं उभयफलं स्थानं समानासु श्रैष्ठ्यं निःसपत्नं सपत्नीबाधरहितं यथा तथा भर्त्तारं लभन्ते।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञधर्मशास्त्रपान्थपान्थारिमदहरहरपुरनिवासी–भास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ चतुर्थेऽधिकरणे प्रथमोऽध्यायः।**

अध्याय – 2

# ज्येष्ठादिवृत्तप्रकरणम्

एवं भर्तृसन्निधाना सन्निधानकालयोः कृत्यमुक्त्वा अवसरसंगत्याऽपुत्रत्वादिनिमित्तैरन्या–परिग्रहे तयोरन्योन्यानुवर्तनं तद्वर्तनं चाह – जाड्येत्यादिना।

**4/2/1 'जाड्यदौःशील्यदौर्भाग्येभ्यः प्रजानुपत्तेराभीक्ष्येन दारिकोत्पत्तेर्नायक-चापलाद्वा सपत्न्यधिवेदनम्'।***

जाड्यं कार्येष्ववैदग्ध्यं दौःशील्यं दुःस्वभावता दौर्भाग्यं दुर्भगत्वं प्रजानुत्पत्तेः सन्तानानुत्पत्तेः आभीक्ष्येन पौनःपुन्येन दारिकोत्पत्तेः कन्योत्पत्तेः चापलं कान्तान्तरेच्छा वा शब्दादाभीक्ष्येन मृतापत्यत्वादेः संग्रहः सपत्न्यधिवेदनं भार्यान्तरस्वीकारः कार्यः।

**4/2/2 'तदादित एव भक्तिशीलवैदग्ध्यख्यापनेन'** प्रकटनेन **'परिजिहीर्षेत्'** निवर्त्तयेत्। **'प्रजानुत्पत्तौ च स्वयमेव सापत्नके चोदयेत्'।**

तत्सपत्न्यधिवेदननिमित्तं त्रितयं आदित एव परिग्रहात्पूर्वमेव भक्तिः प्रीतिः शीलनं सद्वृत्तिः वैदग्ध्यं कृत्यवस्तुषु चातुर्यं एतेषां ख्यापनेन प्रकटनेन परिजिहीर्षेत् निवर्त्तयेत्। प्रजानुत्पत्तौ स्वस्याः पुत्रानुत्पत्तौ स्वयमेव नायकगूढाभिप्रायज्ञानेन सापत्नकं भार्यान्तरस्वीकारं प्रति पतिं प्रथमत एव बोधयेत् चोदयेत् प्रेरयेत्।

**4/2/3 'अधिविद्यमाना च यावच्छक्तियोगादात्मनोऽधिकत्वेन स्थितिं कारयेत्'।**

अधिविद्यमाना स्वप्रेरणप्राप्तसपत्नीका यावच्छक्तियोगात् यथाशक्तिकृतोपायैः अधिकत्वे भर्तुः प्रेमाधिकत्वे स्थितिं यत्नं कारयेत् कुर्यात्।

**4/2/4 'आगतां चैनां भगिनिकामिव वीक्षेत्'।**

एनां सपत्नीं वीक्षेत् वीक्षन्तीव तिष्ठेत्।

---

* Vātsyāyana has taken this line from Baudhyana Sutra.

**4/2/4 'नायकविदितं च प्रादोषिकं विधिमतीव यत्नादस्याः कारयेत्'।**

अस्या अभिनवसापत्न्याः प्रादोषिकं प्रदोषकालिककचकुचाद्यलंकारं नायकविदितं तद्दृष्टं यथा तथा अतियत्नादिव तस्य तज्जात्यस्वादरप्रकटनायातिप्रयासेनैव कारयेत् कुर्यात्।

**4/2/4 'सौभाग्यजं वैकृतमुत्सेकं वाऽस्या नाद्रियेत'।**

सौभाग्यजं पत्युरतिशयप्रीतिजं वैकृतं स्वानादरं उत्सेकं सौन्दर्ययौवनादिगर्वं नाद्रियेत न विचारयेत्। किं तु प्रादोषिकविधिं कारयेदिति पूर्वेणान्वयः।

**4/2/5 'भर्त्तरि प्रमाद्यतीमुपेक्षेत'।**

तत्र माद्यतीं सेवामकुर्वन्तीं उपेक्षेत कुर्वितीति न शिक्षयेत्।

**4/2/5 'यत्र मन्येतार्थमिव स्वयमपि प्रतिपत्स्यत इति तत्रैनामादरत एवानुशिष्यात्'**

**4/2/6 'नायकसंश्रवे च रहसि विशेषानधिकान् दर्शयेत्'।**

इमं अर्थं कार्यं स्वयमपि स्वत एव प्रतिपत्स्यते जानाति इति मन्येत जानीयात्। तत्र तस्मिन्नेवार्थे एनां सपत्नीं आदरेण। नायकसंश्रवे तत्समक्षं अनुशिष्यात् शिक्षयेत्। अर्थादज्ञातार्थं न शिक्षयेत् इति सूचितं। रहसि नायकस्य विशेषान् स्वसाधारणान्।

**4/2/7 'तदपत्येष्वविशेषः'।**

तदपत्येषु सपत्नीपुत्रादौ विषये अविशेषः स्वस्याः पुत्रादौ सति यो विश्वासः तमेव कुर्वन्तीव।

**4/2/7 'परिजनवर्गेऽधिकानुकम्पा मित्रवर्गेप्रीतिः'।**

परिजनवर्गे भर्तुः अधिका सपत्न्यपेक्षया मित्रवर्गे तस्यैव।

**4/2/7 'आत्मज्ञातिषु नात्यादारः'।**

आत्मज्ञातिषु भ्रात्रादिष्वागतेषु अत्यादरः प्रीतिसूचकातिमानः न कार्याः।

**4/2/7 'तज्ज्ञातिषु चातिसम्भ्रमः'।**

तज्ज्ञातिषु सपत्नीसम्बन्धिषु विषये अतिसम्भ्रमः अतिपूजनं। चाद् गूढानादरः।

**4/2/8 'बह्वीभिः स्त्रीभिः सह अधिविन्नाऽव्यवहितायां संसृज्येत'।**

बह्वीभिः स्त्रीभिः सह अधिविन्ना एकपुंकर्तृकविवाहसंस्कारवती बहुसपत्नीति यावत् अव्यवहितायां स्वाव्यवहितोत्तरसंस्कृतायां संसृज्यते अनुरूज्यात्।

**4/2/9 'यां तु नायकोऽधिकां चिकीर्षेत्तां भूतपूर्वसुभगया प्रोत्साह्य कलहयेत्'।**

**4/2/10 'ततश्चानुकम्पेत'।**

नायकः यां स्त्रियं अधिकं अनुरागपात्रं चिकीर्षेत् तां प्रोत्साह्य परस्परोक्तिप्रत्युक्तिकथनेन उद्वेजयित्वा भूतपूर्वसुभगया पूर्वं पत्यानुरागवत्या कलहयेत्। ततः स्वयं नायकसमीपे अनुकम्पेत पत्यनुमतसपत्नीमनुकम्पयेत् अनुगृह्णीयात्।

**4/2/11 'ताभिर्बह्वीभिरेनामधिकां चिकीर्षितां स्वयमविवदमाना दुर्जनीकुर्यात्'।**

स्वयमविवदमाना अकलहिता सती अधिकां अधिकप्रेमपात्रं चिकीर्षितां कृतामेनां बह्वीभिः स्वेतराभिः ताभिः सपत्नीभिः दुर्जनीकुर्यात् चंडीयमिति प्रवादयेत्।

**4/2/12 'नायकेन तु कलहितामेनां पक्षपातावलम्बनेनोपबृंहितामाश्वासयेत्'।**

नायकेन कलहितां प्रणयेन एनां तद्धितां पक्षपातावलम्बनेन तद्वाक्यानुमोदनसहायेन उपबृंहितां कलहे दृढीभूतां कृत्वा आश्वासयेत् वशं नयेत्।

**4/2/13 'कलहं च वर्धयेत्'।**

**4/2/14 'तयो मन्दं वा कलहमुपलभ्य स्वयमेव संधुक्षयेत्'।**

मन्दं स्वल्पं कलहं अभिमतसपत्नीपत्योः सन्धुक्षयेत्। वर्धयेत्।

**4/2/15 'यदि नायकोऽस्यामद्यापि सानुनय इति मन्येत तदा स्वयमेव सन्तोषयेदिति ज्येष्ठावृत्तम्'।**

अस्यां पूर्वोक्तसपत्न्यां अद्यापि कलहवृद्धावपि सानुशयः। यत्किंचित्प्रीतिमान् सन्तोषयेत् हावभावादिभिः तमनुरंजयेत् स्वप्रीतिद्वारा तत्प्रीतिनिवृत्तय इति शेषः।

**4/2/16 'कनिष्ठा मातृवत्सपत्नीं पश्येत्'।**

**4/2/17 'ज्ञातिदायमपि तस्या अविदितं नोपयुंजीत'।**

कनिष्ठासपत्नी सपत्नं ज्येष्ठं मातृवत् मात्रातुल्यं, ज्ञातिदायं ज्ञातिभ्यः पित्रादिभ्यः दायं लब्धमपि वस्त्वपि न भर्तृकुललब्धस्य कैमुतिकता सूचिता तस्या ज्येष्ठाया अविदितं अनिवेदितं नोपयुंजीत न विनियुंज्यात्।

**4/2/18 'आत्मवृत्तान्तश्च तदनधिष्ठितान्न कुर्यात्'।**

आत्मवृत्तान्तान् स्वापेक्षितवस्त्रालंकारादीन् तदनधिष्टितान् तस्यै अनुज्ञापितान् न कुर्यात् न धारयेत्।

**4/2/19 'अनुज्ञाता पतिमधिशयीत'।**

अनुज्ञाता तया पतिमधितः समीपे।

**4/2/20 'न वा तस्या वचनमन्यस्याः कथयेत्'।**

अस्याः ज्येष्ठायाः वचनं रहस्यं अन्यस्याः स्वसख्याः।

**4/2/21 'तदपत्यानि च स्वेभ्योऽधिकानि पश्येत्'।**

तदपत्यानि चेत् स्वेभ्यः स्वापत्येभ्यः अधिकानि अधिकप्रेमपात्राणि पश्येत् कुर्यात्।

**4/2/22 'रहसि पतिमधिकमुपचरेत्'।**

अधिकं तदपेक्षया उपचरेत् लीलाभिः परितोषयेत्।

**4/2/23 'आत्मनश्च सपत्नीविकारजं दुःखं नाचक्षीत'।**

विकारजन्यं अधिक्षेपं तं नाचक्षीत।

**4/2/24 'पत्युश्च सविशेषकं गूढं मानं लिप्सेत्'।**

पत्युः सकाशात् वैशेषिकं इतरापेक्षया विशिष्टं गूढमानम् प्रच्छन्नसन्मानं लिप्सेत् प्राप्नुयात्।

**4/2/25 'अनेन खलु पथ्यदानेन जीवामीति ब्रूयात्'।**

अनेन गूढसन्मानेन पथ्यं विशेषतुष्टिः।

**4/2/26 'तत्तु श्लाघया रागेण वा बहिर्नाचक्षेत'।**

तत्कृतं गूढसन्मानं तु श्लाधया स्वविकत्थनेच्छया रागेण प्रीत्या बहिः सख्यादौ। यतः–

**4/2/27 'भिन्नरहस्या हि भर्तुरवज्ञां लभते'।**

भिन्नरहस्यं प्रकटितरहस्यवृत्तान्तं मनोरमापि भर्तुःसकाशात् अवज्ञां अवमानं।

**4/2/28 'ज्येष्ठाभयाच्च निगूढसम्मानार्थिनी स्यादिति गोनर्दीयः'।**

ज्येष्ठाभयात् तत्कोपशंकया।

**4/2/29 'दुर्भगामनपत्यां च ज्येष्ठामनुकम्पयेत्'।**

दुर्भगां भर्तुरनतिप्रेमास्पदं अनुकम्पेत मोचारसमुचा वाचा विचारयेत्।

**4/2/29 'नायकेन चानुकम्पयेत्'।** सन्तोषयेत्।

**4/2/30 'प्रसह्य त्वेनामेकचारिणीवृत्तमनुतिष्ठेत् इति कनिष्ठावृत्तम्'।**

एनां ज्येष्ठां प्रसह्य पातिव्रत्येन न्यूनयित्वा एकचारिणीवृत्तं अतिविततपतिव्रतात्वं अनुतिष्ठेत् सम्पादयेत्।

कनिष्ठावृत्तं कनिष्ठायाः ज्येष्ठायां पत्यौ च वर्त्तनप्रकारः इति समाप्तम्।

ऐहिकामुष्मिकयोपयोगिनायिकावृत्तमुक्त्वा ऐहिकमात्रोपयोगी वनितावृत्तमाह विधवेत्यादिना।

**4/2/31 'विधवा तु इन्द्रियदौर्बल्यादातुरा भोगिनी गुणसम्पन्नं च या पुनर्विन्देत्सा पुनर्भूः'।**

तु शब्दः पूर्वोक्तवैलक्षण्यद्योतनार्थं इन्द्रियदौर्बल्यात् तच्चापल्यात् अतएव आतुरा मनोभवेन अतएव भोगिनी पुरूषसम्भोगार्थिनी या विधवा विसृष्टधवा विगतधवा वा गुणसम्पन्नं इन्द्रियपाटवादिगुणसंयुक्तं चाद्भोगार्थिनं विन्देत् लभेत् सा पुनर्भवत्यन्यदीयेति पुनर्भूः।

**4/2/32 'यस्तु स्वेच्छया पुनरपि निष्क्रमणं स्यात् निर्गुणोऽयमिति तदान्यं कांक्षेत् इति बाभ्रवीयाः'।**

अयं नायकः निर्गुणः मदभिमतगुणैः रहितः इति पुनः स्वेच्छया वरणाद्यन्तरं निष्क्रमणं त्यागः यतः यस्य सम्भवति तमादावेव नाकांक्षेत् यतः।

**4/2/33 'सौख्यार्थिनी सा किल पुनर्विन्दति'।**

सा सौख्यार्थिनी सुखातिशयार्थिनी सती पुनर्विन्दति स्वेच्छया नायकान्तरं गृह्णाति।

**4/2/34 'गुणेषु सोपभोगेषु सुखसाकल्यं तस्मात्ततो विशेष इति बाभ्रवीयाः'।***

सोपभोगेषु उपभोगानुकूलेषु गुणेषु कलाकौशल्यादिषु सत्सु आकल्पं आजीवनं सुखं भवति ततः पूर्वस्मात् पुरूषात् विशेषः अस्य उत्कर्षः तस्मात् गुणसमृद्धेरेव हि अतस्तादृशमेव वृणुयात्।

**4/2/35 'आत्मनश्चित्तानुकूल्यादिति वात्स्यायनः'।**

चित्तानुकूल्यात् मनः प्रवृत्तेरेव हेतोर्वृणुयादित्याचार्यमतम्।

**4/2/36 'सा बान्धवैर्नायकादापानकोत्सवव्यसनोद्यानश्रद्धादानमित्रपूजनादिषु व्ययसहिष्णुकर्म लिप्सेत्'।**

आत्मनः सारेण वा सा पुनर्भूः बान्धवैः तदीयैः सह आपानसक्तोत्सवः पानकर्मभिर्व्याप्य भक्ष्यभोज्यादिभक्षणोत्सवः व्यसनं द्यूतादि उद्यानं वनविहारः श्रद्धादानं विप्रेभ्यः व्ययसहिष्णु धनसाध्यं कर्म स्रक्चन्दनादि दानरूपं नायकात्।

**4/2/37 'आत्मनः सारेण'** स्वीयधनेन वा लिप्सेत् कारयेत् **'अलंकारन्तु तदीयमात्मीयं वा विभृयात् इति'।**

**4/2/38 'प्रीतिदायेष्वनियमः'।**

विभृयादिति विनिमयेन गृह्णीयात्। इत्येवं प्रीतिदायेषु प्रीत्या परस्परप्रेम्णा दायेषु अन्योन्येषु अनियमः। व्ययभोगधारणादावव्यवस्था।

**4/2/39 'स्वेच्छया च निर्गच्छन्ती प्रीतिदायादन्यन्नायकदत्तं जीयेत निष्कास्यमाना तु न किंचिद्दद्यात्'।**

तस्मिन्नरूच्या स्वेच्छया निर्गच्छन्ती एनं विहायान्यत्र गच्छन्ती सती प्रीतिदायात् प्रीत्या स्वस्यैव दत्ता सती अन्यनायकदत्तं तेन स्वसमीपे स्थापितं जीयेत पुनर्न दद्यात्, निष्कास्यमाना तेनारूच्या बलान्निष्कासिता चेत्किंचिदपि स्वाधीनं न दद्यात्।

**4/2/40 'सा प्रभविष्णुरिव तस्य भवनमाप्नुयात्'।**

---

* In the published text it is गोनर्दीयः।

सा पुनर्भूः प्रभविष्णुरिव सम्पन्नेव तस्य नायकस्य भवनमाप्नुयात् आदौ प्रविशेत्।

**4/2/41 'कुलजासु तु प्रेष्यवत् वर्त्तेत'।**

कुलजासु तत्पत्नीषु प्रेष्यवत् दासीतुल्यं परिजने तदीय दासीदासादौ दाक्षिण्येन दयाविशेषेण वर्तेत।

**4/2/42 'दाक्षिण्येन परिजने सर्वत्र परिहासा मित्रेषु प्रतिपत्तिः'।**

सर्वत्र सर्वदा मित्रेषु तत्सखीषु सपरिहासा प्रतिपत्तिः स्थितिः कार्या।

**4/2/42 'कलासु कौशलमधिकस्य ज्ञपानम्'।**

कलासु उक्तगानादिचतुःषष्ठीविद्यासु अधिकस्य तत्पत्न्याद्यपेक्षया कौशलस्य स्वकुशलतायाः ज्ञापनं नायकस्य।

**4/2/43 'कलहस्थानेषु च नायकं स्वयमुपालभेत्'।**

कलहस्थानेषु गोत्रस्खलनादिषु उपालभेत् अधिक्षिपेत्।

**4/2/44 'मृदुरहसि कलया चतुःषष्ट्यानुवर्तेत'।**

चतुःषष्ट्या बाभ्रवीयोक्तदन्तक्षतादि चतुःषष्टिकलाभिः मृदु अनतितीक्ष्णं अनुवर्तेत अनुरंजयेत्।

**4/2/44 'स्वयं सपत्नीनामुपकुर्यात्'।**

सपत्नीनां तत्सपत्नीनां उपकृतिमेवाह–

**4/2/44 'तदपत्यानि स्वामिवदुपचरेत्। मंडनकानि आदरेण कुर्वीत'।**

तदपत्यानि सपत्नीपुत्रान् स्वामिवत् स्वामिनमिव उपचरेत् दासीव सेवेत। मंडनकानि तासां केशसंस्करादि कार्याणि।

**4/2/44 'परिजने मित्रवर्गे च विस्रम्भणं विश्राणनं च। समाजापानकोद्यानयात्रा-विहारशीलता चेति पुनर्भूवृत्तम्'।**

परिजने तस्य विस्रम्भणं विश्वासः विश्राणनं दानं। समाजः तन्मित्रसंघः यात्रा देवोत्सवः एषु विहरण स्वभावता कार्या प्राग्वक्तव्यमपि दुर्भगावृत्तं परानुवर्तनविशेषसाम्यादथ प्रतिपादयति।

**4/2/45 'दुर्भगा तु सापत्न्यपीडिता या तासामधिकमिव पत्यावुपचरेत्तां चाश्रयेत्। प्रकाश्यानि कलाविज्ञानानि दर्शयेत्'*।**

दुर्भगा अनतिरूपादिमती पत्नी अतएव सापत्न्यपीडिता। तासां सपत्न्यपेक्षया अधिकमिव तां पत्यभिमतसपत्नीमपि आश्रयेत् सेवेत। प्रकाश्यानि अगोप्यानि कलाविज्ञानानि स्वज्ञानविषयकलाः दर्शयेत् तस्यै कथयेत्।

**4/2/46 'नायकापत्यानां'** सपत्नीपुत्राणां **'धात्रीकर्माणि कुर्यात्'।**

सपत्नीपुत्राणां धात्रीकर्माणि उपमातृकार्यपोषणादीनि।

**4/2/47 'तन्मित्राणि चोपगृह्य तद्भक्तिमात्मनस्तैः प्रकाशयेत्'।**

तन्मित्राणि नायकसखाः उपगृह्य अनुसृत्य आत्मनः स्वस्याः तद्भक्तिं नायकविषयप्रीतिविशेषं तैः तन्मित्रैः प्रकाशयेत् परोक्षं प्रख्यापयेत्।

**4/2/48 'धर्मकार्येषु च पुरश्चारिणी स्याद्व्रतोपवासयोश्च'।**

धर्मकार्येषु अग्निहोत्राद्युपचारविषये व्रतोपवासयोः व्रतं दर्शपौर्णमासिकं उपवासः एकादश्यादिः तयोश्च पुरश्चारिणी सपत्न्यपेक्षा प्रथमं प्रवृत्ता।

**4/2/49 'परिजने दाक्षिण्यं'** दासी दासादौ।

**4/2/49 'न चाधिकमात्मानं पश्येत्'।**

आत्मानं स्वां अधिकमुत्कृष्टं न च पश्येत् अहंकारं त्यजेदिति यावत्।

**4/2/50 'शयने च तत्सात्म्येनात्मनोऽनुरागप्रत्यानयनं'।**

शयने शयनकाले तत्सात्म्येन तदनुरागानुसारेण प्रत्यानयनकार्यम्।

**4/2/51 'न चोपालभेत वामता च न दर्शयेत्'।**

वामतां वक्रतां न दर्शयेत् न कुर्यात्।

**4/2/52 'यया कलहितः स्यात्कामं तामावर्त्तयेत्'।**

यया अभिमतसपत्न्या उपावर्तयेत् संघटयेत्।

---

* 'दौर्भाग्याद्रहस्यानामभावः' Clause, that is there in the published text is missing from this sutra.

**4/2/53 'यां च प्रच्छन्नां कामयेत्तामनेन संगमयेत्'।**

प्रच्छन्नां प्रतिवेश्यां मर्माणि चास्यामवबुध्येत **'गोपयेच्च'** मर्माणि पारदारिकादीनि गोपयेत् सुसख्या अपि न प्रकाशयेत्।

**4/2/54 'यथा च पतिव्रतात्वमशाठ्यं च नायको मन्येत तथा विदधीतेति दुर्भगावृत्तम्'।**

पतिव्रतात्वं स्वस्याः पातिव्रत्यमशाठ्यं अकापट्यं यथा मन्येत् जानीयात् तथा विदधीत कुर्यात्।

**4/2/55 'अन्तःपुराणां च वृत्तमेतेष्वेव प्रकारेषु लक्षयेत्'।**

अन्तःपुराणां अन्तःपुरस्त्रीणां राजमहिषीणां चाद्राज्ञः परस्परावर्तनं एतेषु वक्ष्यमाणप्रकारेण लक्षयेत् जानीयात्। तमेवाह –

**4/2/56 'माल्यानुलेपनवासांसि चासां कंचुकी वा महत्तारिका वा राज्ञो निवेदयेयुः'**

आसामन्तःपुरस्त्रीणां सम्बन्धिकंचुकी वेत्रवती महत्तारिका वृद्धस्त्री वा शब्दात्परिचारिका धात्रेय्यादि परिग्रहः एताः माल्यादीनि प्रेषितानि नवानि।

**4/2/57 'तदादाय राजा निर्माल्यमासां प्रतिप्राभृतं दद्यात्'।**

ततः अभिनवमाल्यादिकं आदाय धृत्वा निर्माल्यं पूर्वं स्वधृतमाल्यानि प्रतिप्राभृतं प्रतिदेयं बहुमानकृतं।

**4/2/58 'अलंकृतः स्वलंकृतानि चापराह्ने सर्वाण्यन्तःपुराण्यैकध्येन* पश्येत्'।**

वावधारणे अपराह्ने सायंसमये ऐकथ्येन एकदा।

**4/2/59 'तासां यथाकालं यथार्हं च स्थानमानानुवृत्तिः सपरिहासाः कथांश्च कुर्यात्'।**

यथार्हं जैष्ठ्यजाताद्यनुसारेणानन्तरं स्थानमानानुवृत्तिः स्थानावृत्तिः समीपदेशगमनं मानानुवृत्तिर्हासमुखनिरीक्षणादिः कथाः प्राचीनविलासिनी गोष्ठीः।

---

* Another reading found in manuscripts— पुराण्यैकथ्येन।

**4/2/60 'तदनन्तरं पुनर्भुवस्तथैव पश्येत्'।**

एवं राजा तद्वत् कलत्राणामिव प्रतिप्राभृतं प्रेषयित्वा अनन्तरं सप्रेमप्रेयसीनिरीक्षणानन्तरं तथैव यथार्हं स्थानमानपरिहासविलासकथाभिः।

**4/2/61 'ततो वेश्याः'** तद्वत्तथैव पश्येदित्यनुवर्तते।

**4/2/61 'आभ्यन्तरिकास्ततो नाटकीयाश्च'।**

तासां यथोक्तकक्षाणि स्थानानि आभ्यन्तरिकाः बाह्यप्रदेशस्थाः नाटकीयाः दशरूपकनिरूपिकाः पश्येत् इत्यन्वयः

**4/2/62 'तासां'** कलत्रादिनाटकीयानां **'यथोक्तकक्षाणि'** पूर्वोक्तप्रकारेण स्वभवनापेक्षया चिह्नितानि शुभानि भवनानि कार्याणि।

**4/2/63 'वासकपाल्यास्तु यस्या वासको यस्याश्चातीतो यस्याश्च ऋतुः तत्परिचारिकानुगता दिवा शय्योत्थितस्य राज्ञस्ताभिः प्रहितमंगुलीयकमनुलेपनं ऋतुं वासकं च निवेदयेयुः।**

वासकः यस्याः सम्बन्धी अद्यैवानीतः यस्या राज्ञा अतीतः पूर्वदिनेऽप्यानीतः वासकपाल्यः तद्राज्ञीसम्बन्धिसुगन्धपुष्पानुलेपनाध्यक्षाः तत्परिचारिकानुगताः राजपरिचारिका सहिताः सत्यः दिवा अपराह्ने ताभिः राज्ञीभिः अंगुलीयकं पौष्पभूमिकादिकुंकुमानुलेपनं कुंकुमरसपंकिलश्रीचन्दनादि ऋतुवासकं तत्तदार्तवकुसुमानि।

**4/2/64 'तत्र राजा यद् गृह्णीयात्तस्या वासकमाज्ञापयेत्'।**

तत्प्रहितं राज्ञा गृहीतमिति निवेदयेत्।

**4/2/65 'उत्सवेषु सर्वासामानुरूप्येण पूजा आपानकं च'।**

उत्सवेषु वासन्तिकादिषु च तदभिमतसमये आनुरूप्येण जैष्ठ्यजात्याद्यनुसारेण पूजावस्त्रभूषणपुष्पचन्दनादि आपानकं पेयद्रव्यविशेषश्च राज्ञा सर्वासां सर्वाभ्यः प्रेयसीभ्यः देयम्।

**4/2/65 'संगीतदर्शनेषु च'।**

संगीतदर्शनेष्वन्तरचारिणीनां निष्कासः।संगीतदर्शनं नृत्तगीतादिसमये।

4/2/66 **'अन्तरचारिणीनां बहिरनिष्कासः'** अन्तः स्थितानां अनिष्कासः निःसारणं न कार्यम् **'बाह्यानमप्रवेशोऽन्यत्र विदितशौचाभ्यः'।**

विज्ञातशुचित्वादिगुणवतीभ्यः अन्यत्र अन्यासां बाह्यस्थितानामविज्ञातानाप्रवेशः। अन्तः कुतः –

4/2/66 **'अपरिक्लिष्टस्वधर्मार्थयोग इत्यान्तःपुरिकम्'।**

अपरिक्लिष्टस्वधर्मार्थं अप्रतिहतस्वधर्मसिद्धये योगः। एवं स्त्रीषु वृत्तिः कार्यः अन्तःपुरिकासु वर्तनप्रकारः। अत्रैव दाढर्याय प्रसिद्धश्लोकानाह–

4/2/67 **'पुरूषस्तु बहून् दारान् समाहृत्य समो भवेत्।**
**न चावज्ञां चरेदासु व्यलीकान्न सहेत च'॥**

अवज्ञामवमानं आसु व्यलीकान् परस्परगर्हणानि सहेत परिहरेत्।

4/2/68 **'एकस्यां या रतिक्रीडावैकृतं वा शरीरजम्।**
**विस्रम्भाद्वाप्युपालम्भस्तमन्यासु न कीर्त्तयेत्'॥**

रतिक्रीडाकेलिविलासः स्वस्य विकृतिं तस्या उपालम्भं तत्कृताधिक्षेपम्।

4/2/69 **'न दद्यात्प्रसरं स्त्रीणां सपत्न्याः कारणे क्वचित्।**
**तथोपलभमानां च दोषैस्तमेव योजयेत्'॥**

स्त्रीणां मध्ये कस्यापि सापत्न्याः सपत्नीविषये प्रसरं निग्रहस्वातन्त्र्यं तथापि उपलभमानां अन्यामधिक्षिपन्तीं दोषैः मिथ्याभूतैः।

4/2/70 **'अन्यां रहसि विस्रम्भैरन्यां प्रत्यक्षपूजनैः।**
***रहस्यैः प्रीतियोगैश्च सर्वाः समनुरंजयेत्'॥**

विस्रम्भै प्रीतिदानैः प्रत्यक्षपूजनैः बाह्यदानैः बहुमानैः प्रियवचनैः रंजयेत् प्रत्येकम्।

4/2/71 **'उद्यानगमनैर्भोगैर्दानैस्तज्ज्ञातिपूजनैः।**
**रहस्यै प्रीतियोगैश्च सर्वाः समनुरंजयेत्'॥**

---

* The published editions of Kama Sutra carry a different version of this second line of the Karika viz 'बहुमानैस्तथा चान्यमित्येवं रंजयेत् स्त्रियः' which seems appropriate. The second line appearing here in 4/2/70 is repeated in 4/2/71. This could be due to scribes mistake.

उद्यानगमनैः सम्भूय भोग्यैः उद्यानक्रीडादिभिः दानैः वस्त्रादेः तज्ज्ञातीनां तद् भ्रात्रादीनां पूजनैः सम्माननैः प्रीतियोगैः बाह्याभ्यन्तररतैः एवं पुंकृत्यमर्यादामुक्त्वा स्त्रियास्तामाह –

**'युवतिश्च जितक्रोधा तथाशास्त्रप्रवर्तिनी।**
**4/2/72 करोति वश्यं भर्त्तारं सपत्नीश्चाधितिष्ठति'॥**

जितक्रोधा सपत्नीद्वेषरहिता शास्त्रप्रवर्तिनी तदुक्तकलाकुशला अधितिष्ठति अधिकृत्य तिष्ठति तास्वाधिका भवतीत्यर्थः।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासीसाहितीपरिपाक–परिज्ञातृसंसेवितभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ चतुर्थाधिकरणे द्वितीयोऽध्यायः।**

**Note:**

In the fourth Adhikarana Vātsyāyana describes the household duties of a good and prudent wife. He also deals with code of conduct for harmonious living with co-wives. He closes the discussion in this Adhikarana by describing how a king must carry himself in treating his queens and concubines etc in the inner chambers of the palace. What he does not tell is the unpleasant side of polygamy. He has enumerated the factors behind people going for more than one wife as noted below-

**जाड्यदौःशील्यदौर्भाग्येभ्यः प्रजानुत्पत्तेराभीक्ष्येन।**
**दारिकोत्पत्तेर्नायकचापल्याद्वा सपत्न्यधिवेदनम्॥**

**4/2/1 – K.S.**

(Generally men, marry the second time on account of dull-mindedness of their wife, or her infidelity, or her giving birth to female progeny only or because of his own flirtatious nature)
Corroborating this line of thinking we find sanction from law books (Baudhayana Sutra)for abandoning a wife in the following circumstances–

(i) When the wife is barren – after 10 years of marriage,
(ii) When the wife bears daughters only – after 12 years of marriage
(iii) When her all off springs are dead – after 15 years of marriage
(iv) When the wife utters unpleasant words – forthwith.

The women in such cases of abandonment lose their conjugal rights but their maintenance rested with the husband. Thus we find that Vātsyāyana calls upon the younger wife to be kind towards her husband's earlier wife (who obviously was staying in the same abode) who was unable to bear a child for him (4/2/29 K.S.)

On the other side, women's right to abandon the husband (under following circumstances) was also recognized in the law books—

**नष्टे मृते प्रव्रजिते क्लीबे पतिते पतौ।**
**पञ्चत्स्वापत्सु नारीणां पतिरन्यो विधीयते॥**

–पराशर

(When the husband had disappeared, or when he is dead, or when he has chosen a mendicant's life over that of a householder or when he is impotent, or when he has been degraded and become an outcast.)

It will be noted that 'divorce' as such was not mentioned. All we hear is moving away from the husband and going over to another man. Thus as per Bābhravya 'Punarbhu' woman is one who leaves her husband being dissatisfied with him and goes to a person of her choice (4/2/32 K.S.), although the husband does not qualify for separation from his wife as per conditions laid down by Parashara, noted above. In a way it was separation with no strings attached.

It was only coming to Kautilya that we hear of 'moksha' 'separation' ie freedom from matrimonial bondage, vide परस्परं द्वेषान्मोक्षः (3/3/9-A.S.). This obviously meant that 'Moksha' on account of hatred against each other was recorded and registered by the administration to make it official.

# 5. पारदारिकं नाम पंचममधिकरणम्

अध्याय –1

## स्त्रीपुरूषशीलावस्थापनप्रकरणम्

समाप्तं चेदमधिकरणं सपत्नीषु ज्येष्ठावृत्तं कनिष्ठावृत्तं पुनर्भूवृत्तं दुर्भगावृत्तं आन्तपुरिकं पुरूषस्य बह्वीषु प्रतिपत्तिः उक्ताः। एवं पूर्वाधिकरणे इहपरसुखविशेषावच्छिन्नसाम्प्रयोगिकसुखहेतु ऐहिकतदवच्छिन्नतद्धेतुं सांगमुक्त्वा उभयविरोधितन्मात्रहेतुं सुखविशेषहेतुत्वसाम्येन प्रासंगिकं सांगमुपपादयति – व्याख्यातकारणेत्यादिना –

5/1/1 **'व्याख्यातकारणाः परपरिग्रहोपगमाः'।**

5/1/2 **'तेषु साध्यत्वमनत्ययं गम्यत्वमायतिं वृत्तिं चादितः परीक्षेत्'।**

प्रख्यातकारणाः बहिर्मुखेन्द्रियाः अवशीकृतेन्द्रिया इति यावत् अतएव परपरिग्रहोपमाः परदारगमनशीला अपि तेषु परपरिग्रहेषु साध्यत्वं स्वप्रयत्नसाध्यत्वमनत्ययमविच्छित्तिं गम्यत्वं सगोत्रत्वाद्यत्यंतदोषराहित्यं आयतिं यत्किंचिद्दैहिकोत्तरकालिकद्रव्यादिफलवृत्तिं तात्कालिकलाभं चात्तात्कालिकबाधाराहित्यादि आदित उपगमात् प्राक् परीक्षेत् विचारयेत्।

5/1/3 **'यत्र वा स्थानात्स्थानान्तरं कामं प्रतिपद्यमानं पश्येत् तदात्मशरीरोप– घातत्राणार्थं परपरिग्रहानभ्युपगच्छेत्'।**

यत्र येषु परपरिग्रहेषु दृष्टेषु कामं मनोभवं स्थानात् चक्षुप्रीत्याद्यवस्थानः स्थानं द्वितीयतृतीयाद्यवस्थान्तरं प्रतिपद्यमानं वर्धमानं तत्र तदा शरीरोपघातत्राणार्थं शरीरस्य उपघातत्वात् मूर्च्छाद्यवस्थानः रक्षणार्थं परपरिग्रहान् तानपि साधारणप्रायान् स्वतुल्यावस्थानमुपगच्छेत् कामयेत्।

5/1/4 **'दश तु कामावस्थाः'।** मदनवृद्धिकालिकदशाविशेषाः। तास्तु चक्षुप्रीतिः दृष्टस्येष्टस्य मनसानुसन्धानं संकल्पोत्पत्तिः तत्संगदृढाध्यवसायः निद्राच्छेदः नायक चिन्तया जागरणं तनुता तच्चिन्तया शरीरकार्श्यं विषयेभ्यो व्यावृत्तिः

स्रक्चन्दनादिष्वरूचिः लज्जाप्रणाशः वीतव्रीडं गुर्वादिसन्निधौ ग्राम्योक्तिः उन्मादः चेतनाचेतनविषयकविवेकशून्यता मूर्च्छा बाह्येन्द्रिय–निमीलनं मरणं निधनेच्छया ज्योत्स्नादिसेवा। तदुक्तं प्रतापरूद्रीये विद्यानाथेन- 'श्रृंगारस्यांकुरितत्वपल्लवितत्व-कुसुमितत्वफलितत्वहेतवश्चक्षुप्रीत्यादयः।

**आदराद्दर्शनं च चक्षुप्रीतिरित्यभिधीयते।**
**मनःसंग प्रियतमे नित्यं चित्तस्य विश्रामः**
**संकल्पो नाथविषयो मनोरथ उदाहृतः**
**जागरस्तु विनिद्रत्वं विरहादिसमुद्भवम्**
**कार्श्यं अंगस्य तानत्वमन्यत्राप्रीतिकारतिः।**
**लंघितमहिलासमयं तथा भणितं मदनदुर्विनीतया।**
**यथा श्रुत्वा गुरुजनोऽपसरति विलज्जितो दूरम्॥***

**P.R.Y.B- P.263-273 उन्मादस्तुल्यवर्तित्व चेतनाचेतनेष्वपि**
**मूर्च्छा मरणार्थं तु प्रयत्नः परिकीर्तितः इति।****

तासां लिंगानि। तासामवस्थानां लिंगानि ज्ञापकानि उच्यन्ते।

5/1/5 **'चक्षुःप्रीतिर्मनःसंगः संकल्पोत्पत्तिनिद्राच्छेदस्तनुता विषयेभ्यो व्यावृत्तिर्लज्जाप्रणाश उन्मादो मूर्च्छा मरणमिति तेषां लिंगानि॥'**

5/1/6 **'तत्राकृतितो लक्षणतश्च युवत्याः शीलसत्यशौचा साध्यासाध्यतां चंडमृदुवेगतां च लक्षयेदित्याचार्याः'।**

तत्र लिंगेषु युवत्या आकृतितः सौन्दर्यविशेषात् लक्षणतः अलंकारादिसन्निवेशविशेषात् तदाभावाच्च शीलं सद्वृत्तिं सत्यं सत्यवाक्यतां शौचं शुचिमूर्ततां तदभावं अवस्थाश्चानुमाय तैश्च साध्यासाध्यतां स्वकृतिसाध्यासाध्यत्वे चंडमृदुवेगतां श्लक्ष्णमध्योत्कटरागितां च लक्षयेत् अनुमिनुयात्।

---

* This couplet is the Sanskrit version of the Prakrt verse quoted by Vidyanatha which runs as follows—

लघिअमहिलासमहं तह मणिअं मअणदुव्विणीदाए।
जह सोउण गुरूअणो ओसरइ विलज्जिओ दूरम्।।

* BNS has quoted from Pratap Rudriya Yasho Bhusana. P. 263 & 273.

**5/1/7 'व्यभिचारादाकृतिलक्षणयोगानामिंगिताकाराभ्यां प्रवृत्तितश्च बोद्धव्या योषित इति वात्स्यायनः'।**

आकृतिलक्षणयोगानां तदभावानां च व्यभिचारात् शीलतदाभावादि साध्याभाववत्यपि सत्त्वात् इंगिताकाराभ्यां इंगितमभिप्रायसूचकवाचकः आकारो भ्रूविलासादिः प्रवृत्तिश्चेष्टा।

**5/1/8 'यं कंचिदुज्ज्वलं पुरूषं दृष्ट्वा स्त्री कामयेत तथा पुरूषोऽपि योषितमपेक्षया तु न प्रवर्तते इति गोणिकापुत्रः'।**

उज्ज्वलं सुन्दरं तथा सुन्दरीं अपेक्षया साध्यत्वाद्यनुमानेन।

**5/1/9 'तत्र स्त्रियः प्रीतिविशेषः'।**

तत्र कामुकस्त्री पुंमध्ये विशेषः अधिकविशेष उच्यते।

**5/1/10 'न स्त्री धममधर्मं वापेक्षते कामयते परम्'**

परं तु कामयते।

**5/1/10 'कार्यापेक्षया तु नाभियुंक्ते'।**

कार्यं पुत्रधनादिनाभियुंक्ते अभियोगं नाकांक्षते।

**5/1/11 'स्वभावाच्च पुरूषेणाभियुज्यमाना चिकीर्षयन्त्यपि व्यावर्त्तते'।**

स्वभावात् स्वाभाविकचापल्यात् अभियुंज्यमाना संयोक्ष्यमाणा चिकीर्षन्ती स्वयमभिकांक्षयन्त्यपि व्यावर्तते परावृत्यानिच्छन्तीव तिष्ठति। तां योजयेदेव।

**5/1/12*'पुनः पुनरभियुक्ता सिद्ध्यति'।**

**5/1/13*'पुरूषस्तु धर्मस्थितिमार्यसमयं चापेक्ष्य कामयमानोऽपि व्यावर्त्तते'।**

**5/1/14 'स्त्रिया तथाबुद्धिश्चाभियुज्यमानोऽपि न सिद्ध्यति'।**

तथा बुद्धिः स्वयं परावर्तबुद्धिः पुमान्स्तु न सिद्ध्यति कार्यसिद्धिं न प्राप्नोति।

**5/1/15 'निष्कारणमभियुंक्ते'।**

निष्कारणमपि पुरूषव्यापारं विनापि अभियुंक्ते अभियोगाय यतते।

---

* Bhaskara Narasimha Sastri skips over these two Sutras of Kama Sutra-2/1/12 & 5/1/13

**5/1/15 'अभियुज्य'** स्वयं यत्नं कृत्वा तस्मिन् यतमाने **'नाभियुंक्ते'** न यतते पुरावर्तत एवेति यावत्।

**5/1/15 'सिद्धायां च माध्यस्थ्यमपि गच्छति'।**

सिद्धायां कार्यसिद्धौ निश्चितायां माध्यस्थ्यमौदासीन्यं।

**5/1/16 'सुलभामवमन्यते दुर्लभामाकांक्षतीति प्रायोवादः'।**

सुलभां निरन्तरसिद्धभत्रादि सम्प्रयुक्तिं दुर्लभां असाध्यपरकीयां प्रायोवादः। प्राचुर्येण स्त्रीस्वभावकथनम्। यत्तु वीरभद्रः* प्रायोवादपदमाकृष्य निष्कारणमित्यादि त्रिसूत्रीं पुंपरतया व्याचख्यौ निष्कारणं तत्संमतिं विना अभियुज्यापि तदनुमत्या संयुज्यापि नाभियुंक्ते त्यजति सिद्धायां स्वत एव वश्यायां बालायां माध्यस्थ्यं उपेक्षां सुलभां अप्रयत्नवश्यां दुर्लभां असाध्यां आकांक्षते चतुर इति तत् व्यावर्त्तनकारणानीत्यादि स्त्रीधर्मपरोक्तग्रन्थविरोधात् प्रायोवादपरापकर्षापत्तेः पुंधर्मस्याग्रे वक्ष्यमाणत्वात् सम्प्रयोगाय यत्नं कृत्वा परावर्त्तनस्थितेः स्त्रीधर्मत्वेन पूंधर्मत्वयोगात् तथाबुद्धिर्न सिध्यतीति पूर्वसूत्रविरोधात् अनिच्छया प्रवृत्तौ चतुरत्वभंगापत्तेश्चेत्युपेक्ष्यं विचक्षणैः।

**5/1/17 'तत्र व्यावर्त्तनकारणानि'।**

तत्र सुन्दरेऽपि परपुरूषे व्यावर्त्तनकारणानि मनो निवर्तनहेतवः उच्यन्ते।

**5/1/18 'पत्यावनुरागः'।** अनुरागः उत्कटः।

**5/1/19 'अपत्यापेक्षा'।** आमुष्मिकोपयोगिपुत्राकांक्षा।

**5/1/20 'अतिक्रान्तवयस्त्वम्'।** वयोऽतिक्रमः।

**5/1/21 'दुःखाभिभवः'।** पुत्रमित्रादिवियोगेन मनस्तापः।

**5/1/22 'विरहामुपलम्भः'।** विविक्तदेशालाभः।

**5/1/23 'अवज्ञयोपमन्त्रयत इति क्रोधः'।** अवज्ञया अवमानपुरःसरं उपमन्त्रयते आकारयतीति।

**5/1/24 'अप्रतर्क्य इति संकल्पवर्जनम्'।**

* This Sutra refers to fickle mindedness of female mind. But Virabhadra interpreted it as reflecting mentality of males Vide. 5/1/21-23. Kandarpacudamani. BNS has rejected this interpretation.

अप्रतर्क्यः असम्भावितोऽनेन योगः संकल्पवर्जनं चित्तपरावर्त्तनं इदं सर्वत्र यथायोग्यं अनुवर्तते।

**5/1/25 'गमिष्यतीत्यनायतिः'।**

गमिष्यति मां विहाय देशान्तरं अनायतिरनास्था।

**5/1/25 'अन्यत्र सक्तमतिरिति वा'**

अन्यत्रान्यस्यां।

**5/1/26 'असंवृताकार इत्युद्वेगः'।**

असंवृताकारः असंरक्षितस्वरूपः साहसिक इति यावत्। इति हेतोरूद्वेगो भीतिः।

**5/1/27 'मित्रेषु निःसृष्टभाव इति'।** सखीजने निःसृष्टभावः निसृष्टरागः।

**5/1/27/28 'तेष्वपेक्षा शुष्काभियोगीत्याशंका'।**

तेषु स्वदारेषु अपेक्षा अत्यन्तानुरागवान् मयि तु शुष्काभियोगी निष्फल–कादाचित्कसम्प्रयोगाकांक्षीति आशंका सन्देहः

**5/1/29 'तेजस्वीति साध्वसम्'।** तेजस्वी तीक्ष्णः।

**5/1/30 'चंडवेगो समर्थो वेति भयं मृग्याः'।**

चंडवेगः अतितीक्ष्णसम्प्रयोगः समर्थः अतिबली मृग्याः न्यूनपरिमाणायाः।

**5/1/31 'नागरिकः कलासु विचक्षणः इतिव्रीडा'।**

**5/1/32 'सखित्वेनोपचरित इति च'।**

नागरिकः नगरसंचारी अतएव कलासु च पूर्वोक्तासु बाभ्रवीयोक्तासु विचक्षण इति ग्रामीणाया व्रीडा निवृत्तिकारिणी सखीत्वेन बालक्रीडासु भ्रातृत्वेन।

**5/1/33 'अदेशकालज्ञ इत्यसूया'।**

अदेशकालज्ञः हासविलासादिषु विविक्तदेशाद्यनभिज्ञः।

**5/1/34 'परिभवस्थानमित्यबहुमानः'।**

परिभवस्थानं सर्वनिन्द्यं अबहुमान उपेक्षा।

**5/1/35 'आकारितोऽपि नावबुध्यत इत्यवज्ञा'।**

आकारितः हस्तनेत्रादिसंज्ञया आहूतोऽपि न जानाति स्वाभिमतम्।

**5/1/36 'शशो मन्दवेग इति हस्तिन्याः'।**

शशः ह्रस्वपरिमाणो मन्दवेगः स्वल्परागः हस्तिन्याः पूर्वोक्तायाः।

**5/1/37 'मत्तोऽस्य मा भूदनिष्टमित्यनुकम्पा'।**

मत्तःमन्निमित्तेन अस्य कुलीनस्यानिष्टं इहपरविरोधः।

**5/1/38 'आत्मनि दोषदर्शनान्निर्वेदः'।**

दोषदर्शनात् बहुकुलीनापयशः सम्पादनादिप्रयुक्तदोषानुसन्धानात् निर्वेदः अरागः

**5/1/39 'विदिता सती स्वजनबहिष्कृता भविष्यामीति भयम्'।**

विदिता परगामितया।

**5/1/40 'पलित इत्यनादरः'।** पलितो वृद्धः।

**5/1/41 'पत्या प्रयुक्तो मां परीक्षत इति विमर्शः'।**

पत्या मत्पतिना प्रयुक्तः मन्मनः परीक्षार्थं नियुक्तः सन् परीक्षते परीक्षणनिरीक्षणादिभिः।

**5/1/42 'धर्मापेक्षा चेति'।**

धर्मापेक्षा पातिव्रत्यपालनेच्छा इति स्त्रीधर्मसमाप्तिसूचकः प्रायोवाद इत्यनुषज्यते वा। पूंकार्यमाह –

**5/1/43 'तेषु यदात्मनि लक्षयेत्तदादित एव परिच्छिन्द्यात्'।**

आदित एव संयोगात्पूर्वमेव तेषु निमित्तेषु मध्ये यत्किंचिन्निमित्तमात्मनि स्वविषये लक्षयेत् मनसा निश्चिनुयाच्चेत् सातत्य निश्चयं तस्याः परिच्छिन्द्यात् निवर्त्तयेत्। तत्प्रकारमेवाह –

**5/1/44 'अर्थित्वयुक्तानि रागवर्धनात्'।**

अर्थित्वयुक्तानि पतिपुत्राद्यनुरागादिरूपनिमित्तानि। रागवर्धनात्स्वस्मिन् अनुरागाधिक्यजननात् छिन्द्यादिति सर्वत्रानुषज्यते।

**5/1/45 'अशक्तिजान्युपायदर्शनात्'।**

अशक्तिजानि शशत्वहस्तिनीत्वादिप्रयुक्तनिमित्तानि उपायदर्शनात् स्वकौशल्यप्रकटनात्।

**5/1/46 'बहुमानकृतान्यतिपरिचयात्'।**

बहुमानकृतानि अप्रतर्क्यत्वादीनि अतिपरिचयात् अत्यन्तदर्शनसल्लापादेः।

**5/1/47 'परिभवकृतान्यति शौण्डीर्यात्'।**

परिभवकृतानि परिभवस्थानादीनि अतिशौण्डीर्यात् प्ररूढप्रौढिमप्रदर्शनात्।

**5/1/47 'वैचक्षण्याच्च'।**

अदेशकालज्ञत्वादीनि वैचक्षण्यात् विचक्षणता प्रकटनात्।

**5/1/48 'तत्परिभवजानि प्रणत्या'।**

तत्परिभवजानि तस्य नायकस्य तस्मात्स्वस्याः परिभवजानि परिभवशंकाजन्यानि मत्तोऽस्य मा भूदवज्ञा इत्यादीनि प्रणत्या प्रह्वीभावादिना।

**5/1/49 'भययुक्तान्याश्वासनादिति'।**

भययुक्तानि पत्या प्रयुक्तः इत्यादीनि आश्वासनात् प्रत्यायनात्।

**5/1/50 'स्त्रीपुरूषयोस्त्वभिप्रायेण सिद्धाः'।**

अमी वक्ष्यमाणाः सिद्धाः सिद्धिसाधनानि। तत्र पुरूषस्य सिद्धिसाधनान्याह–

**'कामसूत्रज्ञः'** एतच्छास्त्रकुशलता सर्वत्र प्रधानो निर्देशः। **'कथाख्यानकुशलः'** प्राचीननायकवृत्तान्तवर्णनचतुरः, **'बाल्यात्प्रभृति संसृष्टः'** संसृष्टः अनुरक्तः, **'प्रवृद्धयौवनः'** तरूणः, **'क्रीडाकर्मादिनागतविश्वासः'** क्रीडाकर्मादिना आबाल्यंसहक्रीडया आगतविश्वासः लब्धप्रत्ययः, **'प्रेषणस्य'** कर्त्ता, प्रेषणस्य ताम्बूलादेः **'कर्त्ता'** प्रेषयिता, **'उचित–सम्भाषणः'** समयोचितवक्ता, **'प्रियस्य कर्त्ता'** प्रियस्य अभिमतकार्यस्य, **'अन्यस्य**

**भूतपूर्वो दूतः'** अन्यस्य नायकान्तरस्य कृतदौत्यः **'तस्यापि मर्मज्ञः'** अतएव मर्मज्ञः रहस्यदोषवेत्ताः, **'उत्तमया प्रार्थितः'** उत्तमया धनकुलाभ्यां श्रेष्ठया, **'सख्या प्रच्छन्नं संसृष्टः'** सख्या नायिकाया संसृष्टः सम्प्रयुक्तः, **'सुभगाभिख्यातः'** सुभगसुन्दर इति अभिख्यातः प्रसिद्धः, **'सहसंवृद्धः'** सह स्वया साकं संवृद्ध वृद्धिं प्राप्तः, **'प्रातिवेश्यः'** समीपगृहवासी **'कामशीलः'** कामुकः, **'तथाभूतः परिचारकः'** तथाभूतः कामी सन् परिचारकः स्वोपचारकर्त्ता, **'धात्रेयिकापरिग्रहः'** धात्रेयिकया वृत्तः, **'नववरकः'** नववयस्कः स्वार्थे कप्, **'प्रेक्षोद्यानत्यागशीलः'** प्रेक्षा नायिकामुखावलोकनादौ उद्यानं उद्यानविहारः त्यागो धनादेः एषु शीलः निरतः, **'वृष इति सिद्धप्रतापः'** वृषः श्रेष्ठ इति सिद्धप्रतापः प्रसिद्धगुणः, **'साहसिकः'** निर्भीकः, **'विद्यारूपगुणोपभोगैः पत्युरतिशयिता'** विद्याश्चतुःषष्टिकलाः रूपं सौन्दर्यं लावण्ये गुणः अनुरागधैर्यौदार्यादिः उपभोगः सुरतचातुर्यं, एतैः पत्युरतिशयिता, **'महार्हवेषोपचारैश्चेति'** महार्हौ स्वपतेरधिकवेषाचारौ अलंकारानुवर्त्तने यस्य चाद्धनादि परिग्रहो इति पुरूषगुणाः।

**5/1/51** *__'यथात्मनः सिद्धतां पश्येदेवं योषितोऽपि'।__

**5/1/52** **स्त्रीगुणानाह – 'अयत्नसाध्ययोषितस्त्विमाः'** इमाः वक्ष्यमाणाः अयत्न–साध्याः अनतियत्नसाध्याः, **'अभियोगमात्रसाध्याः'** योषितः सविलास–निरीक्षणमात्रसाध्या उच्यन्ते **'द्वारदेशावस्थायिनी'** द्वारदेशो बाह्यगृह–देहलीप्रदेशः, **'प्रासादाद्राजमार्गाविलोकिनी'** प्रासादात् हर्म्यस्थलं प्राप्य, ल्यब् लोपे पंचमी, राजमार्गो बहुजनसंचारप्रदेशः, **'तरूणप्रातिवेश्यगृहे गोष्ठीयोजिनी'** प्रतिवेशः स्वसमं गृहं तत्र भवः प्रतिवेश्यः तरूणश्चासौ प्रातिवेश्यश्च तेन सह गृहे तदीय गोष्ठीयोगिनी रहसि सहाससल्लापवती **'सततप्रेक्षिणी'** परपुरूषाभिप्रायनिरीक्षणशीला, **'प्रेक्षिता पार्श्वावलोकिनी'** पुरूषेण प्रेक्षिता सती चंचलदृगंचलावलोकिनी, **'अकारणं सपत्न्याधिविन्ना'** अकारणं निर्हेतुकं सपत्न्या प्रबलया अधिविन्ना तिरस्कृता, **'भर्तृद्वेषिणी'** तदकौशल्येनान्यासक्त्या वा **'विद्विष्टा परिहारहीना च'** विद्विष्टा सौन्दर्याद्यभावात् भर्त्रा तिरस्कृता परिहारहीना कलहे सति भर्त्राप्रियवचनैरपरित्याजितक्रोधा 'निरपत्या' सन्तानरहिता।

**5/1/53** **'ज्ञातिकुलनित्या। विपन्नपत्या।'** जातिर्ब्राह्मणत्वादिः कुलं पित्रादिः नीतिः सदाचार एतैः विपन्ना रहिता पत्या च तथा, **'गोष्ठीयोगिनी'** बहुचटुलभाषिणी,

* Bhaskara Narasimha Sastri skips over the sutra no.51 –

'**प्रीतियोगिनी**' प्रीतिसूचककटाक्षवती '**मृतपतिकाबाला**' षोडशाब्दा, '**दरिद्रा**' अन्नादिरहिता अतएव '**बहूपभोगा**' बाह्याभ्यन्तरभोगरहिता '**ज्येष्ठस्य भार्या बहुदेवरका**' ज्येष्ठस्य कालतः बहुदेवरका अनेकस्वामीभ्रातृका सती तैरेव मानिता, '**बहुमानिनी न्यूनभर्तृका कौशलाभिमानिनी**' बहुमानिनी अन्यासक्या पत्यावत्यन्तेर्ष्याकोपवती न्यूनभर्तृका बालपतिका कौशलाभिमानिनी कामकलाचातुर्याभिमानवती, '**भर्तुर्मौर्ख्येणोद्विग्ना**' भर्तृमौर्ख्येण पत्युः तदकौशल्येन उद्विग्ना दुःखिता, '**अविशेषज्ञतया लोभेन**' च।

5/1/54 '**कन्याकाले यत्नेन वारिता कथंचिदलब्धाभियुक्ता तदानीं। समानबुद्धिशीलमेधाप्रतिपत्तिसात्म्या। प्रकृत्या पक्षपातिनी**' कन्याकाले बाल्ये स्वस्याः अविशेषज्ञतया केलिविशेषज्ञानरहिततया लोभेन पित्रादेर्ध–नादित्सतया यत्नेन धनव्ययेण कथंचित्कलादिरहितेन वरिता वृता अतएव लब्धाभियुक्ता अप्राप्तस्वाभिमतसम्प्रयोगा तदानीं तारूण्यदशायां समानानि स्वसमानानिशीलं वृत्तिः बुद्धिः प्रज्ञामेधा प्रतिभा प्रतिपत्तिर्ज्ञानं सात्म्यं स्वभावः। एतानि यस्मिन् प्रकृत्या स्वभावेन पक्षपातिनी परिग्रहाभिलाषिणी।

5/1/54 '**अनपराधे**' अपराधं विनापि '**विमानिता**' पत्याधिक्षिप्ता '**तुल्यरूपा–भिश्चाधः कृता**' पत्युपेक्षिता सती तुल्यरूपाभिर्याभिरधः कृता तिरस्कृता, '**प्रोषितपतिका**' दीर्घप्रवासपतिका, '**ईर्ष्यालुपूतिव्यक्षक्लीबदीर्घ-सूत्रकापुरूषकुब्जवामनमणिकारविरूपग्राम्यदुर्गन्धिरोगिवृद्धभार्याश्चेति**'। ईर्ष्यालु सर्वत्रेर्ष्यास्वभावः पूति दुर्गन्धः व्यक्षः नेत्रविकलः क्लीबः नपुंसकः दीर्घ–सूत्रः अक्षिप्रकारी कापुरूषः कुत्सितः कुब्जः विकृतमध्यदेशो वामन–विशेषः ह्रस्वांगः मणिकारः कर्मकारविशेषः विरूपः निन्द्यरूपः ग्राम्यः हेयगुणः दुर्गन्धरोगीश्चेति वृद्धो गतवयस्कः एषां भार्याश्च साध्याः।

5/1/55 '**इच्छा स्वभावतो जाता क्रियया परिबृंहिता।**
**बुद्धया संशोधितोद्वेगा स्थिरा स्यादनपायिनी**'॥

स्वभावतः स्वत एव जाता उत्पन्ना क्रियया नायकोपायैः परिबृंहिता वर्धिता बुद्धया नायकप्रज्ञया संस्थितः निवर्तितः उद्वेगो निवृत्तिकारणं यस्या एतादृशी इच्छा योषितः अनपायिनी अविच्छिन्ना स्थिरा च नायके भवति।

इममेव भंग्यन्तरेणाह –

**5/1/56 'सिद्धतामात्मनो ज्ञात्वा लिंगान्युन्नीय योषिताम्।
व्यावृत्तिकारणोच्छेदी नरो योषित्सु सिध्यति'॥**

आत्मनः स्वस्य सिद्धतां सूत्रज्ञत्वादि पूर्वोक्तसिद्धिमतां ज्ञात्वा निश्चित्य लिंगानि लिंगगम्यं भावं लिंगैः पूर्वोक्तैः उन्नीय अनुमाय व्यावृत्तिकारणोच्छेदी व्यावृत्तिकारणानि पत्यानुरागादि पूर्वोक्तनिवृत्तिकारणानि उच्छिनत्ति रागवर्धनादिना निवर्त्तयतीति तथा योषित्सु सिध्यति योषिद्विषयकसिद्धिमान् भवति।

**इति श्रीकविपदवाक्यमानतत्वज्ञकाशीपुरनित्यनिवासिनवरसरसिकजनमानस–सरसिजभास्करभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ पंचमेऽधिकरणे प्रथमोऽध्यायः।**

अध्याय–2

# परिचयकारणप्रकरणम्

एवमनतिप्रयत्नसाध्यस्त्रीविषयवश्योपायानुक्त्वा प्रसंगसंगत्या प्रयत्नसाध्यतदुपाया उच्यन्त इति सूचयितुं वक्तमनुवदति स्त्रीपुरूषशीलावस्थापनं, व्यावर्त्तनकारणानि स्त्रीषु सिद्धाः पुरूषाः, अप्रयत्नसाध्ययोषित इति आदित त्रयोविंशः।

**5/2/1 'कन्या स्वयमभियोगसाध्या न तथा दूत्या'।**

कन्या अविवाहिता स्वयं स्वस्य अभियोगसाध्या साक्षादुपायप्रयोगवश्या यथा भवति तथा दूत्या दूतीसध्या न।

**5/2/1 'परस्त्रियस्तु सूक्ष्मभावा दूतीसाध्या न तथा आत्मनेत्याचार्याः'।**

परस्त्रियः परकान्ताः यतः सूक्ष्मभावाः अत्यन्तरहस्यविज्ञेयाभिप्राया।अतो दूतीद्वारा साध्याः यथा तथा तेन प्रकारेण आत्मना स्वयमुपायप्रयोगेण न साध्या भवन्ति।

**5/2/2 'सर्वत्र शक्तिविषये स्वयं साधनमुपपन्नतरं दुरूपपादत्वात्तस्य दूतीप्रयोग इति वात्स्यायनः'।**

सर्वत्र कन्यापरस्त्रीशक्तिविषये स्वयं साधारण्येन शक्तिविषये सामर्थ्ये सति स्वयं स्वत एव साधनं उपाययोजनं उपपन्नतरं अपाक्षिकफलतया प्रशस्ततमं तस्य स्वयं प्रयोगस्य दुरूपपादत्वात् अशक्यत्वात् हेतोः दूतीप्रयोगः तत्प्रेषणं। वस्तुतस्तु नायिका त्रिविधा तीव्ररागा गूढरागा मध्यरागा च। आद्ययोः स्वयं प्रयोगः अन्यायां तु दूतीद्वारा। स्वयं प्रयोज्यापि द्विविधा – अव्याजेन दर्शनयोग्या व्याजेनेति। तदेतत्सर्वमाह – प्रथमसाहसेत्यादिना।

**5/2/3 'प्रथमसाहसा अनियन्त्रणसम्भाषाश्च स्वयं प्रतार्याः'।**

प्रथम साहसाः प्रथमतः अत्यन्तापरिचितसमय एव साहसाः वश्याः उत्कटरागा इति यावत्। अनियन्त्रणसम्भाषाः अव्यवस्थितवचनाः मन्दरागा इति यावत्। ताः प्रति स्वयं स्वत एव प्रयाति गमनकार्या प्रयोजनाभावात् वर्धनापेक्षणाश्चेति भावः।

5/2/3 **'तद्विपरीताश्च दूत्येनेति प्रायोवादः'।**

तद्विपरीताः मध्यमरागा इति यावत् दूतीसाध्या इति शेषः।

5/2/4 **'स्वयमभियुज्यमानस्त्वादावेव परिचयं कुर्यात्'।**

स्वयमभियुज्यमानाः स्वत एव सम्प्रयोगाय यतमान आदावेव पूर्वकंचित्कालं परिचयसख्यं।

5/2/5 **'तस्याः स्वाभाविकं दर्शनं प्रायत्निकं च'।**

तस्याः स्वपरिचयनीयायाः दर्शनं सन्ततं सादरावलोकनं अप्रायत्निकं स्वाभाविकमव्याजमिति यावत्। प्रायत्निकं यत् किंचित् व्याजसाध्यं।

5/2/6 **'स्वाभाविकमात्मनो भवनसन्निकर्षे'**

तत्र स्वाभाविकं आद्यमात्मनः स्वस्य भवनं तस्याः।

5/2/6 **'प्रायत्निकं मित्रज्ञातिमहामात्रवैद्यभवनसन्निकर्षे विवाहयज्ञोत्सवव्य–सनोद्यानगमनेषु'**

मित्रं स्वसखा ज्ञातिः समानज्ञातिः महामात्रो राजपुरूषः वैद्यश्चिकित्सकः। तद्गृहगमन........एतेषामन्यतमभवनसन्निकर्षे तद् गृहं चेत् प्रायत्निकं तद्गृहगमनव्याजिकं तद्दर्शनं उत्सवो देवतादेः आचारः कुलव्रतं एषु परस्परयोगे सति च प्रायत्निकमित्यन्वयः।

5/2/7 **'दर्शने चास्याः साकारं सततं प्रेक्षणं'** दर्शने तन्निरीक्षणक्षणे तस्यामस्यां विलासिनीविषये साकारं सभ्रूभंगसहासमसृणादिगुणवत् सततं पौनःपुन्येन कार्यं **'केशसंयमनं'** स्वकेशसज्जीकरणं **'नखच्छूरणं'** नखानां सशब्दसंघर्षणं **'अधरोष्ठविमर्दनं'** साकूतं दन्तैः संदशनं **'आभरणप्रह्लादनं'** स्वाभरणं दृष्ट्वा संश्लाघनं **'तास्ताश्च वयस्यैः सार्धं लीला'** वयस्यैः सह स्वसमान–वयस्कैः सखीभिः सार्धं तास्ताः प्रसिद्धाः लीलाः कन्दुकादिक्रीडास्तत्समक्षं कुर्यात् **'प्रेक्षमाणायाः'** संमुखे विद्यमानायाः सत्याः **'तत्सम्बद्धव्यापारा–पदेशिन्यश्च'** तदीय हावभावादिचेष्टाबोधकाः वयस्यैः कार्याः **'कथास्त्या–गोपभोगप्रकाशनं'** त्यागः स्वस्य वितरणं भोगः प्रशस्तसमस्तवस्त्वनुभवः तयोः प्रकाशनं कथनं **'सख्युरूत्संगे निषण्णस्य सांगभंगं जृम्भणं'** उत्संगे समीपे सांगभगं सगात्रविनामं **'जृम्भणं मुखव्यादनं एकभ्रूक्षेपः'** विक्षेपः

विलासकम्पनं '**मन्दवाक्यता**' मन्दसुन्दरभाषणं '**तद्वाक्यश्रवणं**' तादृश तद्वचनश्रवणकुतूहलम् '**तामुद्दिश्य बालेनान्यव्याजेन सहान्योपदिष्टा द्व्यर्था कथा**' तामुद्दिश्य तस्यां श्रृण्वन्त्यां बालेन स्वतात्पर्यानभिज्ञेनान्यजनेन सख्या वा अन्यापदिष्टाः लोकवार्ततया प्रतीयमानाः द्व्यर्थाः प्रकृता प्रकृतोभयपराः '**तस्यां स्वयं मनोरथावेदनं**' नायिकामात्रग्राह्याभिप्रायसूचकं वाक्यं वदेत् '**अन्यापदेशेन तामेवोद्दिश्य**' भूमिविलेखनं अन्यापदेशेन निमित्तान्तरव्याजेन भूमिविलेखनं भूमौ स्वाभिमतविलेखनं '**बालचुम्बनमालिंगनं च**' बालस्य कस्यचित् '**जिह्वया चास्य ताम्बूलदानं**' अस्य बालस्य '**प्रदेशिन्या हनुघट्टनं च**' प्रदेशिन्या तर्जन्या बालस्य हनुघट्टनं कपोलप्रान्तघट्टनं तोदनं तच्च तच्च '**यथावकाशं प्रयोक्तव्यं**' यथावकाशं यथासमयं तच्च तच्च उरः पार्श्वतोदनादि बालकस्य कार्यः

**5/2/8 'तस्याश्चांकगतस्य बालस्य लालनं क्रीडनकानां चास्य दानं'।**

अस्य बालस्य क्रीडनकानां क्रीडासाधनानां '**ग्रहणं वा तेनसंनिकृष्टत्वात्**' तेन बालेन सन्निकृष्टत्वात् सहितत्वात् ग्रहणं तत्स्वीकारव्याजेनांगनांगस्पर्शमपि '**कथायोजनं**' बालकस्य विलासगोष्ठीकरणं '**तत्सम्भाषणंक्षमेण जनेन सह प्रीतिमासज्य कार्ययोगः**' तत्सम्भाषणक्षमेण तया रहसि सम्भाषणचतुरेण जनेन तद्गृहवासिनां प्रीतिं सख्यं आसज्य सम्पाद्य कार्ययोगः स्वकार्यसाधनम् '**तदनुबन्धं च गमनागमनप्रयोजनं**' नायिकागृहं प्रति पुनः पुनरागमनप्रयोजनं प्रष्टुः कथयेत् '**संश्रवे चास्याः तामपश्यतो नाम कामसूत्रसंकथा**' संश्रवे श्रवणयोग्यप्रदेशे अपश्यतो नाम अपश्यतेव कामसूत्रसंकथा।

एतच्छास्त्रविचारो वयस्यैः।

**5/2/9 'प्रसृते च परिचये तस्या हस्ते न्यासं निक्षेपं च विदध्यात्'।**

परिचये सख्ये प्रसृते अंकुरिते सति न्यासं तत्कालानुपभोग्यवस्तु निक्षेपम् तद्विपरीतं

**5/2/9 'प्रतिक्षणं प्रतिदिनं चैकतो गृह्णीयात्'।**

'प्रतिदिनं' दिने दिने 'प्रतिक्षणं' तदुत्सवकाले एकैकशः '**निक्षेपादेकदेशं गृह्णीयात्**' गृहीत्वा तया सह भक्षयेत्।

**5/2/9 'यत्सौगन्धिकं पूगफलानि च'।**

**5/2/10 'तामात्मनो दारैः सह विस्रम्भगोष्ठ्यां विविक्तासने च योजयेत्'।**

विस्रम्भगोष्ठ्यां विश्वाससूचकसल्लापकाले विविक्तासने विजने दारैस्सह स्वकलत्रसमं तेषामिवेति यावत्। यत्तत् सुप्रसिद्धं सौगन्धिकं चन्दनादिपूगफलानि ताम्बूलं तां तां प्रयोजयेत् दद्यात्।

**5/2/11 'नित्यदर्शनार्थे'।**

**5/2/12 'सुवर्णकारमणिकारवैकटिकनीलीकुसुम्भरंजकादिषु च कामार्थिन्यां आत्मनश्च वश्यैरेषां सम्पादने च योजयेत्'।**

नित्यदर्शनार्थे नित्यं तद्दर्शननिमित्तं सुवर्णकारः विचित्रभूषणकर्त्ता मणिकारः कृत्रिमपुत्रिकानिर्माता वैकटिकः विचित्रकटादिकल्पकः नीलीकुसुम्भौ वस्त्ररंजकौ एषां गृहेषु तस्यां कामार्थिन्यां तत्कार्यार्थिन्यां सत्यां वश्यैः दासादिभिः एषां तत्कार्याणां सम्पादनेन समीपप्रापणे योजयेत् यतेत स्वयं प्रयतेत तस्यै दद्यात्।

**5/2/13 'तदनुष्ठानरतस्य च लोके विदितो दीर्घकालं दर्शनयोगः'।**

तदनुष्ठानरतस्य उक्तोपायप्रयोगकुशलस्य अविदितः अज्ञातदर्शनयोगः तद्दर्शनलाभो भवति।

**5/2/14 'तस्मिंश्चान्येषामपि कर्मणामनुसन्धानम्'।**

तस्मिन् तदनन्तरविषये कर्मणामभिमतकार्याणां अनुसन्धानं करणं भवति।

**5/2/15 'येन कर्मणा द्रव्येण कौशलेन चार्थिनी स्यात्तस्य प्रयोगमुत्पत्तिमागममुपायं विज्ञानं चात्मायत्ते दर्शयेत्'।**

कर्मणा वस्त्रादिक्रयविक्रयकार्येण द्रव्येण क्रीडासाधनद्रव्यविषये कौशल्येन क्रीडाचातुर्यविषये अर्थिनी अपेक्षिणी तस्यापेक्षितस्य प्रयोगं करणं उत्पत्यनुत्पत्तिसम्पादनं आगमं रक्षणं उपायविज्ञानं कौशल्यज्ञानं आत्मायत्ते मदधीनं इति दर्शयेत्।

**5/2/16 'पूर्वप्रवृत्तेषु लोकचरितेषु द्रव्यगुणपरीक्षासु तया तत्परिजनेन च सह विवादः'।**

पूर्वप्रवृत्तेषु स्वसख्यात् पूर्वं सम्पादितेषु लोकचरितेषु लोकप्रसिद्धक्रयविक्रयादिषु विषये

द्रव्यगुणपरीक्षासु च द्रव्यं च वस्त्रादिगुणः तदीय नीलपीतवर्णः तेषां परीक्षासु समीचीनत्वादि विचारेषु विवादः। तत्कृतापेक्षया क्रयविक्रयादिषु न्यूनाधिकत्वकथनेन कलहः।

**5/2/17 'तत्र निर्दिष्टानि विपणितानि तेषु एनां प्राश्निकत्वेन योजयेत्'।**

तद्गृहे निर्दिष्टानि सिद्धानि विपणितानि क्रीतानि विक्रेयाणि च यानि वस्तूनि तेषु विषये एनां स्वाभिमतां प्राश्निकत्वेन मूल्यादिविषये स्वप्रतिप्रश्नकर्त्रीं योजयेत् कुर्यात्।

**5/2/18 'तया तु विवदमानोऽत्यन्ताद्भुतमिति ब्रूयात्'।**

विवदमानः मूल्यविषये तत्संमत्या अन्यत् अन्यं प्रति तद्धक्तं तन्मूल्यं पृष्ट्वा तथा कुर्यात्। **'इति परिचयकारणानि'** इत्येवं प्रकाराणि।

**5/2/19 'कृतपरिचयां दर्शितेंगिताकारां कन्यामिवोपायतोऽभियुंजीत'।**

कृतपरिचायां उक्तोपायैर्लब्धविश्वासां अतएव दर्शितेंगिताकारां सहासमृदु–वचनावलोकनादिना ज्ञापितस्याभिप्रायां परकान्तां प्रौढामपि कन्यामिव मुग्धामिव उपायतः शनैः स्पर्शनमृदुचुम्बनादिभिरभियुंजीत प्रथमं योजयेत्

**5/2/19 'प्रायेण तु तत्र सूक्ष्माभियोगाः। कन्यानामसम्प्रयुक्तत्वात्'।**

तत्र कन्यासु सूक्ष्माः कोमलाः अभियोगाः आलिंगनादयो भवन्ति हि। अनभ्यस्तसंयोगवत्वात्।

**5/2/19-20 'इतरासु तानेव स्फुटमुपदध्यात्'।**

इतरासु प्रौढासु आलिंगनादीन् स्फुटमेव गाढमेवोपदध्यात् प्रयुंजीत। **'प्रवृत्तत्वात् संदर्शिताकारायां निर्भिन्नभावायां'** तद्द्रव्याणि गोष्ठीगमनोपभोगव्यतिकरेष्वानीयोपयुंजीत। प्रवृत्तत्वात् किंचित्किंचित्स्पर्शनं चुम्बनालिंगनादिषु स्वस्य प्रवृत्तत्वात् निर्भिन्नभावायां किंचिद्दुद्रिक्तरागायां अतएव दर्शिताकाराभ्यां सस्मितभाषणसादरावलोकनादिषु विलासवत्यां सत्यां तद्द्रव्याणि रागोद्रेजकवक्ष्यमाणवस्तूनि गोष्ठीपरस्परसल्लापः गमनं विहारवनं प्रति **'व्यतिकरः'** सम्भोगार्थमेकत्रस्थितिः **'आनीय'** स्वयमानीय तद्धस्ते दत्वा **'उपयुंजीत'** तया गृह्णीयात्।

**5/2/21 'उत्तरीयकांगुलीयककुसुमपरिवर्त्तनं'।**

उत्तरीयकं उपरिवस्त्रं अंगुलीयकं अंगुल्याभरणं परिवर्त्तनं एषां अन्योन्यसम्बन्धिनां बुद्धिपूर्वकविनिमयः।

**5/2/21 'तत्र महार्हं गन्धमात्मीयं स्यात्'।** तत्र तदा महार्हं विचित्रवस्त्रालंकारादि गन्धं सुगन्धिपुष्पचन्दनादि आत्मीयं स्वशरीरालंकारभूतं स्यात् कुर्यात्।

**5/2/21 'तद्धस्ताच्च ताम्बूलग्रहणं'।**

तद्धस्तात् विलासिनीकरात्।

**5/2/21 'गोष्ठीगमनोद्यतस्य तत्केशहस्तकुसुमयाचनम्'।**

गोष्ठीगमनोद्यतस्य गोष्ठ्यां सल्लापादौ गमनमन्यत्र तयोरूद्यतस्य स्वस्य तत्केशपाशस्य कुसुमानां तद्धस्तेन याचनं।

**5/2/22 'स्वयं तु ददन्महार्हगन्धं स्पृहणीयं नखदशनपदचिह्नितं साकारं दद्यात्'।**

महार्हगन्धं महार्हं वस्त्रादिगन्धं सुपुष्पादि स्वयं ददत् दशनपदं दन्तक्षतं स्पृहणीयं परस्पराभिलषितं च तत्। तच्च तेन चिह्नितं यथा तथा साकारं स्वाभिप्रायसूचकसहावलोकनं तथा दद्यात् इदं ग्रहणस्याप्युपलक्षणम्।

**5/2/23 'अधिकैरधिकैश्चाभियोगैः साध्वसविच्छेदनम्'।**

अधिकैः दिनक्रमेण अभियोगैः आलिंगननखक्षतादिभिः साध्वसविच्छेदनम् लज्जाभयनिवर्त्तनं कुर्यात्।

**5/2/24 'क्रमेण विविक्तदेशगमनं'।**

विविक्तदेशो रहस्यस्थलम्।

**5/2/24 'आलिंगनचुम्बनम्'।**

तत्र गाढालिंगनचुम्बनं पूर्वोक्तदेशेषु।

**5/2/24 'ताम्बूलस्य ग्रहणादाने'।**

ग्रहणं तद्धस्तात् दानं स्वमुखात्।

**5/2/24 'पुष्पाणां च परिवर्त्तनम्'।**

पुष्पाणां परस्परधृतानां।

**5/2/24 'गुह्यदेशाभिमर्शनं चेत्यभियोगाः'।**

गुह्यदेशाभिमर्शनं शनैः तत्प्रान्तस्पर्शनं। इदं नीवीमोक्षादेरूपलक्षणम्। चात्ततोऽभिमतकरणम्।

**5/2/25 'यत्र चैकाभियुक्ता न तत्र परामभियुंजीत'।**

यत्र देशकाले च अभियुक्ता उपायैर्वशं नीता, अविश्वासापत्ते।

**5/2/26 'यत्र या वृद्धानुभूतविषया प्रियोपग्रहैस्तामुपगृह्णीयात्'।**

प्रियोपग्रहैः अभिमतकार्यैः वृद्धानुभूतविषया रागवृद्धिवत्तया स्वेनानुभूता तैः उपगृह्णीयात् उद्दीपयेत्।

**5/2/27 'अन्यत्रदृष्टसंचारस्तद्भर्त्ता यत्र नायकः।**
**न तत्र योषितं कांचित्सुप्रापामपि लंघयेत्'॥**

तद्भर्त्ता यत्र यदा अन्यत्र दूरदेशं प्रति दृष्टसंचारः ज्ञातगमनश्चेद् भवति तदा नायकः विलासां सुप्रापां अनतिप्रयासलभ्यां कांचिदपि योषितं नाभिलंघयेत् न त्यजेत्।

**'शंकितां रक्षितां भीतां सश्वश्रूकां च योषितं।**
**न तर्कयेत् मेधावी रक्षन्प्रत्ययमात्मनः'॥**

शंकितां लोकात् रक्षितां भर्त्रा पत्यादिभिः भीतां पातिव्रत्यात् सश्वश्रूकां नित्यं तत्सनिहितां प्रत्ययं मानं न तर्केत निष्फलापकीर्तिभीत्या न यतेत।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासिभेदमतमहान्धकार–निदाधभास्करभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ पंचमेऽधिकरणे द्वितीयोऽध्यायः।**

**अध्याय–3**

# भावपरीक्षाप्रकरणम्

भास्करनरसिंहशास्त्रि शास्त्रे मदनस्य पंचमाधिकृतौ भावपरीक्षाध्यायं व्याख्यात–साहितीसरणिः।

एवं परिचयपूर्वकोक्ताभियोगानन्तरं तस्याः प्रवृत्त्या भावपरीक्षाप्रकारं कथयिष्यन्नुक्ता–नुवादेनोपजीवकत्वसंगतिं सूचयति परिचयकारणानि अभियोगः आदितश्चतुर्विंशः।

**5/3/1 'अभियुंजानो योषितां प्रवृतिं परीक्षेत् तया भावः परीक्षितो भवति'।**

अभियुंजानः पूर्वोक्तोत्तरीयपरिवर्त्तनादि स्पर्शनान्तरं अभियोगकर्त्ता प्रवृत्तिं चेष्टां परीक्षेत सम्यक् पश्येत्। किमर्थं तया चेष्टया भावः तदीय रागाभिवृद्धिः परीक्षितः सम्यगनुमितो भवति – तत्प्रकारमाह।

**5/3/1 'अभियोगं च प्रतिगृह्णीयात्'।**

**5/3/2 'तत्र मन्त्रमवृण्वानां दूत्यैनां साधयेत्'।**

अभियोगं आलिंगनचुम्बनादिकं प्रतिगृह्णीयात् अंगीकरोति। तत्र तदा मन्त्रं गुह्यमवृण्वानामप्रदर्शयन्तीं दूत्या मर्मज्ञया।

**5/3/3 'अप्रतिगृह्याभियोगं पुनरपि संसृज्यमानां द्विधाभूतमानसां विद्यात्। तां क्रमेण साधयेत्'।**

सविशेषं आलिंगनान्तं अभियोगं कृत्स्नं प्रतिगृह्य वस्त्रपरिवर्त्तनताम्बूलादि यत्किंचिदेव स्वीकरोति तां तादृशीं संसृज्यमानां संयोज्यमानां द्विधाभूतमानसां सन्दिह्यमानमानसां क्रमेणांगीकृताभियोगावर्त्तनेन।

5/3/4 **'अप्रतिगृह्याभियोगं सविशेषमलंकृता चेत् पुनः दृश्येत्'** सन्धिह्यमानमनसां क्रमेणांगीकृताभिर्वत्तनेन अपि न दृश्येत् **'अभिगच्छेच्च विविक्ते च बलात् ग्रहणीयां विद्यात्'।**

अलंकृता चन्दनपुष्पादिना दृश्येत सहासकटाक्षं कदाचित् परिदृश्यते च नाभिगच्छेच्च अवश्येव च तिष्ठति तां विविक्ते रहसि ग्रहणीयां नीवीश्लथनादिना ग्रहणाभिलाषिणीं।

5/3/5 **'बहूनपि विषहतेऽभियोगान्न च चिरेणापि प्रयच्छत्यात्मानं शुष्कप्रति– ग्राहिणी सा परिचयविघटनसाध्या'।**

5/3/6 **'मनुष्यजातेश्चित्तानित्यत्वात्'।**

अभियोगान् आलिंगनादीन् बहून् गाढान्विचित्रांश्च विषहतेऽंगीकरोति चिरेणापि रागवृध्यर्थं बहुकालं तदावर्तने आत्मानं गुह्यदेशं न प्रयच्छति न प्रदर्शयति। सा शुष्कप्रतिग्राहिणी मुख्यत्वाभिमतभिन्नोपचारवती परिचयविघटनसाध्या कोपादिव कंचित्कालं प्रतिदिनदर्शनादि त्यागवश्या मनुष्यजातेः अंकुरितरागस्त्रीमात्रस्य चित्तानित्यत्वात् चपलचित्तत्वात्।

5/3/7 **'अभियुक्तापि परिहरति न च संसृज्यते। न च प्रत्याचष्टे। तस्मिन्ना– त्मनि वा गौरवाभिमानात्। सातिपरिचयात्कृच्छ्रसाध्या। मर्मज्ञया दूत्या तां साधयेत्'।**

अभियुक्ता अभियोगं चुम्बनादिकं प्रापिता न परिहरति तन्न निषेधति तस्मिन् स्वस्मिन् गौरवात् आत्मनि स्वस्यां अभिमानात् उत्कृष्टत्वात् न च संसृज्यते गुह्यं प्रदर्श्य संयोगाय न यतते। स्वयं चुम्बनादिकं न कुरूते न च प्रत्याचष्टे पृष्टापि भावं न कथयति कोपशंकया सा अपि परिचयकृच्छ्रसाध्यां बहुकालमत्यन्तपरिचितिसाधनावर्तनवश्येत्युच्यते तां मर्मज्ञया तद्दोषज्ञया।

5/3/8 **'सादरमभियुज्यमाना पारूष्येण प्रत्यादिशत्युपेक्षया'।**

5/3/9 **'परुषयित्वापि तु प्रीतियोजिनीं साधयेत्'।**

परिचितिं सम्पाद्य सादरं सबहुमानं अभियुज्यमाना स्पर्शनालिंगनाद्यर्थं संयुज्यमाना पारुष्येण परुषोक्तिपूर्वकं प्रत्यादिशेत् निराकुर्याच्चेत् सा उपेक्ष्या अदृश्यमध्याप्यदृश्या अपितु किं तु परुषयित्वा परुषोक्त्या प्रत्यादिश्यापि प्रीतियोजिनी पुनः स्वयमेव प्रार्थयमाना।

5/3/10 **'संश्लेषं नावबुध्यते नाम।'** बुध्वापि निद्रावशादबुद्धेव न यतते।

5/3/10 **'सा द्विधाभूतमानसा'** समुत्कटरागतया प्रवृत्तिनिवृत्योः सन्दिह्यमानचित्ता ज्ञेया। **'सातत्येन'** सततप्रयोगेण **'क्षान्त्या'** विलम्बेन च **'साध्या'** भवति। इममेव विशदयति –

**5/3/11 'समीपे शयनायाः सुप्तो नाम करमुपरि विन्यसेत्। सापि सुप्तेवोपेक्षते। जाग्रती त्वपनुदेद् भूयोऽभियोगाकांक्षिणी'।**

सुप्तो नाम सुप्त इव उपरि करादेः अपेक्षते कंचित्कालं, ततः जाग्रति प्रबुद्धेव परिहरेत् चेत्।

**5/3/12 'एतेन पादस्योपरि पादन्यासो व्याख्यातः'।**

एतेन करे करप्रसारणकथनेन।

**5/3/13 'तस्मिन्प्रसृते भूयः सुप्तसंश्लेषणमुपक्रमेत्'।**

**5/3/14 'तदसहमानामुत्थितां द्वितीयेऽहनि प्रकृतिवर्त्तिनीमभियोगार्थिनीं विद्यात्'।**

तस्मिन् करचरणसंश्लेषसहने उपाया वृत्या प्रसृते सिद्धे सति भूयः अनन्तरं सुप्त इव संश्लेषणमंगानुषंगं कुर्यात् तदसहमानां संश्लेषणनिवारिणीं प्रकृतिवर्त्तिनीं पुनरेव सहसावलोकनवतीं अभियोगार्थिनीं परिचयाकांक्षिणीं।

**5/3/14-15 'अदृश्यमाना तु दूतीसाध्या। चिरमदृष्टा पुनरपि प्रकृतिस्थैव संसृज्येत'।**

चिरमदृष्टा पूर्वमुपायैः परिचिता सती कारणान्तरेण कंचित्कालमदृश्यमानापि सती प्रकृतिस्थैव कदाचिद्दर्शने पुनरेव सहसावलोकनवती चेत् संसृज्येतैव अदृश्यमाना तु अप्रकृतिस्था तु दूतीसाध्या तद्द्वारा साधनीया।

**5/3/15 'कृतलक्षणां तां दर्शितेंगितकारामुपक्रमेत्'।**

अंगीकृतालिंगनादि गुह्यस्पर्शनान्तोत्सवां ततो दर्शितेंगितकारां स्वाभिप्रायसूचकहासभाव-प्रदर्शिनीं उपक्रमेत् सम्प्रयुज्यात्।

**5/3/16 'अनभियुक्ताप्याकारयति। विविक्ते चात्मानं दर्शयति। सवेपथुगद्गदं वदति। स्विन्नकरचरणांगुलिः स्विन्नमुखी च भवति। शिरः पीडनसंवाहनयोः चात्मानं नियोजयति'।**

परिचयमात्रवती पूर्वोक्तसकलाभियोगरहितापि सती आकारयति आकारैरिंगितं प्रकटयति। तदेवाह – विविक्ते रहसि आत्मानं अलंकृतस्वांगं सवेपथुगद्गदं देहकम्पगद्गदाक्षरसहितं यथा

भवति तथा वदति चाटुवाक्यं स्विन्नाः सस्वेदाः करचरणांगुलयो यस्याः स्विन्नमुखी चात्पुलकितांगी शिरःपीडनसंवाहनं करोति।

**5/3/17 'आतुरा संवाहिका हस्तेन चैकेन संवाहयन्ती द्वितीयेन बाहुना स्पर्श–मावेदयति श्लेषयति च'।**

आतुरा अतिरागा सती संवाहिका पादादिसंवाहननियुक्ता सती एकेन हस्तेन संवाहयन्ती द्वितीयेन बाहुना सम्पूर्णेन स्पर्शनं तन्मध्यदेशस्पर्शनं आवेदयति करोति श्लेषयति आलिंगते चाच्चुम्बते च।

**5/3/18 'विस्मितभावा निद्रान्धा वा परिस्पृश्यैनं कराभ्यां तिष्ठति'।**

एनं नायकं निद्रान्धा निद्रितेव विस्मितभावा रागपरवशा सती।

**5/3/18 'अलिकैकदेशमुर्वोपरि पातयति'।**

अलिकैकदेशं स्वफालैकदेशं उर्वोः तस्य पातयति योजयति।

**5/3/18 'ऊरूमूलसंवाहने नियुक्ता न विवादं गच्छति'**

विवादं क्रोधं।

**5/3/18 'तत्रैव हस्तमविचलितं न्यस्यति'।**

अविचलितं निश्चलं।

**5/3/18 'अंगसन्दंशेन पीडितं चिरादपनयति'।**

चिराद् बहुकालं अंगसन्दंशेन बाहुलता संश्लेषणपीडितं कृत्वा अपनयति सस्मितं मुंचति।

अत्र सर्वत्र तया संसृज्यतेत्यनुषज्यते।

**5/3/19 'अप्रतिगृह्य वा नायकाभियोगं पुनर्द्वितीयेऽहनि संवाहनायोपगच्छति'।**

नायकाभियोगं स्वकृतालिंगनादिकं अप्रतिगृह्यानंगीकृत्य पादसंवाहनमात्रं कृत्वा सा दूतीसाध्येत्यग्रिमेणान्वयः।

**5/3/20 'नात्यर्थं संसृजति। न च परिहरति'।**

**5/3/21 'विविक्ते भावं दर्शयति निष्कारणं वा गूढमंगमन्यत्र प्रच्छन्नदेशात्'।**

अत्यर्थमत्यन्तं संसृज्यते संश्लेषाय नयत तेन च परिहरति। नायककृतसंश्लेषं न निषेधति। भावं तत्सूचकाकारं दर्शयति किंचित् प्रच्छन्नदेशात् अतिगोप्यांगादन्यत्रान्यदेव गूढ कंचुकाद्यावृतमेव निष्कारणं अनतिप्रयोजनं दर्शयति।

**5/3/22 'सन्निकृष्टपरिचारकोपभोग्या सा चेदाकारितापि तथैव स्यात् मर्मज्ञया दूत्या साध्या'।**

सन्निकृष्टः सदा सन्निहितः परिचारकः सेवकः तेनोपभुक्तापि सती आकारिता सपरिचयं प्रार्थितापि सती तथैव स्यात् अवश्या चेत् मर्मज्ञया गूढतद्दोषज्ञया।

**5/3/23 'व्यावर्त्तमाना तु तर्कणीयेति भावपरीक्षा'।**

व्यावर्तमाना पूर्वं वश्या सती पुनः पराङ्मुखी यदि तर्कनीया, तद्धेतुं ज्ञात्वा पुनर्वशयेत् इति भाव परीक्षा।

तत्प्रकारः–यद्यपि आकारादिना तद्भावपरीक्षां विना पूर्वोक्तवस्त्रपरिवर्त्तनताम्बूलदानाद्यभि-योगप्रयोगोऽपि न सम्भवति तथापि प्रयोगोपयोगिरागौत्कट्य परीक्षणपरमिदं बोध्यम्।

अध्यायद्वयोक्तस्य प्रयोगक्रममाह –

**5/3/24 'आदौ परिचयं कुर्यात् ततश्च परिभाषणम्।**
**परिभाषणसंमिश्रं मिथश्चाकारवेदनम्'॥**

परिचयं साकूतदर्शनादिना परिभाषणं साभिप्रायवचनं आकारवेदनं आकारभाषणादिना भावपरीक्षणम्।

**5/3/25 'प्रत्युत्तरेण पश्येच्चेदाकारस्य परिग्रहम्।**
**ततोऽभियुंजीत नरः स्त्रियं विगतसाध्वसः'॥**

आकारस्य हावभावदेः परिग्रहं अनुमेयभावं प्रत्युत्तरेण साभिप्रायवाक्येनैव पश्येत् अनुमियात्। ततोऽभियुंजीत, पूर्वोक्तपरिवर्त्तनाद्यभियोगवती कुर्यात्। ततः पूर्वोक्तभावपरीक्षां कुर्यात्।

**5/3/26 'आकारेणात्मनो भावं या नारी प्राक्प्रदर्शयेत्।**
**क्षिप्रमेवाभियोज्या सा प्रथमे त्वेव दर्शने'॥**

प्रथमं परिचयं विनैव प्राक् पूर्वोक्ताभियोगं विना भावं रागवृद्धिम्।

**5/3/27 'श्लक्ष्णमाकारिता या तु दर्शयेत्स्फुटमुत्तरम्।**
**सापि तत्क्षणसिद्धेति विज्ञेया रतिलालसा'॥**

श्लक्ष्णं नेत्रादिसंज्ञयैव आकारिता आहूता उत्तरं तत्स्मितेंगितालापं स्फुटं सम्यक् दर्शयेत् कुर्यात् सा रतिलालसा रागोद्रेकवती अतएव तत्क्षणसिद्धेति।

**5/3/28 'धीरायामप्रगल्भायां परीक्षिण्यां च योषिति।**
**एष सूक्ष्मो विधिः प्रोक्तः सिद्धा एव स्फुटं स्त्रियः'॥**

स्त्रियः सर्वाः अस्फुटं साधारण्येनाज्ञातं यथा तथा सिद्धा एव उत्कटरागा एव। अतो धीरायां रागोद्रेकेऽपि अचपलायामप्रगल्भायां मुग्धायां परीक्षिण्यां विदूष्यां एष पूर्वोक्तः सूक्ष्मः चतुरप्रयोक्तव्यः विधिः वशीकरणोपायः।

**इति श्री कविपदवाक्यमानवत्त्वज्ञकाशीपुरनित्यनिवासिषड्दर्शिनीरहस्यार्थ-कमलभास्करभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ पंचमेऽधिकरणे तृतीयोऽध्यायः।**

**अध्याय–4**

# दूतीकर्मप्रकरणम्

एवं साक्षात्स्वसाध्याया वशीकरणोपायानुक्त्वावसरसंगत्यान्यस्यास्तानाह – भावपरीक्षा आदितः पंचविंशः।

**5/4/1 'दर्शितेंगितकारां तु प्रविरलदर्शनां अपूर्वां च दूत्यैवोपसर्पेत्'।**

दर्शितेंगिताकारां हावभावादिभिः किंचित् प्रदर्शितरागां प्रविरलदर्शनां कदाचित् निरीक्षणां अपूर्वां वा आकारकलाकौशल्यवत्तया श्रुतां सतीं अदृष्टपूर्वां वा दूत्यै दूतीद्वारा वशयित्वैव सर्पेत स्वयं गच्छेत्।

**5/4/2-3 'सैनां शीलतोऽनुप्रविश्याख्यानकपटपाठैः सुभगंकरणयोगैः लोकवृत्तान्तैः कविकथाभिः पारदारिककथाभिश्च तस्याः स्वरूपविज्ञानदाक्षिण्य-शीलां तु प्रशंसाभिश्च कथमेवं विधायास्तवायमित्थंभूतः पतिरिति चानुशयं ग्राहयेत्'।**

सा दूती एनामनुविलासिनीसमीपं शीलतः तापसीत्वादिरूपेण प्रविश्य प्राप्य आख्यानं प्राचीननायककथाकपटपाठश्छलोक्तिः सुभगंकरणं सौन्दर्यवर्णनं लोकवृत्तान्तः आधुनिकसुन्दरीचरित्रं कविः कालिदासादिः स्वरूपं सौन्दर्यलावण्यो विज्ञानं चतुःषष्टिकलाभिज्ञता दाक्षिण्यं प्रीतिविशेषः शीलं ऋजुभावः एतेषां प्रशंसा उत्कृष्टतया स्तुतिः। तामेतैर्वशीकृत्य एवं विधाया एतादृशकल्याणगुणगणवत्याः इत्थंभूतः वक्ष्यमाणदुर्गुणगणः कथं पतित्व–योग्यः। अनुशयं तस्मिन्नरूचिं ग्राहयेत् उत्पादयेत्।

**5/4/4 'न तव सुभगे दास्यमपि कर्त्तुं युक्त इति ब्रूयात्'।**

सुभगे हे सौन्दर्यनिधे दास्यं नीचसेवामपि न युक्तः नास्य योग्यता।

**5/4/5 'मन्दवेगतां शठतामीर्ष्यालुत्वमकृतज्ञतामसम्भोगशीलतां कदर्यतामन्यानि च यानि तस्मिन् गुप्तान्यस्याभ्याशे सति सद्भावेऽतिशयेन सम्भाषेत'।**

मन्दवेगतां सम्प्रयोगे सति स्वल्परागित्वं शठतां वंचकत्वमीर्ष्यालुत्वं गुणिषु दोषारोपणशीलतां अकृतज्ञतां कृतघ्नतां असम्भोगशीलतां भोगलम्पटत्वं कदर्यतां कृपणतां अन्यानि च पारदारिकत्वकुरूपित्वाकलाभिज्ञत्वादीनि गुप्तानि पराविज्ञातानि सन्ति अस्याभ्याशे अस्मिन् सद्भावे सति सद्भावापेक्षया सम्भाषेत तस्यै कथयेत्।

**5/4/6 'येन च दोषेणोद्विग्नां लक्षयेत्तेनैवानुप्रविशेत्'।**

येन दोषेण तदीय यद्दोषश्रवणेन उद्विग्नां चिन्ताकुलां लक्षयेत् मुखमालिन्यादिना निश्चिनुयात् तेनैव तद्दोषप्रपंचनेनैव अनुप्रविशेत् तस्मिन् विमुखीं कुर्यात्।

**5/4/7 'यदा सा मृगी तदा नैव शशतादोषः'।**

**5/4/8 'एतेन वडवाहस्तिनी विषय उक्ताः'।**

मृगी पूर्वोक्तपरिमाणा शशता अल्पपरिमाणवत्वं तस्य न दोषः किं तु एतेन मृग्या अदोषत्वेन वडवाहस्तिनीविषये उक्ताष्टांगुलित्वविषये* उक्तःदोष एव तमपि वदेत्।

**5/4/9 'बालिकाया** एव विश्वास्यतामुपलभ्योपसर्पेत्।**

विश्वास्यतां विश्वसनीयत्वं उपलभ्य निश्चित्य उपसर्पेत् पूर्वोक्तवाक्यानि कथयेत्।

**5/4/9 'प्रथमसाहसायां सूक्ष्मभावायां चेति गोणिकापुत्रः'**

प्रथमं तद्विश्वसनीयतापरिज्ञानेऽपि ग्लानिः सहिष्णुतारूपसाहसवत्यां सूक्ष्मभावायां तद्दोषसूचिकायां सत्यां दूत्यां भवति प्रवृत्तिरिति।

---

* In the measurement table appearing in Yashodhara's commentary on 2/1/1 of K.S. there is no category for eight finger length of male organ; it is six fingers for Sasa, nine fingers for Vrsa and twelve fingers for Aswa.

Vide-

'षण्नवद्वादशेत्येवमायामेन यथाक्रमम्। शशादिभेदभिन्नानां साधनसंस्थितिः।'

Later on when men and women were catagorised in four types instead of the three types of olden times, this category of eight fingers was recongnised vide Kumara Harihara (15th cen C.E.)

'अष्टांगुललसद्गुह्या शंखिनी परिकीर्त्तिता। एवं विधां कुचिमारस्तां रमेत यथाविधिः' 2/16 श्रृंगाररसप्रबन्धदीपिका

** It is नायिकाया in the published text vide 'नायिकाया एव तु विश्वास्यतामुपलभ्य दूतीत्वेनोपसर्पयेत्।

**5/4/10 'सा नायकस्य चरितमनुलोमतां कामितानि च कथयेत्'।**

सा सखी चरितं विलासव्यापारं अनुलोमतां अनुकूलतां कामितानि अभिमतानि सन्तीति कथयेत्।

**5/4/11 'प्रसृतसद्भावायां युक्त्या कार्यशरीरमित्थं वदेत्'.।**

प्रसृतसद्भावायां प्रकटितस्वाभिप्रायां सत्यां युक्त्या उपायेन स्वकार्यं स्वागमकार्यं इत्थं वक्ष्यमाणप्रकारेण।

**5/4/12 'श्रृणु विचित्रमिदं सुभगे त्वां किल दृष्ट्वामुत्रासावित्थं गोत्रपुत्रो नायकश्चित्तोन्मादमनुभवति।'**

सुभगे सुन्दरमानिनि इत्थं गोत्रपुत्रः सत्कुलीनोऽयं सुन्दरः त्वां कदाचित् दृष्ट्वा श्रुत्वा चामुत्र परोक्षेण नायकं अपूर्वं चित्तोन्मादं अवस्थाविशेषम् अनुभवति प्राप्नोति इदमाश्चर्यं श्रृणु।

**5/4/12 'प्रकृत्या सुकुमारः कदाचिदन्यत्रापरिक्लिष्टपूर्वः तपस्वी ततोऽधुना शक्यमनेन मरणमप्यनुभवितुमिति वर्णयेत्'।**

स च प्रकृत्या स्वभावेन सुकुमारः कोमलः अन्यत्र कार्यान्तरे कदाचिदपि अपरिक्लिष्टपूर्वः अननुभूतकष्टः अथ च तपस्वी प्रसन्नदेवश्चास्ते तथापि ततः भवद्दर्शनादिजन्मविकारेणाद्यानेन एतादृशयूना मरणं *दशमावस्थापि अनुभवितुं शक्यं प्राप्यते वा।

**5/4/13 'तत्र सिद्धा द्वितीयेऽहनि वाचि वक्रे दृष्ट्यां च प्रसादमुपलभ्य पुनरपि कथां प्रवर्त्तयेत्'।**

तत्र श्रावितार्थे सिद्धे तन्मनसि लग्ने सति वाचि प्रसादो माधुर्यं वक्त्रे विकासः दृष्ट्यां सौम्यता उपलभ्यते भावमनुमाय कथां वक्ष्यमाणां।

**5/4/14 'श्रृण्वन्त्यां चाहल्याविमारकशकुन्तलादीन्यन्यानि च वृत्तान्तानि कथयेत्'।**

---

* According to well know stages of love-lorn mind given in the works of poetics and erotics tenth stage (दशमावस्था) is death (5/1/5. K.S.) Japanese call this tenth stage as 'Tokotsubo cardiomyopathy'.

श्रृण्वन्त्यां चास्यां मनः प्रणिधानवत्यां सत्यां अहल्या मुनिवनिता, उर्वीशैलान्मारितवान् अविमारकः, शकुन्तला विश्वामित्रमेनकोद्भवा आदिना दुष्यन्तसुभद्रादि परिग्रहः। एतदीयानि अन्यानि आधुनिकानि तद्वृत्तानि स्वाभिमतनायकपरिग्रहरूपाणि।

**5/4/15 'वृषतां चातुःषष्टिकचित्ततां सौभाग्यं च नायकस्य'।**

वृषतां पुरूषधौरेयतां चातुःषष्टिकलां चातुःषष्टिकलाभिज्ञतां सौभाग्यं च नायकस्य सम्पदं भोगितां कथयेत्।

**5/4/15 'श्लाघनीयया प्रच्छन्नसम्प्रयोगं भूतमभूतपूर्वं वा वर्णयेत्'।**

श्लाघनीयया कुलशीलकलासम्पद्भिः प्रशस्तया प्रच्छन्नसम्प्रयोगं एतस्य गूढसंयोगं अभूतपूर्वं अश्रुतपूर्वं अत्यद्भुतमिति यावत् भूतमभूतमपि ज्ञातमपि।

**5/4/16 'आकारं चास्या लक्षयेत्'।**

**5/4/17 'सापि हसितं कृत्वा सम्भाषेत्'।**

अस्याः स्ववाक्यं श्रृण्वन्त्या आकारं मुखविकासादि। सा श्रृण्वन्ती नायिकापि हसितं किंचित् स्मितं सम्भाषेत् वक्ष्यमाणं।

**5/4/18 'आसने चोपमन्त्रयेत्'।**

आसने स्वपर्यंके आहूयोपवेशयेत्।

**5/4/19 'क्व स्थितं शयितं भुक्तं विचेष्टितं किं वा कृतमिति पृच्छति'।**

क्व स्थितं नायकस्य स्थितं स्थितिः। सर्वत्र भावे क्तः। पृच्छति पृच्छेद्दूतीम्। दूत्याह–

**5/4/20 'विविक्ते दर्शयत्यात्मानम्'।**

**5/4/21 'आख्यानकानि नियुंक्ते'।**

**5/4/22 'चिन्तयति विजृम्भते श्वसिति च'।**

**5/4/23 'प्रीतिदायं च ददाति'।**

आत्मनं अलंकृतस्वरूपं दर्शयति विलासिन्याः आख्यानकानि प्राचीनविलासिनीवृत्तान्तानि अनुयुंक्ते। सर्वदा पठति चिन्तयति अनुसंधत्ते विजृम्भते तत्पारवश्येन गात्रं विनामयति दीर्घं श्वसिति दीर्घं निःश्वसिति प्रीतिदायं प्रीत्यां देयं गन्धमाल्यादिकं च ददाति प्रेषयति।

**5/4/24 'इष्टेषूत्सवेषु च तां स्मरति'।**

**5/4/25 'पुनर्दर्शनानुबन्धं विसृजति'।**

इष्टेषु आप्तजनसंसदि उत्सवेषु विवाहादिषु तां स्वाभिमतां स्मरति आनाययति पुनर्दर्शनानुबन्धं कालविशेषे पुनर्दर्शननिबन्धनपुरःसरं विसृजति सम्मान्य प्रेषयति। इदं विचेष्टितं विविक्तस्थितिसंचितशयनसुभुक्तीनामुपलक्षणं नायिका पुनराह –

**5/4/26 'साधुवादिनी सती किमिदमशोभनमभिधत्स इति कथामनुबध्नाति'।**

अयि साधुवादिनी सती पुरा समीचीनभाषिणी सती अशोभनं अनभिमतमेव इदं तद्विषयकचरित्रं किमभिधत्से किमर्थं प्रतिपादयसि इति कथां इति वचनं अनुबध्नाति सहासं वदति।

**5/4/27 'नायकस्य चापल्यशाठ्यसम्बन्धान्दोषान् ददाति'।**

चापलं अधैर्यं शाठ्यं धौर्त्यं सम्बन्धान् एवं रूपान् ददाति सस्मितं वदति।

**5/4/28 'पूर्वं तं च तत्सन्दर्शनं कथाभियोगं वा स्वयमकथयन्ती तयोच्य–मानमाकांक्षति'।**

पूर्वं दूती समागमात्प्राक् तस्मिन् सुरक्तापि दूतीसमक्षं पूर्वं प्रथमतः स्वयमेव तं तन्नाम तद्दर्शनं नायकदर्शनवांछां कथाभियोगं तद्गोष्ठीं तया दूत्या आकांक्षति सादरं श्रृणुयात्।

**5/4/29 'नायकमनोरथेषु कथ्यमानेषु सपरिभवं नाम हसति न च निर्वदतीति'।**

नायकमनोरथेषु स्वया सरससल्लापादिषु सपरिभवं नाम तिरस्कुर्वन्तीव हसति हासेनानुमोदते निर्वदति मुखतः स्वभावं कथयति।

इति नायिकाचेष्टा समाप्ता।

**5/4/30 'दूत्या दर्शिताकारां नायिकाभिज्ञानैरूपबृंहयेत्'।**

अदर्शिताकारां नायकेन सह परस्परासन्दर्शितविलासां संस्तुतां नायिकां नायकाभिज्ञानैः पूर्वदृष्टनायकरूपलावण्यस्मारकवाक्यैः उपबृंहयेत् प्रोत्साहयेत्।

**5/4/31 'असंस्तुतां तु गुणकथनैरनुरागकथाभिश्चावर्जयेत्'।**

असंस्तुतां तेनानतिपरिचितां दर्शिताकारां गुणकथनैः तदीय गुणगणसंकीर्त्तनैः।

**5/4/32 'नासंसृष्टाकारयोरसंस्तुतयोर्दौत्यमस्तीत्यौद्दालकिः'।**

असंसृष्टाकारयोः परस्पराज्ञातविलासयोः असंस्तुतयोः अपरिचितयोर्विषये दौत्यं दूतीव्यापारः घटनरूपः नास्तिः।

**5/4/33 'असंस्तुतयोरपि संसृष्टाकारयोरिति बाभ्रवीयाः'।**

दौत्यमस्तीति अनुषज्यते।

**5/4/34 'संस्तुतयोरसंसृष्टाकारयोरप्यस्तीति गोणिकापुत्रः'।**

दौत्यम्।

**5/4/35 'असंस्तुतयोरपि दूतीप्रत्ययादिति वात्स्यायनः'।**

असंसृष्टाकारयोरित्यनुषज्यते दूतीप्रत्ययात् दूत्यामाप्ततानिश्चयात् भवति घटनम्।

**5/4/36 'तासां मनोहराण्युपायनानि ताम्बूलमनुलेपनं स्रजमंगुलीयकं वासो वा तेन प्रहितं प्रदर्शयेत्'।**

तासां सन्दर्शितभावानां कामिनीनां च मनोहराणि हृद्यानि उपायनानि ताम्बूलादीनि।

**5/4/37 'तेषु च यथार्थं नायकस्य नखदशनपदानि तानि तानि च चिह्नानि स्युः'।**

तेषु ताम्बूलादिषु* यथार्थं यथायोग्यं ताम्बूले दशनपदमित्यादि तानि तानि च वक्ष्यमाणानि।

**5/4/38 'वाससि च कुंकुमांकमंजलिं निदध्यात्'।**

वाससि चेलांचले कुंकुमां कुंकुमरससक्तं।

**5/4/39 'पत्रच्छेद्यानि च नानाभिप्रायाकृतीनि'**

---

* Such marks carrying hints passed on through packets of betels and other gifts are dealt with in the 7th & 9th chapter of Nagara Sarvasva of Padmsari, vide

सिक्थेन निर्मिता मुद्रा पंचांगुलिनखांकिता।
वेष्टन रक्तसूत्रेण पोटली परिकीर्तिता।।

नानाभिप्रायाकृतीनि आलिंगनचुम्बनादिस्वाभिप्रायाकाराणि पत्रच्छेद्यानि तालपत्रखण्डादिनिर्मितकृत्रिममिथुनानि।

**5/4/39 'लिखितपत्रगर्भाणि कर्णपत्राण्यापीडांश्च'।**

**5/4/40 'तेषु च स्वमनोरथाख्यानं'।**

लिखितपत्रगर्भाणि स्वाभिमतलेखनाभ्यन्तराणि कर्णपत्राणि कर्णाभरणविशेषाः आपीडाः पौष्पशिरोभूषणानि दर्शयेत् तेषु उक्तेषु दर्शितेषु सत्सु स्वीयमनोरथाख्यानं स्वत एव कृतं भवति।

**5/4/40 'प्रतिप्राभृतदानेनैवेनां नियोजयेत्'।**

नायिका च प्रतिप्राभृतस्य तत्प्रेषितानुरूप यावत् सोर्मिकाताम्बूलादेः स्वाभिप्रायसूचकदानेन प्रत्यर्पणेन एनां दूतीं स्वानुकूलां नियोजयेत् तत्समीपं प्रेषयेत्।

**5/4/41 'कृतपरस्परपरिग्रहयोः'** स्वीकृतान्योन्यप्रीतिदानयोः दूती परस्पराभिप्राय–ज्ञानोद्रिक्तरागादन्योन्यसन्दर्शनाकांक्षिणोः **'दूतीप्रत्ययः'** दूतीद्वारक **'समागमः'** वक्ष्यमाणदेशकालयोः।

**5/4/42 'स तु देवताभिगमने यात्रायामुद्याने च क्रीडायां जलावतरणे विवाहे यज्ञव्यसनोत्सवेष्वग्न्युत्पाते चौरविभ्रमे जनपदस्य चक्रारोहणे प्रेक्षाव्यापारेषु तेषु तेषु च व्यापारेष्विति बाभ्रवीयाः'।**

स यूनोः समागमः देवताभिगमने यात्रायां देवतादर्शननिमित्तप्रयाणसमये उद्याने क्रीडायां विहारकाले जलावतरणे नद्यादितीरे उत्सवे वसन्तादेः अग्निपीडया व्यापृतिकाले चौरविभ्रमे चोरनिमित्तकव्याकुलकाले जनपदस्य चक्रारोहणे ग्रामदेवतानिमित्तयन्त्रारोहणव्यग्रतायां प्रेक्षाव्यापारेऽन्यत्ताद्यवलोकने तेषु तेषु च अन्येषु व्यापारेषु दैविकराजिकेषु भवति।

**5/4/43 'सखीभिक्षुकीक्षपणिकातापसीभवनेषु सुखोपाय इति गोणिकापुत्रः'।**

क्षपणिका कापालिका तापसी तद्वेषवती सुखोपायः सुखसिद्धिकः सः।

**5/4/44 'तस्या एव तु गेहे विदितनिष्क्रमणप्रदेशे चिन्तितात्ययप्रतीकारे प्रवेशनमुपपन्नं। निष्क्रमणकालं च तन्नित्यं सुखोपायं चेति वात्स्यायनः'**

तस्याः नायिकाया एव एवकाराद्विदितशंकया पूर्वोक्तनिरासः। विदितनिष्क्रमणप्रवेशे

विज्ञातनिर्गमनगोप्यमार्गे चिन्तितो विचारितः अत्ययस्य निर्गमने निरीक्षणप्रयुक्तविपदः प्रतिकारः।फलपुष्पाद्यानयनादिरूपो यस्मिन् अविज्ञातकालं अनियतकालं चात् प्रवेशश्च तत् तदा सुखोपायं उपपन्नतमम्।

अथ दूतीभेदानाह –

**5/4/45 'निसृष्टार्था परिमितार्था पत्रहारी स्वयंदूती गूढदूती भार्यादूती मूकदूती वातदूती चेति दूतीविशेषाः अष्टविद्याः'।**

तासां लक्षणमाह –

**5/4/46 'नायकस्य नायिकायाश्च यथा मनीषितमर्थमुपलभ्य स्वबुध्या कार्यसम्पादिनी निसृष्टार्था'**

या यथा मनीषितं सैव मां भजतु। अहमेवेत्याद्यभिलाषपूर्वकं अर्थं सम्प्रयोगमात्रमुपलभ्य ज्ञात्वा स्वबुध्या घटनप्रकारं ताभ्यामशिक्षित इव स्वबुद्धिकौशल्येन कार्यसम्पादिनी परस्पराभिमतरीत्या संयोजयित्री।

**5/4/47-49 'सा प्रायेण संस्तुतपरिभाषणयोर्नायिकया च प्रयुक्तासंस्तुतभाषण-योरपि कौतुकाच्च अनुरूपौ युक्ताविमौ परस्परस्येत्यसंस्तुतयोरपि'**

सा पूर्वोक्ता नायकतात्पर्येण कार्यसम्पादिनी प्रायशः संस्तुतपरिभाषणयोः परिचितिसम्भाषणोभयवतोर्नायकयोरेव यथा तथा भवति।एवं चान्नायकेन प्रयुक्ता प्रेषिता सती असंस्तुतभाषणयोरपि तयोस्तथा अप्रयुक्तापि इमौ अनुरूपौ रूपलावण्यगुणौ सदृशौ अतो युक्तौ संयुक्तौ स्यातां इति कौतुकात् एतौ घटयेदन्यप्रेरणात्तथा।

**5/4/50 'कार्यैकदेशाभियोगैः एकदेशं चोपलभ्य शेषं सम्पादयतीति परिमितार्था'।**

**5/4/51 'सा दृष्टपरस्पराकारयोः प्रविरलदर्शनयोः'।**

दृष्टपरस्पराकारयोः परस्परदृष्टेंगितव्यंजकहावभावयोः प्रविरलदर्शनयोः कदाचित्कदर्शनयोः अपरिचितयोरिति यावत्। कार्यैकदेशं साकूतनिरीक्षणादि प्रागुक्तपरिचयकारणैकदेशं अभियोगैकदेशं ताम्बूलदानादि पूर्वोक्तं तदेकदेशं वा नायककृतमुपलभ्य तत्प्रेरणाकौतुकाद्वा शेषं सम्प्रयोगान्तं सा परिमितार्था परिमितं यत्किंचिदुपलभ्यार्थसाधिकत्वात्तथा।

**5/4/52 'सन्देशमात्रं प्रापयन्तीति पत्रहारी'।**

**5/4/53 'सा प्रकृष्टसद्भावयोः संसृष्टयोश्च'।**

प्रकृष्टसद्भावयोः उद्रिक्तरागयोः अतएव संसृष्टयोः कदाचित् संयुक्तयोः चाद्दैवाद्विप्रकृष्टयोः सन्देशमात्रं परस्पररहस्यवार्त्तान्तर्गततद्गर्भकर्णावतंसादिकं वा मात्र च स्वस्याः घटनानिरासः। **'देशकालसम्बोधनार्थम्'।**

**5/4/54 'दौत्येन प्रहिता स्वयमेव नायकमधिगच्छेदजानती नाम तेन सहोपभोगं स्वप्नं कथयेत्। गोत्रस्खलितं वा भार्यां चास्य निन्देत्। तद्व्यपदेशेन स्वयमीर्ष्यां दर्शयेन्नखदशनचिह्नितं किंचित् दद्यात्। भवतेऽहमादौ संकल्पितेति चाभिदधीत। मम वा त्वद् भार्याया का आकाररमणीयेति विविक्तेपर्यनुयुंजीत सा स्वयंदूती।**

अन्यया देशकालसम्बोधनार्थं संकेतदेशाभिमतकालज्ञापनार्थं दूत्येन वा किंचित् घटनार्थं वा प्रहिताभिमतनायकं प्रति प्रेषितापि सा स्वयमेव स्वकार्यार्थमेव अधिगच्छेत् प्राप्नोति गत्वा च अजानती नाम परिचितेव तेन सह भवता सह उपभोगस्वप्नं संभोगो मम जात इति पूर्वरात्रिजस्वप्नावस्थां गोत्रस्खलितं वा गोत्रस्य त्वन्नाम्नः स्खलितं विस्मृतिं च निन्देत्। असुन्दरीत्यादिना तद्व्यपदेशेन तन्निन्दाव्याजेन स्वामीर्ष्यां स्वभर्त्तरि कुरूपित्वादिना स्वस्या असंमतिं वा शब्देन भार्यायास्तस्मिन्नीर्ष्यां दर्शयेत् कथयेत्।नखदशनचिह्नितं तदन्तं किंचिन्मृदु दद्यात् तस्मिन् कुर्यात्।भवते तुभ्यमेव दातुमादौ एतत्परिणयात्पूर्वं संकल्पिता पित्रादिना आकाररमणीयता शरीरसौन्दर्यलावण्याद्यस्ति कथय इति उक्तरीत्या विविक्ते पर्यनुयुंजीत तं वशयेत्। स्वयंदूती अन्यार्थं गता सती स्वकार्यसाधिकात्वात्तथा।

**5/4/55 'तस्या विविक्ते दर्शनं प्रतिग्रहश्च'।**

तस्याः स्वयंदूत्याः कार्यो नायकेनेति शेषः।

**5/4/56 'दूत्यच्छलेनान्यामभिसन्धाय तस्याः सन्देशश्रावणद्वारेण नायकं साधयेत् तां चोपहन्यात्सापि स्वयंदूती'।**

दूत्यछलेन अन्यस्याः दूतीकर्मव्याजेन तत्समीपं प्राप्य अन्यां स्वस्यामनुरक्तिं तस्यां विरक्तिं च अभिसन्धाय मनसि निधाय तस्याः प्रेषयित्र्याः वार्त्ता तस्य श्रवणद्वारेण विरसमुक्त्वा साधयेत्। स्वकीयगुणलावण्यादिवर्णनेन वशयेद्वा तां चोपहन्यात्। तां स्वप्रेषयित्रीं उपहन्यात् तदीय हृदयाद्दूरी कुर्यात्।

**5/4/57 'एतया नायकोऽप्यन्यदूतश्च व्याख्यातः'।**

एतया उक्तस्वयंदूत्या अन्यदूतः अन्येन नायकेन प्रेषितः व्याख्यातः। व्याख्यातप्रकारेणं नायिकां वशं नयेदित्युक्तप्रायः।

**5/4/58 'नायकभार्यां मुग्धां विश्वास्यायन्त्रणयानुप्रविश्य नायकस्य चेष्टितानि पृच्छति, योगान् शिक्षयति साकारं मंडयति कोपमेनां ग्राहयत्येवं च प्रतिपद्यस्वेति श्रावयति। स्वयं चास्यां नखदशनपदानि निवर्तयति। तेन द्वारेण नायकमाकारयति सा गूढ*दूती'।**

मुग्धां अविवेकिनीं विश्वास्य सखीं कृत्वा यन्त्रणया तदनुपत्या अनुप्रविश्य अन्तर्गृहं प्राप्य चेष्टितानि क्रीडनकानि योगान् तदुपायान् शिक्षयति ग्राहयति साकारं रागवर्धकं यथा तथा मंडयति स्वयमलंकुरूते कोपं प्रणयक्रोधं ग्राहयति कुर्वति बोधयति। एवं च **'तदा एव प्रतिपद्यस्व'** 'याचतं पतिं ब्रूहि' श्रावयति तस्यै कथयति। स्वयं वा स्वयमेव अस्याः मुग्धायाः निवर्त्तयति तत्र करोति तेन द्वारेण तच्छिक्षणव्याजेन स्वचातुर्यं दर्शयित्वा आकारयति वशयति। या गूढं प्रच्छन्नं स्वार्थं दूती।

**5/4/59 'तस्यास्तयैव प्रत्युत्तराणि योजयेत्'।**

तस्यां गूढदूतीविषये तस्यैव मुग्धाद्वारेणैव साक्षाद्दर्शनवचनानि योजयेत् प्रेषयेत् नायकेनेति शेषः।

**5/4/60 'स्वभार्यां वा मुग्धां प्रयोज्यया सह विश्वासेन सह योजयित्वा तयैवााकारयत्यात्मनश्च वैचक्षण्यं च प्रकाशयेत् सा भार्यादूती'।**

नायकः यां मुग्धां अविचक्षणां प्रयोज्यया अभिमतनायिकया सह विश्वासेन योजयित्वा सख्यं कारयित्वा तयैव तद्दारा सन्देशप्रसाधनादिप्रेषणेन वैचक्षण्यं तदभिमत विलासिन्यै भार्यारूपत्वात्तदाख्या।

**5/4/60 'तस्यास्तयैवाकारग्रहणम्'।**

तस्याः अन्यनायिकायाः तयैव भार्यादूतीद्वारैव आकारग्रहणं नायकेंगितचातुर्यादिज्ञानं भवति।

* It is 'मूढदूती' in the published text as also in Yashodhara's commentary. It seems that scribes of GOML/BORI copies have written गूढ instead of मूढ at respective places erroneously.

**5/4/61 'बालां परिचारिकामदोषज्ञामदुष्टेनोपायेन प्रहिणुयात्। तत्र स्त्रजि कर्णपत्रे वा गूढलेखानिधानं नखदशनपदं सा मूकदूती'।**

नायकः सा वा अदोषज्ञां गुणदोषानभिज्ञां यां अदुष्टेनोपायेन लौकिकं यत्किंचित् कार्यव्याजेन प्रहिणुयात् प्रयोज्यागृहं प्रति प्रेषयेत्। तत्र तत्प्रेषणकाले स्त्रजि कमलकह्लारादि मालायां कर्णपत्रे कर्णावतंसविशेषेण गूढलेखनिधानं गूढं प्रच्छन्नं यथा तथा लेखस्य स्वाभिप्रायविलेखनपत्रिकायाः निधानं स्थापनं नखदशनपदं स्वीय तदंकनिधानं कृत्वा यस्यै दद्यात् मूकाऽज्ञा तस्यास्तस्यैव प्रार्थनं तस्याः विलासवत्याः तयैव तादृशपत्रिकयैव कृतं भवति तथा नायकस्य।

**5/4/62 'पूर्वप्रस्तुतार्थलिंगसम्बन्धं स्वजनाग्रहणीयं लौकिकार्थं द्व्यर्थं च वचनमुदासीना या श्रावयेत्सा वातदूती'।**

संस्तुतयोः कृतपरस्पसंलापयोः पूर्वप्रस्तुतार्थलिंगसम्बन्धं रहस्योक्तवाक्य–र्थान्वितार्थकं स्वजनाग्रहणीयार्थं श्वश्र्वाद्यज्ञेयतात्पर्यार्थं लौकिकार्थः। आपाततो जनानां मनोबोधकं द्व्यर्थं तस्या एव रहस्यार्थबोधकं उदासीना तन्मुखाधिकं सादरमनिरीक्षन्ती तयोरन्तरेण अविवेकात् कार्यव्याजेनाभिप्रेषिता सती सा वातदूती वातवत् असक्तेव घटयित्री तदाख्या।

**5/4/62 'तस्या अपि तयैव प्रत्युत्तरप्रार्थना'** पूर्वप्रस्तुतादिविशेषेण युक्तमेव प्रार्थनाधिकं प्रतिवचनं कथयेत् तदन्यतरः। **'इति दूतीविशेषाः'** विशेषाः भेदाः इति सलक्षणमुक्त्वा मतान्तरमाह –

**5/4/63 'विधवेक्षणिका दासी भिक्षुकी शिल्पकारिका।**
**प्रविशत्याशु विश्वासं दूतीकार्यं च विन्दति'॥**

विधवा तथाविधा पक्त्री ईक्षणिका शुभादिलक्षणाभिज्ञा शिल्पकारिका प्रसाधिका विश्वासं सख्यं प्रविशति प्राप्नोति विन्दति जानाति। तदेवाह –

**5/4/64 'विद्वेषं ग्राहयेत्पत्यौ रमणीयानि वर्णयेत्।**
**विचित्रान् रतिसंयोगाननेकानपि दर्शयेत्'॥**

विद्वेषमचतुरकुरूपित्वादिवर्णनेन रमणीयानि स्वाभिमते मनोहरमौदार्यादीनि विचित्रान् अत्यद्भुतान् अनेकान् नाना बन्धयुक्तान् रतिसंयोगान् सुरतविशेषान् दर्शयेत् अनुभविष्यतीति कथयेत्।

**5/4/65 'नायकस्यानुरागं च पुनश्च रतिकौशलम्।
प्रार्थनां चाधिकस्त्रीभिरवष्टम्भं च वर्णयेत्'॥**

तद्धेतु वाह्यरतं अधिकाः कुलसौन्दर्यादिभिः अवष्टम्भं यौवनमदं। दूतीप्रागल्भ्यमाह–

**5/4/66 'असंकल्पितमप्यर्थं उत्सृष्टमपि कारणात्।
पुनरावर्त्तयत्येव दूती वचनकौशलात्'॥**

दूतीवचनकौशलात् स्ववाक्यचातुर्यात् असंकल्पितमपि अनंकुरितमपि कारणात् ऐहिकामुष्मिकभयात् उत्कृष्टमपि निवृत्तमपि वा अर्थमनुरागं आवर्तयति उत्पादयति। अतो दूत्या समं साधनीयमिति भावः।

**इति श्री सर्वतन्त्रस्वतन्त्रश्रीसर्वेश्वरनिरूपधिनिरवधिकरूणाभरणभास्कर–
नरसिंहशास्त्रिणा कृतायां वात्स्यायनसूत्रवृत्तौ पंचमेऽधिकरणे चतुर्थोऽध्यायः।**

अध्याय – 5

# ईश्वरकामितप्रकरणम्

कविराट् नृसिंहशास्त्री शास्त्रे मदनस्य पंचमाधिकृतौ व्याख्याय कर्मयूनोर्व्याख्याते कस्य कामितं विततम्। एवं तद् गृहगमनाद्युक्तपरकान्तावशीकरणोपायानां जगत् विदिते राज्ञि असम्भवात् कथं तस्य तत्सिद्धिरित्याक्षेपसंगत्या तस्य प्रकारान्तरमाह–

**5/5/1 'न राज्ञां महामात्राणां वा परभवनप्रवेशो विद्यते।
महाजनेन हि चरितमेषां दृश्यतेऽनुविधीयते'।।**

यद्यपि राज्ञां पट्टाभिषिक्तानां महामात्राणां तद्राज्यभारवाहिनां प्रवेशः अविदितप्रवेशः। कुतः महाजनेन प्रसिद्धपुरुषेण चरितं कृतं कर्म एषां सर्वेषां दृश्यते विदितं भवति हि ततश्च अनुविधीयते सर्वैः क्रियते च। 'यद्यदाचरति'*

'यथा राजेति'** न्यायात्। अत्र दृष्टान्तमाह –

**5/5/2 'सवितारमुद्यन्तं त्रयो लोकाः पश्यन्ति च
गच्छन्तमपि पश्यन्त्यनुप्रतिष्ठन्ते च'।।**

अनुप्रतिष्ठन्ते तद्गमनागमनमनुसृत्य तथा कुर्वन्ति हि।

**5/5/3 'तस्मादशक्यत्वात् गर्हणीयत्वाच्च न ते वृथा किंचिदाचरेयुः'।**

तस्मादशक्यत्वादविदितं प्रवेष्टुं गर्हणीयत्वात् अकीर्त्तिकरत्वात् तस्मात्सर्वलोकोपप्लवस्य महादोषत्वाच्च ते राजामात्यादयः वृथा इह परविरोधि आचरेयुः। नाचरेयुः।

तथापि–

---

* The full text is as follows—
'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरूते लोकस्तदनुवर्त्तते।।' 3/21–गीता

** The full form of this proverb is – यथा राजा तथा प्रजा'।

**5/5/4 'अवश्यं त्वाचरितव्ये योगान् प्रयुंजीरन्'।**

प्रारब्धवशात् रूच्यां परदारगमने रूच्या आचरितव्ये सति विषयीकृते सति योगान् वक्ष्यमाणोपायान्।

**5/5/5 'ग्रामाधिपतेरायुक्तकस्य शिलोंञ्छनादिवृत्तिपुत्रस्य च यूनो ग्रामीण–योषितो वचनमात्रसाध्याः'।**

शिलं कणिशादानं उञ्छः कणश आदानं तद्वृत्तिकपुत्रस्य 'कणिशाद्यर्जनं शिलमिति' यादवकोशात्। चाप्यर्थे वचनमात्रात् अचतुरवचनादेव ग्रामीणानां तथाविधवृत्तिकानां तद् ग्राम्यस्थानां योषितः ग्रामाधिपतेः तन्नियन्तुः आयुक्तकस्य आसमन्तात् युक्तकस्य स्त्रीभिर्युतस्यापि साध्याः वश्याः भवन्ति।

**5/5/5 'ता धर्षण्य* इत्याचक्षते विटाः'।**

ताः ग्रामीणयोषितः धर्षण्यः धर्षणेन भीषणेनापि साध्याः तदाख्याः।

**5/5/6 'ताभिः सह विष्टिकर्मसु कोष्ठागारप्रवेशे द्रव्याणां निष्क्रमणप्रवेश–नयोर्भवनप्रतिसंस्कारे क्षेत्रकर्मणि कार्पासोर्णातसीशणवल्कलादाने सूत्रप्रतिग्रहे द्रव्याणां क्रयविक्रयविनिमयेषु तेषु तेषु सम्प्रयोगाः'।**

ताभिः ग्रामीणयोषिद्भिः ग्रामाध्यक्षादेः विष्टिकर्मवेतनं विना कार्यमाणं कर्मकोष्ठागारं स्वल्पगृहं तत्र प्रवेशः यत्किंचित्कार्यार्थं निष्क्रमणं गृहाद्बहिरानयनं प्रवेशनं अन्तःस्थापनं प्रतिसंस्कारः संमार्जनादिक्षेत्रकर्मस्य मध्यगतृणनिष्कासनादि कार्पासस्य सबीजतूलस्य अतसीशणस्तृणविशेषः ऊर्णा आदिकं एतेषां वल्कलानां त्वचां तद्वदवारकरोम्णां चादानं शलाटुकादिभ्यो निष्कासनं तस्मिन् कर्मणि सूत्रप्रतिग्रहे एतेषां सूत्रकरणकर्मणि द्रव्यानां धान्यादीनां क्रयादिषु परस्परकृतेषु तेषु तेषु अन्येष्वपि फलीकरणादि गार्ह्यकर्मसु सम्प्रयोगाः। सम्भाषणादिना सख्यं भवति। अत्र ग्रामाध्यक्षस्य कारयितृत्वेन शिलोंच्छादिवृत्तेश्च सहकरणेन योगो बोध्यः।

**5/5/7 'तथा व्रजयोषाभिः सह गवाध्यक्षस्य'।**

व्रजयोषाभिः गोपीभिः गवाध्यक्षस्य गोपस्य तदध्यक्षस्य च।

**5/5/8 'विधवानाथप्रव्रजिताभिः सह सूत्राध्यक्षस्य'**

* In the published text the word is 'चर्षण्य'.

विधवा पतिरहिताऽकिंचनानाथा सभर्तृकापि निस्वा प्रव्रजिता तादृशी प्रव्रजितभर्तृका सूत्राध्यक्षः तन्तुकरणक्रियादि अधिष्ठाता।

**5/5/9 'मर्मज्ञभावाद्रात्रावटतः कुलयोषाभिः'।**

मर्मज्ञभावात् परस्पररहस्याभिज्ञत्वात् रात्रावटतः विटस्य कुलटायोषाभिः विटांगनाभिः।

**5/5/9 'वणिग्योषाभिः नागरिकस्य'।***

वणिग्योषाभिः आपणिकाभिः।

**5/5/10 'क्रयविक्रये पण्याध्यक्षस्य च'।**

वणिग्योषाभिः सम्प्रयोगः।

**5/5/11 'अष्टमीचन्द्रकौमुदीसुवसन्तिकादिषु नगरखर्वटयोषितामीश्वरभवने सहान्तःपुरिकाभिः क्रीडा'।**

अष्टमीचन्द्रकौमुदीषु आष्टमिकज्योत्स्नायां वसन्तादिषु वसन्तोत्सवादिषु खर्वटं बहुजनाश्रयो ग्रामविशेषः तत्रत्य योषितां राजदारादिभिः सप्रत्ययमानीतानां ईश्वरभवने राजान्तःपुरे अन्तःपुरिकाभिः सह क्रीडा सल्लापादिकं कार्यम्। तामेवाह –

**5/5/12 'तत्र पानकान्ते नगरयोषितो यथापरिचयमन्तःपुरिकाणां पृथक्पृथग्भोगावासकान्प्रविश्य कथाभिरासित्वा पूजिताः प्रपीताश्चोपप्रदोषं निष्क्रामयेयुः'।**

तत्र राजभवने नगरपदं खर्वटोपलक्षणं। आपानकान्ते प्रीत्यर्थं यत्किंचिद्द्राक्षोदकादि पीत्वा यथा परिचयं दिनक्रमपरिचित्यनुसारेण भोगवासकान् भोगस्थानानि आसित्वा रंजयित्वा पूजिताः ताभिः ताम्बूलादिभिः पुनश्च निर्गमनसमये प्रपीताः सकर्मकत्वेऽपि बाहुलकात् कर्त्तरि क्तः। चाच्चर्विततताम्बूलाः उपप्रदोषं सायंकाले अव्ययं विभक्तीत्यादिनां 'समीपार्थेऽव्ययीभावः'। निष्क्रमेयुः कंचितत्कालं तद् गृहान्निर्गच्छेयुः।

**5/5/13 'तत्र प्रणिहिता राजदासी प्रयोज्यया पूर्वसंसृष्टा तां तत्र सम्भाषेत'।**

तत्र तदुपवेशनसमये प्रणिहिता राज्ञा प्रेषिता प्रयोज्यया संयोजनीय तत्रत्य नगरयोषितां पूर्वसंसृष्टा पूर्वसंकेतवती राजदासी तां प्रयोज्यां तत्र तदा आगत्य–

---

* This extension of Sutra no.5/5/9 appears additionally in BNS's work.

**5/5/14 'रामणीयकदर्शनेन योजयेत्'।**

रामणीयकदर्शने मनोहरप्रासादोपवनादिवक्ष्यमाणदर्शनविषये योजयेत् नयेत्।

तदेवाह –

**5/5/15 'प्रागेव स्वभवनस्थां ब्रूयात्। अमुष्यां क्रीडायां तव राजभवनस्थानानि रामणीयकानि दर्शयिष्यामीति काले च योजयेत्'।**

प्राक् राजाज्ञया स्वस्यास्तद्गृहगमनसमये स्वयं दासी स्वस्याः नायिकायाः भवनस्थां नायिकां क्रीडायामन्तःपुरिकासल्लापसमये स्थानानि वक्ष्यमाणानि इति इत्यादि ब्रूयात्। आनयनार्थं यद्यत्कथयेत् योजयेत् तत् तत्प्रदर्शयेत्। तद् गृहे कथनीयस्थानान्येवाह –

**5/5/15 'बहिः प्रवालकुट्टिमं दर्शयिष्यामि'।**

**5/5/16 'मणिभूमिकां वृक्षवाटिकां मृद्वीकामंडपं समुद्रगृहं प्रासादांश्च गूढभितिसंचारांश्च प्रतिभवनं चित्रकर्माणि शकुनकान् व्याघ्रसिंहपंजरादीनि च यानि पुरस्तात् वर्णितानि स्युः'।**

वहिः क्रीडासद्मप्रांगणे प्रवालकुट्टिमं विद्रुमखचितभूमिं मणिभूमिकां अन्तः पुष्परागादिमणिमंडितभूमिं वृक्षवाटिकां तत्रत्य हर्म्योद्यानं मृद्वीकाद्राक्षा–समुद्गकं कोशगृहं गूढभित्तिसंचारान् भित्तिगतप्रच्छन्नमार्गान् चित्रकर्माणि नानालेख्यानि योजयेदित्यनुषज्यते।

**5/5/17 'एकान्ते च तद्गतमीश्वरानुरागं श्रावयेत्'।**

एकान्ते तत्तद्वाटिकादिप्रदर्शनसमये तद्गतं तासुस्थितं ईश्वरानुरागं महाराजप्रीतिं श्रावयेत् ताभ्यः कथयेत्।

**5/5/18 'सम्प्रयोगे चायतिं वर्णयेत्'।**

सम्प्रयोगे महाराजेन संयोगे सति आयतिं अभीष्टप्राप्तिं।

**5/5/19 'अमन्त्रश्रावं च प्रतिपन्नां योजयेत्'।**

अमन्त्रश्रावं च स्वोक्तवाक्यगोपनं यथा तथा प्रच्छन्नां विस्रब्धां योजयेत् राज्ञा।

**5/5/20 'अप्रतिपद्यमानां दासी वाक्यैरननुकूलां आर्योपचारैः वस्त्रताम्बूलादिदानैः सान्त्वनैः प्रियवचनैः रंजयित्वा अनुकूलयित्वा संभूय विसृजेत्'**

संयुज्य सानुरागं पुनरागमनौत्कंठ्ययुक्तं यथा तथा ।

**5/5/21 'प्रयोज्यायाश्च पत्युरनुग्रहोचितस्य दारान्नित्यमन्तःपुरमौचित्यात्प्रवेशयेयुः'**

प्रयोज्यायाः पूर्वोक्तोभयरूपेण प्रयोजयितुमभिमतायाः पत्युः भर्तुः अतएवानुग्रहोचितस्य वस्त्राभरणादिना संमानं कृत्वा दारान् प्रयोज्यान् नित्यं प्रतिदिनं औचित्यात् आश्रितभार्यात्वेन।

**5/5/21 'तत्र प्रणिहिता राजदासीति समानं पूर्वेण'।**

तत्र अन्तःपुरप्रवेशानन्तरं इति रामणीयकदर्शनेत्यादि पूर्वेण पूर्वोक्तं सम्प्रयोगानां समानं अस्या अपि।

**5/5/22 'अन्तःपुरिका वा प्रयोज्यया सह चेटिकासम्प्रेषणेन प्रीतिं कुर्यात्। प्रसृतप्रीतिं च सापदेशं दर्शनेऽभियोजेत्। प्रविष्टां पूजितां पीतवतीं प्रणिहिता राजदासीति समानं पूर्वेण'।**

अन्तःपुरिका अन्तःपुरस्थ काचन भोगस्त्री चेटिकासम्प्रेषणेन राजाज्ञया स्वदासीनियोजनेन प्रयोज्यया संयोगाभिमतया प्रसृतप्रीतिं उत्पन्नानुरागां तां सापदेशं उत्सावादिव्याजेन दर्शने स्वदर्शनार्थं अभियोजयेत् आनाययेत्। प्रविष्टां अन्तःपुरं पूजितां तत्रत्यया पीतवतीं पीतपानकां इति रामणीयकदर्शनादि प्राग्वत्।

**5/5/23 'यस्मिन्वा विज्ञाने प्रयोज्या विख्याता स्यात् तद्दर्शनार्थं अन्तःपुरिका सोपचारं तामह्वयेत्। प्रविष्टां प्रणिहिता राजदासीति समानं पूर्वेण'।**

यस्मिन् सालभंजिकादिविषयकनिर्माणचातुर्ये या प्रयोज्या विख्याता लोकप्रसिद्धा सोपचारं ससन्मानं।

**5/5/24 'उद्धूतान् अर्थभीतस्य भार्यां भिक्षुकी ब्रूयात् असावन्तःपुरिका राजनि सिद्धा गृहीतवाक्या ममवचनं श्रृणोति, स्वभावतश्च कृपाशीला तामनेनोपायेनाधिगमिष्यामि। सा ते भर्तुः तथानर्थं निवर्त्तयिष्यति। प्रतिपन्नां द्विस्त्रिरिति प्रवेशयेदन्तःपुरिका चास्या अभयं दद्यात्। अभयश्रवणाच्च सम्प्रहृष्टां प्रविष्टां प्रणिहिता राजदासीति समानं पूर्वेण'।**

राजकुट्टिनी प्रेषिता भिक्षुकीवेषधारिणी उद्धूतानर्थभीतस्य उद्धूत उत्पन्नो योऽनर्थः राजकीयकलहादिरूपः तेन भीतस्य भार्यामार्त्तां दृष्ट्वा असौ एतन्नाम्निका आन्तःपुरिका राजकुट्टिनी राजनि सिद्धा राजविषयकानुरागा अतएव गृहीतवाक्या राज्ञा श्रूयमाणवचना मम

सखी अतो मद्वचनं श्रृणोति। स्वभावतश्च कृपाशीला दयावती सा तां प्रति अनेनोपायेन रहस्यमार्गेणाभिगमिष्यामि त्वां नेष्यामि। सा अन्तःपुरिका तथानर्थं राजकीयोपद्रवं निर्वत्तयिष्यति, राजानं प्रयुक्त्वा परिहरिष्यति इति तां प्रति ब्रूयात्। द्विस्त्रिः द्वित्रिदिनपर्यन्तं द्वित्रिवारं वा इति इत्युक्त्वा प्रतिपन्नां प्रत्ययवतीं तां प्रवेशयेत्। भिक्षुकी अन्तःपुरं प्रति अस्याः भीतभार्यायाः अभयं अनर्थं परिहरिष्यामि इति प्रत्ययं प्रविष्टां श्रुत्वा 'प्रणिहिता राजदासीति समानं पूर्वेणं'।

**5/5/25 'एतया वृत्यर्थिनां महामात्राभितप्तानां बलात् गृहीतानां व्यवहारदुर्बलानां स्वभोगेनासन्तुष्टानां राजनि प्रीतिकामानां बाह्यजने व्यक्तिमिच्छतां सजातीयैर्बाध्यमानानां सजातीन् बाधितुं कामानां सूचकानामन्येषां च कार्यार्थिनां व्यसनिनां जाया व्याख्याताः'।**

एतया उक्तरीत्या वृत्तिर्जीविका महामात्रा राजप्रकृतयः तैरभितप्ता वृत्तिच्छेदादिना पीडिताः निगृहीतानां निगृह्य बन्दीकृतानां भोगेन स्वकीय वृत्त्या राजनि प्रभुत्वनिमित्तं प्रीतिकामानां राज्ञः बाह्यजने लोके वृत्तिं ख्यातिं राजमान्यत्वेन सजातीयैः ज्ञातिभिः सूचकानां लोकरहस्यज्ञापकानां व्यसनिनां द्यूतादिचतुराणां जाया व्याख्याताः। ईश्वरवश्यत्वेनोक्तप्रायाः।

**5/5/26 'अन्येन वा प्रयोज्यां सह संसृष्टां संग्राह्य दास्यमुपनीतां अन्तःपुरं प्रवेशयेत्'।**

**5/5/27 'प्रणिधिना वा पतिमस्या सन्दूष्य राजनि दुष्ट इति कलत्रावग्रहो– पायेनान्तःपुरं प्रवेशयेदिति प्रच्छन्नयोगाः'।**

अन्येन पुरूषान्तरेण संसृष्टां संयुक्तां प्रयोज्यां संग्राह्य गृहीत्वा दास्यमुपनीतां दासीकृत्य तेन सह नियमितां प्रवेशयेत्। दासी द्वारा अस्याः प्रयोज्यायाः पतिं प्रणिधिनास्त्रंतरघटनेन सन्दूष्य दोषिणं कृत्वा राजदुष्ट इति कलत्रावग्रहोपायेन कलत्रस्यावग्रहं विद्वेषमुत्पाद्य कलत्रेण सह निर्बन्धं वा कृत्वा उपायेन भिक्षुक्यादिद्वारेण प्रच्छन्नयोगाः।रहसि सम्प्रयोगोपायाः।

**5/5/27 'एते राजपुत्रेषु प्रायेण'।**

राजपुत्रेषु परदारलोलुपराजविषये एते स्वान्तःपुरप्रापकोक्तोपायः एव योग्याः।

**5/5/28 'न त्वेवं परभवनमीशः प्रविशेत्।**

एवमन्य इव परभवनं अन्यभामिनीभवनं न प्रविशेत् कुतः।

**5/5/29 'आभीरं हि कोट्टराजं परभवनगतं भर्तृप्रयुक्तो रजको जघान'।**

परभवनगतं परकान्तां निशान्तरतं भर्तृप्रयुक्तो तत्पतिनियुक्तः कोट्टराजं तद्देशाधीशं आभीरं तदाख्यं।

**5/5/29 'काशीराजं जयत्सेनमश्वाध्यक्ष इति'।**

अतो न प्रविशेदिति पूर्वेणान्वयः।

**5/5/30 'प्रकाशकामितानि देशप्रवृत्तियोगात्'।**

देशप्रवृत्तियोगात् देशाचारानुसारात् प्रकाशं लोकविदितं यथा तथा कामितानि परकान्तायोगाः सिध्यन्ति राज्ञः इति। तथाहि –

**5/5/31 'प्रत्ता जनपदकन्या दशमेऽहनि किंचिदौपायनिकमुपगृह्य प्रविश्यान्तः– पुरमुपभुक्ता एव विसृज्यन्त आन्ध्राणाम्'।**

प्रत्ता विवाहिताः जनपदकन्याः जनपदजातिविशेषोद्भवाः दशमेऽहनि प्रथमर्तुदिनात् औपायनिकं प्राभृतिकं, भुक्ताः संयुक्ता एकदिनं विसृज्यन्त एव तद्भर्तृगृहं प्रेष्यन्ते आन्ध्राणां तद्राजेन।

**5/5/32 'महामात्रेश्वराणां चान्तःपुराणि निशि सेवार्थं राजानमुपगच्छन्ती वात्सगुल्मकानाम्'।**

महामात्रेश्वराणां राजामात्यानां प्रत्याः कन्येत्यादि उपगृह्यान्तमनुषज्यते उपगच्छन्ति भुक्ता विसृज्यन्ते च।

**5/5/33 'रूपवतीर्जनपदयोषितः प्रीत्यपदेशेन मासं मासार्धं वातिवास– यन्त्यन्तःपुरिका वैदर्भाणाम्'।**

समानं प्रीत्यपदेशेन अनुरागातिशयानुसारेण आन्तःपुरिकाराजदूत्यः वैदर्भिकाणां राजाज्ञया।

**5/5/34 'दर्शनीयाः स्वभार्याः प्रीतिदायमेव महामात्रराजभ्यो ददत्यपरान्तकानां'।**

प्रीतिदानं उपायनं महामात्रराजभ्यो राजप्रभृतिभ्यश्च ददति पतय एव अपरान्तकानां राज्ये।

**5/5/35 'राजक्रीडार्थं नगरस्त्रियो जनपदस्त्रियश्च संहता एकशाश्च राजकुलं प्रविशन्ति सौराष्ट्रकाणामिति'।**

एकशः एकदा राजकुलं राजगृहं, तत्र भुक्ताः पुनरायान्ति इति इत्याद्युन्नेयम्।

**5/5/36 'एते चान्ये च बहवः प्रयोगाः पारदारिकाः।**
**देशे देशे प्रवर्त्तन्ते राजभिः सम्प्रवर्त्तिताः'॥**

राजभिः परदारपरैः सम्प्रवर्त्तिताः आचरिताः।

**5/5/37 'न त्वेवैतत्प्रयुंजीत राजा लोकहिते रतः।**
**निगृहीतारिषड्वर्गः तथा विजयते महीम्'॥**

एतत्परदारगमनं न प्रयुंजीत न कुर्वीत। कुतः 'न परदारान् गच्छेत्।'

**'उदर्कशुद्धिमिच्छद्भिः न सद्भिः खलु दृश्यते।**
**प्रसन्नराघव 7/1 चतुर्थीचन्द्ररेखेव परस्त्रीफालपट्टिका'॥**

इत्यादिश्रुतिस्मृतिनिषिद्धत्वात् तदसम्प्रयोगे फलमाह – निगृहीतः वशीकृतः विहितेषु प्रवर्त्तितः अरयः कामादयः एव इन्द्रियाणि वा।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञपंडितमंडलमंडितपांडित्याखंडचंडिमोद्दंड-श्रीसर्वेश्वरसूरिवरमुख्यशिष्यकाशीपुरनित्यनिवासिगुणिगुणनलिनभास्करभास्करनरसिंह–शास्त्रिकृतवात्स्यायनसूत्रवृत्तौ पंचमाधिकरणे पंचमोऽध्यायः।**

अध्याय – 6

# आन्तःपुरिकावृत्ताप्रकरणम्

एवं राज्ञः परदारसम्प्रयोगोपायमुक्त्वा प्रसंगेन तद्योषितां परयूनसम्प्रयोगोपायान् राज्ञां तद्रक्षणं च कथयिष्यन् संगतिसूचनायोक्तमनुवदति – ईश्वरकामितं आदितः सप्तविंशः।

**5/6/1 'अन्तःपुराणां रक्षणयोगात्पुरूषसन्दर्शनं न विद्यते'।**

रक्षणयोगात् अन्तःपुररक्षणनियुक्तराजभटनिरोधनवशात् अन्तःपुराणां राजकलत्राणां पुरूषदर्शनं परतरूणनिरीक्षणं।

**5/6/1 'पत्युश्चैकत्वादनेकसाधारणत्वाच्चातृप्तिः।**
**तस्मात्तानि प्रयोगत एव परस्परं रंजयेयुः'॥**

राजयोषितां एकत्वात् एकमात्रत्वात् द्वितीयस्याभावादिति यावत् अस्य चानेकसाधारण्यत्वात् वह्वीषु अनुरक्तत्वात् अतृप्तिः यावद्रागं मैथुनालाभः तस्मात् तानि राजकलत्राणि प्रयोगतः पुंप्रकृतितः परस्परं प्रत्येकं रंजयेयुः आनन्दयेयुः। तदेवाह –

**5/6/2 'धात्रेयिकां सखीं दासीं वा पुरूषवदलंकृत्याकृतिसंयुक्तैः कन्दमूलफलैः अपद्रव्यैर्वात्माभिप्रायं निवर्त्तयेयुः'।**

आकृतिसंयुक्तैः पुंलिंगत्वेन कल्पितैः अपद्रव्यैः अस्थ्यादिभिः मृदुतरचर्मपिनद्धैः पुरूषवदलंकृत्य पुरूषतुल्यं कृत्वा आत्माभिप्रायं आलिंगनसुरतादिकं।।

**5/6/3 'पुरूषप्रतिमा अव्यक्तलिंगाश्चाधिशयीरन्'।**

पुरूषप्रतिमाः पुरूषाकारदार्वादिविकाराः अतएवाव्यक्तलिंगाः स्वयं चेष्टारहिताः अधिशयीरन् आलिंग्य शेरते।

**5/6/4 'राजानश्च कृपाशीला विनापि भावयोगमायोजितापद्रव्या यावदर्थमेकया रात्र्या बह्विभिरेव गच्छन्ति'।**

कृपाशीलाः स्वकामिनीमनोभववेदनाजनितदयालवः चो विकल्पे भावयोगं स्वाभाविकरागौत्कंठ्यं आयोजितापद्रव्याः मदकरवस्तुसेविनस्सन्तः यावदर्थं तत्तृप्तिपर्यन्तंः।

**5/6/4 'यस्यां प्रीतिर्वासक ऋतुर्वा निवेदयति तत्राभिप्रायात् प्रवर्तन्त इति प्राच्योपचारः'।**

किं तु तासु मध्ये यस्याः प्रीतिः स्वस्मिन्नत्यन्तानुरागः स्वस्य वा तस्या वासकः रूपलावण्यादिर्वातिशयेन ऋतुस्तत्कालः निवेदयति ज्ञायते तत्र तस्यां अभिप्रायादनुरागात् प्राच्योपचारः पूर्वदेशीयाचारः।

**5/6/5 'स्त्रीयोगेणैव पुरूषाणामप्यलब्धवृत्तीनां वियोनिषु विजातिषु स्त्रीप्रतिमासु केवलोपमर्दनाच्चाभिप्रायनिवृत्तिर्व्याख्याता'।**

स्त्रीयोगेनैव तच्चेष्टाकथनेनैव अलब्धवृत्तीनां स्त्रीरहितानां वियोनिषु पुंव्यक्तिषु विजातिषु तिर्यगादिषु स्त्रीप्रतिमासु दार्वादिमयीषु अभिप्रायनिवृत्तिः धातुक्षरणम्।

**5/6/6 'योषावेषांश्च नागरिकान्प्रायेणान्तःपुरिकाः परिचारिकाभिः सह प्रवेशयन्ति'।**

नागरिकान् कलाकुशलान् यूनः आयत्यादिवर्णनेन वश्यान् प्रवेशयन्ति अन्तःपुरं प्रापयन्ति तदाज्ञया।

वशीकरणप्रकारमेवाह –

**5/6/7 'तेषामुपावर्त्तने परिचारिका धात्रेयिकाश्चाभ्यन्तरसंसृष्टा आयतिं दर्शयन्त्यः प्रयतेरन्'।**

तेषां नागरिकाणां उपावर्त्तने अन्तःपुरनयनविषये अभ्यन्तरसंसृष्टाः राजमहिषीसमीपवर्त्तिन्यः आयतिं फललाभं दर्शयन्त्यः वर्णयन्त्यः सत्यः।

**5/6/8 'सुप्रवेशतामपसारभूमिं विशालतां वेश्मनः प्रसादं रक्षिणामनित्यतां परिजनस्य वर्णयेयुः'।**

वेश्मनः अन्तःपुरस्य सुप्रवेशतां सुखप्रवेशार्हतां अपसारभूमिं पुनर्निर्गमनगुप्तद्वारवत्तां विशालतां कदाचिदनिर्गमनेऽपि प्रच्छन्ननिवासयोग्यप्रवेशवतां रक्षिणां बाह्यागाररक्षकराजभटानां प्रसादं कदाचिदवलोकनेऽप्यक्रूरतां। प्रमादमिति* पाठे अनवधानतां परिजनस्य

* BNS is aware of another reading प्रमाद (in place of प्रसाद in this Sutra) which appears in the published text of K.S.

अन्तःपुररक्षणनियुक्ता वीरक्लीवादेः अनित्यतां नियतानवस्थितिं वर्णयेयुः। तेषामित्यादिसंसृष्टां तमनुषज्यते।

**5/6/9 'न चासद्भूतेनार्थेन प्रवेशयितुं जनमुपावर्तयेयुर्दोषात्'।**

असद्भूतेन मिथ्याभूतेन जनं नागरिकं न चोपावर्त्तयेयुः न प्रवेशयेयुः ता इति शेषः। कुतः तस्य हान्याद्यापतेः।

**5/6/10 'नागरिकस्तु समायमप्यन्तःपुरमपायभूयिष्ठत्वान्नप्रविशेत्'*।**

समायं सलाभमपि अपायभूयिष्ठत्वात् बलवद् बहु अनिष्टत्वानुबन्धित्वात्।

**5/6/11 'सापसारं तु प्रमदवनावगूढं विभक्तदीर्घकक्ष्यमल्पप्रमत्तरक्षकं प्रोषितराजकं कारणानि समीक्ष्य बहुश आहूयमानः कक्ष्याप्रवेशं दृष्ट्वा ताभिरेव विहितोपायः प्रविशेत्'।**

बहुश आहूयमानः राज्ञीदास्यादिभिः आयत्यादिकथनपूर्वकं प्रार्थ्यमानस्सन् अतिकामुकः साहसिकस्तु नागरिकः कारणानि आयत्यादीन्युक्तवक्ष्यमाणानि समीक्ष्य सम्यक्पर्यालोच्य प्रमदवनावगूढं प्रान्तलग्नक्रीडावनं विभक्तदीर्घकक्षं पृथक्कृतविस्तृतानेकभवनमध्यस्थं अतएव सापसारं सनिर्गमनगूढमार्गं प्रोषितराजकं दूरदेशस्थस्वामिकं तत एव अल्पप्रमत्तरक्षं अल्पाः प्रमत्ताश्च रक्षका यस्मिन् तथोक्तं राजगृहं श्रुत्वा कक्ष्यप्रदेशं बाह्यमन्दिरप्रान्तं गत्वा तत्रोक्तलक्षणानि कानिचिद् दृष्ट्वा ताभिः सहागतराजदासीभिः विहितोपायः कृतस्ववेषादिरेव प्रविशेदन्तःपुरम्।

**5/6/12 'शक्तिविषये च प्रतिदिनं निष्क्रामेत्'।**

तत्र राज्ञीभिः संयुज्य शक्तिविषये बहिर्निर्गमनकौशल्ये अपायशंकया कौतुककथाकथनेच्छया निष्क्रमेत् स्वगृहं गच्छेत्।

प्रवेश उपायान्तरहमाह –

**5/6/13 'बहिश्च रक्षिभिः अन्यदेव कारणमपदिश्य संसृज्येत्'।**

बहिः रक्षिभिः बाह्यांगणरक्षकैः साकं अन्यद्वक्ष्यमाणं कारणं वा अन्तःप्रवेशे अपदिश्य उक्त्वा संसृज्येत। अन्तःपुरं प्रविश्य तत्रत्याभिः संसृज्येत।

---

* Bhaskara Narasimha Sastri does not record 'इति वात्स्यायनः' here at the end of sutra, which is found in the published text.

**5/6/14 'अन्तःपुरचारिण्यां च परिचारिकायां विदितार्थायां सक्तमात्मानं रूपयेत्'।**

रूपयेत् रक्षिभ्यः कथयेत्। तदलाभात् परिचारिकालाभाच्छोकं आत्मनः कथयेत्। **'तदलाभाच्च शोकं'**।

**5/6/14 'अन्तःप्रवेशिनीभिश्च दूतीकल्पंसकलमाचरेत्'।**

अन्तःपुरगमनागमनवतीभिः सख्यं कृत्वा दूतीकल्पं दूत्येव सकलं राज्ञीं प्रति सन्देशप्रेषणादिकम्।

**5/6/15 'राजप्रणिधींश्च बुध्येत्'।**

राजप्रणिधीन् राजदासान् बुध्येत् अन्यत्रगतान् प्रमत्तान्वा बुध्वा सावधानो यतेत।

**5/6/16 'दूत्यास्त्वसंचारे यत्र गृहीताकारायाः प्रयोज्याया दर्शनयोगस्तत्राव– स्थानम्'।**

असंचारे अप्रवेश्ये यत्र स्थले गृहीताकारायाः ज्ञातभावायाः प्रयोज्यायाः दर्शनयोगः चक्षुः सन्निकर्षः भवति।

**5/6/17 'तस्मिन्नपि तु रक्षिषु परिचारिकाव्यपदेशः'।**

तस्मिन् स्थले रक्षिषु रक्षकेषु विषये परिचारिकापदेशः दासीत्वेन व्यवहारः कार्यः।

**5/6/18 'प्रयोज्यायां चक्षुरबध्नन्त्यामिंगिताकारनिवेदनम्'।**

अनुबध्नन्त्यां प्रेषयन्त्यां सत्यां इंगिताकारवेदनं भावसूचकभ्रूविक्षेपणादिकम्।

**5/6/19 'यत्र सम्पातः स्यात्तत्रचित्रकर्मणः प्रयुक्तस्य श्लोकानां द्व्यर्थानां गीतवस्तुकानां कृतचिह्नानां अंगुलीयकस्य निधानम्'।**

यत्र देशे सम्पातः तस्याः चक्षुः सन्निकर्षः प्रयुक्तस्य मिथुनीभूतस्य चित्रकर्मणः प्रतिमादेः द्व्यर्थानां लौकिकरहस्यार्थानां गीतवस्तुकानां गेयानां क्रीडितकानां कन्दुकादीनां कृतचिह्नानां कृतनखाद्यंकानां मातुलुंगादीनां अंगुलीयकस्य स्वनामांकितोर्मिकादेः निधानं लेखनम्।

**5/6/20 'प्रत्युत्तरं च तया दत्तं पश्येत्। ततः प्रविशेत्'।**

तया राज्ञाः दास्याः प्रत्युत्तरस्वकृतचेष्टाया प्रतिदर्शनं चात्प्रतिचेष्टां वा कृतां पश्येत्। द्रष्टुं प्रतीक्षेत। ततः प्रविशेत् अन्तःपुरम्।

**5/6/21 'यत्र चास्या नियतं गमनमिति विन्द्यात्तत्र प्रच्छन्नस्य प्रयोगावस्थानम्'।**

**5/6/22 'रक्षतपुरूषो वा तदनुज्ञातवेलायां प्रविशेत्'.।**

यत्र स्थले नियतं गमनं नियमेनागमनं भवीति विन्द्यात् जानीयात् प्रच्छन्नस्य परैः अदृष्टस्य प्रागेव तदागमनात्पूर्वमेवावस्थानं युक्तं। तदनुज्ञातवेलायां तया राज्ञ्या अनुज्ञातवेलायां निश्चिते समये देशे च।

**5/6/23 'आस्तरणप्रावरणवेष्टितस्य वा निर्हरणप्रवेशौ'।**

आस्तरणं शय्याप्रावरणमपि तादृशमेव निर्हरणप्रवेशौ अन्तःप्रवेशनबहिर्नयने दासीभिः कार्ये।

**5/6/24 'पुरापुटैर्योगैर्वा* नष्टच्छायारूपः'।**

पुरापुटैः प्राचीनबृहत्भांडान्तस्थित्या योगैर्वक्ष्यमाणां जनेन नष्टच्छायारूपः नष्टं अदृश्यं छाया प्रतिबिम्बं रूप्यतेऽनेनेति शरीरं यस्य न तथोक्तः निर्हरणप्रवेशयोगः।

**5/6/25 *'तत्रायं योगः नकुलहृदयः रोचकः तुम्बीफलानि सर्पाक्षीणि चान्तर्धूमं पचेत्। ततोऽंजनेन समभागेनोदकेनाभ्यक्तनयनो नष्टच्छायारूपश्चरति'**

नकुलहृदयं बभ्रुवक्षशकलं रोचको गोरोचनं तुम्बीफलानि परिणतालाबुखण्डः सर्पाक्षीणि च समभागं संयोज्य समभागेनोदकेन अन्तः गूढं पचेत्। ततः धूपं चालकजिह्वया धूपं दत्वा तेनांजनेनाभ्यक्तनयनः अलक्षः।

**5/6/26 'रात्रिषु कौमुदीषु च चेटिकासम्बाधे चैतद्भवति'।**

---

* The reading in published text is पुटापुटैर्योगैर्वा।

* At the end of this Sutra the following sentence appears in brackets in the published text of Kama Sutra—

'अन्यैश्च जलब्रह्मक्षेमशिरःप्रणीतैर्बाह्यपानकैर्वा'।

The Aupanisadik discussions do not throw light neither on पुटापुटयोग nor on connections of जलब्रह्म and क्षेमशिर (who may be some ayurvedik experts?)

कौमुदीषु तद्वतीषु चेटिका दासी एतत्प्रवेशनं निर्गमनं च।

**5/6/27 'द्रव्याणामपि निर्हारे पानकानां प्रवेशने।**
**आपानकोत्सवार्थेषु चेटिकानां तु सम्भ्रमे'॥**

द्रव्याणां राज्ञीगृहस्थवस्तूनां अभिनिर्हारे राजाज्ञया दास्यादिभिर्निष्कासससमये पानकानां पेयद्रव्यघटानां प्रवेशने तत्समये उत्सवे तद्दानप्रतिदाने सम्भ्रमः सम्मर्दः।

**5/6/27 'व्यत्यासे वेश्मनां चैव रक्षिणां च विपर्यये।**
**उद्यानयात्रागमने यात्रातश्च प्रवेशने'॥**

व्यात्यासे नूतनप्रवेशे विपर्यये नवानां स्थापने यात्रातः यात्रां कृत्वा।

**5/6/27 'दीर्घकालोदयां यात्रां प्रोषिते वापि राजनि।**
**प्रवेशनं भवेत्प्रायो यूनां निष्क्रमणं तथा'॥**

दीर्घकालोदयां दीर्घकालिकां प्रोषिते।

**5/6/28 'परस्परस्य मर्माणि ज्ञात्वा चान्तःपुरालयाः।**
**एककार्यास्ततः कुर्युः शेषाणामपि भेदनम्'॥**

एककार्याः नागरिकराज्ञीसंयोजकेनैकप्रयोजनाः राज्ञीगामिनो वा अन्तःपुरालयाः अन्तःपुरवासिनी जनाः मर्माणि रहस्यकर्माणि ज्ञात्वा प्रकटनभीत्या परस्परानुकूलाः सन्तः शेषाणामननुकूलानां तत्सन्निहितानां भेदनं प्रलोभनादिना स्वाधीनीकरणम्।

**5/6/28 'दूषयित्वा ततोऽनेकामेककार्यार्थगा स्थिरः।**
**अभेद्यतां गतः सद्यो यथेच्छं फलमश्नुते'॥**

अनेका राज्ञीसन्निहिता दासी दूषयित्वा वशयित्वा अभेद्यतां ताभिः यथेच्छं राज्ञीसम्प्रयोगरूपं फलम्।

**5/6/29 'तत्र राजकुलचारिण्य एव पुरूषान्लक्षण्यान् अन्तःपुराणि प्रवेशयन्ति**
**नातिसुरक्षत्वात् अपरान्तिकानाम्॥**

तत्र राज्ञीकामितविषये राजकुलचारिण्यः चेटिकाद्याः अलक्षण्यान् प्रच्छन्नान् पुरूषानभिमतान् तान्यन्तःपुराणि प्रवेशयन्ति सुरक्ष्यत्वात्ताभिरेव अपरान्तिकानां देशविशेषस्थानामियं रीतिः।

**5/6/30 'क्षत्रियसंज्ञकैरन्तःपुररक्षिभिरेवार्थं साधयन्त्याभीरकाणाम्'।**

अर्थं अभिमतं आभीरकाणां स्त्रियः।

**5/6/31 'प्रेष्याभिः सह नागरिकांस्तद्रूपां निवेशयन्ति वात्सगुल्मकानाम्'।**

तद्रूपान् प्रेष्यावेषिणः निवेशयन्ति प्रवेशयन्ति रक्षिष्वन्येषु सत्स्वपि।

**5/6/32 'स्वैः पुत्रैः अन्तःपुराणि कामाचारैः जननीवर्ज्यमुपयुज्यन्ते वैदर्भिकाणाम्'।**

पुत्रैः पुत्रसंज्ञैः जननीसाक्षात् भुंजते उपमात्राद्याः।

**5/6/33 'तथा प्रवेशितैरेव ज्ञातिसम्बन्धिभिः स्त्रैराजकानाम्'।**

प्रवेशितैः दूत्यादिभिः ज्ञातिसम्बन्धिभिः ज्ञातिभिः सगोत्रैः सम्बन्धिभिः सपिंडैर्वा स्त्रैराजकानाम् योषितः संयुज्यन्ते।

**5/6/34 'ब्राह्मणैर्मित्रैः भृत्यैर्दासचेटैश्च गौडानां।**

**5/6/35 'राज्ञः कर्मकाराश्चान्तःपुरेष्वनिषिद्धास्ते च तद्रूपाश्च सैन्धवानाम्'।**

कर्मकराः अन्तःपुरेषु कर्मकराः चित्रादिकार्यकारिणः तद्रूपास्तत्समानाः तद्वदेव गमनादिकं अन्तः अतएव परिचित्या अनिषिद्धाः सैन्धवानां राज्ञीनां भोग्याः।

**5/6/36 'अर्थेण रक्षिणमुपगृह्य साहसिकाः संहताः प्रविशन्ति हैमवतानाम्'।**

रक्षिणं अन्तःपुररक्षकं उपगृह्य वशयित्वा साहसिकां भाव्यनिष्ठाभीरवः नागरिकाः संहताः तद्दासीभिः संघटितास्सन्तः हैमवतानां पार्वतीयाना–मन्तःपुराणि प्रविशन्ति क्रमेण।

**5/6/37 'पुष्पदाननियोगान्नागरब्राह्मणा राजविदितमन्तःपुराणि गच्छन्ति। पटान्तरितश्चैषामालापस्तेन प्रसंगेन व्यतिकरो भवति बंगांगक–लिंगकानाम्'।**

**5/6/38 'संहत्य नवदशेत्येकैकं युवानम् प्रच्छादयन्ति प्राच्यानाम्'।**

पुष्पदाननियोगात् प्रतिदिनं साशीर्वचनपूर्वकपुष्पाक्षतादिप्रदानविषयकराजनियमनात् एषां ब्राह्मणानां आलापः राज्ञीभिः सह प्रसंगेन तद्व्याजेन व्यतिकरः सम्बन्धो भवति। तत्रापि एकेन यूना संहत्य संयुज्य तं प्रच्छादयन्ति। एवं नव दश वा भोक्तारो भवन्ति प्राच्यानाम् तद्दिगवस्थितानां अंगादीनामंगनानाम्।

**5/6/38 'एवं परस्त्रियः कुर्वीत'।**

एवं पंचाध्यायोक्तप्रकारेण परस्त्रियः वश्याः कुरूते साहसिको दुर्जनः। ननु 'न परदारान् गच्छेत्' इति निषिद्धस्य ऐहिकामुष्मिकबलवदनिष्ठानुबन्धिभिः योषिदन्तरसंगस्य प्रेक्षावत् प्रवृत्यविषयतया तत्रैव तावता प्रबन्धेनोपायवर्णनं निष्फलमित्याशंक्य मननोपयोगितया पदार्थनिरूपणवद्दाररक्षणायोपकरिष्यति। इत्याह –

**5/6/39 'एभ्य एव च कारणेभ्यः स्वदारान् रक्षेत्'।**

एभ्यः उक्तेभ्यः कारणेभ्यः वशीकरणसाधनेभ्यः अच्छिद्य।

**5/6/40 'कामोपधाशुद्धान् रक्षिणोऽन्तःपूरे स्थापयेत् इत्याचार्याः'।**

कामोपधा शुद्धान् कामः स्वयं भोगवांछा उपधा उत्कोचग्रहणेच्छा ताभ्यां शुद्धान् रहितान्।

**5/6/41 'ते हि भयेनार्थेन चान्यं योजयेयुरिति तस्मात्कामभयार्थोपशुद्धान् स्थापयेदिति गोणिकापुत्रः'।**

ते पूर्वोक्ता अपि रक्षिणः भयेन राजाभिमतत्वादिना स्वनिष्टासनभीत्या अर्थेन धनलोभेन अन्यं नागरिकं योजयेयुः। अन्तःपुरगामिनमुपेक्षयेयुः तस्मादिति हेतोः।

**5/6/42 'अद्रोहो धर्मस्तमपि भयाज्जह्यादतो धर्मत्रयोपधाशुद्धानिति वात्स्यायनः'।**

अद्रोहः अन्तःपुराद्रोहः धर्मः रक्षिणां तद्धर्ममपि भयात् नागरिकभयात् जह्यात् जहाति कश्चिद्भीरुः अतः अधर्मत्रयं अधर्मादित्रयं अधर्मार्थकामाः यद्यपि अधर्मशुद्धावित्यनेनैव सर्वलाभस्तथापि भयनिमित्तं धर्मविवक्षया प्रपंचनार्थं पृथगुक्तिः।

**5/6/43 'परवाक्याभिधायिनीभिश्च गूढाकाराभिः प्रमदाभिरात्मदारानुपदध्याच्छौचाशौचज्ञानार्थमिति बाभ्रवीयाः'।**

गृहमेधी राजा वा स्वदाराणां शौचाशौचज्ञानार्थं शुद्धतदितरान् बोधाय परवाक्याभिधायिनीभिः परस्य नागरिकसुन्दरपुरुषस्य वाक्यामिधायिनीभिः सन्देशप्रेषणपराभिः गूढाकाराभिः भिक्षुक्यादिवेषधारिणीभिः प्रमदाभिः स्वात्मदासीभिः उपदध्यात् संयोजयेत्।

**5/6/44 'दुष्टानां युवतिषु सिद्धत्वान्नाकस्माददुष्टानां दूषणमाचरेत् इति वात्स्यायनः'।**

युवतिषु तरूणीषु दुष्टानां चापल्यादिदुष्टानां सिद्धत्वात् स्वभावतः अदुष्टानां अस्पष्टदोषाणां तासां अकस्मात् स्वयमेव दूषणम् दोषाभिव्यंजनं नाचरेत्। अतो बाभ्रवीयोक्तमयुक्तम्। किं तु –

**5/6/45 'अतिगोष्ठी निरंकुशत्वं भर्तुः स्वैरता पुरूषैः सहानियन्त्रणता प्रवासेऽवस्थानं विदेशवासः स्ववृत्युपघातः स्वैरिणीसंसर्गः पत्युरीर्ष्यालुता चेति स्त्रीणां विनाशकारणानि'।**

अतिगोष्ठी अनुचितभाषणं निरंकुशत्वं स्वातन्त्र्यं स्वैरिता युवत्यन्तरसंसर्गः अनियन्त्रणता भाषणोपवेशनादौ अनियमः प्रवासेऽवस्थानं भर्तुः विदेशवासः स्वस्याः स्ववृत्युपघातः स्वमर्यादोल्लंघनं पत्युः ईर्ष्यालुता असह्यम्।

**5/6/46 'सन्दृश्य शास्त्रतो योगान्पारदारिकलक्षितान्।**
**न याति च्छलनां कश्चित्स्वदारान् प्रति शास्त्रवित्'॥**

पारदारिकलक्षितान् परांगनासम्प्रयोगफलकान् योगान् पूर्वोक्तानुपायान् शास्त्रतः अस्मात् सन्दृश्य सम्यक् ज्ञात्वा दारान्प्रति दाररक्षणविषये छलनां प्रमादं उक्तोपायानां प्रयोगं उक्तेश्च प्रयोजनमात्रोक्त्या संवादयति –

**5/6/47 'पाक्षिकत्वात्प्रयोगाणामपायानां च दर्शनात्।**
**धर्मार्थयोश्च वैलोम्यान्नाचरेत्पारदारिकम्'॥**

प्रयोगाणां उक्तोपायैः फललाभस्य पाक्षिकत्वात् अनियतत्वात् अंगहान्यादेः दर्शनात् कदाचित् सम्भवात् धर्मः न पारदारान् गच्छेदिति निषेधरूपः अर्थः स्वं चात् इतरपुरूषार्थयोः वैलोम्यात् हानेः एकत्रापरिपालनात् अन्यत्रव्ययात् तृतीये ईर्ष्यातः चतुर्थेऽदूरदृष्टत्वात्।

**5/6/48 'तदेतद्दारगुप्त्यर्थमारब्धं श्रेयसे नृणाम्।**
**प्रजानां दूषणायैव न विज्ञेयोऽस्य संविधिः'॥**

दारगुप्त्यर्थं तद्रूपाय एतत् उपायत्रयं आरब्धं कृतम्। अस्य उपायजातस्य संविधिः प्रतिपादनं प्रजानां एतत् शास्त्राध्येतृणां दूषणाय प्रयोगेण धर्मार्थादि विलोपनायैव कृतम्। अतोऽस्मिन् शास्त्रे प्रेक्षावतां प्रवृत्तिसिद्धिरिति भावः।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञषड्दर्शिनीनिरतविहरणसदाचारसमाचरण–वसिष्ठादिवरिष्ठपंडितमंडितपांडित्याखंडचंडिमोद्दंडश्रीसर्वेश्वरसूरिवरमुख्यशिष्य–कविकुलकृतिततिसरसिजविकसनभास्करभास्करनरसिंहशास्त्रिविरचितवात्स्यायन–सूत्रवृत्तौ पारदारिके पंचमेऽधिकरणे षष्ठोऽध्यायः।**

**Note :**

Such sexual escapades of uniting with other's wives, were common and were generally tolerated by the society. This attitude is evident in the following aphorisms -

**न स्त्री दुष्यति जारेण**

(A wife does not become impure because of her extra-marital affairs)

**दृष्टपंचपुरूषा नागम्या काचिदस्तीति बाभ्रवीयाः**

(As per school of Bābhravya nothing stops one from approaching a woman for sexual pleasures, who already had relations with as many as five men).

Besides these observations, on some critical occasions justification for extra-marital union was recommened by experts vide—

**ऋतुस्नानाभिगमने मित्रकार्ये तथापदि।**
**त्रिष्वेतेषु प्रियतमः क्षन्तव्यो वारगम्यया।।**

गोनर्दीय quoted by Mallinath in Raghuvamsam – P.271

Later such immoral actions of having sex with a woman (outside marriage) who professedly suffers from unrequited love was given a moral backing by comparing him with a physician treating a patient, as per Padmasri.

'तथा चाह महेश्वरः– **कामं त्यक्त्वात्मनः कामी कामव्याधिनिपीडिताम्।**
**चिकित्सयति यो नित्यं पदं प्राप्नोति कामिकम्।।**

-1/5 N.S.

Such state of affairs in the society gave rise to the following notable phenomena —

(a) A highly sophisticated science of sign language was developed for clandestine lovers. Nagara Sarvasva of Padmasri epitomizes details of this sign language.

(b) Sexual preferences, nature and temperaments, attitude towards various sexual acts etc were recorded in works on Kama Sastra. Although Svetaketu strongly upheld the sanctity of marriage, he apparently did not put any

restriction on —

(i) men enjoying the company of courtesans,

(ii) men having extra marital affairs.

Thus we find गम्यागम्यव्यवस्था (ie rules regarding whom to approach for sexual favours and whom not to) is said to have found place in his treatise. These obviously were aimed at courtesans and applied to both parties. It is also apparent that subjects like making acquaintance with women, sending go between for enticing them etc. were also discussed by him. References to his views on these matters are found in the fifth Adhikarana of K.S. This topic took into account the following categories of women-

**अयत्नसाध्याः कष्टसाध्या and असाध्या**

(ie women who could be easily enticed, those for whom efforts have to be made and those who cannot be lured at all.)

These women generally speaking were others' wives. This is the 'raison de etre' of inclusion of Paradarika Adhikarana in K.S. Sex acts etc of women of different provinces were catalogued by writers on Kama Sastra under Desh Jati Vicara. No wonder then that we find accounts of wide spread promiscuity in the society right from villages to cities and royal palaces, in K.S. of Vātsyāyana.

# 6. वैशिकं नाम षष्ठमधिकरणम्

### अध्याय – 1

## सहायगम्यागम्यगमनकारणचिन्ताप्रकरणम्

आन्तःपुरिकं दाररक्षितकमिति आदितः अष्टाविंशः। एवं बलवदैहिकामुष्मिक-विरोधिपारदारिकमुक्त्वावसरसंगत्या यत्किंचित् विरोधिवैशिकमुच्यते इत्याह। समाप्तं चेदं पारदारिकं पंचममधिकरणम्।

भास्करनरसिंहशास्त्रि शास्त्रकामस्य पंचमाधिकृतिं व्याख्याय वैशिकाख्यां व्याख्या-ताख्यातधर्मशास्त्रार्थः।

**6/1/1 'वेश्यानां पुरूषाधिगमे रतिवृतिश्च सर्गतः'।**

अभिगमने संयुक्तत्वविषये रतिः रागोल्वणता वृत्तिः जीवनं सर्गतः निमित्ततया शास्त्राचारसिद्धा। इममेव स्थापयति –

**6/1/2 'रतितश्च स्वाभाविकं प्रवर्त्तनम्'।**

रतितः रतिसुखविशेषः। तदर्थं स्वाभाविक अकृत्रिमं प्रवर्त्तनं पुरूषसम्प्रयुक्तता कृत्रिमर्थार्थम् अर्थार्थं जीवनार्थं प्रवर्त्तनं कृत्रिमं रागशून्यम्।

**6/1/3 'तदपि स्वाभाविकवद्रूपयेत्'।**

तत् कृत्रिमप्रवर्त्तनमपि स्वाभाविकवत् रागकृतमिव रूपयेत् प्रदर्शयेत्। कुतः।

**6/1/4 'कामपरासु हि पुंसो विश्वासयोगात्'।**

कामपराः स्वभावानुरक्ताः विश्वासयोग्या अत्यन्तप्रीतिं लभन्ते हि।

**6/1/5 'अलुब्धतां च ख्यापायेत्तस्य दर्शनार्थम्'।**

तस्य स्वाभाविकवद्रूपितानुरागनिदर्शनार्थं निश्चायनार्थं अलुब्धतां द्रव्याभिलाषतां चात्स्वकीयभावं च ख्यापयेत्'।

6/1/6 **'न चानुपायेनार्थान् लिप्सेत्'।**

अर्थान् परकीयधनान् अनुपायेन चातुर्यं विना न लिप्सेत् न प्राप्नोति यतः अतएवं कुर्यात्।

6/1/6 **'आयतिसंरक्षणार्थम्'।**

आयतिं संरक्षणार्थं उत्तरफलहेतु।

6/1/7 **'नित्यमलंकारयोगिनी राजमार्गावलोकिनी'।**

जनरंजनार्थं अलंकारयोगिनी अलंकृता सती राजमार्गं विलोकिनी घंटापथं यथाप्यनुयायियुवावलोकिनी चन्द्रांशुप्रसरणमार्गप्रहितदृगन्ता वा भवेत्।

6/1/7 **'दृश्यमाना न चातिविवृता तिष्ठेत्। पण्यसधर्मत्वात्'।**

दृश्यमाना युवभिः सादरमवलोकिता सती अतिविवृता अतिप्रकटितावयवा न तिष्ठेत्। कुतः लक्ष्यालक्ष्यकचकुचादिमती भवेदिति यावत्। कुतः पण्यसधर्मत्वात्। क्रय्यसालभंजिकादितुल्यत्वात्।

6/1/8 **'नायकमावर्जयेत्'** आवर्त्तयेत् मन्दहासभ्रूविलासादिनानुरंजयेत्। **'अन्या–भ्यश्चावच्छिन्द्यात् आत्मनश्चानर्थं प्रतिकुर्यादर्थं च साधयेत्'।** अन्याभ्यः पूर्वमनुरक्ताभ्यः एनमवच्छिन्द्यात् स्वस्यां रूपलावण्याद्यतिशयप्रदर्शनेन विरंजयेत् अनर्थमनेकसंगित्वादिदोषशंकां प्रतिकुर्यात् नोत्पादयेत् अर्थं स्वस्याः असाधारण्यानुरागरूपेण तस्यापि तं साधयेत् उत्पादयेत्।**'न च गम्यैः परिभूयेत याननुसृत्य तां सहायान्'।** सहायीकृत्य गम्यैः संयोक्तुमभिमतैः नायकैः न परिभूयेत न वियुंज्येत किंत्वत्यन्तमनुरज्येत्। तान्येव वक्ष्यमाणान् सहायान् संघटनोपयोगिनः कुर्यात्, तैः संयुज्य तद्द्वारा साधयेदित्यर्थः। तानेवाह –

6/1/9 **'ते त्वारक्षिपुरूषा धर्माधिकरणस्था दैवज्ञा विक्रान्ताः समानविद्याः कलाग्राहिणः पीठमर्दविटविदूषकमालाकारगान्धिकशौण्डिकरजक–नापितभिक्षवश्चेति'।**

ते त्वारक्षिपुरूषा राजगृहसंरक्षकाः धर्माधिकरणस्था न्यायशालाध्यक्षाः दैवज्ञाः ज्योतिर्विदः विक्रान्ताः शूराः समानविद्याः धनिकेन तुल्याः कलाग्राहिणः तस्यैव कामशास्त्राध्यापकाः पीठमर्दादयः उक्तलक्षणाः ते च कार्ययोगात्।

6/1/10 **'केवलार्थैस्त्वमी गम्याः'** ते आरक्षिकादयः पीठमर्दादयश्च कार्ययोगात् धनिकसंघठनकार्यार्थं केवलार्थैः अर्थदानं विना घटकानुक्वा साध्यानाह–

6/1/10 **'स्वतन्त्रः पूर्वे वयसि वर्त्तमानः वित्तवान्'** स्वतन्त्रः पित्रादिशिक्षारहितः प्रवृद्धवया तादृशो वित्तवान् **'अपरोक्षवृत्तिः'** सः सन्निहितग्रामक्षेत्रादिमान् **'अधिकरणवान्'** गृहारामादिसम्पन्नः **'अकृच्छाधिगमवित्तः'** नित्यमनति–प्रयत्नलब्धधनः **'संघर्षवान्'** संघर्षः पराभिभवेच्छा **'संततायः'** सर्वादिग–वस्थितवर्षाशीलः **'सुभगमानी श्लाघनकः'** सौन्दर्याभिमानी सन् इतर–निन्दापूर्वकं स्वस्याः गुणप्रशंसकः **'षंडकः पुंशब्दार्थी'** पुंस्त्वेनलोकव्यवहारार्थी धनिकः **'समस्पर्धी'** समैः सर्वैः सजनैः स्पर्धालु धनिकः **'स्वभावतश्च त्यागी'** उन्मत्तदाता चाद्रागी **'राजनि महामात्रे सिद्धः'** सिद्धः अतिपरिचितः, अनेन धनिकत्वं तद्घटकत्वं सूचितम्, **'दैवप्रमाणो वित्तावमानी'** अदृष्टैकवादी सन् विद्यमानद्रव्यविरागी रागी च, **'गुरुशासनातिगः'** गुरुः पित्रादिः धनवानिति सर्वत्रानुषज्यते, **'सजातानां लक्ष्यभूतः'** सजातानां सोदरादीनां लक्ष्यभूतः, **'सवित्तः एकपुत्रो लिंगी प्रच्छन्नकामः'** अन्तर्निगूढरागः **'शूरो वैद्यश्चेति'।**

इति एते धनलोभेनाभिगम्याः।

6/1/11 **'प्रीतियशोऽधिकास्तु गुणतोऽधिगम्याः'।**

प्रीतियशोऽधिकाः प्रीतिः स्वस्यां यशः लोके आभ्यामधिका वक्ष्यमाणाश्च गुणतः गुणलोभेन।

6/1/12 **'महाकुलीनः'** दानदाक्षिण्यादिगुणवत्तया प्रसिद्धकुलोत्पन्नः **'विद्वान्'** सभा–पंडितः **'समयज्ञः'** धर्मशास्त्रज्ञः **'कविः'** महाप्रबन्धनिर्माता **'आख्यान–कुशलः'** पौराणिकः **'वाग्मी'** सभावावदूकः **'प्रगल्भः'** सर्वकार्ये चतुरः **'विविधशिल्पज्ञः'** नानाचित्रकर्मकुशलः **'वृद्धसेवी'** वृद्धज्ञानादिनां **'स्थूललक्षः'** महापुरूषत्वेन ख्यातः **'महोत्साहः'** महान् उत्साहः कार्येषु औत्सुक्यं यस्य **'दृढभक्तिः'** भक्तिराराध्यत्वेन ज्ञानं आयेषु रागो वा **'अनसूयकः'** गुणीषु दोषारोपरहितः **'मित्रवत्सलः'** वात्सल्यमनुपधिनिरवधिप्रेमद्वान्वत्सलः

**'घटागोष्ठीप्रेक्षणकसमाजसमस्याक्रीडनशीलः'** घटागोष्ठीसमुदायसल्लापः प्रेक्षणं रथोत्सवादेः समाजसमस्या बहुजनसंख्यं क्रीडनं अतिहृद्योद्यानादौ विहारशीलं यस्य **'नीरूक्'** दृढांगः **'अव्यंगशरीरः'** अविकलदेहः **'प्राणवान्'** बलिष्ठः **'अमद्यपः'** निषिद्धवस्तुत्यागी **'वृषः'** पुरूषधौरेयः **'मैत्रः'** सर्वजनप्रियः **'स्त्रीणां प्रणेता लालयिता च'** प्रणेता इष्टदः लालयिता प्रियोक्तिभिः रंजयिता **'न चासां वशगः'** आसां स्त्रीणां मध्ये वशगः नैकाधीनः **'स्वतन्त्रवृत्तिः'** अपराधीनजीवनः **'अनिष्ठुरः'** मृदुमनोवचनः युवति-**'ष्वनभिशंकी'** अन्यसंगितासन्देहरहितः **'अनीर्ष्यालुः'** दीर्घक्रोधशून्यः गोष्ठीकलाप्रियः गोष्ठीसरसालापः बाभ्रवी–योक्त चतुःषष्टिकलाः रतिकला वा।

'इति नायकगुणाः' इति इत्याद्याः।

नायकगुणा अभिगम्य गमनरक्षणीयगुणाः गम्यरम्यगुणानुक्त्वा नायकं परीक्ष्य ललनागुणानाह –

6/1/13 **'रूपलक्षणमाधुर्ययोगिनी'** रूपमंगेषु सौष्ठवं, लक्षणानि षडुन्नतत्त्वं सप्तारूणत्वादि सामुद्रिकोक्तानि माधुर्यं वाचि **'गुणयुक्ता'** नायकाभिमत–करूणानीर्ष्यादिगुणवती **'नित्यमकदर्यवृत्तिः'** अदीनस्वभावा अहरहद्रव्यार्थिनीति यावत् **'गोष्ठीकलाप्रिया'** गोष्ठीसप्रेमसम्भाषणकलाबाभ्रवीयास्ता–स्तुत्याभिलाषिणी **'विशेषार्थिनी'** विशेषः नायकगता साधारणमर्मः **'गुणेष्वभिरज्यते न तथार्थेषु'** गुणेषु पूर्वोक्तनीरोगत्वादिषु **'प्रीति–सम्भोगशीलां'** सानुरागसम्भोगदाः **'स्थिरमतिः'** अचपलचित्ता **'एकजातीया चेति नायिकागुणाः'**। एकजातीया गणिका अमद्यपत्वाद्यनुक्तसमुच्चयार्थ–श्चकारः

6/1/14 **'नायिका पुनर्बुद्धिः'** प्रतिभा **'शीलं'** सत्स्वभावः **'आचारः'** सद्वृत्तिः **'आर्जवं'** अवक्रता **'कृतज्ञता'** कृतोपकारस्मरणं **'दीर्घदूरदर्शित्वं'** दीर्घं भविष्यत् दूरभूतं उभयोर्दर्शित्वं प्रतिसन्धानं **'अविसंवादिता'** सफलयत्नता **'देशकालज्ञता'** तत्तत्कारणोपयोगिदेशाद्यभिज्ञता **'नागरिकता'** कार्यचतुरता **'दैन्यातिहासपैशुन्यपरिवादक्रोधलोभस्तम्भचापलवर्जनं'** दैन्यं अभिमता–लाभेन मुखमालिन्यं अतिहासः तल्लाभे अट्टहासः पैशुन्यं रहसि परदोष–कथनं परिवादः सति दोषारोपः क्रोधः अपराधाननुगुणपारूष्यं लोभः

तुच्छेऽप्यतिवांछा स्तम्भः हासावलोकनमधुरभाषणादौ निर्विकारता चापलं देशकालपूर्वोत्तरानालोचनेन प्रवर्त्तनं वर्जनं दैन्यादीनामभावः **'पूर्वाभिलाषिता'** बाल्यप्रभृत्यनुरक्तता **'कामसूत्रकौशलं'** अत्रोपपादितोपाय प्रयोजनता **'तदंगविद्यासु च'**। तच्छास्त्रांगपूर्वोक्तचतुःषष्टिषु चातुर्यं।

**'इति साधारणगुणाः'।**

**6/1/15 'गुणविपर्यये दोषः'।**

गुणविपर्ययाः उक्तबुद्ध्याद्यभावाः दोषाः। अवरणहेतवः। दोषान्तराण्याह –

**6/1/16 'क्षयी'** राजयक्ष्माक्रान्तः **'रोगी'** कुष्ठज्वरादिमान् **'कृमिशकृद्वायसास्यः'** कृमिशकृत् कीटसंयुक्तगोमयं वायसशब्दः पक्षीमात्रोपलक्षकः निम्नोन्नत–विशोभविकटाक्षवदन इत्यर्थः। **'प्रियकलत्र'** निर्दाक्षिण्यः गुरूजनपरित्यक्तः पित्रादिभिरप्यविश्वास्यत्वादिना त्यक्तः **'स्तेन'** विश्वस्तेष्वपि चोरः **'दम्भ–शीलः'** अन्तःसारहीनो बाह्यवेषजीवी **'मूलकर्मणि प्रसक्तः'** निरीक्षण–मात्राभिलाषः **'मानापमानयोरनपेक्षी'** स्वपरपूजेतराभिलाषी **'द्वेष्यैरभि–भाव्यः'** प्रबलपरतिरस्कृतः **'विलज्जः'** बहुतरलोकापवादभीरुः **'इत्य–गम्याः'** इति एते।

**6/1/17 'रागः'** रूपलावण्यादिषु अनुरागः **'भयं:'** राजभ्यो भीतिः **'अर्थः'** स्ववांछा **'संघर्षो'** स्पर्धा **'वैरनिर्यातनं'** शौर्यं **'जिज्ञासा पक्षः'** चतुःषष्टिविद्या-परिशीलनेच्छा **'खेदः'** स्वकलत्रमौर्ख्येन खिन्नता **'धर्मः'** कृतज्ञता **'यशः'** स्वसमानेषु उदारत्वेन कीर्तिः **'अनुकम्पा'** अनुरक्तेषु दया **'सुहृद्वाक्यं'** प्रियवचनं **'ह्रीः'** समानेषु कृतघ्नतापयशोभीरुता **'प्रियसादृश्यं'** वांछितसमानाकारता **'धन्यता'** धनिकता **'रागापनयः'** स्वकलत्रविरागः **'साजात्यं'** शशमृगीत्वादि समानजातीया एकजातीया वा **'साहवेश्यं'** प्रातिवेशित्वं **'सातत्यं'** सततसान्निध्यं **'आयतिश्च'** उत्तरकाललाभः **'गमनकारणानि भवन्तीत्याचार्याः'**। गमनकारणानि सम्प्रयोगे हेतवः।

**6/1/18 'अर्थानर्थप्रतीघातः प्रीतिरिति वात्स्यायनः'।**

अर्थोऽभिमतवस्तुप्रदत्वम्, अनर्थः प्रतिभूतः अनर्थपरिहर्तृता प्रीतिः,अनुरक्तता इत्येतानि त्रिण्येव गमनकारणानीति उक्तगुणानामेकत्रासत्वेऽन्यतमपरिग्रहविषये बलवदभावत्वे दर्शयति।

**6/1/19 'अर्थस्तु प्रीत्या न बाधितः। अस्य प्राधान्यात्'।**

**6/1/20 'भयादिषु तु गुरुलाघवपरीक्षा'।**

अर्थस्तु एकस्यानिधने इतरस्यातिरागे तयोः प्रीत्या रागेण अर्थो न बाध्यः। कुतः तस्य धनस्य प्राधान्यात् मुख्याभिलाषितत्वात्परांगनायाः। भयादिषु संघर्षणादिषु मध्ये गुरुलाघवपरीक्षा उत्कर्षापकर्षविचारः कार्यः इति। 'सहायगम्यागम्य (गमन) कारणचिन्ता' गमनचिन्ता। गम्यत इति गमनं कर्मणि ल्युट्। चिन्ता तद्गतगुणदोष तद्बलाबलपरीक्षा गमनकाले कार्या।

**6/1/21 'उपमन्त्रितापि गम्येन सहसा न प्रतिजानीयात् पुरूषाणां सुलभावमानित्वात्'।**

वेश्यागम्येन उक्तगुणवत्ता उपमन्त्रिता स्वेन दासी द्वारा वा आहूतापि सहसा वक्ष्यमाणरीत्या भावपरीक्षातः पूर्वमाकारमात्रेण न प्रतिजानीयात् न संगच्छेत् तेन। कुतः पुरूषाणां यूनामपि प्रायेण सुलभावमानित्वात् सुलभां अनतिप्रयत्नलभ्याविषये अवमानितत्वात् अवमानयितृत्वात् अतो गौरवार्थिन्या भावपरीक्षा कार्या। तत्प्रकारमाह–

**6/1/22 'भावजिज्ञासार्थं परिचारकमुखान्संवाहकगायनवैहासिकान् गम्ये तद्भक्तान् प्रणिदध्यात्'।**

**6/1/23 'तदभावे पीठमर्दादीन्।**

परिचारकमुखान् तस्य ताम्बूलादिदातृप्रमुखान् संवाहकः शिविकादेः वैहासिकः परिहासकः तद्भक्तान् तस्माद्भक्तमन्नं येषां ते तदुपजीविनः तन्मित्राणि च वशयित्वा गम्ये विषये भावपरीक्षार्थं प्रणिदध्यात् नियुंज्यात्। तदभावे एतेषामवश्यत्वे पीठमर्दादीन् अन्यान् प्रणिदध्यात्।

**6/1/23 'तेभ्यो नायकस्य शौचाशौचं रागापरागौ सक्तासक्ततां धनसम्पत्तिं दानादाने'** वितरणतदभावौ।

**6/1/24 'सम्भावितेन च सह विटपुरोगां प्रीतिं जनयेत्'।**

परिचारिकादिश्च विलासिनः एतस्यां विटपुरोगां विलासदास्यगानादिगुणकथनजनितां प्रीतिसम्भावितेन च सह बहुमानेन सह जनयेत् वर्धयेत्।

**6/1/25 'लावककुक्कुटमेषयुद्धशुकसारिकाप्रलापनप्रेक्षणककलाव्यपदेशेन च पीठमर्दो नायकं तस्या उदवसितमानयेत्।**

**6/1/26 'तां वा तस्य'।**

पीठमर्दस्तदादिः तस्याः कलावत्याः लावकादीनां युद्धे योधने शुकादीनां प्रलापने कलाप्रेक्षणापदेशेन चातुर्यप्रेक्षणव्याजेन नायकं तस्या उदवसितं गृहं तां व तस्योदवसितं नयेत् अनुमत्या।

**6/1/27 'प्रीतिकौतुकजननं किंचित् द्रव्यजातं स्वयमिदमसाधारणोपभोग्यमिति प्रीतिदायं दद्यात्'।**

प्रीतेः परस्परानुरागस्य कौतुकस्य औत्कंठ्य च जनकं प्रीतिदायं प्रीतिसूचकं द्रव्यजातमपूर्वफलादि साधारणोपभोग्यं स्वमात्रानुभाव्यं इति दद्यात्।

**6/1/28 'यत्र च रमते तं गोष्ठ्यैनमुपचारैश्च रंजयेत्'।**

यत्र यस्मिन्नायके पुरा रमते रमन्ती स्थिता तं तस्य प्रतार्य एनं नवं उपचारैः ताम्बूलादिभिः।

**6/1/29 'गते च परिहासप्रायां सोपायनांश्च परिचारिकानभीक्ष्णं प्रेषयेत्'।**

गते च तस्मिन् स्वगृहात् गते सति सपरिहासप्रायान् परिहासकान् विदूषकादीन् सोपायनान् अपूर्वफलपुष्पादिहस्तान् परिचारकान् स्वदारान् अभीक्ष्णं पुनः पुनः तत्समीपं प्रीत्युद्रेकाय प्रेषयेत्।

**6/1/30 'सपीठमर्दायाश्च कारणापदेशं स्वयं वा गमनमिति गम्योपावर्त्तनम्'।**

सपीठमर्दायाः पीठमर्दसहितायाः स्वस्याः कारणापदेशं स्वर्णमालाकारादिगृहगमनव्याजेन गमनं तद्गृहं प्रति भवति गम्योपावर्तनं गम्यस्य नायकस्य स्वगृहं गतस्य औत्कंठ्योत्पादनेन पुनः स्वगृहानयनोपायाः।

अध्याय परिसमाप्तिसूचनाय श्लोकानाह –

**6/1/31 'ताम्बूलानि स्त्रजश्चैव संस्कृतं चानुलेपनम्।**
**आगतस्याहरेत्प्रीत्या कलागोष्ठीश्च योजयेत्'॥**

स्वगृहं प्रत्यागतस्य सुगन्धद्रव्यमिश्रं अनुलेपनं चन्दनादि आहरेत् दद्यात्। कलाः शुकसारिकाप्रलापनादि चतुरतां गोष्ठीः सहासविलासप्रियवचनानि योजयेत् ज्ञापयेत्।

**6/1/32 'द्रव्याणि प्रणयाद्दद्यात्कुर्याच्च परिवर्त्तनम्।**
**सम्प्रयोगस्य चाकूतं निजेनैव प्रयोजयेत्'॥**

द्रव्याणि मदकरमधुरवस्तूनि प्रणयादि परिवर्त्तनं हारादेः सम्प्रयोगस्य विषयत्वं षष्ठ्यर्थं आहरेत् आकूतं अभिप्रायं निजेनैव स्वयमेव प्रयोजयेत् प्रकटयेत्।

**'प्रीतिदायैरुपन्यासैरुपचारैश्च पेशलैः।**
**गम्येन सह संसृष्टा रंजयेत्तं ततः परम्'॥**

गम्येन सह संसृष्टा सम्प्रयुक्ता सती ततः परं अभिमतसिध्यनन्तरं पुनरागमनाय प्रीतिदायैः प्रेमप्रदेयैः उपचारैः ताम्बूलपानकादिभिः पेशलैः सरसैः उपन्यासैः वचनैः तं रंजयेत् स्थिरानुरागं कुर्यात्।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासीश्रीविश्वनाथसकलवृन्दारक–वृन्दवन्द्यमानचरणारविन्दद्वन्दमिलिन्दायमानमानसामन्दानन्दसन्दोहयशोदानन्दनविशदयशः कमलकुलभास्करभास्करनरसिंहशास्त्रिविरचितवात्स्यायनसूत्रवृत्तौ षष्ठेऽधिकरणे प्रथमोध्यायः।**

अध्याय – 2

# कान्तानुवृत्तप्रकरणम्

उपजीवकत्वसंगतिं सूचयितुं वृत्तं कीर्त्तयति गम्यचिन्ता गमनकारणानि उपावर्त्तन–विधिरिति आदित एकोनत्रिंशः।

**6/2/1 'संयुक्ता नायकेन च तद्रंजनार्थं एकचारिणीवृत्तमनुतिष्ठेत्'।**

तद्रंजनार्थं तस्य स्वस्या रागस्थैर्यार्थं एकचारिणीवृत्तं तदेकलपटत्वं अनुतिष्ठेत् तस्य ज्ञापयेत्।

**6/2/2 'रंजयेन्न तु सज्जेत सक्तवच्च विचेष्टेतेति संक्षिप्तोक्तिः'।**

रंजयेत्तस्यैव स्वस्यां प्रीतिं वर्धयेत् न तु सज्जेत स्वयं तस्मिन् अनुरक्ता न भवेत्। सक्तवच्च असाधारणानुरागवतीव विचेष्टेत् तस्मिन् व्याप्रियेत इति एवं संक्षेपोक्तिः।

वक्ष्यमाणस्य विवृणोति –

**6/2/3 'मातरि क्रूरशीलायामर्थपरायां चायत्ता स्यात्'।**

मातरि स्वस्याः अर्थपरायां नायकादर्थाभिलाषिण्यां क्रूरशीलायां तदलाभे परूषावलोकनादिमत्यां सत्त्यां आयत्ता स्यात् तदधीनतां सूचयेत्।

**6/2/4 'तदभावे मातृकायाम्'।**

तदभावे साक्षान्मात्राभावे मातृकायां उपमात्रादे क्रूरेत्याद्यनुवर्त्तते।

**6/2/5 'सा तु गम्येन नातिप्रियेत'।**

सा मात्रादिः अनुगम्येन दुहित्रा सह सकृत्संयुक्तेन नातिप्रियेत अभिमतधनालाभे अनतिप्रीतेव वर्त्तेत।

**6/2/6 'प्रसह्य दुहितरमानयेत्'।**

तेन तदज्ञाने ज्ञात्वाप्यादाने दुहितरं तस्मिन्ननुरक्तां इवस्थितां प्रसह्य तदसंमत्येव बलात् आनयेत् स्वनिवासगृहं प्रापयेत्।

**6/2/7 'तत्र तु नायिकायाः सततमरतिनिर्वेदो भयं ब्रीडा'।**

**6/2/8 'न त्वेव शासनातवृत्तिः'।**

तत्र मातृगृहे अरतिः स्रगादिष्वरूचिः निर्वेदः दुःखादिना सर्वत्र विफलत्वधीः। तदुक्तं प्रतापरूद्रीये –

**PRYB-P. 243 'दुःखेर्ष्यातत्त्वबोधादेर्निर्वेदो निष्फलत्वधीः'। इति।**

भयं रौद्रं सन्दर्शनादिभिरनर्थाशंसनं ब्रीडा चेतः संकोचनं ब्रीडा अनंगरागत्त्वादिभिः न त्वेवं शासनातिवृत्तिः भवदाज्ञानुल्लंघनं च सततं भवतीति।

**6/2/9 'अजुगुप्सितमनिन्दितं व्याधिं'** मनस्तापाद्यभिभवाज्वरादिर्व्याधिरूच्यते **'अचक्षुर्ग्राह्यमनित्यं'** अप्रत्यक्षहेतुकं अनित्यं चपलता चापल्यं त्वनवस्थानं रागद्वेषादिसम्भवं इदमुन्मादमूर्च्छादीनामुपलक्षणम्। अवस्था नायकपुरतश्चेटी ख्यापयेत् कथयेत्।

**6/2/10 'सति कारणे तदपदेशेन च नायकानभिगमनम्'।**

सति कारणे एतादृशगमननिमित्ते सत्यपि अपदेशेन केनचित् व्याजेन नायकाभिगमनम्। नायको नायाति चेत् तदा –

**6/2/11 'निर्माल्यस्य तु नायिका चेटिकां प्रेषयेत्ताम्बूलस्य च'**

निर्माल्यस्य नायकनिर्माल्यताम्बूलस्य च तथाभूतस्य आनयनाय चेटिकां दासीं एवंविध नायकौत्कंठ्यश्रवणद्रवीभूतहृदयस्य नायकस्य समागमने सति –

**6/2/12-13 'व्यवाये तदुपचारेषु विस्मयः। चतुःषष्ठ्यां शिष्यत्वम्'।**

व्यवाये क्रमेणोभयोः सम्प्रयोगे सति तदुपचारेषु नायककृतवीजनगन्धताम्बूलादिदानरूपेषू विस्मयः। अपूर्वार्थसन्दर्शनाच्चित्तविस्माररूपः चतुःषष्ठ्यां दन्तनखक्षतादिचतुःषष्ठिविद्यासु शिष्यत्वम्।

तदेवाह –

**6/2/14 'तदुपदिष्टानां च योगानामाभीक्ष्येन प्रयोगः'।**

तदुपदिष्टानां तेन प्रथमतः कृतानां योगानां उक्तचतुःषष्टिविद्यानामाभीक्ष्येण पौनःपुन्येन प्रयोगः करणम्।

**6/2/15 'तस्य सात्म्यप्रयोगाद्रहसि वृत्तिः'।**

**6/2/16 'मनोरथानामाख्यानम्'**

तस्य नायकस्य रहसि सात्म्यप्रयोगात् करजरदनक्षतादेः समानप्रयोगं कृतप्रतिकृत्वा ल्यब्लोपे पंचमी वृत्तिवर्त्तनं मनोरथानां अभिमतभूषणवस्त्रादीनां आख्यानं प्रदेयकत्वं न प्रकटनम्।

**6/2/17 'गुह्यानां च वैकृतानां प्रच्छादनम्'**

गुह्यानामुपस्थानादीनां वैकृतानां क्षतकुचादीनां प्रच्छादनं वस्त्रादिना दुर्लभीकरणमिति यावत्।

**6/2/18 'शयने परावृत्तस्यानुपेक्षणम्'।**

**6/2/19 'चानुलोम्यं गुह्यस्पर्शने'।**

**6/2/20 'सुप्तस्य चुम्बनमालिंगनं च'।**

क्रोधात् शयनात् परावृत्तस्य निर्गमनेच्छोरनुपेक्षणं आलिंगनादिना पुनरुपवेशनं आनुलोम्यतः ततः पुनरभिमुखीकरणं। सुप्तस्य निद्रितप्रायस्य चात्पादसंवाहनादिना रागप्रदर्शनं कृत्वाभिमतं साधयेत्।

प्रकारान्तरमाह –

**6/2/21 'प्रेक्षणमन्यमनस्कस्य'** अन्यमनस्कस्य वस्त्वन्तरावलोकनस्थिरीभूतमुखादेः प्रेक्षणं सादरावलोकनं।

**6/2/21 'राजमार्गेऽपि प्रासादस्थायास्तत्र विदिताया व्रीडा शाठ्यनाशः'।**

प्रासादस्थायाः सौधस्थितायाः राजमार्गेण गच्छतः प्रेक्षणं तत्र तदा विदितायाः तेन पुनर्निरीक्षितायाः व्रीडा शाठ्यनाशः व्रीडा सहसावलोकनादौ मन्दाक्षं शाठ्यं धाष्ट्र्यं तयोर्नाशः त्यागः।

6/2/22 **'तद्द्वेष्ये द्वेष्यता'** तद्द्वेष्ये नायकशत्रौ द्वेष्यता शत्रुत्वं, **'तत्प्रिये प्रियता'** नायकमित्रे प्रियता स्वस्या अपि मैत्री, **'तद्रम्ये रतिः'** तद्रम्ये तदिष्टवस्तुनि रतिः रुचिः, **'तन्मनसो वा शोकहर्षाभ्यां शोकहर्षौ'** तन्मनसो नायकचित्तस्य शोकहर्षौ प्रियवस्तुयोगवियोगाभ्यां क्लेशप्रमोदौ दर्पोहर्षः, **'स्त्रीषु जिज्ञासा'** स्त्रीषु परेषां जिज्ञासा एतस्य रागपरिशीलनं विनिवर्त्तनायेति शेषः, **'कोपश्चादीर्घः'** कोपः प्रणयकलहः दक्षिणत्वप्रयुक्तो वा अदीर्घः क्षणिकः।

6/2/23 **'स्वकृतेष्वपि नखदशनचिह्नेष्वन्याशंका'।**

स्वकृतेषु तदंगेषु स्वया कलितेषु अन्यशंका परकान्ताकृतत्वसन्देहवचनं असाधारणानुरागविषयत्वसूचनाय।

6/2/24-25 **'अनुरागस्यावचनमाकारतस्तु दर्शयेत्'।**

अनुरागस्य स्वस्याः परप्रेम्णः अवचनं मुखतोऽनुक्तिः किं तु आकारतः हावभावादिविलासैः उक्तैर्वक्ष्यमाणैश्च दर्शयेत् ज्ञापयेत् स्वप्रेम।

6/2/26 **'मदस्वप्नव्याधिषु निर्वचनम्'।**

मदः पानादिना मत्तता स्वप्नो जागरितसंस्कारजः प्रत्ययस्य विषयः व्याधिरामयः एषु एतद्व्याजेन निर्वचनं रागस्य।

6/2/27 **'श्लाघ्यानां प्रशस्तानां नायकगुणानां'।**

चतुःषष्टिविद्याभिज्ञत्वौदार्यादीनां कस्यांचित् गोष्ठ्याम्।

6/2/28 **'तस्मिन् ब्रुवाणे'** प्रवक्तरे सति **'वाक्यार्थग्रहणं'** तेषां मनसि धारणं **'तदवधार्य प्रशंसाविषये च भाषणम्। तद्वाक्यस्य चोत्तरेण योजनम्'** तद्वाक्यस्य तदुक्तप्रशंसावचनस्योत्तरेण योजनम् अनुमोदकप्रत्युत्तरकथनं तदवधार्य तदुक्तार्थं मनसि धृत्वा प्रशंसाविषये स्तवनप्रसंगे भाषणं गुणवर्णनं।

6/2/28 **'भक्तिमांश्चेत्'।**

6/2/29 **'कथास्वनुवृत्तिरन्यत्र सपत्न्याः'।**

कथासु प्राचीननायकवृत्तान्तश्रवणे भक्तिमान् रुचिमांश्चेत् सपत्न्या अन्यत्र तस्य सपत्नीसंयोगकथनं विना विलासानामनुवृत्तिः कथनं कार्या।

**6/2/30 'निःश्वासे जृम्भिते स्खलिते पतिते भिन्ने वा तस्यार्त्तिमाशंसीत'।**

निःश्वासे आर्त्तिसूचकाधिकश्वासे मुखतो निर्गते ससूत्कारे जृम्भिते जरीजृम्भणे स्खलिते पादस्खलने पतिते पतने भिन्ने अंगुल्यादेर्ग्रावाभिघाते अनार्तिं क्षेममाशंसीत भूयादित्याशीर्वादं श्रावयेत्।

**6/2/31 'क्षुतव्याहृतविस्मितेषु जीवेत्युदाहरणम्'।**

क्षुतं शैत्यादिजप्राणादिवृत्तिनिरोधान्नासिकानिसृतसशब्दवायुनिःसरणविशेषः। व्याहृतं उच्चैरधिकभाषणं विस्मितं अधिककालमट्टहासः उदाहरणं श्रावणम्।

**6/2/32 'दौर्मनस्ये व्याधिदौहृदस्यापदेशः'।**

दौर्मनस्ये मनस्तापे व्याधावामये च सति स्वस्या अपि दौहृदस्य मनस्तापस्य व्याधेश्चापदेशः आरोपणेन वर्त्तनम्।

**6/2/33 'गुणतः परस्याकीर्त्तनम्'।**

गुणत एतदपेक्षयाधिकगुणवत्वेनाकीर्त्तनं एतत्समक्षम्।

**6/2/34 'न निन्दा नायकस्य समानदोषस्य'।**

**6/2/35 'दत्तस्य स्मरणम्'।**

दत्तस्य तेनकृतस्य समानदोषस्य अभिमतनखक्षतादेः स्मरणं मुहुर्मुहुः।

**6/2/36(*) 'स्वयं कृतेऽपराधे भयं'** कृते तस्मिन् अपराधे अधिकरदादिक्षतरूपे भयं भीतिं **'तत्कृते पीडां दर्शयेत्'** तत्कृते नायककृते अधिके **'राजोपरोधे, व्याध्युपरोधे तद्व्यसने चालंकारस्याग्रहणं'** राजोपरोधे राजकृतनिर्बन्धे तद्व्यसने धनहान्यादिना अग्रहणं विक्षेप। सूचनाय **'अभोजन'** च तत्प्रायता

**6/2/37 'तद्युक्ताश्च विलापाः'**

नायकविषयक सरोदनदीनोक्तिः।

---

* This sutra in the published text runs as follows-

'वृथापराधे तद्व्यसने वालंकारस्याग्रहणमभोजनं च'।

The Sutra in the text of Praudhapriya adds the following dimensions

(i) स्वयं कृतापराध (ii) नायककृतापराध (iii) राजोपरोध and व्याध्युपरोधे।

स्वयं कृतेऽपराधे भयं, तत्कृते पीडां दर्शयेत्। राजोपरोधे व्याध्युपरोधे तद्व्यसने चालंकारस्याग्रहणं अभोजनम्।

6/2/38 **'तेन सह देशमोक्षणं रोचयेत्'।** रोचयेत् कथयेत् **'राजनि निष्क्रयं'** राज्ञो मां वा विक्रीय विमुक्तो भव।

6/2/39 **'नास्तिक्यमायुषोऽधिगच्छेत्तदवाप्तौ साफल्यं तु'।**

आयुषो जीवनस्य नास्तिक्यमनिच्छां अधिगच्छेत् नायकानवाप्तौ ब्रूयात् तत्तदवाप्तौ साफल्यं जन्मनः कथयेत्।

6/2/40 **'तस्यार्थागमेऽभिप्रायसिद्धौ शरीरोपचये च पूर्वसम्भाषितदेवतोपहारः'।**

तस्य नायकस्यार्थागमेऽर्थलाभेऽभिप्रायसिद्धौ राजसम्मानादिमनोरथसिद्धौ शरीरोपचये रूग्णस्य शरीरपुष्टौ पूर्वसम्भाषितः पूर्वमलाभकाले सम्भाषितः लाभे इदं करिष्यामीति प्रतिज्ञातः देवतोपहारः देवतोत्सवः कार्यः।

6/2/41 **'नित्यमलंकारयोगः'।**

नित्यं तदीक्षणसमये प्रत्यहं अलंकारयोगः अलंकरणमंगस्य।

6/2/41 **'परिमितोऽभ्यवहारः'।**

स्निग्धस्य स्निग्धः घृतक्षीरादियुक्तः परिमितः स्वल्पौदनसूपादिसम्बन्धी अभ्यवहारो भोजनम्।

6/2/42 **'गीते च नामगोत्रयोर्ग्रहणम्'।**

गीते गेयहृद्यगद्यपद्यादौ नामगोत्रयोः अभिधानं वंशबोधकपदयोर्ग्रहणं ग्रथनम्।

6/2/42 **'ग्लान्यामुरसि ललाटे च करं कुर्वीत'।**

ग्लान्यां धनशरीरादिप्रयुक्तविक्षेपे करं सवेगं कुर्वीत स्ववक्षोललाटताडनेन खेदमभिनयेदित्यर्थः। यद्वा तदीय वक्षोललाटादौ स्वीयकरपल्लवं मृदु न्यसेत्तच्छान्तयेऽत्यर्थः।

6/2/42 **'तत्सुखमुपलभ्य निद्रालाभः'।**

तत्सुखं तस्य सुखं सन्तोषमुपलभ्य मुखविलासादिनानुमायैव निद्रालाभः स्वपेत।

6/2/43 **'उत्संगे चास्योपवेशनं'*** उल्लाससमये। **'गमने च वियोगे'** देशान्तरगमने।

---

* 'स्वपनं च।' is found additionally in this Sutra, in the published version of Kama Sutra.

**6/2/44 'तस्मात्पुत्रार्थिनी स्यात्'। तथा कथयेत् तत्पुत्रः इति शेषः। सर्वत्र यथायोग्यं।**

**6/2/44 'आयुषो आधिक्यं जीवनं नेच्छेत्' न स्पृहयेत्।**

**6/2/45 'एतस्यानभिज्ञातमर्थं रहसि न ब्रूयात्'।**

अनभिज्ञातमर्थं अविदितहितकार्यं।

**6/2/46 'व्रतमुपवासं चास्य निवर्त्तयेत् मयि दोष इति। अशक्ये स्वयमपि तद्रूपा स्यात्'।**

दोषः अकरणे प्रत्यवायं मयि मम स्यात् इति उक्त्वा व्रतं एकभक्तादि उपवास एकादश्यादौ। व्रतादि कर्त्रीव परिदृश्येत्।

**6/2/47 'विवादे न शक्यमित्यर्थनिर्देशः'।**

विवादे क्रीडनचातुर्याभिमाने न शक्यं तवेवमनेनेति ब्रूयात्।

**6/2/48 'तदीयात्मीयतो विशेषेण पश्येत्'।**

तदीय वस्त्वादि आत्मीयतः स्वीयवस्तुना सहाविशेषेण समान रागेण।

**6/2/49 'तेन विना गोष्ठ्यादीनामगमनमिति'।**

गोष्ठ्यादीनां नटविटगायकादिकथानां श्रावणाय।

**6/2/50 'निर्माल्यधारणे श्लाघा'।**

तद्भुक्तमाल्यादिधारणे श्लाघा श्रद्धा।

**6/2/50 'उच्छिष्टभोजने च'।**

चात् तत्पीतपानीये।

**6/2/51 'कुलशीलविद्याज्ञातिवर्णवित्तमित्रदेशगुणवयोमाधुर्यपूजा'।**

कुलं वंशः शीलं वृत्ति विद्या चतुःषष्टिकलाः ज्ञातिः भ्रात्रादिः वर्णो ब्राह्मणत्वादि वित्तं धनधान्यादिः मित्रं प्रियसखादिः देश आर्यावर्त्तादि गुणमौदार्यादिः वयस्तारूण्यादिः माधुर्यं रसवचनत्वादिः एषां पूजा प्रशंसनम्।

**6/2/52 'गीतादिषु चोदनमभिज्ञस्य'।**

अभिज्ञस्य गानादिकुशलस्य सिद्धये गीतादिषु आदिना नाट्याभिनयादि परिग्रहः चोदनं प्रेरणं प्रोत्साहनमिति यावत्।

**6/2/53 'भयशीतोष्णवर्षाण्यनपेक्ष्य तदभिगमनम्'।**

भयं चोरादेः भयादिना तदनागमने अनपेक्ष्य अविचार्य।

**6/2/54 'स एव मे स्यादित्यौर्ध्वदेहिकेषु वचनम्'।**

और्ध्वदेहिकेषु जन्मान्तरेष्वपि स एव भवानेव स्यात्पतिः भवतु।

**6/2/55 'तदिष्टरसभावशीलानुवर्त्तनम्'।**

रसः विभावाद्यभिव्यक्तरत्यादि स्थायीभावः श्रृंगारादिरूपः भावः नयनकरादिचेष्टाः लीलाकन्दुकादिक्रीडा अनुवर्त्तनं करणम्।

**6/2/56*'मूलकर्माभिशंका'।**

**6/2/57 'तदभिगमने जनन्या सह नित्यो विवादः'।**

तदभिगमने नायकसम्प्रयोगविषये विवादः भवतीति ख्यापयेत्।

**6/2/58 'बलात्कारेण यद्यन्यत्र तया नीयते तदा विषमनशनं शस्त्रं रज्जुमिति कामयेत्'।**

तया मात्रा बलात्कारेण निर्बन्धेन अन्यत्र ग्रामान्तरे यदि नीयते तदा विषादिकं गृहीत्वा प्राणवियोगं कामयेत् वांछतीति ख्यापयेत्।

**6/2/59 'प्रत्यायनं च प्रणिधिभिर्नायकस्य'।**

कदाचिदनागमने प्रणिधिभिः सखीभिः प्रत्यानयनं आनयनं वा।

**6/2/59 'स्वयं वा चात्मनो वृत्तिग्रहणम्'।**

**6/2/60 'न त्वेवार्थेषु विवादः'।**

---

* Sutra no. 6/2/56 'मूलकर्माभिशंका' has been skipped in BNS's work.

**6/2/61 'मात्रा विना न किंच्चिचेष्टेत'।**

वृत्तिग्रहणं भावादिभिर्वशीकरणमेव अर्थेषु धनादिदानविषये मात्रा सह विवादो न कार्यः। विना मातरं किंचित् क्रूरदृष्ट्यादिकमपि न चेष्टेत न कुर्यात्।

**6/2/62 'प्रवासे शीघ्रागमनाय शपथदानम्'।**

प्रोषिते सति पूजादेवतादेः नियमः।

**6/2/63 'प्रोषिते पूजानियमश्चालंकारस्य प्रतिषेधो। मंगलं चापेक्षं'।***

प्रवासे देशान्तरगमनकाले शपथदानं शापनं। प्रोषिते गते सति पूजा देवतादेः नियमः। अशनादेः अलंकारस्य स्रगादेः मंगलं क्षेममपेक्ष्यं सम्प्रार्थ्यम्।

**6/2/64 'स्मरणमतीतानां गमनमीक्षणिकोपश्रुतीनां'**

अतीतानां नायकवचनादीनां ईक्षणिकाः शकुनद्रष्टारः उपश्रुतयः प्रश्नकथकाः तेषां गृहं प्रति।

**6/2/64 'नक्षत्रसूर्यचन्द्रताराभ्यः स्पृहणम्'।**

नक्षत्रं जन्मर्क्षं तारा जन्मसम्पदादि ज्योतिःशास्त्रप्रसिद्धसंज्ञाविशेषः। एतदानुकूल्यविचारणेन स्पृहणम् आगमनवांछनम्।

**6/2/65 'इष्टस्वप्नदर्शने तत्संगमो ममास्त्विति वचनम्'।**

इष्टस्वप्नदर्शने शुभसूचकस्वप्ने सति अस्तु एतत्फलम् वचनं ब्रूयात्।

**6/2/66 'उद्वेगोऽनिष्टे शान्तिकर्म च'।**

अनिष्टे तत्सूचकस्वप्ने सति उद्वेगो विक्षेपः शान्तिकर्म तद्दोषनिवर्त्तकग्रहपूजादिकार्यम्।

**6/2/67 'प्रत्यागते कामपूजा'।**

प्रत्यागते पुनरागमने कामपूजा प्रतिमादौ मनोभवपूजनम्।

**6/2/68 'देवतोपहारः' प्रतिश्रुतसुरामांसादिदानम्।**

---

* 'एकं शंखवलयं वा धारयेत्' appears additionally in this sutra in the published version of Kama Sutra.

**6/2/69 'सखीभिः पूर्णपात्रग्रहणम्'।**

पूर्णपात्रग्रहणं गन्धपुष्पादि मंगलद्रव्यपरिग्रहो दानं च।

**6/2/70 'वायसपूजा च'।**

वायसपूजा काकबलिः चात् गृध्रादीनाम्।

**6/2/71 'प्रथमसमागमानन्तरं चैतदेव वायसपूजावर्जम्'।**

तरूणी प्रथमसमागमेऽपि एतद् कामपूजादि कार्यम्।

**6/2/72 'शक्तस्य चानुसरणं ब्रूयात्'।**

शक्तस्य वक्ष्यमाणस्य अनुकरणं सह कामपूजानुष्ठानं कार्यमिति ब्रूयात् कथयेत्।

**6/2/73 'निसृष्टभावः समानवृत्तिः प्रयोजनकारी निराशंको निरपेक्षोऽर्थेष्विति शक्तलक्षणम्'**

निसृष्टभावः अत्यन्तलग्नचित्तः समानवृत्तिः तुल्यस्वभावः प्रयोजनकारी आज्ञाकारी निराशंकः निर्भीकः निरपेक्ष उदारः।

**6/2/74 'तदेवं निदर्शनार्थं दत्तकशासनादुक्तम्। चानुशीलयेत् लोकात्।**

दत्तकशासनात् दत्तकेनोक्तशास्त्रानुसारात् तदेवं पूर्वोक्तं सर्वं निदर्शनार्थं दिक्प्रदर्शनार्थं। अनुक्तंच अकथितमपि लोकात् तद्व्यवहारात् अनुशीलयेत् गृह्णीयात्।

**6/2/74 'पुरूषप्रकृतेश्च'** तत्तत्पुरूषस्वभावानुसारेण तत्तदुपायान् प्रयुंजीत धनलाभायाननुरक्तापि सत्वानतिप्रौढस्वभावत्वाद्भावमज्ञात्वापि मोहितो धनं दिशतीत्यर्थः।

तद्भावस्य दुर्विज्ञेयत्वमेवाह –

**'सूक्ष्मत्वादतिलोभाच्च प्रकृत्याज्ञानतस्तथा।**
**6/2/75 कामलक्ष्म तु दुर्ज्ञानं स्त्रीणां तद्भावितैरपि'।**

स्त्रीणां कामलक्ष्म अनुरागादिः तद्भावितैरपि तत्परिशीलयितृभिरपि दुर्ज्ञानं दुर्ज्ञेयं। कुतः सूक्ष्मत्वात् उत्कटस्यापि तस्यातिगूढत्वात् अतिलोभात् बहुकामगुणापेक्षितत्वात् प्रकृत्याज्ञानतः दुर्विज्ञेयस्वभावत्वात्। दुर्विज्ञेयत्वमेवाह –

**6/2/76 'रज्यन्ते रमयन्त्यश्च रंजयन्ति त्यजन्ति च।**
**कर्षयन्त्यपि सर्वार्थान् ज्ञायन्ते नैव योषितः'॥**

रज्यन्तेऽनुरक्ता इव व्यवहरन्ति रमयन्त्यः स्वस्वानुरक्तान् कुर्वन्त्यः सत्यः रंजयन्ति क्रीडादिभिरनुमोदयन्ति सर्वार्थान् धनकनकवस्तुवाहनादीन् कर्षयन्ति ततः त्यजन्ति न पश्यन्ति अतः नैव ज्ञायन्ते दुर्विज्ञेयभावा इत्यर्थः।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासीसर्वतन्त्रस्वतन्त्रपंडित-मंडलमंडितपांडित्यांखंडचंडिमोद्दंडश्रीसर्वेश्वरसूरिवरमुख्यशिष्यकृतिवरकृत-कृतिगुणानभिज्ञपंडितमन्यखलकुलतमस्ततिचंडभास्करभास्करनरसिंहशास्त्रि-विरचिते वात्स्यायनसूत्रवृत्तौ षष्टेऽधिकरणे द्वितीयोऽध्यायः।**

अध्याय – 3

# अर्थागमोपायप्रकरणम्

एवं वशीकरणोपायानुक्त्वा अवसरसंगत्या धनाकर्षणोपायानाह– कान्तानुवर्त्तनं नामादितः त्रिंशः कान्तस्यानुवर्त्तनं वशीकरणोपायानुक्त्वा धनार्जनोपायानुच्यन्ते इति शेषः।

**6/3/1 'सक्तात्स्वाभाविकं वित्तादानमुपायतश्च'।**

सक्तात् वशीकृतधनिकात् वित्तादानं गृह्यमाणवित्तं स्वाभाविकमुपायतः यौक्तिकं चेति द्विविधम्।

**6/3/2 'तत्र स्वाभाविकं संकल्पितं'**

संकल्पितं स्वाभाव्यात् तेन दत्तमाद्यं द्वितीयं तूक्तमेव।

**6/3/2 'तत्समधिकं वा लभमाना नोपायान् प्रथमं युंजीतेत्याचार्याः'।**

तत्संकल्पितं समधिकं वा ततो यत्किंचिदधिकं वा लब्धा सती उपायान् सर्वाकर्षणाय न प्रयुंजीत न कुर्यात्।

**6/3/3 'विदितमप्युपायैः परिष्कृतं द्विगुणं दास्यतीति वात्स्यायनः'।**

विदितं संकल्पितमपि धनं उपायैः सन्तुष्टः परिष्कृतं वस्त्रालंकाराद्युपकरणयुतं द्विगुणं वा दास्यतीत्यत उपायान् प्रयुंजीतैव।

**6/3/4 'अलंकारभक्ष्यभोज्यपेयमाल्यवस्त्रगन्धद्रव्यादेस्तद्व्यवहारेषु कालिकं विस्रम्भार्थं अर्थात् प्रतिनयनम्'।**

गन्धद्रव्यं चन्दनमादिनाताम्बूलादिग्रहः तस्यार्थान् धनं नीत्वा प्रतिनयनं आनयनं तदीयैः विस्रम्भार्थं नायकप्रत्ययार्थं कालिकं तत्समक्षं तद्व्यवहारेषु अलंकारादिविक्रेतृभिः कार्यम्।

6/3/5 **'तत्समक्षं तद्वित्तप्रशंसा'।**

तत्समक्षं नायकसन्निधौ तद्वित्तं तद्दत्तालंकारादि।

6/3/6 **'व्रतवृक्षारामदेवकुलतडागोद्यानोत्सवप्रीतिदायव्यपदेशः'।**

व्रतं कामदेवपूजा वृक्षोत्सवः अश्वत्थविवाहादिः आरामोत्सवो वनप्रतिष्ठा देवकुलोत्सवः देववृन्दस्य रथप्लवोत्सवादिः तडागोत्सवः तत्प्रतिष्ठापनं उद्यानोत्सवः तत्रत्य क्रीडा एषु प्रीत्या सन्तोषेण नटविटादिभ्यो देयवस्त्रादेः व्यपदेशः कथनं प्रणिधिभिः निवेदितव्यं इत्यग्रिमेणान्वयः। एवमुत्तरत्रापि

6/3/7 **'तदभिगमननिमित्तारक्षिभिश्चौरैर्वालंकारपरिमुष्टिः'**

रक्षिभिः वनपालादिभिः तदभिगमनं निमित्ता वृक्षारामादिगमनकालिका परिमुष्टिः उल्लुंठनं कृतेति कथयेत्।

6/3/8 **'दंडात् कुड्यच्छेदात् प्रमादात् भवनेऽर्थनाशः'।**

दंडात् राजकृतात् कुड्यच्छेदात् तत्पातात्।

6/3/9 **'तथा याचितालंकाराणां'** परिचितेभ्यः **'नायकालंकाराणां'** तद्दत्तानां च चोरादिभ्यो नाशः **'तदभिगमनार्थस्य'** तदारामादि **'व्ययस्य'** बहुलस्य **'प्रणिधिभिः'** सखीभिः **'निवेदनम्'** परोक्षतया नायक प्रति ज्ञापनं कार्यम्।

6/3/10 **'तदर्थमृणग्रहणं'** तदर्थं पुनरलंकाराद्यर्थं **'जनन्या सह तदुद्भवस्य व्ययस्य विवादः'।**

तदुद्भवस्य उत्सवादिनिमित्तकस्य व्ययस्य तन्निमित्तकः प्रणधिभिः श्रावणीयः।

6/3/11 **'सुहृदां कार्येषु अनभिगमनं'।**

सुहृदां स्वमित्राणां कार्येषु व्यसनोत्सवादिषु अनभिगमनं धनहानिखेदेन।

6/3/12 **'तैश्च पूर्वमाहृता गुरवोऽभिहाराः पूर्वमुपनीताः पूर्वं श्राविताः स्युः'।**

अभिहारहेतौ स्वगृहे वासन्तिकाद्युत्सवप्राप्तौ सत्यां पूर्वं स्वाभिमतं विनापि तैः नायकीयैः प्रणिधिभिः आहूताः पूजार्थमाकारिताः अश्रावितापि स्वां प्रतिनायकेनानुक्ता अपि जना गुरव इव पूर्वं धनहानेः पूर्वमिव अभिहार्याः कृच्छ्रेण पूज्याः।

**6/3/13 'उचितानां क्रियाणां विच्छित्तिः'।**

उचितानां अवश्यकर्त्तव्यानामपि क्रियाणां स्वाहूतमित्रपूजादीनां गन्धवस्त्रादिधारणादीनां वा आदौ व्युच्छित्तिः पूर्ववदकृतिः।

**6/3/14 'नायकार्थं च शिल्पिषु कार्यम्'।**

नायकार्थं नायकसन्तोषाय शिल्पिषु तदभिमतचित्रलेखकेषु कार्यं पूजनं विधेयं ऋणं कृत्वा।

**6/3/15 'वैद्य महामात्रयोरूपक्रिया कार्यहेतोः'।**

वैद्यमहामात्रयोः वैद्यः चिकित्सकः महामात्रो राजकीयः तयोरूपक्रिया उपचारः पूर्ववत्कृच्छ्रेण कार्या कार्यहेतोरुभयहितार्थे।

**6/3/16 'मित्राणां चोपकारिणां व्यसनोत्सवेषु अभ्युपपत्ति'।**

मित्राणां नायकस्य अभ्युपपत्तिः गृहाभिगमनं कार्यम्।

**6/3/17 'गृहकर्म सख्याः पुत्रस्योत्संजनं दोहदो व्याधिर्मित्रस्य दुःखापनयनम्'।**

गृहकर्म गृहस्य शिथिलस्य कर्म नवीकरणम् उत्संजनं विवाहाद्युत्सवः दोहदः शरीरपुष्टीकररसायनादिः व्याधिर्ज्वरादिः दुःखापनयनं पुनर्विवाहादिना प्रणिधिभिर्निवेदयेदिति पूर्वेणान्वयः।

**6/3/18 'अलंकारैकदेशविक्रयो नायकस्यार्थे'।**

**6/3/19 'तया शीलितस्यालंकारस्य भांडोपस्करस्य वा वणिजो विक्रयस्यार्थे दर्शनम्'।**

तया नायिकयैव शीलितस्य अर्थे अपेक्षितगन्धताम्बूलादिविक्रयणायविक्रयः क्रयणं तत्समक्षं नायकेन पूर्वज्ञातस्यालंकारस्य भूषादेः अलंकारैकदेशस्य वा भांडोपस्करस्य वा गृहपात्रपरिकरादेर्वा नायकस्यार्थे तदपेक्षितसुवस्त्रगन्धद्रव्यादिविषये नायकसमक्षं विक्रयः क्रयणं वणिजः सकाशात् विक्रयस्यार्थे स्वविक्रयणार्थं दर्शनं नायकं प्रति प्रदर्शनमपि कार्यम्।

**6/3/20 'प्रतिगणिकानां च सदृशस्य भांडस्य व्यतिकरे प्रतिविशिष्टस्य ग्रहणम्'।**

प्रतिगणिकानां सजातीयवेश्यानां व्यतिकरे उत्सवादौ समवाये सति प्रतिविशिष्टस्य

बहुमूल्यस्य सदृशस्य मनोहरस्य भांडस्य अलंकारविशेषस्य ग्रहणं ताभ्यः स्वीकृत्य स्वयं धृत्वा गोष्ठ्यामेतस्य प्रदर्शनम्।

**6/3/21 'पूर्वोपकाराणामविस्मरणं नित्यमनुकीर्तनं च'**

पूर्वोपकाराणां पुरादत्तवस्त्रालंकारादीनां अविस्मरणं स्मरणं तत्समक्षं अनुकीर्त्तनम्

**6/3/22** तदीयानां **'प्रणिधिभिः प्रतिगणिकानां लाभातिशयं श्रावयेत्'।**

प्रतिगणिकानां स्वसमानपण्यस्त्रीणां लाभातिशय तत्प्रतिभटनायकादधिकलाभं प्रणिधिभिः प्रतिनायकं प्रति।

**6/3/23 'तासु नायकसमक्षमात्मनोऽभ्यधिकलाभं भूतमभूतं वा व्रीडिता नाम वर्णयेत्'।**

स्वयमपि आत्मापेक्षया तासु सम्बन्धिवासरवनितानामधिकलाभं भूरिधनप्राप्तिं भूतं जातं अभूतं भाविनं वा नायकसमक्षं व्रीडिता चारुहासलज्जावती सती।

**6/3/24 'पूर्वयोगिनां तु लाभातिशयं येन पुनः सन्धाने यतमानानामाविष्कृतः प्रतिषेधः'।**

पूर्वयोः पूर्वसंयुक्तनायकानां स्वल्पदानेन निराकृतानां लाभातिशयेन बहुद्रव्यदानेन पुनः सन्धाने पुनरपि सम्प्रयोगे यतमानानामपि स्वमात्रादिद्वारा प्रतिषेधो निराकरणं आविष्कृतः तत्सन्निधौ प्रणिधिभिः प्रकटितः कार्यः।

**6/3/25 'तत्स्पर्धिनां त्यागयोगिनां निदर्शनम्'।**

तत्स्पर्धिनां नायकविरोधिनां भूरिदानेन याचतामपि त्यागयोगितायाः निराकृते निदर्शनं कथनं।

**6/3/26 'न पुनरेष्यतीति बालयाचितकमत्यर्थाधिगमोपायाः'।**

एतत् वस्त्रालंकारादि अपूर्वं पुनः नेष्यति न मिलतीति बालवद्दैन्येन याचयेत्। धनग्रहणोपायमुक्त्वा तद्धेतु भावग्रहोपायान् व्यतिरेकमुखेनाह–

**6/3/27 'विरक्तं च नित्यमेव मनः प्रकृतिविक्रियातो मुखवर्णाच्च विद्यात्'।**

नित्यं सर्वदा प्रकृतिः शरीरस्य विक्रियातः करचरणविलक्षणविक्षेपादिना मुखवर्णादप्रसन्नत्वादेः मनः अस्य विरक्तं मयि रागहीनं इति विद्यात्।

मन इत्याद्युत्तरत्रानुषज्यते।

**6/3/28 'ऊनमतिरिक्तं वा ददाति'।**

अतिरिक्तमधिकं प्रतिज्ञाय ऊनं ददातिचेत्।

**6/3/29 'प्रतिलोमैः लोकैः सम्बध्यते'।**

प्रतिलोमैः भूरिदानानपेक्षिनीचजातिभिः सम्बध्यते।

**6/3/30** संयुक्तो यदि **'व्यपदिश्यान्यत्करोति'** व्यपदिश्य अन्यदुक्त्वा अन्यदनुक्तं चेत्।

**6/3/31 'उचितमाच्छिनत्ति'।**

**6/3/32 'प्रतिज्ञातं विस्मरति'।***

उचितं गन्धपुष्पादिसेवन आच्छिनत्ति न करोति।

**6/3/33 'स्वपक्षैः संज्ञया भाषते'।**

स्वपक्षैः स्वीयजनैः। संज्ञया भाषान्तरेण भाषते स्वविषयं सम्भाषते।

**6/3/34 'मित्रकार्यादिमपदिश्यान्यत्र शेते'।****

मित्रगृहे उत्सवादिकं अपदिश्य भवतीति प्रतार्य अन्यत्र नायिकान्तरगृहे।

**6/3/35 'पूर्वसंसृष्टायाश्च परिजनेन मिथः कथयति'।**

पूर्वसंसृष्टायाः स्वापेक्षया पूर्वानुभूतायाः गुणीपरिजनेन स्वस्य मिथो रहसि।

**6/3/36 'तस्य सारद्रव्याणि प्रागवबोधादन्यापदेशेन हस्ते कुर्वीत'।**

तस्य एवं लिंगै स्वस्यां विरागं ज्ञात्वा अवबोधयेत् अनया स्वविरागो ज्ञात इति ज्ञानात्पूर्वं सारद्रव्याणि बहुमूल्यतदीयहस्तकंकणादीनि अन्यापदेशेन पश्यामीत्यादि प्रतारणेन।

---

* BNS misses out the closing part of the Sutra- **'अन्यथा वा योजयति'**

** Coverings the disinterestedness of a lover/husband Gonardiya offers the following justification which include 'मित्रकार्य'–

'अत्र गोनर्दीयः–

ऋतुस्नाताभिगमने मित्रकार्ये तथापदि।
त्रिष्वेतेषु प्रियतमः क्षन्तव्यो वारगम्यया।।'

Quoted by Mallinath in Raghuvansam P.371-NSP Edn

**6/3/37 'तानि चास्या हस्तादुत्तमर्णः प्रसह्य प्रतिगृह्णीयात्'।**

उत्तमर्णः भूषणादिः स च अतिप्रसह्य कलहित्वा अस्या हस्तात्ः। गृह्णीयात्।

**6/3/38 'विवदमानेन सह धर्मस्थेषु सभीकेषु व्यवहरेत्।**

विवदमानेन अविवेकात् धर्मस्थेषु सभीकेषु व्यवहरेत् कथयेत्।

**6/3/39 'सा शक्तं पूर्वोपकारिणमल्पफलमप्यलीकेनानुपालंभेत्'।**

शक्तमुक्तलक्षणं पूर्वोपकारिणं पुरा च बहुदं वा कदाचित् अल्पफलमपि स्वल्पदमपि अन्यं वा तादृशं अलीकेन उपायात्स्वल्पग्रहणेन नानुपलम्भेत् न विवदेत्।

**6/3/40 'असारं तु निष्प्रतिपत्तिकमुपायतोऽपवाहयेत्'।**

असारं गतधनं निष्प्रतिपत्तिकं तल्लाभयोग्यताहीनं अपवाहयेत् उपायत उच्चाटयेत्। **'अन्यमवष्टभ्य'**। तदनिष्टमेव अन्यं ससारं अवष्टभ्य अवलम्ब्यैव तदनिष्टं तस्य निन्दितस्य अनिष्टमहितं कुर्यात्।

तत्प्रकारमेवाह –

**6/3/41** **'निन्दिताभ्यासः निर्भोगः'** निन्दिताभ्यासः निन्दितस्य तदनिष्टस्य अभ्यासः पुनः पुनः प्रयोगः निर्भोगस्तदिष्टत्यागः, **'पादेन भूमेरभिघातः'** कोपप्रकटनाय तत्सन्निधौ **'अविज्ञातविषयस्य संकथा'** अविज्ञातविषयस्य तदविदितवृत्तान्तस्य **'तद्विदितज्ञानेषु अविस्मयः'** कुत्सा च' तद्विज्ञानेषु तत्कथितकथासु दर्पविघातः दर्पस्य तदीय सौकुमार्यकलाभिज्ञत्वाद्यभिमानस्य अभिघातः जघन्यस्तुत्या निन्दा अधिकैः संरागः अधिकैः ततोऽपि अनपेक्षणं तद्वचनश्रवणादौ। प्रत्युत **'समानदोषाणां निन्दा'** वदति तस्मिन सति परिजनस्य स्वस्य कटाक्षेक्षणं मुखनिरीक्षणं सहासं ताडनं सखीहस्ते हस्तप्रक्षेपः। अनेन समानदोषाणां जनानां निन्दा तद्दोषोद्घाटनेन धिक्करणम्।*

**6/3/42** **'रतोपचारेषु'** गन्धताम्बूलादिस्वीकारेषु **'उद्वेगः'** अस्पृहा **'सुरतस्यादानं'** अदानमवांछनं बलात्प्रवृत्तौ **'जघनरक्षणं'** रक्षणं पिधानं **'नखदन्तक्षतेभ्यो'** तत्कृतेभ्यो हेतुभ्यः **'जुगुप्सा'** निन्दनम् **'परिष्वंगे भुजमय्या सूच्या पिधानम्'** परिष्वंगे कुचकलशगाढालिंगने कर्तुमुद्युक्ते सति सूच्या तद्वक्षोभयकरया व्यवधानं सम्यगाच्छादनं **'स्तब्धता गात्राणां'** लोचनौष्ठादीनां स्तब्धता निर्विकारता

---

* BNS misses out the closing part of the Sutra- **'रहसि चावस्थानम्'**

**'श्रान्तमुपलभ्य चोदना'** उपलभ्य ज्ञात्वा चोदना रत्यर्थप्रेरणा **'अशक्तौ हासः'** अशक्तौ अप्रवृत्तौ हासः **'शक्तावनभिनन्दनं'** शक्तौ प्रवृत्तौ अनभिनन्दनं अनंगीकारः। तदेवाह – **'सक्तोर्व्यात्यासः'** गुह्याच्छादनाय सक्तोर्वामदक्षिणोर्वोः **'निद्रापरत्वं'** तदैव निद्रालुता।* **'दिवास्य भावमुपलभ्य महाजनाभिगमनं'** भावं रतिः ताभ्यां महाजनाभिगमनं महाजनान्वणिगादीन् प्रति कार्यव्याजेनाभिगमनं रात्रौ।

6/3/43 **'वाक्येषु छलग्रहणं'** अर्थान्तरकल्पनेन निन्दनं, **'अनर्मणि हासः'** अनर्मणि प्रमदानुचितभाषणे **'नर्मणि चार्थान्तरमुपदिश्य हसेत्'**, नर्मणि युक्त–सम्भाषणे शिष्ट अर्थान्तरमुपदिश्य कुत्सितार्थं परिकल्प्य हसेत् **'वदति तस्मिन् परिजनस्य कटाक्षेक्षणं ताडनं सहासं आहत्य चास्य कथामन्याः कथाः'** कथां गोष्ठीं आहत्य निवार्य अन्याः अहिताः कथाः वाच्याः **'तद्व्यलीकानां तद्व्यसनानां चापरिहार्याणामनुकीर्त्तनम्'** व्यलीकानां दोषाणां व्यसनानां दुःखकराणां अपरिहार्याणां स्वविषयापराधानां **'मर्मणां च चेटिकयोपप्रथनं'** मर्मणां परानुरक्तत्वादीनां उपप्रथनं तत्समीपे ख्यापनम्।

6/3/44 **'आगते चादर्शनं'** आगते स्वसमीपं प्रति, **'अयाच्ययाचनं'** अयाच्य–स्यालब्धवस्तुनः। **'अन्ते च मोक्षः'** एवं अन्ते तदीय सर्वस्वग्रहणान्ते मोक्षो मोक्षोपाया उक्ताः। **'इति परिग्रहकल्पो दत्तकस्य'** परिग्रहकल्पः वशीकरणोपायः मोक्षोपायश्च दत्तकस्य मते इति ज्ञेयः।

उक्तं श्लोकेन संगृह्णाति –

6/3/45 **'परीक्ष्य गम्यैः संयोगः संयुक्तस्यानुरंजनम्।**
**रक्तादर्थस्य चादानमन्ते मोक्षश्च वैशिकम्'॥**

परीक्ष्य तदीय गुणदोषान् वैशिकं इति वेश्यावृत्तम्।

---

* Compare Dattaka Sutra, (a fragmentary work in GOML, Chennai)
दृष्ट्वास्य वक्त्रं प्रतिगूहनं च निष्ठीवनं चान्यनिरीक्षणं च।
कथाभिरन्यैस्सह जल्पनं च कुर्वन्ति नार्यो विपरीतकामाः।।
अदेशकालागमनान्यभावा निद्रावशत्वं शयनं गतायाः।
अनादरत्वं च विहारकाले वदन्ति लिंगानि विरागिणीनाम्।।

**6/3/46 'एवमेतेन कल्पेन स्थिता वेश्यापरिग्रहे।**
**नातिसन्धीयते गम्यैः करोत्यर्थांश्च पुष्कलान्'॥**

कल्पेन उक्तोपायेन परिग्रहे संयोगादौ नातिसन्धीयते न प्रतार्यते करोति सम्पादयति।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासीपंडितमंडलमंडित–पांडित्याखंडचंडिमोद्दंडषड्दर्शिनीविहरणशरणनिजवरिष्ठनिष्ठाकनिष्ठीकृत–वरिष्ठादिगरिष्ठसर्वेश्वरावतारसर्वेश्वरसूरिसच्छात्रनिकराचरमसुन्दरेन्दिराहृदयार–विन्दमिलिन्दनन्दनचरणारविन्दद्वन्द्वाभिवन्दनामन्दारविन्दसन्दोहतुन्दिलयशोदानन्द–नन्दनविशदयशःकमलभास्करभास्करनरसिंहशास्त्रिकलितवात्स्यायनसूत्रवृत्तौ षष्ठेऽधिकरणे तृतीयोऽध्यायः।**

### अध्याय – 4

# विशीर्षप्रतिसन्धानप्रकरणम्

एवं निस्वीकृतस्य विमोचनोपायान् उक्त्वा नष्टप्रीतिसन्धानोपायानाह – अर्थागमोपायाः आगमः अर्जनं विरक्तलिंगानि लिंगानि चिह्नानि विरक्तप्रतिपत्तिः तैः विरक्तताज्ञान–पूर्वकमाभरणग्रहणादि निष्कासक्रमाः अनुरक्तस्यापि निःस्वस्य मोचनोपायाः उक्ताः आदित एकत्रिंशः अध्यायः। अधुना सधनस्य पुनः वशीकरणोपाया अवसरसंगत्या कथ्यन्ते इति शेषः।

**6/4/1 'वर्त्तमानं निपीडितार्थमुत्सृजति पूर्वसंसृष्टेन सह सन्दध्यात्'।**

वर्त्तमानं सपदि संवृद्धं निपीडितार्थं स्वगृहीतसर्वधनं सन्तं पूर्वसंसृष्टेन पूर्वसंयुक्तेन निःस्वतया निसृष्टेन दैवात् धनिकेन सता सह सन्दध्यात् संयोगोपायान् प्रयुंजीत।

**6/4/2 'सन्ध्येद्योवसितार्थो वित्तवान्सानुरागश्च ततः सन्धेयः'।**

अवसितार्थः कर्त्तव्यत्वेन निश्चितसम्प्रयोगाख्य कार्यः। वित्तवान् भूरिधनं सानुरागः पुरानुभूतत्वेन स्वस्यामनुरागवान् यः सन्ध्येत् स्वया घटनार्थं दास्यादिकं प्रेषयेत्सः।ततः तदुद्योगानन्तरं स्वयापि सन्धेयः दूत्यादिद्वारा।

**6/4/3 'अन्यत्र गतस्तर्कयितव्यः'।**

स कार्यवशात् प्रविष्टः अन्यत्र गतः पूर्वं स्वस्यां संगतः सन् स्वां विहायान्यत्रगतः अन्यस्यां संगतः सन् पुनः कार्यवशात् सम्प्रयोगरूपकार्यार्थं प्रविष्टः स्वसमीपं प्राप्तश्चेत् तर्कयितव्यः वक्ष्यमाणरीत्या ग्रहणे विचारयितव्यः। पंचविधोऽपि* विचारप्रकारमाह—

**6/4/4 'इतः स्वयमपसृत्य तत्र स्थितोऽपि स्वयमसृतः'।**

---

* Kama Sutra records six types of such situations where the lover moves away from one vesya. 'स कार्ययुक्त्या षड्विधः' in sutra 6/4/3 is missing BNS's text.

इतः स्वस्याः समीपात् स्वयं स्वेच्छयैवापसृत्य गत्वा तत्रान्यत्र स्थित सन् ततोऽपि स्वयमेवाप्रसृतः विनिर्गतः प्रथमः।

**6/4/5 'इतस्ततश्च निष्कासितापसृतः'।**

इतः स्वस्थानात् ततः परगेहाच्च बलान्निष्कासितः सन्नपसृतः इति द्वितीयः।

**6/4/6 'इतः स्वयमपसृत्य ततो निष्कासितापसृतः'।**

स्वयं स्वेच्छया प्रसह्य निष्कासितस्तृतीयः।

**6/4/7 'इतः स्वयमेवापसृत्य तत्र स्थितः'।**

तत्र तस्याः सदने स्थितः सन् यः स्वां सन्दध्यात् स चतुर्थः स्वामित्यादि सर्वत्रानुषज्यते।

**6/4/8-9 'इतोऽपि निष्कासितापसृतस्ततोऽनिष्कासितापसृतस्तत्र स्थित इति'।**

इतः स्वस्याः निष्कासितो बलात् ततः तस्याः अनिष्कासित एव निःसृत स्थितः तत्रैव अकार्य एव इति पंचमः।*

एषु ग्राह्यादीनाह –

**6/4/10 'इतस्ततश्च स्वयमपसृत्योपैति चेदुभयोर्गुणानपेक्षी च लघुबुद्धिरसन्धेयः'।**

इतः स्वसद्मतः ततः तद्गेहात् स्वयमेवापसृत्य स्वेच्छयैव निर्गत्य उपैति चेत् स्वां पुनः स उभयोः स्वेतरयोः गुणानपेक्षी गुणग्राही अतएव लघुबुद्धिः चपलचित्त इति असन्धेयो न ग्राह्य आद्यः।

---

* It seems Bhaskara Narasimha Sastri had dispensed with the sixth type of situation. Vātsyāyana has recorded this sixth type as under, इतो निष्कासितापसृतस्तत्र स्थितः' (6/4/9. K.S.) It appears that BNS clubbed Sutra 6/4/8 & 6/4/9 into one. As per 6/4/8 'he was thrown out from here and he himself left the other' and as per 6/4/9 'he was thrown out from here and then he settled with the other prostitute there' Probably he means to interpret that in the second situation of 6/4/9 the client persisted to stay with the second prostitute, against his earlier leaving the first one on being thrown out from there.

**6/4/11 'इतश्च ततश्च निष्कासितापसृतः स्थिरबुद्धिः। स चेदन्यतो बहु लभ्यमानया निष्कासितः स्यात् समानया रोषितः स मे बहुदास्यतीति सन्धेयः'।**

स्थिरबुद्धिः निश्चलरागोऽपि सः उक्त द्वितीयः अन्यतः नायिकान्तरात् बहुधनादिकं लभ्यमानया लभ्येच्छया स्वया समानया तथाविधयान्यया च निष्कासितः स्यात् चेन्निष्कासितत्वाद्धेतोः रोषितः अभिमानी सन् मे मह्यम् इदानीं बहुधनादिकं दास्यत्येवेति निश्चित्य सन्धेयः।

**6/4/12-13 'निःसारतया कदर्यतया वा त्यक्तो न प्रेयानितः स्वयमुपसृत्यस्ततो निष्कासितापसृतो यद्यतिरिक्तमादौ दद्यात्ततः प्रतिग्राह्यः'।**

इति तृतीयः।

अन्यया निःसारतया निःस्वत्वेन कदर्यतया अतिकृपणत्वेन वा ज्ञात्वा त्यक्तश्चेत् न प्रेयान् न सन्धेयः स एव रिक्तं स्वापेक्षितं धनं आदौ सम्प्रयोगात् दद्याद्यदि ततः तदा गृहीत्वा सोऽपि प्रतिग्राह्य एव।

**6/4/14 'इतः स्वयमपसृत्य तत्र स्थित उपजपंस्तर्कयितव्यो'।**

**6/4/15 'विशेषार्थी तत्र विशेषमपश्यन् मयि कामो जिज्ञासितुकामः आगत्य सानुरागत्वाद्दास्यति तस्यां च दोषान् दृष्ट्वा मयि भूयिष्ठं वा गुणान् अधुना पश्यति सगुणदर्शी भूयिष्ठं दास्यति इति।'**

चतुर्थस्तु विशेषार्थी हावभावादि विलासापेक्षी सन् तत्र तस्यां विशेषं अपेक्षितं कामः जिज्ञासितुकामः जिज्ञासितुं मत्सकाशात् कलाः ज्ञातुं वा कामः इच्छावान् अतो मे धनं दास्यतीति वा। तस्यां दोषान् क्रौर्यादीन् भूयिष्ठं बहुलान् गुणान् सौन्दर्यप्रसन्नत्वादीन् अधुना पश्यति जानाति अतो गुणदर्शी गुणज्ञः तस्मात् भूयिष्ठं बहुधनं दास्यतीति वा।

**6/4/16 'बालो वा नैकदृष्टिरतिसन्धानप्रधानो वा हरिद्रारागो वा यत्किंचित्कारी चेत्यवलोक्य सन्दध्यान्न वा'।**

बालः अनभिज्ञः अतएव नैकदृष्टिः चपलः अतिप्रतिसन्धानप्रधानः अत्यन्तसंघटनापेक्षः हरिद्रारागः निशामात्रानुरक्तः तदापि यत्किंचित्कारी स्वल्पदायी इत्यवलोक्य पर्यालोच्य सन्दध्यान्नवा इति। एवं त्रिधा पुरूषवयोऽनुसारेण ग्रहणाग्रहणयोः तर्कयितव्यः परिशीलितव्यः।

**6/4/17-20 'इतो निष्कासितापसृतस्ततः स्वयमपसृत उपजपंस्तर्कयितव्योऽनुरागादागन्तुकामः स बहु दास्यतीति मद्गुणैर्भावितः सोऽन्यस्यां न रमते।पूर्वमयोगेन वा मया निष्कासितः स मां छलयित्वा वैरं निर्यातयितुकामो धनमभियोगाद्वा मयास्यापहृतं तन्मां विश्वास्य प्रत्यादातुकामो निर्वेष्टुकामो वा मां वर्त्तमानां भेदयित्वा त्यक्तुकाम इत्यवेत्याहं कल्याणबुद्धिरसन्धेयः। अन्यथाबुद्धिः कालेन लम्भयितव्यः'।**

उपतपन् दुःखितः स्वया सन्धानार्थीति यावत् **पंचमः**।

अनुरागात् मयि प्रीत्या आगन्तुकामः संयोक्तुकामः स अदानेन पुरा निष्कासितः इदानीं दास्यतीति वा मद्‌गुणैः मदीय रूपलावण्यादिभिः विलासैश्च भावितः रंजितः सन् अन्यस्यां तद्‌गृहीतायां न रमत इति वा पूर्वं अयोगेन सम्प्रयोगमदत्वा छलयित्वा वंचयित्वा वैरं क्रोधं निर्यातयितुकामः प्रत्यपकारेणापनेतुकामो वा अस्य धनं बहु अभियोगात् सम्प्रयोगनिमित्तं अपहृतं सम्प्रयोगश्च बहुकालं न दत्तः विश्वास्य विश्वासयित्वा तद्धनं प्रत्यादातुकामः प्रत्यानयनकामो वा निर्वेष्टुकामः मद् गृह एव स्वदत्तधनभोगकामो वा मां चावर्त्तमानां अन्येन सक्तां भेदयित्वा ततो विश्लेषयित्वा स्वयमपि त्यक्तुकामो वेति बहुधा तर्कयितव्यः। आवेद्य दूत्यादिद्वारा एवं बहुधा पर्यालोच्य कल्याणबुद्धिः स्वविषये असमीचीनमतिश्चेदसन्धेयः। अन्यथाबुद्धिः सानुरागमतिश्चेत्कालेन लंभयितव्यः न वंचयितव्यः अविलम्बेन प्रतिसन्धेय इति यावत्।

**6/4/21 'इतो निष्कासितस्तत्र स्थित उपजपन्नेतेन व्याख्यातः'।**

एतेन पंचमविषयोक्तप्रकारेण व्याख्यातः। ग्रहणादि विषये उक्तप्रायः।

**6/4/22 'तेषूपजपंस्त्वन्यतः स्थितः स्वयमुपजपेत्'।**

**6/4/23 'व्यलीकार्थोपनिष्कासितो मयासावन्यत्र गतो यत्नादानयितव्यः'।**

तेषूक्तेषु मध्ये चरमः मया व्यलीकार्थोपनिष्कासितः आरोपितमिथ्यावादः सन् त्यक्तः अन्यत्र गतः इति विचार्य स्वयमुपजपेत्, तदानयने स्वयमेव यतेत यत्नादयमानेतव्यश्च।

**6/4/24 'इतः प्रवृत्तसम्भाषो वा ततो भेदं यास्यति'**

इतः मया प्रवृत्तसम्भाषः लब्धशुभवचनः सन् ततः तस्याः सकाशात् भेदं विच्छेदं यास्यति।

**6/4/25 'वर्त्तमानस्य वा दर्पविघातः करिष्यामि'।***

वर्त्तमानस्यात्यत्र दर्पविघातं सुन्दरीलाभगर्वस्य विघातं तदीयदोषोद्घाटनेन निवृत्तिं च करिष्यामीति निश्चित्य यत्नादानेय इति पूर्वेणान्वयः। सामान्यतः इतः परं रिक्ततया त्यक्तस्य पुनः प्रतिसन्धानकालमाह –

**6/4/26 'अर्थागमकालो वास्य। स्पष्टावृद्धिरस्य जाता'।**

अर्थागमकालः भाविवृध्यंकुरकालः वृद्धिः धनादिसमृद्धिः अस्य त्वनुरक्तस्य स्पष्टा सिद्धि यदा वा इदं सर्वत्रानुषज्यते।

**6/4/26 'लब्धमनेनाधिकरणम्'।** अधिकरणं महाराजाश्रयः। **'दारैर्वियुक्तः'** दैवान्मानुषाद्वा **'पारतन्त्र्यात्व्यावृत्तः' धनस्य 'पित्रा भ्रात्रा वा विभक्तः'**

विभक्तोऽन्येन।

**6/4/27 'प्रतिबद्धोऽनेन सन्धिं कृत्वा नायकं धनिनमास्थास्यामीति'**

वियुक्तः विभक्तः रहितो वा अन्येन त्यक्तनायकेन प्रतिबद्धः सख्यं प्राप्तो धनिकः तं धनिनं नायकं। अनेन पूर्वं त्यक्तः तत्प्रतिबद्धनायकद्वारेण सन्धिं घटनां कारयित्वा आस्थास्यामि वशं नेष्यामीति वा।

**6/4/28 'विमानिता वा भार्यया तमेव तस्यां विकारयिष्यामि'।**

यया इदानीं तत्सम्बन्धनायिकया विमानिता मत्सम्बन्धधनिकाकर्षणे कृतापकारा तस्यां विषये विकारयिष्यामि। अनेन प्रत्यपकारं कारयिष्यामीति वा।

**6/4/29 'अस्य वा मित्रं मद्द्वेषिणी कामयतेताममुना भेदयिष्यामि'।**

मम द्वेषिणी सा अस्य नायकस्य मित्रं धनिकं कामयते रंजयति ताममुना मत्सम्बन्धेन भेदयिष्यामि। तं विरक्तयित्वा तथा करिष्यामीति वा।

**6/4/30 'चलचित्तया वा लाघवमेनमापादयिष्यामि'।**

---

* The Sutra in published text appears as –'तदर्थाभिघातं करिष्यति'।
'The occasion of coming back to me will give him an opportunity to crush the other woman's ego'. Here in BNS version the authorship of crushing the other woman's ego is attributed to the first woman who has won the client back.

एनं स्वत्यागिनं अन्यत्र रक्तम् चलचित्तत्वेन तस्या अपि रागशून्यं आपदयिष्यामि करिष्यमीति वा यदा मन्यते तदा प्रतिसन्धेय इति पूर्वेणान्वयः।

अथ सन्धातुः कृत्यमाह –

**6/4/31 'तस्य पीठमर्दादयो मातुर्दौःशील्येन नायिकायाः सत्यप्यनुरागे विवशायाः पूर्वनिष्कासनं हेतुं च वर्णयेयुः'।**

पीठमर्दादयोऽनया प्रेषिताः नायिकायाः सत्यपि मातुः दौःशील्येन क्रौर्येण विवशायाः पराधीनायाः नायिकायाः भार्यायाः सकाशात् तव पूर्वं निष्कासनं जातमिति तस्य सन्धेय नायकस्य हेतुं निष्कासनस्य।

**6/4/32 'वर्त्तमानेनाकामायाः संसर्गः'।**

अकामायाः अपि तस्मिन्ननुरागरहितायाः अप्यस्याः वर्त्तमानेन वर्त्तमानत्वेन सान्निध्येनेति यावत् संसर्गः तेन सम्प्रयोगो भवति तदागमने निवर्त्तते इति च वर्णयेत्।

**6/4/33 'तस्याश्च साभिज्ञानैः पूर्वानुरागैरेनं प्रत्यानयेयुः'।**

साभिज्ञानैः पूर्वप्रत्यभिज्ञानसहितैः पूर्वानुरागैः प्राचीनरागोद्बोधकवाक्यैः प्रत्यानयेयुः वशीकुर्युः।

**6/4/34 'अभिज्ञानं च तत्कृतोपकरणसम्बद्धं'**

तत्कृतोपकरणसम्बद्धं तत् ताभ्यां कृतं परस्परं कृतानि उपकरणानि नखक्षतादीनि तैः सम्बद्धं तत्ख्यापनपूर्वकं अभिज्ञानं प्रत्यभिज्ञानं कथयेत् वर्णयेत् इति पूर्वेणान्वयः।

**6/4/34 'इति विशीर्णप्रतिसन्धानम्'।**

विशीर्णस्य पूर्वं वियुक्तस्य प्रतिसन्धानं पुनः संघटनप्रकारः इति उक्तः।

एवं वियुक्तस्य पुनः प्रतिसन्धानः तदभावप्रकारमुक्त्वा पूर्वसंयुक्ता संयुक्तसमवाये ग्राह्यमाह–

**6/4/35 'अपूर्वपूर्वसंसृष्टयोः पूर्वं संसृष्टः श्रेयान्। स हि विदितशीलः दृष्टरागः सूपचारो भवतीत्याचार्याः'॥**

अपूर्वोऽपरिचितः पूर्वभूक्तोत्सृष्टः उभयोः संसृष्टयोः ग्रहणार्थिनोः सतोः पूर्वसंसृष्टः पूर्वपरिचित एव श्रेयान् ग्रहणयोग्यः। कुतः। स हि पूर्वपरिचितः विदितशीलः परिज्ञातस्वभावः

दृष्टानुरागः क्लृप्तानुरागः अतः सूपचारः सुखेनानायासेन तदनुकूलहावाद्युपचारैः वशीकार्यो भवति इति आचार्या केचित्।

6/4/36 **'पूर्वसंसृष्टो निष्पीडितार्थोऽर्थदोषदुःखश्च न पुनर्विश्वासयितुं अपूर्वस्तु सुखेनानुरज्यत इति वात्स्यायनः'।**

निष्पीडितार्थः स्वया आकर्षितधनः अतएव अर्थदोषदुःखः अर्थहानिप्रयुक्तदुःखः अतः विश्वासयितुं वशीकर्तुं न शक्यः। अपूर्वस्तु सुखेनानतियत्नेन रज्यते स्वस्यां।

6/4/37 **'तथापि वस्तुतस्तु पुरूषप्रकृतितः'** पुरूषस्वभावानुसारेण **विशेषः** सन्धानं कार्यं। एवं स्वलाभपरहान्यर्थं वा विश्लिष्टप्रतिसन्धानं प्रपंचमुक्त्वा सुखप्रतिपत्तये श्लोकैः संगृह्णाति –

6/4/38 **'अन्यां भावयितुं गम्यादन्यतो गम्यमेव वा।**
**स्थितस्य चोपघातार्थं पुनः सन्धानमिष्यते'।।**

गम्यात् संगतात् अन्यां स्वप्रियां भेदयितुं भावयितुं विश्लेषयितुं वा अन्यतः अन्यस्याः गम्यं स्वस्याः विरोधिनं भेदयितुं वा स्थितस्य द्रव्यहानिभीत्या स्वां विहाय तूष्णीं स्थितस्य अपघातार्थं द्रव्यस्वीकारार्थं वा पुनः सन्धानं उपायतो वशीकरणम्।

6/4/39 **'विभेत्यन्यस्य संसर्गात् व्यलीकानि च नेक्षते।**
**अतिसक्तः पुमान् यत्र भयाद्बहु ददाति च'।।**

अन्यस्य पुरूषान्तरस्य संसर्गात् हेतोः स्वया विभेति भीतो भवति संसर्गं न सहत इत्यर्थः। व्यलीकानि स्वापराधान् नेक्षते न गणयति अतिसक्तः स्वस्यामत्यन्तानुरक्तः अतएव भयाच्च बहुधनं ददाति। तं नाभिभवेत् किन्तु अत्यन्तां अनुरक्तमेव सन्तं पूर्वं स्थितं।

6/4/40 **'असक्तमभिनन्देत्'** निराकुर्यात् **'सक्तं'** ईषदनुरक्तमपि तादृशमुपेक्षेत **'परिभवेत्'।**
**'अन्यदूतानुपाते तु यः स्यादतिविशारदः।।'**

6/4/41 **'तं योगिनं पूर्वं नारी कालेन च वियोजयेत्'।।**

अन्यदूतो दूतान्तरं नायिकान्तरप्रेष्य इति यावत् तस्य अनुयाते रहसि सम्भाषणादिना अनुसरणे अतिविशारदः अत्यन्तकुशलः स्वगृहे सन्नेव यः स्यात् तं संयोगिनं पूर्वसंयुक्तमपि तं पूर्वनारी कालेन अतिसक्तधनीलाभेन वियोजयेत् त्यजेत्।

**6/4/41 'भवेच्चाच्छिन्नसन्धाना न च सक्तं परित्यजेत्।**
**सक्तं तु वशिनं नारी सम्भाव्याप्यन्यतो व्रजेत्'॥**

**6/4/42 'ततश्चार्थमुपादाय सक्तमेवानुरंजयेत्'॥**

सक्तं धनिनं सक्तं न परित्यजेत् अधिकनायकलाभेऽपि न त्यजेत् किं तु तस्मिन्नच्छिन्नसन्माना अवियुक्तानुरागा भवेत् तत्तु अपितु वशिनं स्वायत्तं शक्तं तं सम्भाव्य प्रार्थनया अभिमतं कृत्वा अन्यदः बहुदातारं प्रति ततः तस्मात् उपादाय गृहीत्वा सक्तं प्राचीनमेव।

**6/4/43 'आयतिं प्रसमीक्ष्यादौ लाभं प्रीतिं च पुष्कलाम्।**
**सौहार्दं प्रतिसन्दध्यात् विशीर्णं स्त्री विचक्षणा'॥**

विचक्षणा कुशला वारांगना आदौ ग्रहणकाल एव तस्य आयतीः उत्तरकालप्राप्तिं लाभं स्वस्याः तस्मात् पुष्कलां उत्कटां प्रीतिं स्वस्यां प्रसमीक्ष्य सम्यगालोच्य विशीर्णं विशिष्टं प्रति सौहार्दं अनुरागं सन्दध्यात् कुर्यात्।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञ काशीपुरनित्यनिवासिपंडितमंडलमंडित-पांडित्याखंडचंडिमोद्दंडसर्वतन्त्रस्वतन्त्रनिजवरिष्ठनिष्ठाकनिष्टीकृतवसिष्ठादिगरिष्टश्री सर्वेश्वरावतारसर्वेश्वरसूरिवरछात्रनिकराचरमसुन्दरेन्दिराहृदयारविन्दमिलिन्दनन्दनन्दनचरणा-रविन्दद्वन्द्वाभिवन्दनाऽमन्दानन्दसन्दोहतुंन्दिलयशोदानन्दनविशदयशःकमलभास्कर-भास्करनरसिंहशास्त्रिविरचितवात्स्यायनसूत्रवृत्तौ षष्ठेऽधिकरणे चतुर्थोऽध्यायः।**

**अध्याय – 5**

# लाभविशेषप्रकरणम्

एवं विशीर्णप्रतिसन्धानप्रकारमुक्त्वा तद्धेतुं लाभविचारं वक्तुं उपजीवकत्वसंगतिं सूचयति–

विशीर्णप्रतिसन्धानं आदितो द्वात्रिंशः।

**6/5/1 'गम्यबाहुल्ये बहु प्रतिदिनं च लभमाना नैकं प्रतिगृह्णीयात्'।**

गम्यबाहुल्ये गम्यानां स्वासंगमासक्तानां बाहुल्ये बहुत्वे सति प्रतिदिनं बहुधनमेवं नियमेन।

**6/5/2 'देशं कालं स्थितिमात्मनो गुणान्सौभाग्यं चान्याभ्यो न्यूनातिरिक्तं चावेक्ष्य रजन्यामर्घं स्थापयेत्'।**

देशं राजधान्यादि कालं वसन्तादि आत्मनः स्वस्याः स्थितिं मर्यादां गुणान् सौजन्यादीन् सौभाग्यं रूपलावण्यादि अन्याभ्यः तत्रत्य नायिकान्तराभ्यः अन्यूनानतिरिक्ततां समानरूपादिमत्तां अवेक्ष्य विचार्य तदनुसारेण रजन्या रात्रौ सम्प्रयोगार्थिनं अर्घं पणं स्थापयेत् निश्चिनुयात्।

**6/5/3 'गम्येषु दूतांश्च प्रयोजयेत्'।**

गम्येषु विषये योजयेत् प्रहिणुयात्।

**6/5/3 'तत्प्रतिबद्धांश्च स्वयं प्रहिणुयात्'।**

तत्प्रतिबद्धान् तेषां सखीन् स्वयमपि वशयित्वा तान्प्रति।

**6/5/4 'द्विस्त्रिश्चतुरिति शतानि लाभातिशयप्रतिग्रहार्थमेकस्यापि गच्छेत् प्रति परिग्रहकल्पांश्चाचरेत्'।**

इति शतानि सुवर्णादिशतानां लाभातिशयः अधिलाभः तस्य प्रतिग्रहार्थं प्राप्तये एकस्यापि एकेनैव चागच्छेत् संगच्छेत्। 'प्रतिपरिग्रह–कलापांश्चाचरेत्' प्रतिपरिग्रह प्रतिदिनसम्प्रयोगे कल्पानुक्तान्येकोत्तरवृध्याद्वित्र्यादिशतानि आचरेत् पणं कुर्यात्।

**6/5/5 'गम्ययौगपद्ये तु लाभसाम्ये यद्द्रव्यार्थिनी स्यात् तत्तोऽपि न निर्विशेषः प्रत्यक्ष इत्याचार्याः'।**

गम्ययौगपद्ये युगपद्गम्यप्रसक्तौ लाभसाम्ये स्वस्याः धनप्राप्त्यविशेषे सति यद्द्रव्यार्थिनी द्रव्यं रत्नहीराद्यपूर्वं यद्द्रव्यं यस्यास्ति तदर्थिनी सा स्यात् तत्र गच्छेत्। यतः अपि लाभसाम्येऽपि ततः असाधारणद्रव्याद्धेतोः न निर्विशेषः साम्याभावः प्रत्यक्षसिद्धोऽस्ति।

**6/5/6 'अप्रत्यक्षदेयत्वात्सर्वकार्याणां तन्मूलत्वात् हिरण्यद इति वात्स्यायनः'।**

अप्रत्यादेयत्वात् हिरण्यस्य दैवाद्विरागेऽपि पुनर्देयानर्हत्वात् सर्वकार्याणां वस्त्रालंकारभोज्यादीनां तन्मूलत्वात्। सुवर्णमूलकत्वात् रजतात् तदितररत्नादेरूक्तवैपरीत्याच्च हिरण्यत एव धनाधिक्यलाभात् सुवर्णमेव पणः कार्यः।

**6/5/7 'सुवर्णरजतताम्रादिकांस्यलोहभांडोपस्करास्तरणप्रावरणविशेषगन्ध–द्रव्यकटुकभांडघृततैलधान्यपशुजात्यादीनां पूर्वपूर्वतो विशेषः'।**

सुवर्णकुप्यालाभे भांडशब्दः सुवर्णादिषु प्रत्येकं सम्बध्यते उपस्करस्तन्मया एव द्रव्यादयः, आस्तरणं चित्रकम्बलादीनि प्रावरणं शाल्यादि सविशेषगन्धद्रव्यं अगुरूश्रीचन्दनखंडादि कटुकभांडं एलालवंगादिपेटिका घृततैलयोः कटाहो धान्यं खार्यादिमितं पशुजातिगोमहिष्यादिः पूर्वतः अन्यनायकाद्विशेषः। यस्मिन्नुक्तविशेषोऽस्ति स ग्राह्यः।

**6/5/8 'यत्तत्र साम्याद्वा द्रव्याल्पेऽपि मित्रवाक्यादतिपातित्वादायतिता गम्यगुणतः प्रीतितश्च विशेषः'।**

तत्रोभयत्र साम्यात् साम्ये द्रव्याल्पेऽपि द्रव्यस्योक्तस्य अल्पत्वे वा सति मित्रवाक्यात् सुहृद्वचनात् ग्रहणं कार्यम्। तथा चायतितः सुवर्णादिधनविशेषलाभात् गुणतः मित्रपक्षपातित्वगुणाद्वा प्रीतितः रागाधिक्याद्वा यत्र विशेषः तस्य ग्रहणमिति फलितम्।

**6/5/9 'रागित्यागिनोस्त्यागिनि विशेषः प्रत्यक्ष इत्याचार्याः'।**

रागित्यागिनोः स्वानुरक्तद्रव्यत्यागिनोः मध्ये रागिणि विशेषः ग्रहणे प्रत्यक्षः अनुभवसिद्ध इति चेत् केचित्।

**6/5/10-11 'शक्यो हि रागिणि त्याग, लुब्धोऽपि हि रक्तस्त्यजति न तु त्यागी निर्बन्धाद्रज्यत। इति वात्स्यायनः'।**

रागिणि त्यागः धनलोभात्परित्यागः शक्यः सम्भावितः न तु दातरि। इममेवार्थं विशदयति – रक्तोऽपि लुब्धः धने त्यजति धनहानिभीत्या स्वां द्रव्ये निर्ममः निर्लोभस्तु त्यागी न त्यजति हि। अतः त्यागी श्रेष्ठः इति नेदं युक्तम्।

किं तु –

**6/5/12 'तत्रापि धनवदधनवतोर्धनवति विशेषः'।**

तत्रापि धनवदधनवतोः त्यागिनोः मध्ये धनवतः धनवत्वेन।

**6/5/12 'त्यागीप्रयोजनकर्त्रोः प्रयोजनकर्तुः विशेषः प्रत्यक्षत इत्याचार्याः'।**

प्रयोजनं मित्रादेः स्ववचनेनोपकारः।

**6/5/13 'प्रयोजनकर्त्ता सकृत्प्रयोजनं कृत्वा कृतिनमात्मानं मन्यते त्यागी पुनरतीतं नापेक्षत इति वात्स्यायनः'।**

सकृत् एकवारं कृतिनं बहुकार्यकर्त्तारं अतीतं पूर्वदत्तं नापेक्षते न स्मरति अतस्तच्चिन्त्यम्।

**6/5/14 'तत्रापि आत्ययिकतो विशेषः'।**

तत्रापि त्यागिन्यपि आत्ययिकतः अत्ययमतीतं तन्न स्मरतीत्यात्ययिकः पूर्वदत्तानुद्घाटकत्वेन।

**6/5/15 'कृतज्ञत्यागिनोस्त्यागिनि विशेषः प्रत्यक्ष इत्याचार्याः'।**

कृतं पुरा स्वाचरितमनोरंजककार्यं स्मरतीति तथा विशेषः श्रेष्ठता।

**6/5/16 'चिरमाराधितोऽपि त्यागी व्यलीकमुपलभ्य प्रतिगणिकया वा मिथ्यादूषितः श्रममतीतं नापेक्षते'।**

**6/5/17 'प्रायेण हि तेजस्विनो ऋजवोऽत्यादृताश्च त्यागिनो भवन्ति'।**

**6/5/18 'कृतज्ञस्तु पूर्वपरिश्रमापेक्षी न सहसा विरज्यते। परीक्षितशीलत्वाच्च न मिथ्या दूष्यत इति वात्स्यायनः'।**

कृतघ्नः त्यागी आराधितोऽपि पूर्वोक्तैकचारिणीधर्मेण चिरसेवितोऽपि व्यलीकं यत्किंचिदपराधं प्रत्यक्षकृतमुपलभ्य दृष्ट्वा वा प्रतिगणिकया विरोधिवारांगनया मिथ्यादूषितः अनया एवं

कृतमित्युक्वा सत्यवचनस्सन् अतीतं पूर्वं स्वया कृतं श्रमं वशीकरणकष्टं नापेक्षते न विचारयति। कुतः तेजस्विनः श्रीमन्तः ऋजवः पूर्वोत्तरा परिशीलिकाः उक्तमात्रग्राहिणः अतोऽत्यादृता अपि अत्यन्तविश्वस्ता अपि त्यागिनः परित्यागशीलाः अतएव कृतघ्नाः नापेक्षन्ते, कृतज्ञस्तु पूर्वोत्तर परिशीलतु पूर्वपरिश्रमापेक्षिण पूर्वं स्वया कृतसेवाविचारी सन् किंचिदलीके सत्यपि न विरज्यते न विरक्तो भवति। परीक्षितशीलत्वाद्विचारस्वभावत्त्वात् न मिथ्या दूष्यते अन्यया असत्यकथनेन दूषितुं न शक्यते।

**6/5/19 'तत्राप्यायतितो विशेषः'।**

तत्रापि कृतज्ञद्वयसमवाये तु आयतितः अधिकलाभेन।

**6/5/20 'मित्रवचनार्थागमयोरर्थागमे विशेषः प्रत्यक्षत इत्याचार्याः'।**

अर्थागमे द्रव्यलाभे विशेषः प्राधान्यम्।

**6/5/21 'अन्येष्वित्यर्थागमो भवति। मित्रं तु सकृद्वाक्ये प्रतिहते कलुषितं स्यादिति वात्स्यायनः'।**

अन्येषु अन्येभ्योऽपि भवति सुलभः सकृत् एकवारं अपि वाक्ये स्वोक्ते प्रतिहते वितथे सति मित्रं सुहृन्मनः कलुषितं क्षुब्धम्।

**6/5/22 'तत्राप्यतिपातितो विशेषः'।**

तत्रापि मित्रद्वयसन्निपाते अतिपातिः अतिलाभेन।

**6/5/23 'तत्र कार्यसन्दर्शनेन मित्रमनुनीय श्वोभूते, श्वोदास्यतीति कृतं वचनं ततोऽतिपातिनमर्थं प्रतिगृह्णीयात्'** श्वोभूते श्वो दास्यति इति सकृतं वचनं अनुक्तवन्तं मित्रं कार्यदर्शनेन लाभदृष्ट्या अनुनीय संमान्य ततोऽपि नायकात्सद्य एव पातनं पणं।

**6/5/24 'अर्थागमानर्थप्रतीकारयोरर्थागमेन विशेषः प्रत्यक्षत इत्याचार्याः'।**

अर्थागमः अर्थलाभः अनर्थप्रतिकारः सिद्धवृत्त्यादेरनिष्टपरिहारः। तयोर्मध्ये अर्थागमने अर्थलाभो भिन्नः विशेषः ग्रहणे असाधारणनिमित्तम्।

**6/5/25 'अर्थः परिमितावच्छेदः अनर्थः पुनः सकृत् कृतो न ज्ञायते क्वावतिष्ठत इति वात्स्यायनः'।**

अर्थः दत्तधनं परिमितावच्छेदः इयत्ताकालः अनर्थः पुनः सकृत् कृतो न ज्ञायते एकवारं संस्थितः निवर्तितः क्वावतिष्ठते न ज्ञायते न दृश्यते अनर्थनिवृत्तिरपरछिन्न-कालावस्थायिनीत्यर्थः अतो न समीचीनम्।

**6/5/26 'तत्रापि गुरूलाघवकृतो विशेषः'।**

तत्रापि अर्थानर्थपरिहारं समवाये।

**6/5/27 'एतेनार्थसंशयानार्थप्रतिकारयोर्विशेषो व्याख्यातः।'**

एतेनार्थानर्थपरिहारयोरन्त्यप्राशस्त्यकथनेन अर्थसंशयः तल्लाभसन्देहः अनर्थप्रतीकारः तन्निश्चयसन्देहौ। तयोरपि मध्ये विशेषः। चरमयोरेव प्राशस्त्यं।

**6/5/28 'देवकुलतडागानामारामाणां कारणं स्थलीनामग्निचैत्यानां च निबन्धनं गोसहस्त्राणां पात्रान्तरितं ब्राह्मणेभ्यो दानम्'।**

देवकुलं देवालयः स्थली महाजनोपवेशनप्रदेशः अग्न्यर्थं इष्टकाभिश्चीयत इत्यग्निचैत्यं यजनस्थलं निबन्धनं ब्राह्मणादिभ्यः पात्रान्तरितं अन्यद्वारा कारणं देवस्थलानां च पूजाभ्युदयप्रवर्त्तनम् देवस्थलानां **'स्थावरदेवतानां पूजा अभ्युदयप्रवर्त्तनं'** उपनयादिकरणं

**6/5/28 'तद्व्ययसहिष्णोर्वा धनस्य प्रतिग्रहणमित्युत्तमगणिकानां लाभातिशयः'।**

तद्व्ययसहिष्णोः उक्तापेक्षितधनव्ययकर्त्तुः सकाशात् धनप्रतिग्रहणं धर्माय उत्तमाः कुलकलालावण्यधनादिभिः लाभातिशयः सम्पादनप्रकारः। एवमुत्तमगणिकानां धनलाभप्रकारमुक्त्वा रूपाजीवानां अन्यासां तमाह –

**6/5/29 'सर्वांगालंकारलाभो गृहस्यास्वकरणं'।**

सर्वांगे कचकुचादौ अलंकारलाभः गन्धपुष्पादिभिरलंकरणं गृहस्यागारस्यापि अस्वकरणं अलंकरणं।

**6/5/29 'महार्हैभाण्डैः परिचारकैश्च गृहपरिच्छदस्योज्ज्वलतेति रूपाजीवानां लाभातिशयः'।**

महार्हैः अतिमूल्यैः चादासनाद्यैः गृहपरिच्छेदस्य अन्तःसदन पुरःसदनप्रदेशस्य उज्वलतालंकरणरूपेण अलंकारैरेव आसमन्तात् सर्वदा जीवन्तेति रूपजीवाः।

**6/5/30 'नित्यं शुक्लमाच्छादनमपक्षुधमन्नं नित्यं सौगन्धिकेन ताम्बूलेन च योगः सहिरण्यलेशमलंकरणमिति कुम्भदासीनां लाभातिशयः'।**

नित्यं सर्वदा शुक्लममलिनमाच्छादनं वासः अपक्षुधं क्षुधाजनकं कुम्भदासीनां जलाहरणीनां।

**6/5/31 'एतेन प्रदेशेन मध्यमाधमानामपि लाभातिशयान् योजयेदित्याचार्याः'।**

एतेन उक्तेन प्रदेशेन मध्यमाधमानाम् अनतिन्यूनानां महार्हभांडालंकारादिरहितानां अधमानां वस्त्रगृहशोधिकानां लाभान् तत्प्रकारान् योजयेत् सम्भावितेनोक्तरीत्या।

**6/5/32 'देशकालविभवसामर्थ्यात्तु गुणरूपरागलोकप्रवृत्तिवशादतिनियत-लाभानां नियता प्रवृत्तिरिति वात्स्यायनः'।**

विभागसामर्थ्यात् अनुसरणात् गुणाः कलाभिज्ञत्वादयः रागः स्वस्यां नायकस्य लोकप्रवृत्तिः स्वसमानानां पणः आसां वशात् अनुसारात् अनियताभ्यः अव्यवस्थितालाभानां लाभार्थं न तु नियता।

**6/5/33 'गम्यमन्यतो निवारयितुकामा सक्तमन्यस्यामपहर्तुकामान्यां वा लाभतो विमोक्ष्यमाणागम्यसंसर्गादात्मनः स्थानवृद्धिमायतिं अभिगम्यतां च मन्यमानानर्थप्रतीकारे वा सहाय्यमेनं कामयितुकामा सक्तस्य चान्यस्य व्यलीकार्थिनी पूर्वोपकारमकृतमिव पश्यन्ती केवलप्रत्यर्थिनी कल्याणबुद्धिरल्पमप्यर्थं लाभं गृह्णीयात्'।**

गम्यं पूर्वं स्वासक्तविरोधिनं अन्यतः अन्यसकाशादपि निवारयितुकामा व्यावर्त्तनेच्छुः अन्यस्यां स्वविरोधिन्यां अपहर्तुकामा ततो निष्कासनार्थिनी अन्यां अनभिमतां लाभतः अधिकधनस्य अभिगम्य संसर्गात् रूपगुणकीर्तिमत्सम्बन्धात् स्वस्याः स्थानवृद्धिं प्रतिष्ठाधिक्यं वा आयं लाभं अभिगम्यतां महाजनाभिलष्यमाणात्वं च मन्यमाना वा अनर्थप्रतीकारे अनिष्टपरिहारविषये एनं नायकं सहाय्यं स्वस्याः सहायभूतकर्मकामा वा सक्तस्य स्वस्यां अन्यस्य आदातुः व्यलीकार्थिनीभिः कृतमपि अकृतमिव पश्यन्ती विस्मयन्ती सति प्रत्यर्थिनी द्वेषिणी कल्याणबुद्धिः कुशलमतिर्गणिका गृह्णीयात् गृहीत्वा वशयेत्।

**6/5/34 'आयत्यर्थिनी तु समाश्रितानर्थं प्रतिचिकीर्षन्ती नैवं प्रतिगृह्णीयात्'।**

समाश्रितानर्थं प्राप्तानिष्टं प्रतिचिकीर्षन्ती परिहर्तुकामा अत्यर्थिनी अतिक्रान्तमविद्यमानं अर्थं धनमस्याः अत्यर्थिनी अप्राप्तापीति यावत्। एनमर्थमल्पमपि न प्रतिगृह्णीयात्।

**6/5/35 'त्यक्ष्याम्येनमन्येन प्रतिसन्धास्यामि गमिष्यत्ययं स्वदारैर्योक्ष्यते'।**

एनं निर्धनं अन्येन धनिना प्रतिसन्धास्यामि संगच्छे अयं मत्त्यक्तः गमिष्यति मत्तः मत्सकाशात् गत्वा च स्वदारैः स्वकलत्रैरेव योक्ष्यते युक्तो भवति।

**6/5/35 'नाशयिष्यत्यसावकुशलो उत्तराध्यक्षोऽस्यागमिष्यति स्वामी पिता वा'।**

असौ नायकः अकुशलः अर्थरक्षणे अतः नाशयिष्यति धनं नाना प्रकारेण उत्तरा अनन्तरं अस्य अध्यक्षः नियन्ता स्वामी राजपुरूषः पिता वा आगभिष्यति चेत् मम कष्टं भवेत् अतो वा एनं त्यक्ष्यामीति पूर्वेणा–न्वयः।

**6/5/35 'स्थानभ्रंशो वास्य भविष्यति चलचित्तश्चेति मन्यमाना तदा तस्माल्लाभमिच्छेत्'।**

तस्य स्वसंगतस्य स्थानभ्रंशः राजकोपकारणात् पतनान्निष्कासनं भविष्यतीति वा अयं चलचित्त इति वा मन्यमाना निश्चितवती सती तदा शीघ्रमेव तस्मात्ते भविष्यति स्थानादिभ्रंशिनः सकाशात् लाभं धनप्राप्तिं इच्छेत् यतो धनैकदानपरेति शेषः।

**6/5/36 'प्रतिज्ञातमीश्वरेण प्रतिग्रहं लप्स्यत्यधिकरणं वा प्राप्स्यति वृत्तिकता वास्यापततो वाहनमस्यागमिष्यति स्थलपत्रं वा सस्यमस्य पक्ष्यते कृतेऽस्मिन्ननश्यति नित्यमविसंवादको वेत्यायतिमिच्छेत् परिग्रहत्वं वा चरेत्'।**

यस्य ईश्वरेण राजप्रतिज्ञातं यश्च प्रतिग्रहं वा धनिकादनेकहस्त्यादेः अधिकरणस्थानं स्वाधिकरणापतन एव वृहद्गृहं अस्य वृत्तिकता वृत्तिः क्षेत्रादिः कलः राजगृहे लेखनं आपततः आगमिष्यतः वाहनं अश्वादिस्थलपत्रं स्थानाधिपत्यपत्रिका आगमिष्यति सस्यं व्रीह्यादि पक्ष्ते बहुफलति कृते कृतिमति सति न नश्यति कृतिन्यविफला भवति नित्यं प्रतिदिनमविसंवादो सफलप्रवृत्तिमान् नैयतिकधनलाभवानिति यावत्। इत्येवं आयतिं अस्य धनलाभादिकं इच्छेत् विचारयेत्। ततः परिग्रहं वशीकरणोपायं वा शब्दात् पूर्वोक्तोऽन्यस्य त्यागः समुच्चीयते।

गम्यागम्यानुक्त्वा श्लोकेः संगृह्णति –

**6/5/37 'कृच्छ्राधिगतवित्तश्च राजवाल्लभ्यवित्तवान्।**
**आयत्याश्च तदात्वे च दूरादेव विवर्जयेत्'॥**

कृच्छ्रेण अतिकष्टेन प्राप्तं धनं येन राजवाल्लभ्यं राजाधीनं वित्तमस्येति तया आयत्याः उत्तरकालफलस्यापि तथात्वे कृच्छ्रसाध्यत्वराजाधीनत्वे च तमिति शेषः।

**6/5/38 'अनर्थो वर्जने येषां गमनेऽभ्युदयस्तथा।**
**अयत्नेनैव तान् सर्वान् सापदेशमनुक्रमेत्'॥**

वर्जने त्यागे अनर्थाः स्थानच्युतादयः अभ्युदयः यत्किंचिल्लाभः भवति तान् अयत्नेन स्वयं प्रयत्नमकृत्वा सापदेशं सकपटं अनुव्रजेत् संगच्छेत्।

**6/5/39 'प्रेम्णा ये च प्रयच्छन्ति स्वल्पेऽप्यगणितं वसु।**
**स्थूललक्षान्महोत्साहान् गच्छेत्स्वैरपि व्ययैः'॥**

ये स्वल्पेऽपि उत्सवे अगणितं बहु वसु प्रेम्णा प्रयच्छन्ती व्ययं कुर्वन्ति स्थूललक्षान् उदारमतीन् महोत्साहान् दाने स्वैरपि व्ययैः वशीकरणाय स्वीय द्रव्यव्ययेनापि गच्छेत्।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासिशरणागतभरणनिपुण–करूणावरूणशरणशर्वाणीरमणचरणपरिचरणाचरणधुरीणांन्तःकरणकृतज्ञेतर–कुमुदसमुदायनिदाघभास्करभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ षष्ठेऽधिकरणे पंचमोऽध्यायः।**

अध्याय – 6

# अर्थानर्थानुबन्धसंशयविचारप्रकरणम्

एवं लाभालाभौ परिग्रहापरिग्रहहेतू प्रदर्श्य क्वचित् अपवादं वक्तुं वृत्तकीर्त्तने नापवादिकीं संगतिं दर्शयति लाभविशेषाः।

6/6/1 **'अर्था आचर्यमाणा अनर्थानप्यनुबध्नन्ति तेषामनुबन्धास्तत्संशयाश्च'।**

अर्था अभिमताः वक्ष्यमाणा अनर्थाश्च आचर्यमाणाः क्रियमाणाः सन्तः अनर्थान् अनभिमतान् वक्ष्यमाणान् अर्थांश्च अनुबध्नन्ति सम्पादयन्ति। तेषामनर्थानां अर्थानां च अनुबन्धा अनुनिष्पत्तयः भवन्ति। उभयेभ्यः। क्वचित् संशयाः चात्संकीर्णादयो वक्ष्यमाणाः भवन्ति तद्धेतूना –

6/6/2 **'ते हि बुद्धिदौर्बल्यादतिरागात् अत्यभिमानादतिदम्भादतिहर्षादति स्तम्भादत्यार्जवादतिविश्वासादतिक्रोधादतिप्रसादादतिमदादतिसाहसाद्दैव–योगाच्च यदृच्छया स्युः'।**

ते चानर्थाः हिताय प्रयतमानस्वबुद्धिदौर्बल्यात् अकौशल्यात् अतिरागात् अभिमतवस्तुनि अत्यभिमानात् स्वायोग्याहंकारात् अतिदम्भात् अत्यन्तप्रतारणात् अतिहर्षात् अकांडहासात् अतिस्तम्भात् समयेऽतिमौग्ध्यात् अत्यार्जवात् अतिविनयात् अतिविश्वासात् अतिविस्रम्भात् अतिक्रोधात् अयोग्यकोपात् अतिप्रसादात् कदाचित्कातिसौलभ्यात् अतिसाहसात् अनुचितकार्यकरणात् दैवयोगात् क्वचिद् यदृच्छया स्वापराधं विना कर्मवशात् भवन्ति।

6/6/3 **'तेषां फलं कृतस्य व्ययस्य निष्फलत्वमनायतिरागमिष्यतोऽप्यर्थस्य निवर्त्तनमाप्तस्य निष्क्रमणं पारूष्यप्राप्तिर्गम्यशरीरस्य प्रतिघातः केशानां छेदनं अंगवैकल्यापत्तिः'।**

तेषामभेदे षष्ठी अनर्थाभिन्नफलं जात्येकवचनं कृतस्य नायकवशीकरणार्थं व्ययस्य गन्धादिप्रसाधनविनियोगस्य निष्फलत्वं उद्देश्यकार्यजनकत्वं अनायतिः उत्तरकालप्राप्यवर्षाशनादेः

हानिः आगमिष्यतः प्रतिदिवसलभ्यस्य निवर्त्तनं निवृत्तिः आप्तस्य स्वयं प्रयुक्तस्य निष्क्रमणं सावसधात् पारूष्यप्राप्तिः अवाच्यवचनः गम्यशरीरस्य भोग्यशरीरावयवस्य प्रतिघातः हानिः केशानां कर्त्तर्याः पातनं पाषाणादौ स्वावपातः अंगवैकल्यापत्तिः कर्णाद्यंगच्छेदनं भवति।

**6/6/4 'तस्मात्तानादित एव परिजिहीर्षेत्'।**

ताननर्थहेतूनादितः अर्थानुष्ठानकाले एव परिजिहीर्षेत् त्यजेत्।

**6/6/4 'अर्थभूयिष्ठांश्चापेक्षेत्।**

अवर्जनीयश्चेत् अर्थभूयिष्ठान् बहुलाभिमतकरान् किंचिदनर्थकरानपि व्यापारान् अपेक्षेत कुर्यात्।

अथार्थादीनां स्वरूपमुदाहरणं चाह –

**6/6/5 'अर्थो धर्मः काम इत्यर्थत्रिवर्गः'।**

अर्थो धनकनकादि धर्मो अदृष्टादिः काम ऐहिकामुष्मिकोभयफलं सुखविशेषः।

**6/6/6 'अनर्थोऽधर्मो द्वेष इत्यनर्थत्रिवर्गः'।**

अनर्थः पूर्वोक्तनिष्फलत्वादिः अधर्मः दुरदृष्टं द्वेष्यत इति द्वेषः तत्फलमुभयलौकिकदुःखं।

**6/6/7 'तेषु चाचर्यमाणेष्वन्यस्यापि निष्पत्तिरनुबन्धः'**

तेषु अर्थार्थेषु व्यापारेषु आचर्यमाणेषु सत्सु अन्यस्यापि अनर्थाष्वन्यतमस्य निष्पत्तिः अनुनिष्पत्तिः अनुबध्यतेऽनुनिष्पद्यते इति तथोच्यते।

**6/6/8 'सन्दिग्धायां तु फलप्राप्तौ स्याद्वा न वेति शुद्धसंशयः'।**

फलप्राप्तौ फललाभतदभावयोः सन्दिग्धायां सन्देहविषययोः सत्तोः तु उभयविषयकसन्देह इति यावत् इति इत्याकारकः शुद्धः प्रतियोगितदभावविषयकः।

**6/6/9 'इदं वा स्यादिदं वेति संकीर्णः'।**

इदं इष्टं इदं द्विष्टं संकीर्णः विरूद्धभावद्वेषविषयकः संशयः।

**6/6/10 'एकस्मिन् क्रियमाणे कार्यद्वयस्योत्पत्तिरूभयतो योगः'।**

एकस्मिन् एकफलोद्देश्यककर्मणि।

**6/6/11 'समन्तादुत्पत्तिः समन्ततो योग इति'**

समन्तात् बहूनां फलानां इति उच्यत इति सर्वत्र शेषः।

**6/6/11 'तानुदाहरिष्यामः'।**

**6/6/12 'विचारितरूपोऽर्थत्रिवर्गः'।**

विचारितरूपः इच्छाविषय अभिमत इति यावत्।

**6/6/12 'तद्विपरीत एवानर्थत्रिवर्गः'।**

तद्विपरीतः अनभिमतः द्विष्ट इति यावत्। त्रिवर्गः पूर्वोक्तः अनर्थ एव तथोच्यते।

**6/6/13 'यस्योत्तमस्य प्राप्तौ प्रत्यक्षतोऽर्थलाभो ग्रहणीयमायतिरागमः प्रार्थनीयत्वं चान्येषां स्यात् सोऽर्थोऽर्थानुबन्धः'।**

उत्तमस्य सम्पदौदार्ययुक्तस्य प्रत्यक्षतः उद्देश्यतया अर्थात् ग्रहणीयत्वं स्वस्या उत्तमग्राह्यता आयतेः उत्तरकालफलस्य आगमः। योग्यता अन्येषां साधारणानां प्रार्थनीयत्वं आकांक्षणीयत्वं च स उत्तमः अर्थानुबन्धोऽर्थः।

**6/6/14 'लाभमात्रं कस्यचिदन्यस्य गमनं सोऽर्थो निरनुबन्धः'।**

कस्यचिदन्यस्य प्राप्तौ लाभमात्रस्य अन्यस्य आर्थिकस्य नागमनमलाभः।

**6/6/15 'अन्यार्थपरिग्रहे सक्तादायति भेदनं चात्तस्य वा निष्क्रमणं लोकविद्विष्टस्य नीचस्य वा गमनमायतिघ्नमर्थोऽनर्थानुबन्धः'।**

अन्यार्थप्रतिग्रहे अन्यार्थस्य अनुत्तमनायकस्य यस्य नीचस्य परिग्रहे सति सक्तात् पूर्वमनुरक्तादपि आयतिच्छेदः अलाभः आत्तस्य सक्तोत्तमस्य निष्क्रमणं वा नीचस्य अन्यस्यापि वा साम्यादागमनं सर्वायतिघ्नं भवति अनर्थानुबन्धिनोऽनर्थ'।

**6/6/16 'स्वेन व्ययेन शूरस्य महामात्रस्य प्रभवतो वा लुब्धस्य निष्फलमपि गमनव्यसनप्रतिकारार्थं महतश्चार्थघ्नस्य निमित्तस्य प्रशंसनमायतिजननं वा सोऽनर्थोऽर्थानुबन्धः'।**

स्वेन कृतेन व्ययेन धनस्य शूरस्य राजभटस्य वा राजमहामात्रस्य राजप्रधानमन्त्रिणो वा प्रभवतः प्रभोर्वा लुब्धस्य अदातुः कर्मणि षष्ठी तत्कर्मकं गमनं संयोगः यत् निष्फलं धनलाभशून्यमपि व्यसनस्य परकृतक्षेत्रादि पीडायाः प्रतिकारार्थं निवृत्यर्थं अर्थघ्नस्य धनव्ययकरस्य निमित्तस्य राजकीयापराधरूपस्य प्रशमनं शामकं आयतिजननं स्वस्याश्चोत्तमग्रहणयोग्यतासम्पादनेन फलहेतुश्च भवति स निष्फलसंगः।

**6/6/17 'कदर्यस्य सुभगमानिनः कृतघ्नस्य वातिसन्धानशीलस्य स्वैरपि व्ययैस्तथाराधनमन्ते निष्फलमनर्थो निरनुबन्धः'।**

कदर्यस्य लुब्धस्य सुभगमानिनः सुन्दराभिमानिनः कृतघ्नस्य स्वैरपि नायिकाकृतैरेवातिसन्धानशीलस्य अतिसेवासाध्यस्य यदाराधनं अन्ते सम्प्रयोगान्तरमपि निष्फलादिहेतुर्न भवति सः।

**6/6/18 'तस्यैव राजवल्लभस्य शौर्यप्रतापाधिकस्य तथैवाराधनमन्ते' सम्प्रयोगान्तरं अपि 'निष्फलं निष्कासनं च दोषकरं सोऽनर्थोऽनर्थानुबन्धः'।**

तस्य कदर्यतादि दोषयुक्तराजवल्लभस्य राजाभिमतस्य शौर्यं पराक्रमः प्रतापः परमीकरत्वं तथैव स्वधनव्ययेन यदाराधननिष्कासनं त्यागः दोषकरं अनर्थहेतुः।

**6/6/19 'एवं अन्यानपिधर्मकामयोरनुबन्धान्योजयेदित्यर्थः'।**

तथा हि – धर्मेण धर्मस्य तेन कामस्य तेन तस्य धर्मस्य एवमर्थानर्थाभ्यां धर्मकामयोः ताभ्यां तयोः अनुबन्धो भवति केवलधर्मकामावपि।

अथ क्रमेणोदारहरणानि –

गृहागतस्य जात्याद्युत्तमस्य धर्मोद्देश्येन नैयत्येन तस्यैव सेवनात् ततस्तटाकारामादिनिर्मापणं धर्मेण धर्मः प्रथमः। धर्मादर्थात्कामसिद्धिः द्वितीयः। कामोद्देश्येन सुन्दरयुवसेवने तादृशान्यलाभः कामेन कामस्तृतीयः। नैयत्तेन तस्यैव सेवानाद्धर्मसिद्धिश्चतुर्थः। धनिकोदारस्य नियतसेवनाद्धर्मसिद्धिः पंचमः। द्रव्याशया सेवितस्य राजवल्लभस्य विश्वस्तस्य तदलाभेऽप्यऽ–त्यागाद्धर्मलाभः षष्ठः। धनोद्देशेन धनिकोदारयुवसेवने कामलाभः सप्तमः। तस्यैव लुब्धस्य तथा सेवने काममात्रावाप्तिरष्टमः। धर्मोद्देश्येनोत्तमस्य नियतसेवनार्थसिद्धिर्नवमः। तस्यैव राजविरोधिनः तथा सेवनादनर्थावाप्तिर्दशमः। तरूणस्य कामार्थसेवनागम एकादशः। तस्यैव जनविरोधिनस्तथा सेवनाद्द्वादशः।

कृतोपकारस्य विस्रब्धस्त्यागात्केवलधर्मः। नवनवयुवजनानां संगात्केवलकामः। एवं धर्मद्वेषयोरप्यनुबन्धा ज्ञेया इति संक्षेपः।

योजनप्रकारमाह –

**6/6/20 'परस्परेण च युक्त्या संकिरेदित्यनुबन्धाः'।**

युक्त्या अपौनरूक्त्येन परस्परेण धर्मेण धर्मः इत्याद्युक्तरीत्या संकिरेत् अनुबन्धान्कल्पयेत्। अनुबन्धाः तद्भेदाः।

**6/6/21 'परितोषितोऽपि दद्यान्नवेत्यर्थः संशयः'।**

परितोषितः उपचारैः सन्तोषितोऽपि नायकः दद्याद्धनं अर्थसंशयः धनविषयकसन्देहः।

**6/6/22 'निष्पीडितार्थफलमुत्सृजन्त्या धर्म स्यान्नवेति धर्मसंशयः'।**

निष्पीडितं स्वीकृतं अर्थफलं धनादिसम्पद् यस्य तादृशं सक्तं धनाभावादुत्सृजन्त्याः मम स्यात् भवेत्।

**6/6/23 'अभिप्रेतमनुपलभ्य परिचारकमन्यं वा क्षुद्रं गत्वा कामः स्याद्वानवेति कामसंशयः'।**

अभिप्रेतं इच्छाविषय युवानं अनुपलभ्य अलब्ध्वा परिचारकं स्वस्याः क्षुद्रं जातिधननीचं युवानां गत्वा प्राप्स्यां यदि कामः कामपूर्त्तिः।

**6/6/24 'प्रभाववान् क्षुद्रोऽनभिजनोऽनर्थं करिष्यति न वेत्यनर्थसंशयः'।**

प्रभाववान् राजावलम्बनवान् क्षुद्रः जात्यानभिमतः असुन्दरः असंगतः सन् अनर्थं उक्तलक्षणं।

**6/6/25 'अत्यन्तनिष्फलः सक्तः परित्यक्तः पितृलोकं यायात्तत्राधर्मः स्यान्नवेति अधर्मसंशयः'।**

निष्फलः निस्वः सक्तः अत्यन्तं परित्यक्तः मया निष्कासितश्चेत् पितृलोकं मृतिं तत्र तदा।

**6/6/26 'रागस्याविवक्षायामभिप्रेतमनुपलभ्य द्वेषः स्यान्नवेति द्वेषसंशयः'।**

रागस्य स्वीयस्याविवक्षया अलाभान्निवृत्तौ अभिप्रेतं रागपूर्वकसम्प्रयोगं अनुपलभ्य अप्राप्य द्वेषः द्वेषी।

**6/6/26 'इति शुद्धसंशयाः'।**

**6/6/27-28 अर्थ संकीर्णाः– 'आगन्तोरविदितशीलस्य वल्लभसंश्रयस्य प्रभविष्णोर्वा समुपस्थितस्याराधनमर्थोऽनर्थ इति संशयः'।**

आगन्तोः आगन्तुकस्य अर्थादागतस्य अतएव अविदितशीलस्य अज्ञातस्वभावस्य वल्लभसंश्रयस्य राजपुरूषस्य प्रभविष्णोः प्रभोर्वा अविदितशीलस्य समुपस्थितस्यागतस्य आराधनं सेवनं अर्थः अनर्थस्तद्धेतुर्वेति संकीर्णसंशयः।

**6/6/29 'श्रोत्रियस्य ब्रह्मचारिणो दीक्षितस्य लिंगिनो व्रतिनो वा मां दृष्ट्वा जातरागस्य मुमुर्षोर्मित्रवाक्यादानृशंस्याच्च गमनं धर्मोऽधर्म इति संशयः'।**

श्रोत्रियस्य सदाचारसम्पन्नवानप्रस्थस्य ब्रह्मचारिणः तदाश्रयवतो वा दीक्षितस्य यज्ञादिदीक्षायुक्तस्य गृहस्थस्य वा लिंगिनः तुर्याश्रमिणो वा व्रतिनः अन्यस्यापि व्रतशीलस्य शूद्रस्य वा मुमुर्षोः मरणोन्मुखस्य वा कदाचित् जातकामस्य इदं सर्वविशेषणं प्रीत्यर्थं मित्रवाक्यात् स्वमित्रोपकारवाक्यात् अनृशंस्यात् स्वस्या एव दयावशाद्वा।

**6/6/30 'लोकादेवाकृतप्रत्ययादगुणो गुणवान्वेत्यनवेक्ष्य गमने कामो द्वेष इति संशयः'।**

अकृतप्रत्ययात् अपरिचितात् लोकादेव लोकं दृष्ट्वा अगुणः स्थैर्यादिगुणहीनः अनवेक्ष्य स्वयमविचार्य।

**6/6/31 'संकिरेच्च परस्परेणेति संकीर्णसंशयः'।**

परस्परेण अर्थादीनां संकिरेत् संकीर्णनात्।

**6/6/32 'यत्र परस्परस्याभिगमनेऽर्थस्सक्ताच्च संघर्षतः स उभयतोऽर्थः'।**

यत्र यदा परस्याभियोगे एकसम्बन्धि प्रयोगे सति अर्थः धनलाभ एव सक्तात् अल्पैर्सक्तानुरक्ततरूणसंयोगे हर्षः कामः भवति इति यः संशयः स उभयतोऽर्थः। अधिकरणभेदेन अर्थयोगाख्यः एकस्मिन्नेव भावाभावविषयकः शुद्धसंशयः। एकस्मिन्नेव भावद्वयविषयकः संकीर्णः अधिकरणद्वये भावद्वयविषयकस्त्वयमिति भेदः। एवमुत्तरत्रापि।

**6/6/33 'यत्र परस्य स्वेन व्ययेन निष्फलगमनं सक्ताच्चामर्षिताद्वित्तप्रत्यादानं तदुभयतोऽनर्थः'।**

स्वेन स्वीयद्रव्यसम्बन्धिना परस्य वशीकरणं तत्पूर्वकगमनं सम्प्रयोगः निष्फलं धनलाभादिशून्यं भवति वा अमर्षितात् अन्यत्रगमनेन कुपितात् सक्तात् पूर्वमनुरक्तात् द्रव्यदातुः कर्त्तुः वित्तप्रत्यादानं दत्तवित्तपुनःस्वीकारे वा।

**6/6/34 'परस्याभिगमनेऽर्थो भविष्यति नवेत्यत्रशंका सक्तोऽपि संघर्षाद्दास्यति वा नवेति स उभयतोऽनर्थसंशयः'।**

भविष्यति लभ्यते अत्र इदानीं अंकासक्तः सन्निहितासक्तः आद्यः अर्थहर्षोभयविषयकः अयं तु अर्थद्वयविषयकः इति विशेषः।

**6/6/35 'यस्याभिगमने व्ययवति पूर्वो विरूद्धः क्रोधादपकारं करिष्यति न वेति संशयः'।**

व्ययवती मदीय द्रव्यव्ययपूर्वके पूर्वो विरूद्धः पुरा मयि विरोधवानयं क्रोधात्।

**6/6/35 'सक्तो वामर्षितो दत्तं प्रत्यादास्यति न वेति स उभयतोऽनर्थसंशयः'।**

सक्तः अनुरक्तः अमर्षितस्सन् दत्तं प्रतिश्रुतधनं प्रत्यादास्यति ददातीति यः संशयः पूर्वः फलाभावविषयः अयं त्वपकारविषय इति विज्ञेयम्।

**6/6/35 'इत्यौद्दालकेरूभयतो योगः'।**

औद्दालकेः तदुक्ताः।

**6/6/36&37 'बाभ्रवीयास्तु यस्याभिगमनेऽर्थोऽनभिगमने च सक्तादर्थः स**

उभयतोऽर्थः'।

यस्य येनाभिगमने सम्प्रयोगे सति अर्थः धनलाभादि भवति अनभिगमने सक्तात् अनुरक्तात् एव सः तेन योगः।

**6/6/38 'यस्याभिगमने निष्फलो व्ययोऽनभिगमने च निष्प्रतीकारोऽनर्थः स उभयतोऽनर्थः'।**

निष्फलः धनलाभादिशून्यः व्ययः स्वधनमात्रस्य निष्प्रतीकारः प्रकारान्तरेणापरिहार्यः।

**6/6/39 'यस्याभिगमने व्ययो दास्यति नवेतिसंशयः अनभिगमने च सक्तो दास्यति नवेत्युभयतोऽनर्थसंशयः'।**

दास्यति धनम्।

**6/6/40 'यस्याभिगमने व्ययवति पूर्वो विरूद्धः प्रभाववान् प्रत्यादास्यति न वेति संशयोऽनभिगमने च क्रोधादनर्थं करिष्यति नवेत्युभयतोऽनर्थसंशयः'।**

व्ययवति व्ययपूर्वके पूर्वः पुरा विरूद्धः विरोधवान् अयं प्रभाववान् प्रभुत्ववान् प्रत्यादास्यति प्रतिज्ञाय धनं दास्यति।

**6/6/41 'अन्यतोऽनर्थोऽन्यतोऽर्थसंशयः'।**

अन्यतः अनभिगच्छतः अर्थः प्रचुरः निश्चितः संशयः प्रचुरः एवमन्यत्रापि। अन्यतोऽर्थोऽन्यतोऽनर्थसंशयः अन्यतोऽनर्थोऽन्यतोऽनर्थसंशयः।

**6/6/41 'एतेषामेव व्यतिकरेऽन्यतोऽर्थसंशयः अन्यतोऽनर्थसंशयः इति षट् संकीर्णयोगाः।'**

उक्तप्रकारेण एतेषां अर्थानर्थसंशयानां व्यतिकरे परस्परव्यत्ययेन संकीर्णयोगाः भवन्तीति योजना।

**6/6/42 'तेषु सहायैः सह विमृश्य यतोऽर्थभूयिष्ठोऽर्थसंशयो गुरूरनर्थप्रशमो वा ततः प्रवर्त्तेत'।**

तेषु उक्तेषु मध्ये यतोऽद्यदभिगमनेन अर्थभूयिष्ठः बहुधनलाभः अर्थसंशयः उत्कटकोटिकतत्संशयो वा गुरूः उत्कृष्टः योऽनर्थः तस्य प्रशमो वा भवति ततः तदभिगमनं सहाय्यैः आप्तैः सह विमृश्य विचारेण निश्चित्य प्रवर्त्तेत कुर्यात्।

**6/6/43 'धर्मकामावपि तैरेव प्रकारैः उदाहरेदेकैकशः संकिरेत् परस्परेण व्यतिषंजयेत्युभयतो योगः'।**

एतैः अर्थानर्थोक्तैः एकैकशः प्रत्येकं परस्परेण व्यत्ययेन उदाहरणसंकरौ प्रागुक्तौ परस्परव्यतिषंगस्तु एकतः कामोऽन्यतो धर्मः। एकतः कामसंशयः अन्यतो धर्मसंशयः इत्यादिरीत्योन्नेयः।

**6/6/44 'सम्भूय च विटाः परिगृह्णन्त्येकामसौ गोष्ठी परिग्रहः'।**

यां एकां वारसुन्दरीं विटा सम्भूय एकीभूय परिगृह्णन्ति भोगार्थं स्वीकुर्वन्ति असौ सा गोष्ठीपरिग्रहः। गोष्ठ्या संघेन परिगृहीतत्वात्तदाख्या।

**6/6/45 'सा तेषामितस्ततः संसृज्यमानानां प्रत्येकं संघर्षादर्थं निवर्त्तयेत्'।**

तेषां इतस्ततः अन्यास्वपि संसृज्यमानानां अनुरक्तानां तेषां संसक्तानां संघर्षमनुरागं प्रत्येकं तत्पुरूषीयं अर्थात्तन्नायिकासु निवर्त्तयेत् स्वानुरागं संवर्धनेन नाशयेत्।

**6/6/46 'सुवसन्तकादिषु च योगे यो मे मनोरथमिमं युवा सम्पादयिष्यति तस्य गमिष्यति दुहितेति मात्रा रोचयेत्'।**

यः युवा वसन्तादिषु उत्सवोपयोगि-अलंकारवस्त्रादिरूपं मनोरथं तदभिमतं सम्पादयिष्यति पूरयिष्यति तस्य यूनः निकटं मे दुहिता रोचयेत् स्वमात्रा रक्तान् प्रति श्रावयेत्।

**6/6/47 'तेषां संघर्षजेऽभिगमने कार्याण्युपलक्षयेत्'।**

तेषामनुरक्तानां संघर्षं स्वस्यामनुरागं जातिं मान्यतां गमनं अभिमतसम्प्रयोगं कार्याणि उभयोः उपलक्षयेत् कुर्यात्।

**6/6/48 'एकतोऽर्थं सर्वतोऽनर्थं सर्वतोऽनर्थमेकतोऽर्थम् उभयतोऽर्थमर्थतोऽर्थ–मिति समन्ततो योगाः'।**

एकतः एकस्मात् गम्यात् अर्थवस्त्रालंकारादि लभते सर्वतः तदन्येभ्यो बहुभ्योऽनर्थं अनिष्टं उक्तवैपरीत्यं च यतः यस्मात् अर्थं यथा तथा लभते अनर्थमपि अर्थतः एतल्लब्धार्थात् अनु अन्यस्मात् अर्थं अनर्थादन्वनर्थं इत्येते समन्ततः बहुभिः योगनिमित्तकत्वात्तदाख्याः।

**6/6/49 'उभयतो अर्थसंशयमनर्थसंशयं च पूर्ववद्योजयेत्। संकिरेत् च तथा धर्मकामावपि'।**

उभयतः उभाभ्यामर्थः अन्येभ्योः हर्षः तद्वैपरीत्यं च एवमनर्थस्यापि। इत्यादि रीत्या पूर्ववत् उभयतो योगवत् तथा एवमेव धर्मकामावपि एकतो धर्म सर्वतः कामं वैपरीत्यं च एवमुभयतश्चेत्यादिप्रकारेण संकिरेत् संकीर्णसंशयान्योजयेत्।

**6/6/49 'इत्यर्थानर्थानुबन्धसंशयविवादाः'।**

अर्थानर्थौ अनुबन्धौ तदनुबन्धौ तौ तद्विषयकाश्च संशयाः शुद्धसंकीर्णादि नानाविधाः इति समाप्ताः।

अथ वेश्याभेदानाह –

6/6/50 '**कुम्भदासी**' जलहारिणी '**परिचारिका**' संमार्जनादिकारिणी '**कुलटा**' कुलं त्यक्त्वा स्वेच्छाचारिणी '**स्वैरिणी**' कुलस्थैव रहश्चारिणीं '**नटी**' नर्त्तकी '**शिल्पकारिका**' पुष्पादिविचित्रग्रथिनी '**प्रकाशविनष्टा**' बहिरंगचारिणी '**रूपाजीवा**' रूपैकप्रधानजीविका '**गणिका**' अनेकसंगिनी '**वेश्या**' विषयलोला इति वेश्याविशेषाः।

**6/6/51 'सर्वासां चानुरूपेण गम्याः सहायाः तदनुरंजनम्'।**

सर्वासां उक्तानां सहाय्यानुरूप्येण गम्या गमनार्हाः ततः तदनुरंजनं तेषामनुरंजनं अनुरागोत्पादनं कार्यं।

'**अर्थागमोपायाः**' अर्थागमोपायाः तासामर्थसम्पादनोपायाः उच्यन्ते इति शेषः। निःसारणं धनिकमनुरज्य तदीयं परिगृह्य निःस्वस्य '**निष्कासनं पुनः सन्धानं**' पुनः तस्य धनलाभे सन्धानं पीठमर्दादिभिः पुनः संघटनं '**अर्थानुबन्ध–संशयविचाराः**' पूर्वोक्ताः वैशिकं '**इति वैशिकं**' वेश्याधर्माः।*

**6/6/52 'रत्यर्थाः पुरूषा येन रत्यर्थीश्चैव योषितः।**
**शास्त्रस्यार्थप्रधानत्वात्तेन योगोऽत्र योषितां॥'**

येन यतः पुरूषाः सर्वे रत्यर्थिनः तत्सुखाभिलाषिणो हि शास्त्रस्य अस्य अर्थप्रधानत्वात् अर्थसम्पादनोपायविषयकप्रतिपादनपरत्वात् तेन हेतुना अत्र शास्त्रे योगः अध्ययनादिरूपः भवति।

**6/6/53 'सन्ति रागपरा नार्यः सन्ति चार्थपरा अपि।**
**प्रागत्र वर्णितो रागो वेश्यायोगस्तु वैशिके'॥**

लोके नार्यः काश्चनरागपराः रतिमात्राभिलाषिण्यः तयोः रागः रंजनोपायः प्राक् अत्र शास्त्रे वेश्यायोगः वेश्यायाः योगः धनप्रप्त्युपायः अस्मिन् वैशिके वर्णितः।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासिपंडितमंडलमंडित्यांडित्याखंड-चंडिमोद्दंडसर्वेश्वररूपावतारसर्वेश्वरसूरिवरछात्रनिकराचरमानतिप्रयोजनमहाकार्यकारयि-तृलोभिजनमनःकुमुदसमुदायनिदाधभास्करभास्करनरसिंह शास्त्रिविरचितवात्स्यायन-सूत्रवृत्तौ षष्ठेऽधिकरणे षष्ठोऽध्यायः। समाप्तं चेदमधिकरणम्।**

---

* This Sutra in the published text is as follows –सर्वासां चानुरूपेण गम्याः सहायास्तदुपरञ्जनमर्थागमोपाया निष्कासनं पुनः सन्धानं लाभविशेषानुबन्धा अर्थानर्थानुबन्धसंशय-विचाराश्चेति वैशिकम्। 'Some parts of the Sutra are missing in BNS's text.

**Note:**

In this Adhikarana the third categaory of Love women, ie Veśyā (besides 'wife' and 'others' wife') has been taken up. Veśyās were an important segment of urban society those days, as can be inferred from Jataka tales, Brihatkatha, Kathasaritsagara and also Kautilyas Artha Sastra. They enjoyed social acceptance and legal status also. They could approach courts for redressal of their grievance (6/3/38. K.S. & 7/1/19. K.S.). Vajsaneyi Samhita recognized prostitution as a profession. Kautilya had created a post of Ganikadhyaksha who used to regulate their affairs.

There were many categories of Veśyās (6/6/50 K.S.) Broadly speaking the high class गणिका, the medium class रूपाजीवा and the lower class (कुम्भदासी). The high class Veśyā used to live in grand mansions as did Vasantasena in Mrichchhakatikam. Madan Manjusha of Brihatkatha lived in an eight storeyed mansion. Another famous courtisan of Campa Devadatta (6th cen B.C.) 'was proficient in sixty four arts, and endowed with sixty four specialsed characteristics of a courtesan; she excelled in twenty nine amourous ways of disporting, was eminent in twenty one efficiencies of sexual pleasure.... well econversant with eighteen kins of provicial dilects' as per Jaina Nayadammakaha- p. 186. 'the unknoun kamasastras' of Dr. P.K. Agrawal. Rich clients came in their Karni chariots, on horses, and elephants. These were parked infront of their mansions. The gates of mansions were guarded by kiratas (tribesmen of the hills).

The account of Ambapali* in this connection, is illustrative and illuminating. 'She was the beautiful and highly accomplished daughter of Mahanama, many rich youngmen coveted her aggressively. The governing council of the Lichchhavis found out an amicable way to please all of them. They decided that no single person will have the pleasure of being her master by marriage. Instead she will be accessible to all whoever can afford her. Amrapali agreed to the dictats of the Council but simultaneously put her own condition for the same. These were —(i) her residence will be in the prime locality, (ii) only one lover will be entertained at a time, (iii) her fees will be 500 coins (Karsapanas) on each occasion, (iv) Search of her

* 'Ambapali was a famous courtesan of great political influence in the city of Vaishali during Buddha's life time ($6^{th}$ Cen BC)'

- P.K. Agrawal in The Unkonwn Kamasutras - P.189

residence will be permitted with Seven days prior notice.' (Chaturbhani Edn – Motichand & V.S. Agrawal).

Instances of such Veśyās marrying their lovers are there in the stories of Charudatta-Vasantasena, Naravahana Datta – Manjushika, Lohajangha – Rupanika.

On the other hand the lowly Veśyās' plight has been vividly brought out in Padataditaka Bhana of Shyamalaka – They were paid a pittance, were subjected to medical check ups, and treatments, and were made to do degrading things.

Material in this Adhikarana is largely drawn from Dattaka's work, which obviousbly contained advices and suggestions for Veśyās, keeping their welfare in view. Among other things. They were asked to avoid unhealthy men (6/1/16 K.S.) and those who carry out heinous acts at the bidding of Kings (6/5/37 k.S.) Advices for handling predicaments dilemmas in dealing with more than one important client were given in details. They were also asked to keep a watch on prospective rich & influential clients. (6/5/36 K.S.) Besides these the fragmentary work Dattaka Sutra referred to earlier adds a few hints to the above account.

(i) Actions and body languages to indicate disapproval of a client.

दृष्ट्वास्य वक्त्रं प्रतिगूहनं च निष्ठीवनं चान्यनिरीक्षणं च।
कथाभिरन्यैस्सह जल्पनं च कुर्वन्ति नार्यो विपरीतकामाः।

(ii) preparations and ministrations to be carried out under Sayanopcara for their lovers -

स्नात्वा तु गन्धैरनुलेपनैश्च या भूषणैः प्रीतिकरैश्च युक्ता।
गात्रं च दन्तं च विशुद्धवस्त्रा कन्या भवेत्सा विशदा सकामा।।
व्यापोह्य लज्जां भृशभावयुक्ता क्रमेण तस्यानुवशं भवेत्सा।
संगृह्य कण्ठं परिमृज्य केशान् द्वाभ्यां कुचाभ्यां हृदये निपीड्य।।
स्वेनोरूणा तस्यं कटिं निवेश्य यथावदोष्ठग्रहणं च कुर्यात्।
ततः प्रहृष्टा प्रणयसंगाद्रोचते कान्ता दयितं मैथुनाय।।
भावानुरक्तानि मनोहराणि तत्कालयुक्तानि सुखाश्रितानि।
श्लक्ष्णान्युदाराणि वचांसि नारी कान्तेन सार्धं कथयेच्छयाना।।

Later writers on kama Sastra did not deal with the subject of Veśyās. Infact, Vātsyāyana is the last such author who dutifully followed the tradition set forth by Svetaketu & Bābhravya.

# सुभगंकारणप्रकरणम्

### अध्याय-1

## अथ सप्तममधिकरणम्

अथ सप्तममधिकरणम्। भास्करनरसिंहशास्त्री शास्त्रे कामस्य षष्टमधिकरणं व्याख्याय सप्तममथो व्याख्याताख्यातसर्वशास्त्रार्थः अग्रिमप्रमेये मनः प्रणिधानाय प्रमेयभेदं सूचयितुमुक्तमनुवदति अर्थानर्थानुबन्धसंशयविचारा वेश्याविशेषाश्चेति इति समाप्तः। सप्तमाध्यायप्रतिपाद्यं सर्वोपजीव्यमिति सन्तिं सूचयन्नाह–

**7/1/1 'व्याख्यातं कामसूत्रम्'।**

कामसूत्रं कामप्रधानं बह्वर्थसूचकं शास्त्रं व्याख्यातं रचितम्।

**7/1/2 'तत्रोक्तैस्तु विधिभिरभिप्रेतमर्थमनभिगच्छन्नौपनिषदिकमाचरेत्'।**

तत्र षडधिकरणोक्तैः विधिभिः प्रकारैः अभिप्रेतं अभिमतमर्थं नायकवशीकरणादिकं औपनिषदिकं एतत् प्रतिपाद्योपायजातं।

**7/1/3 'रूपं गुणा वयस्त्याग इति सुभगंकरणम्'।**

रूपं अवयवसौष्ठवं गुणाः ऋजुत्वानुरागित्वादयः वयस्तारूण्यं त्यागः औदार्यं इति एते सुभगंकरणं वशीकरणहेतवः प्रसिद्धाः। एतन्मध्ये तु।

**7/1/4 'तगरकुष्टतालीसपत्रकानुलेपनं सुभगंकरणम्'।**

तगरं त्रपुसं कुष्टं काष्ठविशेषः तालीसपत्रं प्रसिद्धं एषां गन्धस्यानुलेपनं लेपः शिष्टं उक्तार्थम्।

**7/1/5 'एतैरेव सुपिष्टैर्वर्त्तिमालिप्याक्षतैलेन नरकपाले साधितमंजनं च'।**

सुपिष्टैः चूर्णीकृतैरेतैः वर्तिवस्त्रखंडमालिप्य तां अक्षतैलेन अक्षतिफलैर्व्याप्नोतीत्यक्षः

कर्षकफलाख्यो वृक्षविशेषः तत्फलमप्यक्षं। तस्य तैलेन स्नेहेन प्रदीप्य नरकपाले उपरि स्थापिते साधितं सम्पादितं अंजनं च सुभगंकरणमिति सर्वत्रानुषज्यते।

7/1/6 **'पुनर्नवासहदेवीसारिवाकुरण्टोत्पलपत्रैश्च सिद्धं तैलमभ्यंजनम्'।**

पुनर्नवा वर्षकेतुः सहदेवी प्रसिद्धा सारिवा लता विशेषः कुरंटः कुरंटकः नखरागार्थं स्त्रीभिः ध्रियते उत्पलपत्राणि प्रसिद्धानि सिद्धं निष्पन्नं तैलं अभ्यंजनं अभ्यक्तं।

7/1/7 **'तद्युक्ता एव स्त्रजश्च'।**

तद्युक्ता उक्तपत्रयुक्ताः।

7/1/8 **'पद्मोत्पलनागकेसराणां शोषितानां चूर्णं मधुघृताभ्यामवलिप्य सुभगो भवति'।**

शोषितानां आतपेन मधुघृताभ्यां मिश्रितम्।

7/1/9 **'तान्येव तगरतालीसतमालपत्रयुक्तान्यनुलेपनम्'**

तान्येव पद्मादीन्येव अनुलेपनं कृत्वा अनुलिप्येतित्यर्थः। शोषितेत्यादि अवलिह्य वर्जमनुवर्त्तते विभक्तिविपरिणामे।

7/1/10 **'मयूराक्षि तरक्षोर्वा सुवर्णेनावलिप्य दक्षिणहस्तेन धारयेदिति सुभगं–करणम्'।**

मयूरः केकीतरक्षोर्मदन अक्षि अन्यतरस्य तत्तद्गोलकं सुवर्णेन हस्तेन आलिप्य लेपयित्वा इति एतत्।

7/1/11 **'तथा बादरमणिं शंखमणिं च'।**

मणिं बीजं शंखमणिं वारिभवघुटिका तथेति सुवर्णेत्याद्यनुषंजनार्थः।

7/1/11 **'तेषु चाथर्वणान्योगान् गमयेत्'।**

तेषु उक्तेषु आथर्वणान् तच्छास्त्रोक्तान् योगान् वशीकरणमन्त्रान् गमयेत् जपेत्।

7/1/12 **'विद्यातन्त्राच्च विद्यायोगाच्च प्राप्तयौवनां परिचारिकां स्वामी संवत्सरमात्रमन्यतो धारयेत्'।**

स्वामी प्राप्तयौवनां प्राश्यमानतारूण्यां परिचारिकां कुलदासीं विद्यातन्त्रात् एतच्छास्त्राभिज्ञात् विद्यायोगात् विद्यानिमितं अन्यतः स्वगृहादन्यस्मिन् गृहे संवत्सरं तदर्धं वा यावद्विद्यालाभं धारयेत् वासयेत्।

**7/1/12 'तत उचितां बालां वामत्वाल्लालसीभूतेषु गम्येषु योऽस्याः संघर्षेण बहु दद्यात्तस्मै विसृजेदिति सौभाग्यवर्धनम्'।**

ततः विद्याभ्यासानन्तरं बालां प्राप्तयौवनां अतएव उचितां लालसीभूतेषु विलासीयुवसु मध्ये संघर्षेण विद्यातारूण्यदर्शनजन्येन बहुधनं विसृजेत् दद्यात् इत्येतद्दानं सौभाग्यवर्धनं चिरतरपरस्पररागानुवर्धकं भवति।

**7/1/13 'गणिका प्राप्तयौवनां स्वां दुहितरं तस्या विज्ञानशीलरूपानुरूप्येण तानभिनिमन्त्र्य सारेण योऽस्यै इदमिदं वा दद्यात्स पाणिं गृह्णीयादिति संसाध्य रक्षयेत्'।**

तस्याः दुहितृसम्बन्धिभिः विज्ञानं विद्याशीलं चतुरतादि रूपं सौन्दर्यं लावण्यादि तैः आनुरूप्येण औपम्येन युक्तान् गृहागतान् अभिनिमन्त्र्य सम्बोध्य सारेण अधिकतया इदं आभरणादि इदं वस्त्रादि चाद्वसु योऽस्यै दद्यात् सोऽस्याः संसाध्य पुनः पुनरूक्त्वा रक्षयेत् असम्प्रयुक्तां रक्षयेत् इति।

**7/1/14 'सा च मातुरविदिता नाम नागरिकपुत्रैर्धनिभिरत्यर्थं प्रीयेत्'।**

इति एवं सति दुहिता अविदिता नाम अज्ञातचेष्टैव नागरिकपुत्रैः सहाध्यायिभिः प्रीयेत प्रीतिं साधयेत् सम्पादयेत्।

**7/1/15 'तेषां कलाग्रहणे गन्धर्वशालायां भिक्षुकीभवने तत्र तत्र च सन्दर्शन–योगाः'।**

तेषां ताश्च ते च ते कलाग्रहणे विद्याभ्यासस्थले गन्धर्वशालायां मन्दुरायां भिक्षुकी कुट्टिनी तत्र तत्र देवभवनारामादौ दर्शनयोः सानुरागसविलासनिरीक्षणादयः सम्पाद्याः।

**7/1/16 'तेषां यथोक्तदायिनां माता पाणिं ग्राहयेत्'।**

तेषां उक्तसख्येनानुरक्तानां अतएव यथोक्तदायिनां स्वोक्तधनदानप्रतिज्ञानां पाणिं ग्राहयेत् दुहित्रा।

**7/1/17 'तत्तावदर्थलभमाना तु स्वेनाप्येकदेशेन दुहित्र एतद्दत्तमनेनेति ख्यापयेत्'।**

माता तत् तस्मात् तावत्प्रतिज्ञातं तु अर्धेऽप्यर्थेन स्वेन स्वकीयेन एकदेशेन धनस्य स्वीयधनैकदेशं गृहीत्वा अनेन एतद्धनं दत्तमिति दुहित्रे ख्यापयेत्।

**7/1/18* 'उढाया वा कन्याभावं विमोचयेत्'**

**7/1/19 'प्रच्छन्नं वा तैः संयोज्य स्वयमजानती भूत्वा ततो विदितेष्वेवं धर्मस्थेषु निवेदयेत्'।**

अजानती तदेव तैः धनिनागरिकैः प्रच्छन्नं भिक्षुकीगृहादौ संयोज्य दुहितरं ततः संयोगानन्तरं विदितेव गृहित्रीव एंव रहोयोगं धर्मस्थेषु राजसभिकेषु निवेदयेत्।

**7/1/20 'सख्यैव तु दास्या वा मोचितकन्याभावां उपगृहीतकामसूत्राभ्यासिकेषु योगेषु प्रतिष्ठितां प्रतिष्ठिते वयसि सौभाग्ये च दुहितरमवसृजन्ति गणिका इति प्राच्योपचाराः'।**

सख्या वयस्यया मोचितकन्याभावं नागरिकसंयोजनेन त्याजितब्रह्मचर्यां उपगृहीतकामसूत्रां सम्यगभ्यस्योक्तशास्त्रं आभ्यासिकेषु आभ्यासैकलभ्येषु योगेषु शास्त्रोक्तवशीकरणोपायेषु प्रतिष्ठितां निपुणतमां वयसि प्रतिष्ठिते निरूढे सति सौभाग्ये नागरिकसधनयुवसम्प्रयोगविषये अवसृजन्ति यतन्ते प्राच्योपचाराः नवसम्प्रयोगमर्यादा।

**7/1/21-22 'पाणिग्रहश्च संवत्सरमव्यभिचार्यस्ततो यथा कामिनी स्यादूर्ध्वमपि संवत्सरात्परिणीतेन निमन्त्र्यमाणा लाभमप्युत्सृज्य तां रात्रिं तस्यागच्छेदिति वेश्यायाः पाणिग्रहणविधिः सौभाग्यवर्धनं च'।**

पाणिग्रहः पाणिग्राही संवत्सरं तत्पर्यन्तं अव्यभिचार्यः नियमेन सेव्यः ततः संवत्सरोत्तरं यथा कामिनी यथेच्छसंचारिणी परिणीतेन पाणिग्राहिणा कस्यांचिद्रात्रौ निमन्त्र्यमाणा प्रार्थ्यमाना सती लाभं अन्यस्मात् तस्य तेन आगच्छेत् संगच्छेत् इति एवं कृतः पाणिग्रहणविधिः तत्प्रकारः सौभाग्यवर्धनं बहुजनानुरागवर्धकः स्यात्ततः प्राप्तिहेतुश्च।

**7/1/23 'एतेन रंगोपजीविनां कन्या व्याख्याताः'।**

एतेन वेश्यापरिणयकथनेन रंगोपजीविनां वस्त्रादिविचित्रकर्मिणाम्।

---

* B.N.S. skips over Sutra no. 7/1/18

**7/1/24 'तस्मै तु तां दद्युर्य एषां तूर्ये विशिष्टमुपकुर्यात्'।**

एषां नागरिकाणां मध्ये तूर्यविशिष्टं तौर्यत्रिकं नृत्तगीतवाद्यानि उपकुर्यात् तस्मै तां दद्युः। अत्र वशीकरणे पाणिग्रहादिकथनं एतादृशपाणिग्रहस्यापि वशीकरणसाधनत्वज्ञापनाय तासामेवात्राधिकार इति सूचनाय वेति बोध्यम् एवं स्त्रीणां वशीकरणहेतूनुक्त्वा पुंसां तानाह –

**7/1/25 'धत्तूरकमरिचपिप्पलीचूर्णैः मधुमिश्रैर्लिप्तलिंगस्य प्रयोगो वशीकरणम्'।**

धत्तूरः कनककुसुमं मरिचं कोलकं।

**7/1/26 'वातोद्भ्रान्तं पत्रं मृतकनिर्माल्यं मयूरास्थिचूर्णावचूर्णं वशीकरणं'।***

वातोद्भ्रान्तपत्रं पिप्पलीदलं मृतकनिर्माल्यं मृतालंकृतिकुसुमं मयूरास्थिकेकिसुप्रमधातुः। एतेषां चूर्णेन मधुमिश्रेण विचूर्णनं लिंगानुलेपनं।

**7/1/27 'स्वयं मृताया मंडलकारिकयोश्चूर्णं मधुसंयुक्तं सहामलकैः स्नानं वशीकरणम्'।**

मंडलकारिकायाः गृध्रायाः आमलकैः धात्रीचूर्णैः स्नानं तत्कालानुलिप्तम्।

**7/1/28 'वज्रस्नूहीगंडकानि खंडशः कृतानि मनःशिलागन्धपाषाण-चूर्णेनाभ्यज्य सप्तकृत्वः शोषितानि चूर्णयित्वा मधुना लिप्तलिंगस्य सम्प्रयोगो वशीकरणम्'।****

मनःशिला मनोगुप्ता गन्धपाषाणः आपणद्रव्यविशेषः सप्तकृत्वः सप्तवारं अभज्यालिप्य शोषितानि वज्रस्नूहीगंडीरं एतानि चूर्णयित्वा मधुना संमिश्र्य तेन लिप्तलिंगं यस्य तस्य कदाचित् सम्प्रयोगः अविच्छेदेन वशीकरणं तद्धेतुः।

**7/1/29 'एतेनैव रात्रौ धूमं कृत्वा तद्धूमतिरस्कृतं विरूपितं सौवर्णं चन्द्रमसं दर्शयति'।**

एतेन उक्तचूर्णेन तिरस्कृत तत्तवासितं सौवर्णं वर्तुलसुवर्णखंडं चन्द्रमसं तमिव दर्शयति दर्शयित्वा वशयति।

**7/1/30 'एतैरेव चूर्णितैर्वानरपुरीषमिश्रितैः यां कन्यां अवकिरेत्सान्यस्मै न दीयते'।**

---

* कुचिमार तंत्र - 3/22

** कुचिमार तंत्र - 3/23

एतैः वज्रादिसंस्कृतखंडैः कन्यां उद्दिश्य अन्यस्मै न दीयते। अन्यं न रोचते।

**7/1/31 'वचागंडकानि सहकारतैललिप्तानि शिंशपावृक्षस्कन्धमुत्कीर्य निदध्यात्'।**

वचा उग्रगन्धागंडकं उक्तं तत् खंडानि सहकारः तत्कुसुमानि स्कन्धं शाखाद्वयमूलं उत्कीर्य खनित्वा तत्र।

**7/1/32 'ततः षड्भिर्मासैरपनीतानि देवकान्तमनुलेपनं वशीकरणं चेत्याचक्षते'।**

षड्भिः मासैः तदुत्तरं अपनीतानि ततो निष्कास्य चूर्णीकृतानि चेत् तच्चूर्णं देवकान्तं तत्कान्तिकरत्वात्तदाख्यम्। एवं अग्रेऽपि अनुलेपनं तस्य।

**7/1/32 'तथा खादिरसारजानि शकलानि तनूनि यं वृक्षमुत्कीर्य षण्मासान्निदध्यात् तत्पुष्पगन्धानि भवन्ति। गन्धर्वकान्तमनुलेपनं वशीकरणं चेत्याचक्षते'।**

खादिरसाराणि वृक्षविशेषः यं सुगन्धं तत इत्यादि कान्तां तमूह्य एवमग्रेऽपि।

**7/1/33 'प्रियंगवस्तगरमिश्राः सहकारतैलदिग्धा नागकेसरवृक्षमुत्कीर्य षण्मासं निहिता नागकान्तमनुलेपनं वशीकरणं इत्याचक्षते।'**

प्रियंगवः तिन्दुकाः तगरं वंगखंडानि दिग्धाः लिप्ताः नागकेसरं हेमबीजं।

**7/1/34 'उष्ट्रास्थिभृंगराजरसेन भावितं दग्धमंजनं उष्ट्रस्यास्थ्यं नलिकायां निहितमुष्ट्रास्थिशलाकयैव श्रौतांजनसहितं पुण्यं चक्षुष्यं वशीकरणं चेत्याचक्षतै'।**

उष्ट्रः क्रमेलकः भावितं वासितं दग्धं भस्मीकृतं तद्रसेनैवाक्तं अंजनं उष्ट्रास्थ्यंजनिकायां तत्कृतकराटिकायां श्रौतांजनसहितं प्रसिद्धांजनसंमिश्रं उष्ट्रशलाकयैव धृतं पुण्यं क्षेमकरं चक्षुष्यं तद्धितम्।

**7/1/35 'एतेन श्येनभासमयूरास्थिमयान्यंजनानि व्याख्यातानि'।**

श्येनः पत्रीभासः पक्षिविशेषः व्याख्यातानि उक्तरीत्या सम्पादितान्युक्तकराणि।

**7/1/36 'उच्चटाकन्दश्च यष्टीमधुकं च सशर्करेण पयसा पीत्वा वृष्यो भवति'**

उच्चटा गुल्मविशेषः कन्दस्तन्मूलं यष्टीमधुकं आपणद्रव्यं वृष्यः प्रवृद्धवीर्यः।

**7/1/37 'मेषवस्तमुष्कसिद्धस्य पयसः सशर्करस्य पानं वृषत्वयोगः'।**

मेषच्छागः वस्तः विश्रुंग मुष्कसिद्धस्य ऊधोलब्धस्य।

**7/1/38 'तथा विदार्याः क्षीरिकायाः स्वयंगुप्तायाश्च क्षीरेण पानं'।***

क्षीरिकायाः क्षीरवत्याः विदारीस्वयंगुप्ता लताविशेषः प्रसिद्धेन सह पानं तथा वृषत्वहेतुः.।

**7/1/39 'तथा प्रियालबीजानां मोरटाक्षीरविदार्योश्च क्षीरेणैव'।**

प्रियलो वृक्षविशेषः तद्बीजानां चूर्णीकृतानां मोरटा लताविशेषः क्षीरस्य पानम्।

**7/1/40 'तथा श्रृंगाटककसेरूमधूकानिक्षीरकाकोल्या सह पिष्टानि सशर्करेण पयसा घृतेन मन्दाग्निनोत्करिकां पक्त्वा यावदर्थं भक्षितवाननंताः स्त्रियो गच्छतीत्याचक्षते'।**

श्रृंगाटकादीनि आपणद्रव्याणि क्षीरकाकोली गुल्मविशेषः।
पयसा गोलीकृत्य उत्करिकं सम्यक् यावदर्थं यथेच्छं अनन्ता अपेक्षितः।

**7/1/41 'माषकलधौतामुष्णेन घृतेन मृदूकृत्योद्धृतां वृद्धवत्सायाः गो पयः सिद्धं पायसं मधुसर्पिभ्यां अशित्वानन्ता स्त्रियो गच्छति इत्याचक्षते'।****

माषकलधौतान्माषविकारसूक्ष्मगोलकान्।

**7/1/42 'विदारी स्वयंगुप्ता शर्करा मधुसर्पिभ्यां गोधूमचूर्णेन पोलिकां कृत्वा यावदर्थं भक्षितवाननन्ताः स्त्रियो गच्छतीत्याचक्षते'।*****

विदारी स्वयंगुप्ता तत्क्षीरेण।

**7/1/43 'चटकांडरसभावितैस्तंडुलैः पायसं सिद्धं मधुसर्पिभ्यां प्लावितं यावदर्थमिति समानं पूर्वेण'।**

चटको ग्राम्यकुक्कुटपक्षिविशेषः भावितैः वासितैः प्लावितं मिश्रितं यावदर्थं यावदपेक्षितं इति भक्षितवानित्यादि पूर्वेणान्वयः समानम्।

---

* कुचिमार तंत्र 4/11-12
** कुचिमार तंत्र 4/9-10
*** कुचिमार तंत्र 4/11-12

**7/1/44 'चटकांडरसभावितानपगतत्वचस्तिलान् श्रृंगाटककसेरूकस्वयंगुप्ता-फलानि गोधूममाषचूर्णैः सशर्करेण पयसा सर्पिषा च पक्वं पायसं यावदर्थं प्राशितमिति समानं पूर्वेण'।**

अपगतत्वचः निष्कासिततुषान् तिलान् स्नेहपूरकान् श्रृंगाटकादिफलानि च गोधूममाषचूर्णैः सहसर्पिषाघृतेन पक्वानि सशर्करेण पयसा पायसम्।

**7/1/45 'सर्पिषो मधुनश्च शर्कराया मधुकस्य च द्वे द्वे पले मधुरसायाः कर्षः प्रस्थं पयस इति षडंगममृतं मेध्यं वृष्यमायुष्यं युक्तरसमित्याचक्षते'।***

मधुकस्य गुडपुष्पस्य मधुररसायाः लताविशेषस्य पलाद्याः परिमाणविशेषाः मेध्यं पवित्रं वृष्यं इन्द्रियवर्धकं आयुष्करम्।

**7/1/46 'शतावरीश्वदंष्ट्रागुडकषाये पिप्पलीमधुकल्के गोक्षीरछागघृते पक्वे तस्य पुष्यारम्भेणान्वहं प्राशनं मेध्यं वृष्यं आयुष्यं युक्तरसमित्याचक्षते'।**

शतावरी भीरूलता श्वदंष्ट्रालताविशेषः गुडं प्रसिद्धं एषां कषायेऽधिकरणे पिप्पलीमागधीमधुकं तयोः कल्के रसौ गोक्षीरछागघृते च पक्वे पाचयित्वा पुष्यारम्भेण वसन्ततौ तस्य पक्वरसस्य अन्वहं प्रतिदिनं वृष्यम्।

**7/1/47 'शतवर्याः श्वदंष्ट्राया श्रीपर्णीफलानां च क्षुण्णानां चतुर्गुणे जले पाक आप्रकृत्यवस्थानात् तस्य पुष्यारम्भेण प्रातः प्राशनं मेध्यं वृष्यमायुष्यं युक्तरस मित्याचक्षते'।**

श्रीपर्णी भद्रपर्णी क्षुण्णानां शकलीकृतानां चतुर्गुणे एतत् शकलपरिमाणात् आप्रकृत्यवस्थानात् घनीभावपर्यन्तं पाकः कार्यः।

**7/1/48 'श्वदंष्ट्राचूर्णसमन्वितं तत्सममेव यवचूर्णं प्रातरूत्थाय द्विपलकमनुदिनं प्राश्नीयान्मेध्यं वृष्यमायुष्यं युक्तरसमित्याचक्षते'।**

तत्सममेव चूर्णपरिमितं।

उक्तार्थे मूलप्रमाणमाह –

**7/1/49 'आयुर्वेदाच्च वेदाच्च विद्यातन्त्रेभ्य एव च।**
**आप्तेभ्यश्चावबोद्धव्या योगा ये प्रीतिकारकाः'॥**

---

* कुचिमार तंत्र 4/23

आयुर्वेदो वैद्यशास्त्रं वेदाः प्रसिद्धाः विद्यातन्त्रं एतत् शास्त्रादिः आप्तेभ्यः रसिकसत्यवादिभ्यः योगाः उक्तरसायनानि प्रीतिकारकाणिः सुखहेतवः।

**7/1/50 'न प्रयुंजीत सन्दिग्धान् न शरीरात्ययावहान्।**
**न जीवघातसम्बद्धान्नाशुचिद्रव्यसंयुक्तान्'॥**

सन्दिग्धान् सम्प्रदायालब्धान् अत्ययः आर्तिः सम्बद्धान् हेतून् तथायुक्तान्

**7/1/51 'तथायुक्तान्प्रयुंजीत शिष्टैरपि न निन्दितान्।**
**ब्राह्मणैश्च सुहृद्भिश्च मंगलैरभिनन्दितान्'॥**

तथा युक्तान् उक्तदोषरहितान् मंगलैः तदर्थिभिः अभिनन्दितान् अनुमोदितान्।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासिपंडितमंडलमंडित–**
**पांडित्याखंडचंडिमोद्दंडसर्वेश्वरावतारसर्वेश्वरशास्त्रिचरणमुख्यशिष्य–**
**वितथविकत्थनपरनरकुमुदसमुदयग्रीष्मभीष्मभास्करभास्करनरसिंहशास्त्रि**
**विरचितवात्स्यायनसूत्रवृत्तौ सप्तमेऽधिकरणे प्रथमोध्यायः।**

**अध्याय – 2**

# नष्टरागप्रत्यानयनप्रकरणम्

एवं यूनो वशीकरणादिहेतूनुक्त्वा स्थविरस्य रागिणः प्रौढानुरंजनोपायान्वक्तुमवसर–संगतिं सूचयति सुभगंकरणं वशीकरणं वृष्याश्चयोगाः आदितः पंचत्रिंशः।

**7/2/1 'चंडवेगां रंजयितुमशक्नुवन्योगानाचरेत्'।**

चंडवेगां पूर्णयौवनां रंजयितुं प्रीणयितुं योगान् वक्ष्यमाणान्।

**7/2/2 'रतस्योपक्रमे सम्बाधस्य करेणोपमर्दनं तस्या रसप्राप्तिकाले च रत–योजनमिति रागप्रत्यानयनम्'।**

तस्याः प्रौढायाः रसप्राप्तिकाले सुखार्थागमनकाले रतस्योपक्रमे उपक्रमात्प्राक् सम्बाधस्य लिंगस्य ततः रागप्रत्यानयनं उपोद्वलनं।

**7/2/3 'औपरिष्टकं मन्दवेगस्य गतवयसः श्रान्तस्य च प्रत्यानयनं'।**

**7/2/4 'अपद्रव्याणि वा योजयेत्'।**

गतवयसः स्थविरस्य श्रान्तस्य आर्त्तस्य प्रत्यानयनं तदर्थं औपरिष्टकं पूर्वोक्तं कार्यं। अपद्रव्याणि वक्ष्यमाणानि योजयितव्यानि वा।

**7/2/5 'तानि सुवर्णरजतताम्रकालायसगजदन्तगवलद्रव्यमयाणि'।**

**7/2/6 'त्रापुषाणि सैसकानि च मृदूनि शीतवीर्याणि वृष्याणि कर्मसहिष्णूनि भवन्तीति बाभ्रवीया योगाः'।**

कालायसं अयस्सारं गवलं द्रव्यविशेषः सीसकं योगेष्टं चादन्यान्यपि मृद्वतिशीतवीर्याणि वीर्यस्वभावाः तानि कर्मसहिष्णूनि कार्यक्षमाणि वृष्याणि प्रीतिकराणि।

**7/2/7 'दारूमयानि सात्म्यतश्चेति वात्स्यायनः'।**

सात्म्यतः सारूप्यात् कार्याणि।

**7/2/8 'लिंगप्रमाणान्तर बिन्दुभिः कर्कशपर्यन्तं बहुलैः स्यात्'।**

लिंगप्रमाणान्तरं लिंगादधिकप्रमाणं बहुलैः विन्दुभिः सूक्ष्मकिणाकारैः कर्कशपर्यन्तं कठिनप्रान्तभागं कुर्यात्।

**7/2/9 'एते एव द्वे संघाटी'।**

एते उक्तदंडौ विधेयानुसारात्।

**7/2/10 'त्रिप्रभृति यावत्प्रमाणं वा चूडकः'।**

त्रिप्रभृति त्रित्वादिसंख्याविशिष्टः यावत्प्रमाणं लिंगसमप्रमाणं दंडश्चूडकः।

**7/2/11 'एकामेव लतिकां प्रमाणवशेन वेष्टयेदित्येकचूडकः'।**

एकामेव लतिकां प्रमाणवशेन लिंगप्रमाणानुसारेण।

**7/2/12 'उभयतो मुखच्छिद्रः स्थूलकर्कशवृषणगुटिकायुक्तः प्रमाणयोगी कट्यां बद्धः कंचुको जलकं वा'।**

उभयतो मुखं मुखद्वये छिद्रं यस्य स्थूलकर्कशवृषत्तगुटिकायुक्तः बहुकठिनसूक्ष्मकिणः प्रमाणयोगीलिंगसमप्रमाणः।

**7/2/13 'तदभावेऽलावूनालकं वेणुश्च तैलकषायैः'**

तैलेन सुगन्धिद्रव्येण '**सुभावितः सूत्रजंघाबद्धं**' सूत्रेण कट्यां बद्धोऽपि तथा '**श्लक्ष्णकाष्टमाला वा ग्रथिता बहुभिरामलकास्थिभिः संयुक्ता**' श्लक्ष्णकाष्ठमाला सूक्ष्मसौवर्णादिलिंगपरिमाणकाष्ठं आमलकास्थिभिः धात्रीदलकाष्ठैः ग्रथिता संयुक्ता तदाख्या '**इत्यपविद्धस्यः**'। इत्याद्याः।

**7/2/14 'न त्वपविद्धस्य कस्यचिद् व्यवहृतिरस्तीति'**

**7/2/15 'दाक्षिणात्यानाम् लिंगस्य कर्णयोरिव व्यधनं बालस्य'।**

अपविद्धस्य उक्तयोगस्य कस्यचित् कस्यापि व्याहतिः विनाशः नास्ति अतो व्यधनात् इदं युक्तमिति दाक्षिणात्यानां मतम्।

लिंगस्य कर्णयोरिव व्यधनं बालस्य लिंगस्य तदग्रस्य व्यधनं छिद्रं कार्यम्।

**7/2/16 'युवा तु शस्त्रेण च्छेदयित्वा यावद्रुधिरस्यागमनं तावदुदके तिष्ठेत्'।**

**7/2/17 'वैशद्यार्थं च तस्यां रात्रौ निर्बन्धाद् व्यवायः'।**

छेदयित्वा लिंगाग्रत्वचं आगमनं यावत् निःसरणनिवृत्तिर्यावत्कालेन वैशद्यार्थं लिंगवृध्यर्थं निर्बन्धात् व्यथामपि सोढ्वा व्यवायः स्त्रीसम्प्रयोगः।

**7/2/18 'ततः कषायैरेकदिनान्तरितं शोधनम्'।**

कषायैः ब्रणशामकैः शोधनं क्षालनम्।

**7/2/19 'वेतसकुटजशंकुभिः क्रमेण वर्धमानस्य वर्धनैः'**

अधिकैः वेतसादीनां कुंभिलताभिः।

**7/2/20 'यष्टिमधुकेन मधुयुक्तेन शोधनम्'।**

शोधनं लेपनम्।

**7/2/21 'ततः सीसपत्रकर्णिकया वर्धयेत्'।**

सीसपत्रं लताविशेषः कर्णिकया कोमलदलबन्धनेन।

**7/2/22 'म्रक्षयेत् भल्लातकतैलेन'।**

अक्षयेत् लेपयेत्।

**7/2/22 'इति व्यधनयोगाः'।**

इति इत्यादयः योगा उपायाः।

**7/2/23 'तस्मिन्नेकाकृतिविकल्पान्यपद्रव्याणि योजयेत्'**

तस्मिन् लिंगे अनेकाकृतिविकल्पानि विकल्पितनानाकाराणि अपद्रव्याणि वक्ष्यमाणानि। तत्राकारानाह –

**7/2/24 'वृत्तमेकतो वृत्तमुदूखलकं कुसुमकं कंटकितं कंकास्थिगज– प्रहारिकमष्टमंडलिकं भ्रमरकं श्रृंगाटकमन्यानि वोपायः कर्मतश्च'**

वृत्तं अग्रे वर्तुलं एकतोवृतं अग्रे वर्तुलं उलूखलकं तदाकारं वा कुसुमकं कुसुममालाकारं कंटकितं सकिणं कंकास्थि तदाकारं गजप्रहारिसकंटकशालाटुकाविशेषः अष्टमंडलिकादीनि द्रव्याकारविशेषाः अन्यानि आकारान्तराणि उपायतः दुःखाहेतुत्वेन कर्मतः कार्यक्षमत्वेन सम्पादयेत्।

**7/2/24 'बहुकर्मसहता चैषां मृदुकर्कशता यथासात्म्यमिति नष्टरागप्रत्यानयनं'।**

एषां उक्ताकाराणां बहुकर्मसहता अधिककालकार्यक्षमता मृदुकर्कशता मार्दवकार्कश्योभयवता एतानि यथासात्म्यं यथास्वभावं। प्रत्यानयनं तदुपायाः।

**7/2/25 'एवं वृक्षजानां जन्तूनां शूकैरूपलिप्तं लिंगं दशरात्रं तैलेऽवमृदितं पुनः पुनरूपलिप्तं पुन अमृदितामिति जातशोफं खट्वायामधोमुखस्तदन्तरे लम्बयेत्'।**

शूकैः तीक्ष्णावयवविशेषैश्चूर्णितैः तैलेन भल्लातकेन इति उक्तप्रकारेण जातशोफं संजातश्च शोषयित्वा तदन्तरेण तदीय तन्तुरन्ध्रेण।

**7/2/26 'ततः शीतैः कषायैः कृतवेदनानिग्रहं सोपक्रमेण निष्पादयेत्'।**

कषायैः ब्रणहरक्वाथैः शितैः कटुष्णैः कृतवेदनानिग्रहं वेदनायाः निग्रहो निवृत्तिः यथाकृतो भवति तथा कषायपूर्णे पात्रे सोपक्रमं समूललिंगं निष्पादयेत् निक्षिपेत्।

**7/2/27 'स यावज्जीवं शुकजो नाम शोफो विटानाम्'।**

स शोफः विटानां यावज्जीवं भवति।

**7/2/28**

**'अश्वगन्धाशबरकन्दजलशूकबृहतीफलमाहिषनवनीतहस्तिकर्णवज्र- वल्लीरसैरेकैकेन परिमर्दनं मासिकं वर्धनम्'।**

अश्वगन्धादीनां द्रव्यविशेषाणां रसैः सारैः एकैकेन पृथक् पृथक् मासिकं तदवधिकं वर्धनं तद्धेतुः लिंगस्य।

**7/2/29 'एतैरेव कषायैः पक्वेन तैलेन परिमर्दनं षाण्मास्यम्'।**

एतैः पूर्वोक्तै कषायैः रसैः सह पक्वेन तैलेन भल्लातकेन षाण्मास्य षण्मासावधिकं परिमर्दनमपि तथा।

**7/2/30 'दाडिमत्रापुसवीजानिबालुकावृहतीफलरसश्चेति मृद्वग्निना पक्वेन तैलेन परिमर्दनं परिषेको वा'।**

इति एतैः सह तैलेन पूर्वोक्तेन परिषेकः समन्ततः सेचनम्।

**7/2/31 'तांस्तांश्च योगानाप्तेभ्य बुध्येतेति वर्धनयोगाः'।**

आप्तेभ्यः शास्त्रससूनृतवादिभ्यः सकाशात् योगा उपायाः एवं प्रौढायाश्चंडवेगाया हस्तिन्यादे रक्षणार्थं पुरूषस्य शशादेः तत्प्रीतये लिंगवर्धनं बहुकार्यक्षमोपायानुक्त्वा इदानीं तस्माद्धार्याः रक्षन्ति विभ्यतः पररेतस इति पर्यालोचनया तस्याः प्रकारान्तरेण रागनाशनोपायानाह –

**7/2/32 'स्नुहीकंटकचूर्णैः पुनर्नवावानरपुरीषलांगलिकामूलमिश्रैर्यामवकिरेत्सा नान्यं कामयेत्'।**

मूलं तच्चूर्णं अन्यं न कामयते वशगा भवतीत्यर्थः अनुद्रिक्तरागाः भवतीत्यर्थः।

**7/2/33 'तथा सोमलतावल्गुजभृंगलोहोपजिह्विकाचूर्णैर्व्याधिघातकजम्बुफल– रसनिर्यासेन घनीकृतेन लिप्तसम्बाधां गच्छतो रागो नश्यति'।**

**7/2/34 'गोपालिकाबहुपादिकाजिह्विकाचूर्णैर्माहिषतक्रयुक्तैः स्नातायां गच्छतो राग नश्यति'।**

स्नातायां स्नापितायां।

**7/2/35 'नीपाम्रातकजम्बूकुसुमयुक्तमनुलेपनं दौर्भाग्यकरं स्त्रजश्च'।**

कुसुमयुक्तं नीपःकदम्बः आम्रातकः कपित्थः जम्बू जाम्बवम् एषां कुसुमयुक्तं कुसुमीयं दौर्भाग्यं उक्तरागनाशकरं।

**7/2/36 'कोकिलाक्षफलप्रलेपो हस्तिन्याः संहतमेकरात्रं करोति'।**

फलप्रलेपः तद्रसानुलेपनं योनेः एकरात्रं एकरात्रकृतोऽपि संहतं संकोचं। एवं शशस्य हस्तिनीविषयकोपायानुक्त्वा वृषभस्य मृगीविषयोपायानाह –

**7/2/37 'पद्मोत्पलकन्दसर्जकसुगन्धचूर्णानि मधुना पिष्टानि लेपो मृग्या विशालीकरणम्'।**

सर्जकं वन्धूककुसुमं गन्धश्चन्दनं पिष्टानि मिश्रितानि कृत्वा लेपो मृग्या विशालीकरणं योनिवैपुल्यहेतुः।

अथ युवतिजनरक्षणाय तद्धीति विस्मयकरत्वेन स्वप्रागल्भ्यप्रदर्शनोपायानाह –

**7/2/38 'स्नुहीसोमार्कक्षारैर्वल्गुजाफलैः भावितान्यामलकानि केशानां स्वेतीकरणम्'।**

फलैः तद्रसैः श्वेतीकरणं तद्धेतुः।

**7/2/39 'मदयन्तिकाकुटजकवजंनिकागिरिकर्णिकाश्लक्ष्णपर्णीमूलैः स्नानं केशप्रत्यानयनं'।**

मूलैः तत्सारैः केशप्रत्यानयनम्। केशहीनायास्तदुत्पत्तिहेतुः केशानां कृष्णताहेतुश्च।

**7/2/40 'एतैरेव सुपक्वेन तैलेनाभ्यंगात् कृष्णीकरणात् क्रमेणास्य प्रत्यानयनं'।**

एतैरेव उक्तमूलरसैः तैलेन प्रसिद्धेन कृष्णीकरणात् कृष्णतासम्पादनानन्तरं क्रमेण दिनक्रमेण अस्य श्वेतस्य।

**7/2/41 'श्वेताश्वस्य मुष्कस्वेदैः सप्तकृत्वो भावितेनालक्तकेन रक्तोऽधरः श्वेतो भवति'।**

मुष्कः अण्डकोषः।

**7/2/42 'मदयन्तीकादीन्येव प्रत्यानयनम्'।**

मदयन्तिकादीनि तन्मूलरसलेपनं प्रत्यानयनम् यूना रागहेतुः।

**7/2/43 'बहुपादिकाकुष्ठतगरतालीसदेवदारुवज्रकन्दकैरूपलिप्तं वंशं वादयतो या शब्दं श्रृणोति सा वश्या भवति'।**

बहुपादिका वटविटपिसटौ।

**7/2/44 'धत्तूरफलयुक्तोऽभ्यवहार उन्मादकरः'।**

अभ्यवहारः भोजनं उन्मादः चित्तविभ्रमः।

**7/2/45 'गुडो जीर्णितश्च प्रत्यानयनम्'।**

जीर्णितः भुक्तः सन् जीर्णं प्रत्यानयनं उन्मादनिवर्त्तकः।

**7/2/46 'हरितालमनःशिलाभक्षिणो मयूरस्य पुरीषेण लिप्तहस्तो यद्रव्यं स्पृशति तन्न दृश्यते।**

हरितालं अलंतालं मनःशिला मनोगुप्ताभक्षिणः तन्मात्राभ्यवहारिणः।

**7/2/47 'अंगारतृणभस्मना तैलेन विमिश्रमुदकं क्षीरवर्णं भवति'।**

तैलेन तद्विशेषेण।

**7/2/48 'हरितक्याम्रातकयोः श्रवणप्रियंगुकाभिश्च पिष्टानि लिप्तानि लोहभांडानि ताम्री भवन्ति'।**

हरीतक्याम्रातकयोः आभ्यां सह पिष्टानि चूर्णितानि।

**7/2/49 'श्रवणप्रियंगुकातैलेन दुकूलसर्पनिर्मोकेण वर्त्त्या दीपं प्रज्वाल्य पार्श्वे दीर्घीकृतानि काष्ठानि सर्पवद्दृश्यन्ते'।**

निर्मोकः कंचुकं तन्मिश्रदुकूलकृतवर्त्त्या तैलेन तद्युक्त्या प्रज्वाल्य कृत्वा तत्प्रभाप्रदेशे दीर्घतया स्थापितानि।

एवं कामं सप्रपंचमुपपाद्य तदंगधर्महेतुमाह –

**7/2/50 'श्वेतायाः श्वेतवत्साया गोः क्षीरस्य पानं यशस्यमायुष्यम्'।**

श्वेतायाः सर्वांगावच्छेदेन।

**7/2/51 'सद्ब्राह्मणानां प्रशस्तानामाशिषः'।**

सद्ब्राह्मणानां साधूनां प्रशस्तानां श्रुताध्यायसम्पन्नानां आशिषः। तथा ग्रन्थस्याप्रचयगमनायान्ते आशीर्निर्देशाः।

**7/2/52 'पूर्वशास्त्राणि संहृत्य प्रयोगाननुसृत्य च।**
**कामसूत्रमिदं यत्नात्संक्षेपेण निवेदितम्'॥**

पूर्वशास्त्राणि नन्दिकेश्वरादिकृतानि संहृत्य आलोच्य प्रयोगान् बाभ्रवीयादिकृतानुष्ठानपद्धतीः उपसृत्य अनुसृत्य यत्नात् ब्रह्मचर्यादिना संक्षेपेण शब्दतः निवेशितं रचितम्।

**7/2/53 'धर्ममर्थं च कामं च प्रत्ययं लोकमेव च।**
**पश्यत्येतस्य तत्त्वज्ञो न च रागत्प्रवर्त्तते'॥**

एतस्य शास्त्रस्य लोकं प्रत्ययं लौकिकोचितव्यवहारान् रागान्न प्रवर्त्तते नातिकामुको भवतीत्यर्थः।

**7/2/54 'अधिकारवशादुक्ता ये चित्रा रागवर्धनाः।**
**तदनन्ततरमत्रैव ते यत्नाद्विनिवारिताः'॥**

चित्राः नानाविद्याः रागवर्धनाः तदुपायाः ये सामान्यतः उक्ताः ते अनन्तरं अत्रैव शास्त्रे यत्नात् सूत्रान्तरेण अधिवेन व्यवस्थापिताः सूचिताः। ननु 'न सुरां पिवेत् न' 'परदारान् गच्छेत्' 'न कलंजं भक्षयेत्' इत्यादिना निषिद्धशिष्टगर्हितपरदारादिवशीकरणादुपायबोधकस्यास्य शास्त्रस्य कथं आर्यपरिग्राह्यत्वं अत आह न शास्त्रमस्तीत्यादिना –

**7/2/55 'न शास्त्रमस्तीत्येतेन प्रयोगो हि समीक्ष्यते।**
**शास्त्रार्थान्व्यापिनो विद्यात्प्रयोगांस्त्वैकदेशिकान्'॥**

एतेन एतेषां प्रयोगः अनुष्ठानं आपाततः शास्त्रमस्तीति ज्ञात्वा न समीक्ष्यते न कार्यः। कुतः शास्त्रार्थान् शास्त्रप्रतिपादितान् व्यापिनः अधिकारविशेषं कंठतो निर्दिश्य सामान्यतः कथितान् विद्यान् शास्त्रतात्पर्यज्ञापकेन शिष्टाचारेण एकदेशिकान्।

**7/2/56 'बाभ्रवीयांश्च सूत्रार्थानागमय्य सुविमृश्य च।**
**वात्स्यायनश्चकारेदं कामसूत्रं यथाविधिः'॥**

आगमं तन्मूलं सुविमृश्य सम्यग्विचार्य यथाविधि तत्तदधिकार्युपयोगि अनेन सम्प्रदायित्वव्युदासः। अयं भावः न हि स्यादिति निषेधविषयः श्येनादिविधिघटितवेद-निन्दितवामाचारबोधकैकदेशकागमेष्विव चात्रापि शिष्टप्रवृत्तिसम्भवात् न च न हिंस्येदित्यादि सामान्यशास्त्रस्य श्येनादिविशेषविधिना बाधितत्वात् न तस्य निषेध्यत्वं। अन्यथा अग्नीषोमीयं पशुहिंसाया अपि तथात्वापत्तेरिति वाच्यं **'अग्नीषोमीयं पशुमालभेत्'** इत्यादौ हिंसायाः विधेयत्वेन तस्याः बलवदनिष्टाननुबन्धित्वबोधनार्थं सामान्यशास्त्रबाधनेऽपि **'श्येनेनाभिचरन्यजेतेत्यादौ'** शत्रुवधरूपाभिचारस्योद्देश्यत्वेन विधेस्तत्र बलवदनिष्ठानुबन्धित्वाद्बोधकतया सामान्यशास्त्रबाधकत्वात्।

तदुक्तमाचार्यैः– **'अग्नीषोमीय विधिविशेषः सामान्यशास्त्रबाधकः'**

न तु श्येनविधिरिति तथा च श्येनादेर्विहितस्यापि बलवदिष्टसाधनहिंसाफलकतया तन्मात्रे शिष्टाप्रवृत्तावपि तदतिरिक्तज्योतिष्टोमादौ यथा वा न सुरामित्यादि निषेधविषयवामाचारादौ शिष्टाप्रवृत्तावपि तदतिरिक्तेतरप्रवृत्तिः तथा पारदारिकोपायादावप्रवृत्तावपि तत्र तत्प्रवृत्तिसम्भवः। वस्तुतस्तु औदुम्बरीस्पृष्ट्वोद्गायेदिति प्रत्यक्षवेदविरूद्धौ औदुम्बरी सर्वावेष्टयितव्येत्यादि-कल्पसूत्राप्रामाण्येऽपि न सर्वाप्रामाण्यं। वस्तुतश्चक्रांकनतन्निषेधयोरित्यधिकारिभेदेनोभय-प्रामाण्यसम्भवान्न कापि क्षतिरिति समास इति।

**7/2/57 'तदेतद्ब्रह्मचर्येण परेण च समाधिना।**
**विहितं लोकयात्रायै न रागार्थोऽस्य संविधिः'॥**

लोकयात्रा लोकोपकारः रागार्थं रागहेतुकः अस्य शास्त्रस्य संविधिः कृतः। अनेन रागादिदोषशून्यत्वं महर्षिप्रणीतत्वं सूचितम्।

**7/2/58 'रक्षेद्धर्मार्थकामानां स्थितिं स्वां लोकवर्त्तिनीम्।**
**अस्य शास्त्रस्य तत्त्वज्ञो भवत्येव जितेन्द्रियः'॥**

लोकवर्त्तिनीं लोकप्रतियोगिकां लोकेभ्य इति यावत्। जितेन्द्रियः इन्द्रियालम्पटः चतुरः स्त्र्यनधीन इति यावत्।

**7/2/56 'तदेतत्कुशलो विद्वान् धर्मार्थाववलोकयन्।**
**तानि रागात्मकः कामी प्रयुंजानः प्रसिध्यति'॥**

धर्मार्थौ कामं च तत् अस्मात् अवलोकयन् जानन् कुशलः विलासिनीनां स्वभावज्ञाने अतिरागात्मकः तद्विलासैरतिरिक्तः कामी तदिच्छुः प्रयुंजानः स्वयं प्रयोक्ता वा न प्रसिध्यति न भवति किन्तु तासां स्वभावज्ञः सन् धर्मार्थकामान् सम्पूर्णान् सम्यक् श्रुते शास्त्रतत्त्ववित्।

**इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनित्यनिवासि पंडितमंडलमंडित्याखंड–चंडिमोद्दंडसर्वेश्वरावतरसर्वेश्वरसूरिवरमुख्यशिष्यविशिष्टशिष्टजनानिष्टकर–दुष्टलोकात्दृष्टिपुष्टितमस्तोमग्रीष्मभीष्मभास्करभास्करनरसिंहशास्त्रिविरचित–वात्स्यायनीयकामसूत्रवृत्तौ औपनिषदिके सप्तमेऽधिकरणे द्वितीयोऽध्यायः।**

नष्टरागप्रत्यानयनं वृद्धिविधयश्च चित्राश्च योगाः आदितः षट्त्रिशः। समाप्तं चेदं औपनिषदिकं सप्तममधिकरणम्। शास्त्रं च सम्पूर्णम्।

**भास्करनरसिंहशास्त्री शास्त्रार्थप्रदेशकारूण्यात्।**
**वात्स्यायनसूत्राणां वृत्तिं बुधहर्षवृद्धये व्यतनोत्।।**

काशीशं श्रितमुल्लसद्गतियुतो यं धर्मशास्त्रे तथा वाणीं व्याकुरूते कृते तदितरं मीमांसके चोभयीम्। पान्थः काव्यपथे तथा परिचितः कामागमे चेति मां ग्रन्थं वक्ष्यति तत्कृतः प्रथयते कोवार्पितोऽस्मिन भरः।

**अधीतप्रबन्धास्तथाध्यापनोक्त्वा विनोपाधिमस्मिन्विधेयेऽधिकाशी।**
**असाधुप्रयोगान्विसन्धीन्प्रबन्धे दयातो बुधाः साधु संशोधयन्तु।।**

**नूत्नावृत्तिरितीर्ष्यया विरहिताः पांडित्यपारंगताः**
**तत्कामाश्च कृपालवोऽत्र रसिकाः पश्यन्त्ववश्यं कृतिम्।**
**यद्वा विद्वदधीशभक्तकलितक्षीरप्रसूनप्रियो विश्वेशः**
**कृतिकारकः कृतिहितः कृत्यानया तुष्यतु।।**

**प्राचीनैः कविभिः कृता काचनग्रन्थाः प्रसिध्यै ततः**
**कार्या काचन साम्प्रतं कृतिरिति ग्रन्थो मया नो कृतः।**
**किन्तु प्रौढरसज्ञतोषकृते* तत्प्रेरणादीश्वरप्रीत्यर्थम्**
**स इहार्थिदतार्थादपदः कृत्यानया प्रीयताम्।।**

**भास्करनरसिंहशास्त्री सर्वेश्वरार्चितो येन।**
**अधिकाशि पुस्तकं सोऽरचदखिलं चैतात्मपरतुष्टये।।**

The closing lines found in BBRAS copy are as underÖ

**भास्करनृसिंहशास्त्री राजव्रजलालवाञ्छया काश्याम्'।**
**वात्स्यायनसूत्राणां वृत्तिं बुधहर्षवृद्धये व्यतनोत्।।**
**वंशाभिवृध्या कमलाकटाक्षैर्दीर्घायुरारोग्यसुखानि सन्तु।**
**सन्तस्त्वदीयाः सुखिनो भवन्तु श्रीशुक्लराजव्रजलालजीयाः।।**

**शराब्धिकरिशीतांशुसंमितेऽब्देऽधिकाश्याम्।**

---

* Another reading found in place of this is 'श्रीव्रजलालविद्वदधिराट्'

**ग्रन्थो विश्वेशकृपया कृतः कृतिमुदे सदा।।**

**नीराजनं दिनमणेरिव दीपिकाभिश्चन्द्रोत्पलोत्थसलिलार्घ्य इवोडुराजः।**
**वारां निधेरूदकतर्पणवत्तदब्धिस्त्वद्दत्तवाग्भिरियमीश कृता कृतिस्ते।।**

**समाप्तम्।।**

This is followed by the following lines in the BORI manuscripts.

**सर्वं विश्वेश्वरार्पणमस्तु।**

संवत् 1942 मिति श्रावणसुदी 15 भौमवार लीपकृतं पारीकब्राह्मणहरगोविन्द सवाई जयनगर संतत् 1942 शाके 18.7 श्री श्री श्री

श्लोकसंख्या 5312*

**Note:**

In the preamble of his work Vātsyāyana held Kucumāra as an authority on Aupanisadika, ie alternative means of achieving desired result in sexual act, and other related subjects. He had made use of Kucumāra's views in this following aphorisms on Vasikarana 26, 28, 36,37,38,41,42 & 45 in the first chapter of seventh Adhikarana. He had summarily curtailed Kucumāra's prescriptions on, Kanyakarana, ie Vagina treatment into two aphorisms, 7/2/36 on contraction and 7/2/37 on enlargement of the vaginal opening. These two aphorisms have been incorporated with a view to helping Śasa type male for mating with Hastini type female and Vrsa type male for mating with a mrgi type female. Vātsyāyana had devoted much attention not only to treatment of phalluses** for its legthening, thickening etc, he had also discussed artificial phallus made of horn, wood etc. In this he had been guided by Bābhravya's work. Also he might have made use of some other work of which we not aware.

On the other hand Kucumāra's approach is female oriented as can be seen from some of the topics covered in his work-

---

* The closing pages of B.O.R.I. Ms.No.985 of 1887-91 has many verses euologising the geneology of Raja Vrajalāla, the patron of BNS. There are many errors in the scribes writing. In the absence of any other manuscript carrying these verses it is difficult to construct the text.

** We find a reference to Talaghalaka an artificial phallus in Buddhist literature.

| | | |
|---|---|---|
| Kanyakarana | - | treatment to attain vagina of virgin girl |
| Vandhyakarana | - | For abortion, and causes of barrenness |
| Loma-Shatana | - | removal of unwanted hair |
| Prasava | - | ways for promoting conception |

It seems that Vātsyāyana's focus was more on taking care of males in the matters of sex.

Despite the detailed treatment of female genital in Kanyakarana Kucumāra betrays lack of anatomical knowledge of Vagina. It simply speaks of ointments for mostly external use for contraction, expansion and of vagina* & taking care of bad odours in vagina. Knowledge about anatomical details of vagina started appearing in works on sexology probably after 6$^{th}$ Cen AD when Tantric practices were gaining greater acceptance and its convergence in the field of sexual union, gave impetus to realization of its importance in sexual experience.

In this connection R.S. Sharma had observed —

"Koshambi considers the combination of sex and religion to be distinctive feature of feudal literature. The growth of leisured landed class which sought support of the Sanskrit knowing priesthood for legitimization and stability gave rise to this feature which became prominent under the influence of Tantrism."

It was coming to Kokkoka the author of R.R. and Padmasri author of N.S. that close attention was given to tantric rituals, mantras in matters of sexual union and also to female genital organ which was epitomised in Yoni Puja** of the Tantrics.

---

* In the modern times we are coming across surgical intervention for such purposes as 'labiaplasty', 'Vaginoplasty', besides 'hymenoplasty.'

** Regarding Yoni Puja - "Purvakaulas draw yoni on Bhurjapatra and worship, while Uttarakaulas worship vagina or vulva of woman directly. Men and Women of Kaulas worship Bindu nakedly. While worshipping the direct Vulva they worship Manmatha Cakra as Bindu. Digambara – Kshapanaka worship the Urdhva Trikona placing the woman upside down". Commentary of Sanga Sesachala Sastri and Tummalapalli Ramalingesh-wara Rao quoted by Dr. B. Rama Rao in Bull. Ind. Inst. Hist. Med.Vol. XXXIV.2004 – P.45

## Select Bibliography


1. Ancient Indian Erotics - SK.De
2. Chhandogya Upanisad - (R.K. Mission Publication)
3. Dharma Sutra – A study in their origin and development– Suresh Ch. Banerjee
4. History of Sanskrit literature - AB Keith, Oxford University Press, London.
5. History of Indian Erotic Literature – N N Bhattacharya-
6. Indian Sexology – Kaviraj Khajan Chand, S. Chand & Co, Ltd. New Delhi.
7. Kama Sutra of Vātsyāyana - with Yashodhara's Jaymangala commentary.
   (a) edited by Deva Dutt Sastri, CSS Edn.
   (b) edited by P.N. Dvivedi, CSS Edn.
8. Charu Charya of Bhoj Raja – Edited by B. Rama Rao
9. Kucumare Tantra – CSS Edn. Varanasi.
10. Nagar Sarvasva – CSS Edn. Varanasi.
11. Natya Locanam of Trilocanaditya – CSS Edn. Varanasi.
12. Pre-Buddhistic Indian Philosophy - B.M. Barua.
13. Raghuvamsam of Kalidasa – NSP Edn. Mumbai.
14. Rati Rahasya of Kokkok-Ed. Devidatta Parajuli—Kashi.
15. Sexual Symbolism for Vedic rituals – SA Dange
16. Sanskrit English Dictionary – V.S. Apte
17. Taittariya Upanisad - (R.K. Mission Publication)
18. The Artha Sastra Teachers – D D Koshambi
19. The Power of Gender, Gender of Power – Kum Kum Roy
20. The Atharva Veda and Ayur Veda – Dr. V.M. Karambelkar

21. Unpublished Manuscript – Dattaka Sutra
22. The Unknown Kama Sastras – P K Agrawal , Books Asia-Varanasi.
23. Unravelling of Kama Sutra – Kum Kum Roy
24. Panca Sayaka – Kavishekhar Jyotirishwara-Ed. Panditraja Dhumdiraj Sastri, CSS, Varanasi.
25. Kuttanimatam of Damodara Gupta. Edn T.M. Tripathi, Krishnadeo Academy, Varanasi.
26. Caturbhani Ed. Dr. V.S. Agrawal & Moti Chand
27. Brhatkatha and its contributions – Dr. Sarla Khosla
28. 'Some Remarks on the Final Verses of the Kama Sutra'
    — An article by Albrecht Wezler.